श्रीबालचन्द्रसूरिप्रणीतवृत्तिसमुपेता
श्रीआसडकविविरचिता

विवेकमञ्जरी

(भाग-१)

नवीनसंस्करणसम्पादिका
साध्वी चन्दनबालाश्री

सम्पादकः
पण्डित हरगोविन्ददास

प्रकाशकः
जैनविविधसाहित्यशास्त्रमाला
वाणारसी-सिटी

नवीनसंस्करणप्रकाशकः
श्रुतरत्नाकर
अहमदाबाद

श्रीबालचन्द्रसूरिप्रणीतवृत्तिसमुपेता
श्रीआसडकविविरचिता

विवेकमञ्जरी

[भाग-१]

• सम्पादकः •
पण्डितहरगोविन्ददासः

• नवीनसंस्करणसम्पादिका •
परमपूज्यपादाचार्यभगवंतश्रीमद्विजय-
रामचन्द्रसूरीश्वरजीमहाराजस्य साम्राज्यवर्ती
तथा प.पू. प्रवर्त्तिनी सा.रोहिताश्रीजीमहाराजस्य शिष्या
साध्वी चन्दनबालाश्री

• प्रकाशकः •
जैनविविधसाहित्य-
शास्त्रमाला
वाराणसी-सिटी

• नवीनसंस्करणप्रकाशकः •
श्रुतरत्नाकरः
१०४, सारप, आश्रम रोड,
अहमदाबाद-१४

विवेकमञ्जरी

[भाग-१]

●

संशोधकः

पण्डितहरगोविन्ददासः

●

सम्पादिका

साध्वी चन्दनबालाश्री

●

प्रकाशकः

श्रुतरत्नाकरः

१०४, सारप, नवजीवन प्रेस सामे,

आश्रम रोड, अहमदाबाद-१४

●

वि.सं. : २०६६

ई.स. : २०१०

●

प्रतियाँ : ५००

●

मूल्य : ५००-०० रुपये

श्रीबालचन्द्रसूरिविरचितवृत्तिसमुपेता

श्रीआसडकविकृता

विवेकमञ्जरी

दर्शनप्रभावक श्रुतस्थविर

आगमादिग्रन्थसंशोधक परमश्रुतोपासक

प्रवर्तकपूज्यमुनिराजश्री जम्बूविजयमहाराजनी

पुण्यस्मृतिने

सादर अर्पण

પરમપૂજ્ય જંબૂવિજયજી મહારાજ એટલે...!!

પ્રભુભક્ત, ગુરુભક્ત, માતૃભક્ત, પિતૃભક્ત !!

સમ્યગ્જ્ઞાનની દેદીપ્યમાન જ્વલંત જ્યોતિ !

અદ્ભુત મેધા, પ્રજ્ઞા અને પ્રતિભાના સ્વામી !!

દર્શનશાસ્ત્ર, ન્યાયશાસ્ત્ર, બૌદ્ધશાસ્ત્રના ધુરંધર વિદ્વાન્ !!

તપ, ત્યાગ, તિતિક્ષાની અદ્વિતીય મૂર્તિ !!

સમ્યગ્જ્ઞાન, દર્શન, ચારિત્રરૂપ રત્નત્રયીના અજોડ ઉપાસક !!

નમ્રતા, નિરભિમાનિતા, નિખાલસતાના સ્વામી !!

શ્રુતપરંપરાના એક ઉજ્જ્વલ નક્ષત્ર !!

નયચક્ર, દ્રવ્યાલંકાર, ન્યાયપ્રવેશક, આચારાંગ, સ્થાનાંગ, સમવાયાંગ, અનુયોગદ્વારસૂત્ર, નંદીસૂત્ર, પંચસૂત્ર, યોગશાસ્ત્ર, ધર્મબિંદુ આદિ અનેક દાર્શનિક ગ્રંથો, આગમ ગ્રંથો અને પ્રકરણ ગ્રંથોના બેનમુન સંશોધક !!

આગમજ્ઞ, આગમસંશોધક, સંપાદકકલાવિશેષજ્ઞ
પરમપૂજ્ય જંબૂવિજયમહારાજની પુણ્યસ્મૃતિને વિવેકમંજરીનું નવીન સંસ્કરણરૂપ સુમન અર્પણ કરીને કૃતાર્થતા અનુભવું છું.

— સાધ્વી ચંદનબાલાશ્રી

શ્રુતભક્તિ-અનુમોદના

લાભાર્થી

પરમપૂજ્ય, પરમોપકારી, સુવિશાલગચ્છાધિપતિ, વ્યાખ્યાનવાચસ્પતિ, પૂજ્યપાદ આચાર્યભગવંતશ્રીમદ્વિજય રામચંદ્રસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન અધ્યાત્મયોગી પૂજ્યપાદ પંન્યાસપ્રવર શ્રીભદ્રંકરવિજયજી મહારાજસાહેબના શિષ્યરત્ન હાલારદેશે સદ્ધર્મરક્ષક પૂજ્યપાદ આચાર્યભગવંત શ્રીમદ્વિજય કુંદકુંદસૂરીશ્વરજીમહારાજસાહેબના શિષ્યરત્ન વર્ધમાનતપોનિધિ ૧૦૦+૬૯ ઓળીના આરાધક પૂજ્યપાદ ગણિવર્ય શ્રીનયભદ્રવિજય મહારાજસાહેબના સદુપદેશથી

શ્રી નવાડીસા શ્વેતાંબર મૂર્તિપૂજક તપગચ્છ જૈનસંઘ અંતર્ગત
શ્રી નેમિનાથનગરના શ્રાવિકા બહેનોના ઉપાશ્રયમાં થયેલી
જ્ઞાનખાતાની ઉપજમાંથી

આ ગ્રંથ પ્રકાશનનો સંપૂર્ણ લાભ લીધેલ છે.

આપે કરેલી શ્રુતભક્તિની અમો હાર્દિક અનુમોદના કરીએ છીએ અને ભવિષ્યમાં પણ આપ ઉત્તરોત્તર ઉત્તમકક્ષાની શ્રુતભક્તિ કરતાં રહો એવી શુભેચ્છા પાઠવીએ છીએ.

લિ. શ્રુતરત્નાકર

मनःशुद्धिबीजानि

''इह जीवाण विवेगो परमं चक्खू अकारणो बंधू ।
जइ कहमवि पाविज्जइ असरिसकम्मक्खओवसमा'' ॥

''तस्स विभूसणमेगं मणसुद्धी मंजरीव रुक्खस्स ।
तीइ समिद्धो एसो सुहफलरिद्धिं पयच्छेइ'' ॥

''तम्हा खलु आयहियं चिंतंतेणं विवेगिणा एसा ।
कायव्वा मणसोही न होइ जह दुल्लहा बोही'' ॥

''चउसरणे पडिवत्ती सम्मं अणुमोअणा गुणाण तहा ।
दुक्कडगरिहा तह भावणा य मणसुद्धिबीआइं'' ॥

[विवेकमञ्जरी/गाथा-३-४-५-६]

પ્રકાશકીય

કવિસભાશૃંગાર મહાકવિશ્રી આસડકૃત વિવેકમંજરી ગ્રંથનું પ્રકાશન કરતા અમે અત્યંત હર્ષની લાગણી અનુભવીએ છીએ. છેલ્લા કેટલાંય વર્ષોથી આ ગ્રંથ અપ્રાપ્ય હતો તેથી જ અલ્પ પરિચિત બની ગયો હતો. પ્રાકૃતપદ્યમય આ ગ્રંથ ઉપર વાગ્દેવી પ્રતિપન્નસૂનુ આચાર્યશ્રી બાલચંદ્રસૂરિ (સં. ૧૨૭૭) એ સંસ્કૃત ભાષામાં વૃત્તિ રચી છે. આ વૃત્તિ સહિત મૂળ ગ્રંથ અહીં પ્રકાશિત કરવામાં આવી રહ્યો છે.

કવિસભાશૃંગાર મહાકવિ આસડ (સં.૧૨૪૮) જૈન શ્રાવક હતા. તેમણે કલિકાલ ગૌતમ આચાર્યદેવશ્રી અભયદેવસૂરિ પાસેથી જૈન સિદ્ધાન્તનો સાર પ્રાપ્ત કર્યો હતો. તેમનો વિદ્વાન પુત્ર રાજડ યુવાવસ્થામાં જ મૃત્યુ પામ્યો હતો અને તેથી આસડ કવિને આઘાત લાગ્યો હતો. તે સમયે આચાર્યશ્રી અભયદેવસૂરિએ બોધ આપી શોકમુક્ત કર્યો હતો. કવિ આસડે પોતાના ગુરુના બોધવાક્યોમાંથી જ આ ગ્રંથની રચના કરી છે.

કવિએ વિવેકમંજરી ગ્રંથના આરંભમાં જ ગ્રંથના નામની અને વિષયની મહત્તા દર્શાવી છે. વિવેક ઉત્તમચક્ષુ સમાન અને અકારણબંધુ સમાન છે. આ વિવેકનું ભૂષણ મનશુદ્ધિ છે. મનશુદ્ધિ વગર વિવેકનો કોઈ અર્થ સરતો નથી. વળી જેમ વૃક્ષ ઉપર મંજરી આવતા જ વૃક્ષની શોભા ખીલી ઊઠે છે અને તે મંજરી ભવિષ્યમાં ઉત્તમ ફળ આપનારી બને છે તેવી જ રીતે વિવેકરૂપી વૃક્ષ ઉપર મનશુદ્ધિ મંજરી સમાન છે. આ મનશુદ્ધિ સ્વર્ગ અને મોક્ષરૂપી ઉત્તમ ફળ આપે છે. જેમણે મનશુદ્ધિ કરી છે તે ઉત્તમ બોધિ પ્રાપ્ત કરે છે.

મનશુદ્ધિ ઉત્તમ ફળ આપનાર વિવેકવૃક્ષની મંજરી સમાન છે. આવી મનશુદ્ધિની પ્રાપ્તિ મુખ્યત્વે ચાર કારણોથી થાય છે. (૧) ચારના શરણનો સ્વીકાર, (૨) ગુણોની અનુમોદના (૩) દુષ્કૃતની ગર્હા અને (૪) ભાવના. આ ચારેય કારણોનું વિસ્તારથી વિવેચન આ ગ્રંથમાં કરવામાં આવ્યું છે.

સ્વર્ગ અને અપવર્ગની પ્રાપ્તિમાં કારણભૂત તત્ત્વોનું સુંદર વર્ણન આ ગ્રંથમાં કરવામાં આવ્યું છે. સરળ પ્રાકૃત પદ્યમાં આ તત્ત્વોનું ગુંફન કરવામાં આવ્યું છે અને આચાર્ય

બાલચંદ્રસૂરિએ આ તત્ત્વોને સમજાવવા સરળ સંસ્કૃત ભાષામાં સુંદર શાસ્ત્રીય દૃષ્ટાંતો વર્ણવ્યા છે, તેથી આ ગ્રંથની મહત્તા અનેકગણી વધી છે. પ્રત્યેક આત્માર્થી માટે આ ગ્રંથ અવશ્ય વાંચવા લાયક છે.

આ ગ્રંથનું પ્રકાશન પૂર્વે હરગોવિંદદાસ પંડિતે કર્યું હતું પરંતુ તે અપ્રાપ્ય હતો અને પોથી આકારમાં નાના ટાઈપમાં છપાયો હતો તેથી વાંચનારને ઉપયોગી થયો ન હતો. તે જ ગ્રંથને આધુનિક શૈલીથી પુનઃ સંપાદન કરી પ્રકાશિત કરવામાં આવી રહ્યો છે. અમને આશા છે કે આ પ્રકાશન વાચકોને / અભ્યાસુ તથા જિજ્ઞાસુઓને ઉપયોગી નિવડશે.

પ્રસ્તુત નવીન સંસ્કરણનું સંપાદન પૂ. સાધ્વીશ્રી ચંદનબાળાશ્રીજીએ કર્યું છે. પૂ.સાધ્વીજી શરીરથી અસ્વસ્થ ઉપરાંત અનેક પ્રકારની શારીરિક તકલીફ હોવા છતાં સદા ય જ્ઞાનમગ્ન રહે છે અને સતત સંપાદનકાર્યમાં વ્યસ્ત રહે છે. તેમણે આ ગ્રંથને સંપાદન કરવામાં તથા પરિશિષ્ટો તૈયાર કરવામાં અથાગ મહેનત કરી છે. તેમજ ગ્રંથમાં આવતા અવતરણોના મૂળ સ્થાનો પણ શોધી આ ગ્રંથમાં તે તે સ્થળોએ રજૂ કર્યા છે. ગ્રંથ નિર્ભૂલ પ્રગટ થાય તે માટે તેમણે ખૂબ જ ચીવટ રાખી છે. આ કામ કરવા બદલ અને આવો ઉત્તમ ગ્રંથ તૈયાર કરવી આપવા બદલ અમે તેમના અત્યંત ઋણી છીએ.

આ ગ્રંથ આત્માર્થી જીવોને તથા જિજ્ઞાસુઓને ઉપયોગી થશે. ગ્રંથપ્રકાશનમાં આર્થિક સહયોગ કરનાર સંસ્થા / સંઘની સાભાર નોંધ લઈએ છીએ તથા પ્રકાશનકાર્યમાં સહયોગ કરનાર તમામનો આભાર માનીએ છીએ.

૨૦૧૦, અમદાવાદ.

જિતેન્દ્ર બાબુલાલ શાહ

प्रस्तावना

इमं प्राकृतपद्यमयं चतुःशरणप्रतिपत्ति-गुणानुमोदना-दुष्कृतगर्हा-भावनारूपेषु चतुर्षु प्रविभक्तं **विवेकमञ्जरी**नामानं ग्रन्थं कविसभाश्रृङ्गारोपनामा **आसड**नामा कविर्विनिरमास्त। कविना चानेन

"सिरि**भिल्लमाल**निम्मलकुलसंभव**कडुय**रायतणएण ।
इय **आसडे**ण रइयं वसुजलहिदिणेसवरिसम्मि" ॥१४४॥

इत्यन्त्यगाथायां संक्षेपेण स्वं परिचाययता ग्रन्थस्यास्य **१२४८** संवत्सरात्मकं निर्माणसमयं च विनिर्दिशता निजस्य विक्रमीयत्रयोदशशताब्दीरूपः सत्तासमयोऽपि प्रदर्शितः। एतट्टीकाकारः सरस्वतीपुत्रबिरुदः कविवरः श्री**बालचन्द्रसूरिः**, यस्य मूल-ग्रन्थकारपुत्रेण **जैत्रसिंहे**नाभ्यर्थितस्य टीकाकरणे प्रवृत्ततया न ततोऽर्वाक्तनः सत्ताकालः[1], **आसड**कविसंबन्धिनमन्यमपि वंशपरिवार-प्रकृतग्रन्थोत्पत्तिकारण-तन्निर्मितान्यग्रन्थादिकं ज्ञातव्यवृत्तान्तं तस्या एवान्त्यगाथाया विवरणे कतिपयैः पद्यैरुदलिखत्, इत्यत्र तत्पुनरावर्त्तनमनावश्यकमवबुध्यमानस्तत्रैव नयनार्पणायासाय जिज्ञासून् विज्ञपयामि।

टीकाकारेण **बालचन्द्र**सूरिणा, **आसड**कविनैव विरचितस्य**उपदेशकन्दली**नाम्नो ग्रन्थस्य महती वृत्तिः, **करुणावज्रायुधं** नाटकम्, **वसन्तविलास**महाकाव्यं चेति ग्रन्था विनिर्मिताः, येषु प्रकटिता प्रतिभोत्कर्षशालिनी कवित्वशक्तिरद्यापि प्रणेतुः कीर्त्तिकाव्यरसास्वादरसिकानां मुदं च जनयति।

टीकाकारेण निजं गुरुपारम्पर्यं विस्तरत **उपदेशकन्दली**प्रशस्तावुल्लिखितम्, यस्यायं फलिताशयः—

---

१. द्रष्टव्योऽत्र प्रशस्तेस्त्रयोदशः श्लोकः।



सटीकोऽप्ययं ग्रन्थो जामनगरे पण्डित**हीरालाले**न प्रकाशितः, किन्तु तत्र मूल-ग्रन्थांशं विशेषतोऽनुसृष्टवताऽपि तेन टीकाया अर्धाधिको भागः, यत्र रुचिरपद्धति-विन्यस्तो भरतचक्र्यादिकथागर्भो विविधवृत्तनिबद्धो रससुधावर्षिकाव्यसमुदायो वर्तते, परित्यक्तः, इति ग्रन्थस्यास्य पुनर्मुद्रणं फलेग्रहि निश्चिन्वन् विद्वद्वरेण जैनाचार्यश्रीविजय-**वीरसूरीश्वरे**ण प्रोत्साहितः संशोधनकर्मणीह व्यापृतोऽभवम् ।

एतत्संपादनावसरे निम्नलिखितानि हस्तलिखितादर्शपुस्तकानि प्राप्तानि, इति तत्प्रेषकाणां महाशयानां धन्यवादार्पणपुरस्सरं कृतज्ञतामुररीकरोमि—

कसंज्ञकं सटीकं, नवीनं, खंभातनगरस्थमुनिराजश्रीनीतिविजयभाण्डागारस्य, ९६ पत्रात्मकम्, अशुद्धम्, जैनाचार्य्यश्रीविजय**वीरसूरीश्वर**द्वारा संप्राप्तम्, अन्तभागे च लेखनकर्मण्यार्थिकसाहाय्यकर्त्तुर्वंशप्रशस्त्यानया विभूषितम्—

''यन्नाममात्रवशतोऽपि शरीरभाजां नश्यन्ति सामजघटा इव दुष्कृतौघाः ।
पादाग्रलाञ्छनमृगेन्द्रभुवा भियेव देवः स वः शिवसुखानि तनोतु **वीरः** ॥१॥

विस्तीर्णोऽयं क्षितिरुह इव श्लाघ्यमूलप्रतिष्ठः,
प्राग्वाटाख्यो गरिमगुणवानन्वयोऽस्ति प्रधानः ।
लक्ष्मी यस्मिन् नवकिसलयश्रेणिशोभां बिभर्ति,
ज्योत्स्नाकारा विकचकुसुमस्तोमसाम्यं च कीर्तिः ॥२॥

आद्यस्तत्रानवदद्यश्रीः **सीदः** श्रीद इवाभवत् ।
विश्राणनेन यश्चित्रं तत्याज न कुलीनताम् ॥३॥

वीरदेव्यभिधया शुभलीला तस्य शीलपरिपालनशीला ।
देहिनीव कमला विमलाऽभूद् गेहिनी सुकृतनिर्मलबुद्धेः ॥४॥

चन्द्र इव **पूर्णदेवः** सुतस्तयोः सुगुणकिरणसंपूर्णः ।
दोषाश्रितो न चित्रं कलङ्कितां न भजते यस्तु ॥५॥

लोकोपकारकरणाद् **विजयाद्यसिंह**सूरेरुपास्तिजननाज्जिनबिम्बक्लृप्तेः ।
पुत्रद्वयव्रतविधापनतश्च चक्रे यः सार्थकं द्रविणमायुरपि स्वकीयम् ॥६॥

तस्य च प्रियतमाऽजनि रम्या **वाल्हिवि**ः शशिसमुज्ज्वलशीला ।
वीतरागचरणार्चनचित्ता क्षेत्रसप्तकवितीर्णसुवित्ता ॥७॥

क्लृप्तोपतापनिधनं विधिनोपधानाभिख्यं तपः शिवसुखाय विधाय धैर्यात् ।
मालाधिरोपणमकारयदात्मनो या द्वेषद्विषो **विजयसिंह**गुरोः करेण ॥८॥

त्रपामणिक्षोणिरसावसूत सुतान् दिगीशान् स्फुटमष्टसंख्यान् ।
ये पुण्यकाष्ठाश्रितचेतसोऽपि चित्रं न संक्रन्दनयोगमापुः ॥९॥

भोगिभोगायितभुजस्तम्भः कुलगृहं श्रियः ।
आद्यस्तत्राभिरामश्री**ब्रह्मदेवो**ऽभवत् सुतः ॥१०॥

अभिरामगुणग्रामद्रुमारामवसुन्धरा ।
दयिता **पोइणि**स्तस्य बभूव प्रियसंवरा ॥११॥

वासनावासितस्वान्तश्चन्द्रावत्यां महत्तमे ।
यश्चैत्ये कारयामास बिम्बं **वीर**जिनेशितुः ॥१२॥

या **पद्मदेव**सूरेर्गुरोः कृते शुभमतिः स्ववित्तेन ।
चरितं **त्रिषष्टि**मध्यादलेखयत्प्रथमतीर्थकृतः ॥१३॥

द्वैतीयीको **बोहडि**रभवत् तनुजो गुणव्रजनिकेतम् ।
एतस्या**वी**ऽति कुटुम्बिनी च चञ्चद्गुणकदम्बा ॥१४॥

स्वकीयवंशे भुवनावतंसे ध्वजानुकारं दधदङ्गजन्मा ।
सद्धर्मनिर्मापण**दत्त**वित्तचित्तस्तयो**र्बिल्हण**संज्ञ आद्यः ॥१५॥

सती सतीसंहतिशीर्षरत्नं तस्य प्रिया जैनपदाब्जभृङ्गी ।
बभूव दानादिगुणप्रधाना सन्मानसा **रूपिणि**नामधेया ॥१६॥

द्वितीय **आल्हण**श्चाभूद् भाग्यसौभाग्यजन्मभूः ।
अनन्यजनसामान्यसौजन्यमणिरोहणः ॥१७॥

जल्हणस्तृतीयः सूनुश्चतुर्थो **मल्हणा**भिधः ।
समभूद् **मोहिनी** चापि सुता स्वजनमोहिनी ॥१८॥

जल्हणस्य तृतीयस्य **नाऊ** जाया शुभाशया ।
वीरपालो वरदेवो वैरिसिंहः सुतास्तयोः ॥१९॥

बहुदेवस्तु तृतीयो यश्चारित्रं च सूरिपदवीं च ।
संप्राप्य नाम लेभे सूरिः श्री**पद्मदेव** इति ॥२०॥

चतुर्थ आमणश्चारुगुणमाणिक्यमण्डितः ।
पञ्चमो **वरदेवा**ख्यः सत्सख्यविहितोद्यमः ॥२१॥

षष्ठः पण्डितसंहतिचतुरः स्फूर्जद्यशा **यशोवीरः** ।
आचार्यपदे लेभे **श्रीपरमानन्द** इत्यभिधाम् ॥२२॥

सप्तमो **वीरचन्द्रा**ख्यो जज्ञेऽनूनगुणावलिः ।
समभूज्**जिनचन्द्रा**ह्वः प्रकृष्टवपुरष्टमः ॥२३॥

बोहडिजबिल्हणस्य च पुत्रचतुष्टयमनूनगुणरूपम् ।
रूपिणिकुक्षिसरोवरकलहंसनिभं विवेकयुतम् ॥२४॥

आशापालः कीर्त्तिवल्ल्यालवालः **सीधू**नामा भूरिधामा द्वितीयः ।
तार्तीयीकोऽभूज्**जगत्सिंह**संज्ञस्तुर्यः सूनुः **पद्मसिंहा**भिधानः ॥२५॥

वीरीति पुत्री सुगुणैः पवित्रा मनोहराभा हरिणीसुनेत्रा ।
अभूच्छुभाचारपवित्रपात्रा सद्रूपलावण्यविशुद्धगात्रा ॥२६॥

जग्राह यः पुत्र इह तृतीयः कामप्रदां संयमराज्यलक्ष्मीम् ।
क्षिप्रं तथा सूरिपदं च लेभे सुदुर्लभं पुण्यवतापि पुंसा ॥२७॥

प्रथमस्**यासपाल**स्य **खेतुका**कुक्षिसंभवाः ।
सज्जनोऽभयसिंहाख्यस्तेजाकः सहजाः सुताः ॥२८॥

सीधुकाख्यद्वितीयस्य **सोहरे**त्यभवद् वधूः ।
अगण्यपुण्यदाक्षिण्यलावण्यादिगुणान्विता ॥२९॥

तुर्यस्य **पद्मसिंह**स्य **वालू**नाम्नी प्रियाऽभवत् ।
सुतस्तयोः समुत्पन्नो **नागपाला**भिधः सुधीः ॥३०॥

किञ्च –

रूपं बलं च विभवो विषयाभिषङ्गो नीरोगता लवणिमा प्रियसंप्रयोगः ।
वातावधूतपटचञ्चलमेव सर्वं विज्ञाय धर्मनिपुणैर्भविभिर्विभाव्यम् ॥३१॥

अङ्गुष्ठमात्रं यो बिम्बं कारयत्यर्हतां बुधः ।
सिद्धिनारीपरीरम्भभवं लभते सुखम् ॥३२॥

न मनःपर्ययमवधिर्न केवलज्ञानमत्र नैवास्ति ।
पुस्तकलेखनमेतत् तद्यष्टिर्दृष्टिहीनानाम् ॥३३॥

श्री**रत्नप्रभ**सूरेर्गुरोः सकाशाद् निजस्य सद्बन्धोः ।
संसाराम्भोधितरीं श्रुत्वेत्यथ देशनां विशदाम् ॥३४॥

होडापद्रपुरे चैत्ये कारयामास भावभाक् ।
श्रीमतः **सुमते**र्बिम्बमर्हतस्त्रिजगत्पतेः ॥३५॥

अलेखयत् सैष कि**लासपाल**ः श्रेयःश्रिये स्वस्य पितुः प्रधानम् ।
विवेकमञ्जर्याभिधां दधानं सत्पुस्तकं निर्वृतिदीपकल्पम् ॥३६॥

यावत् पूर्वाद्रिशृङ्गोदित इह जगति स्वप्रतापेन हन्ति,
प्रोद्यन्नीलीविनीले तिमिरभरमरं तापनस्तत्समन्तात् ।

यावच्छेषाहिराजः क्षितिवलयमसौ स्फूर्त्तिमान् संबिभर्त्ति,
श्रेयोऽधिष्ठानयानप्रवररविनिभः पुस्तकस्तावदास्ताम् ॥३७॥

चक्षुर्लोचनविष्टपात्रिनयनप्रोद्भूतसंवत्सरे,
मासे कार्त्तिकनाम्नि चन्द्रसहिते कृष्णाष्टमीवासरे ।
वृत्तिर्निवृतिमार्गदीपकलिकातुल्या विनीतात्मना,
रामेण स्वयमादरेण लिखिता नन्द्यादनिन्द्याक्षरा ॥३८॥

प्रशस्तिः समाप्ता । छ । छ । शुभमस्तु । छ । छ । छ । छ । छ । आ परत ताडपतरनी परत उपरथी उतारी छे । माहाराज **नित्यविजय**जीने वांचवा अर्थ लीखे छे ॥ स्तंभतीर्थे । छ । व्यास सोमेश्वर शीवलाल ॥ संवत् १९४४ मार्गशिर कृष्ण ११ भानुवासरे संपूर्ण समाप्तः ॥ श्रीरस्तु ॥ शुभं भवतु ॥ छ ।

खसंज्ञकं पण्डित**हीरालाले**न मुद्रितम् ।

गसंज्ञकं पत्तनीयभाण्डागारसंबन्धि, सटीकं, प्राचीनं, शुद्धम्, १२८ पत्रात्मकम्, जैनाचार्यश्रीविजय**वीरसूरीश्वर**द्वाराऽऽसादितम् ।

घसंज्ञकं प्रातःस्मरणीय-पन्न्यासश्री**मोहनविजया**नां संबन्धि, सटीकं, प्राचीनं, शुद्धम्, गसंज्ञकपुस्तकानुकारि ।

ङसंज्ञकं मूलमात्रम्, जैनाचार्यश्रीविजय**वीरसूरीश्वरा**णां संबन्धि, प्राचीनं, शुद्धं, पत्रचतुष्टयात्मकम् ।

चसंज्ञकं मूलमात्रम्, जैनाचार्यश्रीविजय**वीरसूरीश्वरा**णां संबन्धि, प्राचीन-गूर्जरभाषानुवादसहितम्, १६ पत्रात्मकम् ।

एतेषां षण्णामादर्शपुस्तकानां साहाय्येन विहिते ग्रन्थस्यास्य संपादने साहजिक-भ्रमवशाज्जाताः स्खलनाः क्षमितुं पाठकान् सानुनयं प्रार्थये ।

- हरगोविन्दः

સંપાદકીય

આ પ્રાકૃતપદ્યમય ચતુઃશરણપ્રતિપત્તિ, ગુણાનુમોદના, દુષ્કૃતગર્હા અને ભાવનારૂપ ચાર પ્રકરણમાં વિભાજિત **'વિવેકમંજરી'** નામનો ગ્રંથ કવિસભાશૃંગાર **'આસડ'** નામના કવિની અતિશ્રેષ્ઠ કૃતિ છે.

[1]આસડકવિનો પરિચય :-

આ નામના શ્રાવક મહાકવિ થયા, તેઓ **ભિલ્લમાલ** (શ્રીમાલ) વંશના **કટુકરાજ**ના **આનલદેવી**થી થયેલ પુત્ર હતા. **કટુકરાજ**ને જૈનદર્શનમાં સંપૂર્ણ શ્રદ્ધા હતી. ગુર્જરધરામાં **મંડલી** (માંડલ) નગરમાં **મહાવીર**ચૈત્યની પ્રતિષ્ઠા કરનારા અને પૂ.આ.શ્રી **દેવેન્દ્રસૂરિ** મહારાજના સ્વહસ્તથી સૂરિપદ પ્રાપ્ત કરનારા એવા પૂ.આ.શ્રી **ભદ્રેશ્વરસૂરિ** મહારાજ થયા કે જેમના પટ્ટધર 'કલિકાલગૌતમ' પૂ.આ.શ્રી **અભયદેવસૂરિ** મહારાજના ઉપદેશથી **'આસડે'** જૈનસિદ્ધાન્તનો સાર લઈ લીધો હતો, **આસડ**ને '[2]કવિસભાશૃંગાર' નામનું બિરુદ મળ્યું હતું. તેમણે કાલિદાસના મેઘદૂત પર ટીકા, અનેક જિનસ્તોત્ર સ્તુતિઓ અને **ઉપદેશકંદલી** નામના પ્રકરણની રચના કરી. વળી, પોતાના 'બાલસરસ્વતી' નામથી પ્રખ્યાતિ પામેલા **'રાજડ'** નામના પુત્રના તરુણ વયમાં જ થયેલા મૃત્યુથી પોતાને થયેલ શોકમાંથી પૂ.આ.શ્રી **અભયદેવસૂરિ** મહારાજે બોધ આપી, જાગૃત કરેલ હતો અને તેમનાં વાક્યોથી **'વિવેકમંજરી'** નામનું પ્રકરણ પોતે સૂત્રિત કર્યું.

---

૧. સંપાદકીય આ લખાણમાં ગ્રંથ, ગ્રંથકાર અને વૃત્તિકાર અંગેની માહિતી 'જૈન સાહિત્યનો સંક્ષિપ્ત ઈતિહાસ' નવી આવૃત્તિમાંથી તથા જૈન સાહિત્યના બૃહદ્ ઈતિહાસમાંથી સાભાર લીધેલ છે.

૨. **आसडः कालिदासस्य** यशोदीपमदीपयत् । **मेघदूत**महाकाव्यटीकास्नेहनिषेचनात् ॥૫॥
श्रुत्वा नवरसोद्गारकिरोऽस्य कवितागिरः । राजसभ्याः कविसभाशृङ्गार इति यं जगुः ॥૬॥
जिनस्तोत्रस्तुतीः पद्यगद्यबन्धैरनेकशः । चक्रे यः क्रूरकर्माहिजाङ्गुलीमन्त्रसंनिभाः ॥૭॥
येनोपदेशकन्दल्याह्वानप्रकरणच्छलात् । कृतं मोक्षाध्वनीनेभ्यः पाथेयातिथ्यमक्षयम् ॥૮॥
- વિવેકમંજરીવૃત્તિ પ્રશસ્તિ પી.૩, ૧૦૦

'આસડ' કવિની આ **'વિવેકમંજરી'** કૃતિ ઉપર **'સરસ્વતીપુત્ર'** બિરુદને પામેલા પૂ.આ.શ્રી **બાલચંદ્રસૂરિ** મહારાજે વૃત્તિની રચના કરેલ છે.

પૂ.આ.શ્રી બાલચંદ્રસૂરિનો પરિચય :-

પૂ.આ.શ્રી **બાલચંદ્રસૂરિ** મહારાજે પોતાની હકીકત પોતાના રચેલા **વસંતવિલાસ** કાવ્યના પ્રથમ સર્ગમાં આપી છે કે :-

મોઢેરક નામના શહેરમાં (ગાયકવાડ રાજ્યના કડી પ્રાંતમાં આવેલું મોઢેરા) **ધરાદેવ** નામનો પ્રસિદ્ધ મોઢ બ્રાહ્મણ હતો. તે દીનજનોને રક્ષતો અને જિનપ્રણીત શાસ્ત્રના રહસ્યનો જાણનાર હતો. તેને **વિદ્યુત્** (વિજળી) નામની પત્નીથી **મુંજાલ** નામનો પુત્ર થયો. તે પોતાના ઘરમાં રહેતો હોવા છતાં સંસારને જાળસ્વરૂપ સમજતો હતો.

પૂ.આ.શ્રી **હરિભદ્રસૂરિ** મહારાજની વાણી સાંભળી વિવેકરૂપી સંપત્તિ મેળવી મા-બાપની અનુમતિથી જૈનમતનું વ્રત અભ્યાસ્યું - ક્રમે ક્રમે સમગ્ર કલામાં ગુરુ પાસેથી નિપુણ થઈ દીક્ષા લીધી. ટૂંકમાં તેમના ધર્માચાર્ય અને સૂરિપદપ્રદાતા પૂ.આ.શ્રી **હરિભદ્રસૂરિ** મહારાજ હતા. **રત્નશ્રી** ગણિનીના તે ધર્મપુત્ર હતા.

ચૌલુક્ય ભૂપાલો જેમના ચરણમાં નમતા અને જે સરસ્વતીના નિવાસસ્થાનરૂપ હતા એવા ચૌલુક્ય રાજગુરુ **પદ્માદિત્ય** તેમના અધ્યાપક હતા. વાદી **દેવસૂરિ** ગચ્છના પૂ.આ.શ્રી **ઉદયસૂરિ** મહારાજે તેમને સારસ્વત મંત્ર આપ્યો હતો. એક વખત તેમણે સરસ્વતીનું ધ્યાન કરતાં યોગનિદ્રામાં એક મુહૂર્ત્ત આવી શારદાએ કહ્યું, 'વત્સ ! તારા પર પ્રસન્ન થઈ છું અને જેમ પૂર્વે કાલિદાસ આદિ બુદ્ધિશાળી મારી ભક્તિથી કવીન્દ્રો થયા તેમ વત્સ ! તું પણ થશે. આ સરસ્વતીના પ્રસાદથી જેમણે મહાકવિત્વરીતિ મેળવી છે એવો હું આ **વસંતવિલાસ** કાવ્ય રચું છું.' તેમણે પોતાને 'વાગ્દેવીપ્રતિપન્નસૂનુ' તરીકે ઓળખાવેલ છે.

પોતાની ગચ્છપરંપરા પોતે **'ઉપદેશકંદલી'** વૃત્તિમાં આપી છે કે :-

ચંદ્રગચ્છમાં પૂ.આ.શ્રી **પ્રદ્યુમ્નસૂરિ** મહારાજ થયા કે જેમણે તલવાટકના રાજાને પ્રબોધ્યો હતો, તેમના પછી પૂ.આ.શ્રી **ચંદ્રપ્રભસૂરિ** મહારાજ થયા કે જેમણે જિનની પ્રાભાતિક સ્તુતિ રચી હતી, તેમના શિષ્ય પૂ.આ.શ્રી **ધનેશ્વરસૂરિ** મહારાજ થયા કે જેમણે પોતાના સ્વર્ગસ્થ ગુરુ પાસેથી મંત્ર પ્રાપ્ત કર્યો હતો અને **સમયુ** નામના નગરના દેવતા-પુરદેવતાને પ્રબોધ્યો હતો. તેમને સરસ્વતીના ચાર હસ્ત જેવા ચાર શિષ્ય પૂ.**વીરભદ્ર** મ., પૂ.**દેવસૂરિ** મ., પૂ.**દેવપ્રભ** મ., પૂ.**દેવેન્દ્રસૂરિ** મ. થયા. તે પૈકી છેલ્લા

પૂ.**દેવેન્દ્રસૂરિ** મહારાજે જિનપ્રાસાદો જ્યાં પુષ્કળ હતા એવી **મંડલી** (માંડલ) નામની નગરીમાં **મહાવીર** ચૈત્યની પ્રતિષ્ઠા કરી. તેમના પૂ.આ.શ્રી **ભદ્રેશ્વરસૂરિ** મ. થયા અને તેમના પૂ.આ.શ્રી **અભયદેવસૂરિ** મ. થયા. જેમનું ધર્મોપદેશામૃત પીને **આસડે** પોતાની **વિવેકમંજરી** અને **ઉપદેશકંદલી** રચી. તેમના શિષ્ય પૂ.આ.શ્રી **હરિભદ્રસૂરિ** મહારાજ ષડ્દર્શનો અને સાહિત્યમાં નિષ્ણાત થયા; અને તેમના શિષ્ય **બાલચંદ્રસૂરિ** (પોતે) થયા.

સમરાદિત્યસંક્ષેપાદિના કર્તા અને અનેક ગ્રંથોના સંશોધક પ્રસિદ્ધ પૂ.આ.શ્રી **પ્રદ્યુમ્નસૂરિ** મહારાજને પદપ્રતિષ્ઠા પ્રાપ્તિ આ સુકવિ પૂ.**બાલચંદ્રસૂરિ** મહારાજ દ્વારા થઈ હતી.

આ. પૂ.આ.શ્રી **બાલચંદ્રસૂરિ** મહારાજે **કરુણાવજાયુધ** એ નામનું પંચાંકી નાટક રચ્યું. તે વીરધવલના મંત્રી **વસ્તુપાલની આજ્ઞાથી શત્રુંજયમંડન** પ્રથમ તીર્થંકર ઋષભદેવ પરમાત્માના ઉત્સવમાં ભજવાયું હતું તે પરથી જણાય છે કે તે મંત્રી શત્રુંજયની યાત્રાએ ગયા (સં.૧૨૭૭) ત્યારે રચ્યું. તેમાં વજ્રાયુધ ચક્રવર્તીએ પોતાના પ્રાણના ભોગે પણ પારેવાનું રક્ષણ કર્યું તે પ્રસિદ્ધ વસ્તુને અવલંબીને આ નાટક રચાયેલું છે. પોતાના સમકાલીન મહાકવિ **'આસડે'** રચેલા ગ્રંથો નામે **વિવેકમંજરી** અને **ઉપદેશકંદલી** ઉપર ટીકાઓ તેમણે રચી. તેમાંની આ **'વિવેકમંજરી'** ટીકા સં.૧૨૪(૭)૮માં રચી કે જે **નાગેંદ્ર**ગચ્છના પૂ.આ.શ્રી વિજય**સેનસૂરિ** મહારાજે અને બૃહદ્ગચ્છના પૂ.આ.શ્રી **પ્રદ્યુમ્નસૂરિ** મહારાજે શોધી તથા તેમાં **દેવાનંદ**ગચ્છના પૂ.આ.શ્રી **કનકપ્રભસૂરિ** શિષ્ય પૂ.આ.શ્રી **પ્રદ્યુમ્નસૂરિ** મહારાજે સહાય કરી; અને **'ઉપદેશકંદલી'** પર વૃત્તિ રચી કે જેની તાડપત્રની સં.૧૨૯૬ની પ્રત પાટણના ભંડારમાં છે. આ ઉપરાંત તેમણે **'વસંતવિલાસ'** નામનું મહાકાવ્ય બનાવ્યું છે. તેમાં કીર્ત્તિકૌમુદીની પેઠે વસ્તુપાલનાં પરાક્રમો વર્ણવેલાં છે. વસ્તુપાલ સોમશર્મા અને હરહરાદિ કવિઓથી વસંતપાલ કહેવાતો હતો. તેથી તે નામ પરથી કાવ્યનું નામ **'વસંતવિલાસ'** રાખ્યું છે. આમાં વસ્તુપાલના મૃત્યુનો ઉલ્લેખ હોવાથી તે મૃત્યુ સંવત-૧૨૯૬ પછી અને તે વસ્તુપાલના પુત્ર જૈત્રસિંહના વિનોદ માટે રચાયું. તેથી તે ગ્રંથનો રચના સમય વિક્રમના તેરમા સૈકાની આખરનો અથવા ચૌદમા સૈકાની શરૂઆતના આશરાનો છે. મંત્રીશ્વર વસ્તુપાલે પણ બહુ પ્રબંધ કરનાર[1]

---

१. बहुप्रबन्धकर्तुः श्रीबालचन्द्रस्य का स्तुतिः ।
मन्त्रीशवस्तुपालेन यः स्तुतः कवितागुणात् ॥ [प्रद्युम्नसूरिकृत समरादित्यसंक्षेप सं.१३२४]

પૂ.આ.શ્રી **બાલચંદ્રસૂરિ** મહારાજની કવિતાના ગુણને માટે સ્તુતિ કરેલ છે, એ પ્રમાણે પૂ.આ.શ્રી **પ્રદ્યુમ્નસૂરિ** મહારાજકૃત **સમરાદિત્યસંક્ષેપ**માં કહેલ છે.

પૂર્વ સંપાદન અંગે :-

સટીક આ ગ્રંથ પંડિત **હીરાલાલ હંસરાજે**-જામનગરમાં પ્રકાશિત કરેલ, પરંતુ તેમાં મૂલગ્રંથાંશનો અમુક ભાગ ટીકામાં રહી ગયેલો. તેથી આ ગ્રંથના પુનર્મુદ્રણ માટે જૈનાચાર્યશ્રી **વીરસૂરીશ્વરજી મહારાજ**સાહેબે ગુર્જર દેશાન્તર્ગત રાજધન્યપુરમાં રહેતા શ્રેષ્ઠિ ત્રિકમચંદ્રના પુત્ર કલિકાતા વિશ્વવિદ્યાલયમાં સંસ્કૃત-પ્રાકૃત અધ્યાપક ન્યાય-વ્યાકરણતીર્થ પદવીથી વિભૂષિત પંડિત **હરગોવિંદદાસ**ને પ્રોત્સાહિત કર્યા અને તેમણે છ આદર્શ પ્રતોની સહાયથી આ ગ્રંથનું સંશોધન કરી સંસ્કૃત છાયાથી વિભૂષિત કરી આ ગ્રંથ ફરી તૈયાર કર્યો અને **'જૈન વિવિધસાહિત્ય શાસ્ત્રમાલા'**ના ૯મા ગ્રંથાંક તરીકે વિ.સં.૧૯૭૫, વી.સં. ૨૪૪૫માં આ ગ્રંથ પ્રતાકારે બે ભાગમાં પ્રકાશિત થયેલ છે.

નવીનસંસ્કરણ સંપાદન અંગે :-

આજથી લગભગ ૯૦ વર્ષો પૂર્વે પ્રકાશિત થયેલ આ ગ્રંથની આવૃત્તિ જીર્ણપ્રાયઃ થયેલ હોવાથી અને પ્રતાકારે મુદ્રિત થયેલ ગ્રંથમાં ઘણા નાના અક્ષરો હોવાથી સુવાચ્ય અક્ષરોમાં આ ગ્રંથનું પુનર્મુદ્રણ થાય તો સમાધિ માટે અને આત્મસાધના માટે અતિઉપયોગી આ ગ્રંથ હોવાથી અનેકોને વાંચવા માટે ઉપયોગી બને. આવી ઉત્તમ ભાવના **લાલભાઈ દલપતભાઈ વિદ્યામંદિર**ના નિયામકશ્રી **જિતેન્દ્રભાઈ શાહ**ના મનમાં ઉદ્ભવી અને એકવાર તેઓ મારી નાદુરસ્ત રહેતી તબિયતમાં સુખશાતા પૃચ્છા માટે આવેલ, ત્યારે વાત કરી કે **'વિવેકમંજરી'** ગ્રંથના પુનઃસંપાદનની ભાવનાને સાકાર કરવા માટે આપશ્રીજીનો સહયોગ મળે તો આ ગ્રંથનું પુનઃસંપાદન કાર્ય અતિ ઉપકારક થાય તેવું છે. તેમની ભાવનાને સહર્ષ વધાવી તેમના આ સંપાદનકાર્યમાં સ્વસ્વાધ્યાયના ઉદ્દેશથી સહયોગ આપવાનું થયેલ છે અને આ ગ્રંથનો સ્વાધ્યાય કરતાં જે સંવેગગર્ભિત શુભભાવો ઉલ્લસિત થયા છે, તે માટે તેમની ખાસ ઋણી છું.

આ નવીન સંસ્કરણ સંપાદનમાં ઉદ્ધરણો બધા બોલ્ડ ફોન્ટમાં આપેલ છે. ઉદ્ધરણોના[1] સ્થાનો જેટલા ઉપલબ્ધ સામગ્રીના આધારે અમને મળ્યા છે, તે ચોરસ

---

૧. ઉદ્ધરણના સ્થાનો નોંધવા માટે **'શાસ્ત્રસંદેશમાલા'**થી પ્રકાશિત થયેલાં ચાર ભાગો ઉપકારક બન્યા છે.

કાંઉસમાં આપેલ છે. તેમજ પરિશિષ્ટો - ૯ નવા તૈયાર કરેલ છે. પૂર્વ આવૃત્તિમાં આપેલ પંડિતશ્રીની સંસ્કૃત પ્રસ્તાવના પણ આમાં આપેલ છે.

આ ગ્રંથના પહેલા પદ્યમાં મહાવીરસ્વામીને વંદન કર્યા છે, પછી વિવેકનો મહિમા સમજાવ્યો છે અને તેના કારણરૂપ મનની શુદ્ધિનો ઉલ્લેખ કર્યો છે. આ શુદ્ધિના ચાર કારણો જણાવી તેમનું વિસ્તારથી નિરૂપણ કર્યું છે એ ચાર કારણો આ મુજબ છે :

(૧) ચાર શરણોની પ્રતિપ્રતિ, (૨) ગુણોની અનુમોદના, (૩) દુષ્કર્મોની-પાપોની નિંદા અને (૪) બાર ભાવનાઓ.

તીર્થંકર, સિદ્ધ, સાધુ અને ધર્મ - આ ચારેને મંગલ કહીને તેમનું શરણું લેવા કહ્યું છે. વર્તમાન ચોવીસીનાં નામ આપી તેમને તથા અતીત ચોવીસી વગેરેના તીર્થંકરોને નમસ્કાર કર્યા છે. પ્રારંભની સાત ગાથાઓમાંથી છ ગાથાઓ તીર્થંકરોની સ્તુતિપરક છે. પ્રસંગોપાત્ત દૃષ્ટાંતોનો પણ નિર્દેશ કર્યો છે. ગાથા-૫૦-૫૩માં ભિન્ન ભિન્ન મુનિઓનાં તથા ગાથા-૫૬-૫૮માં સીતા વગેરે સતીઓનાં નામ આવે છે.

આ ગ્રંથ ઉપર પરમ પૂજ્ય આચાર્ય ભગવંત **બાલચન્દ્રસૂરિ** મહારાજની વૃત્તિ છે તેની વિ.સં.૧૩૨૨માં લખાયેલી હસ્તલિખિત પ્રતિ છે. મૂળમાં સૂચિત દૃષ્ટાંતોના સ્પષ્ટીકરણ માટે સંસ્કૃત શ્લોકોમાં નાની-મોટી કથાઓ વૃત્તિમાં આપવામાં આવેલ છે. જેમ કે - બાહુબલિની કથા - 'ભરતભૂષણ' નામના ચાર સર્ગોવાળા મહાકાવ્યના રૂપમાં, સનત્કુમારની કથા, સ્થૂલભદ્રની કથા, શાલિભદ્રની કથા, વજ્રસ્વામીની કથા, અભયકુમારની કથા - ચાર પ્રકારની બુદ્ધિ ઉપર લખાયેલ એક એક પ્રકાશના રૂપમાં, સીતાદેવીની કથા - 'સીતાચરિત' નામે ચાર સર્ગોવાળા મહાકાવ્યના રૂપમાં, દવદન્તીની કથા - 'દમયંતી લલિત' નામના ચાર સર્ગોમાં, વિલાસવતીની કથા, અંજનાસુંદરીની કથા, નર્મદાસુંદરીની કથા, કલાવતીની કથા, ઋષિદત્તાની કથા, મૃગાવતીની કથા વગેરે કુલ-૪૩ કથાઓ આ **'વિવેકમંજરી'**માં સંસ્કૃત પદ્યોમાં આપેલ છે. કથાઓનો અકારાદિક્રમ પરિશિષ્ટ-૬ માં આપેલ છે તે જોવાથી અને ગ્રંથની વિષયાનુક્રમણિકા વાંચવાથી પણ ખ્યાલ આવી શકશે.

પ્રસ્તુત પુસ્તકાકારે **વિવેકમંજરી** ભાગ-૧માં ચતુઃશરણપ્રતિપત્તિદ્વારનું વર્ણન તથા ગુણાનુમોદનાદ્વારમાં મહાપુરુષોના ચરિત્રોનું વર્ણન આપવામાં આવેલ છે. ત્યાર પછી **વિવેકમંજરી** ભાગ-૨માં મહાસતીઓના ચરિત્રોનું વર્ણન, દુષ્કૃતગર્હાદ્વારનું વર્ણન અને ભાવનાદ્વારનું વર્ણન આપવામાં આવેલ છે.

ઉપકારસ્મરણ :-

મારી સંયમસાધના અને શ્રુતોપાસનામાં સહાયક બનનાર સૌ કોઈનું કૃતજ્ઞભાવે સ્મરણ કરું છું. વિશેષમાં આ ગ્રંથના પ્રકાશન કાર્યમાં પરમપૂજ્ય પરમોપકારી **રામચંદ્ર-ભદ્રંકર-કુંદકુંદસૂરીશ્વરજી** મહારાજના શિષ્યરત્ન પરમપૂજ્ય પંન્યાસપ્રવરશ્રી **વજ્રસેનવિજય** મહારાજના શુભાશીર્વાદ પ્રાપ્ત થયેલ છે તથા તેઓશ્રીના ગુરુબંધુવર્ય વર્દ્ધમાનતપોનિધિ પરમપૂજ્ય ગણિવર્યશ્રી **નયભદ્રવિજય** મહારાજની શુભ પ્રેરણાથી આ ગ્રંથપ્રકાશનનો સંપૂર્ણ લાભ **નેમિનાથનગર-નવાડીસા** શ્રાવિકા સંઘની બહેનોના જ્ઞાનખાતાની ઉપજમાંથી લીધેલ હોવાથી આ ગ્રંથ પ્રકાશનના સુઅવસરે કૃતજ્ઞભાવે તેમનું સ્મરણ કરું છું તથા આ ગ્રંથના નવીન સંસ્કરણના સંપાદન કાર્ય માટે **જિતુભાઈ**એ મને શ્રુતભક્તિનો જે લાભ આપ્યો તે બદલ તેમની ઋણી છું.

આ **'વિવેકમંજરી'** ગ્રંથનું નવીનસંસ્કરણ પરમપૂજ્ય, પરમોપકારી, પરમશ્રુતોપાસક, આગમસંશોધક, શ્રુતસ્થવિર, પ્રવર્ત્તક **શ્રીજંબૂવિજય** મહારાજની પુણ્યસ્મૃતિને સાદર અર્પણ કરી કૃતાર્થતા અનુભવું છું.

મારી નાદુરસ્ત રહેતી તબિયતમાં પણ ઘણો પરિશ્રમ કરીને યથાશક્ય ગ્રંથ સુવાચ્ય અને શુદ્ધિકરણપૂર્વકનો તૈયાર થાય તે બદલ પૂરતો પ્રયત્ન કરેલ છે. આમ છતાં અનાભોગથી કે દૃષ્ટિદોષના કારણે કે મુદ્રણાદિ દોષના કારણે જે કોઈ ક્ષતિઓ રહેલ હોય તે વિદ્વજ્જનો સુધારીને વાંચે અને તે બદલ મિચ્છા મિ દુક્કડં માંગું છું.

પ્રાંતે અંતરની એક જ શુભભાવના વ્યક્ત કરું છું કે અરિહંતાદિ ચારના શરણોનો સ્વીકાર કરીને, મહાપુરુષોના જીવનમાં રહેલા ગુણોની અનુમોદના-સંસ્તવના કરીને સ્વદુષ્કૃતોની ગર્હા કરીને જેમ પૂર્વના મહાપુરુષોએ આત્મહિત સાધ્યું તેમ આપણે પણ આત્મહિત સાધવા કટિબદ્ધ બની બાર ભાવનાઓથી ભાવિત બની સમાધિને આત્મસાત્ કરી અપૂર્વકરણ, ક્ષપકશ્રેણિ, કેવલજ્ઞાનને પામી યોગનિરોધ દ્વારા સર્વ કર્મનો ક્ષય કરીને આપણે સૌ કોઈ ભવ્યાત્માઓ સાદિ અનંતકાળ સુધી શાશ્વત સુખમાં મ્હાલીએ એ જ શુભકામના !!

સાધ્વી ચંદનબાલાશ્રી

એફ-૨, જેઠાભાઈ પાર્ક,
નારાયણનગર રોડ,
પાલડી, અમદાવાદ-૭
ચૈત્ર સુદ-૧૩, વિ.સં.૨૦૬૬
રવિવાર, તા.૨૯-૩-૨૦૧૦

विषयानुक्रमणिका
[भाग-१]

विषयः	गाथा/पृष्ठाङ्कः
प्रकाशकीय	७-८
प्रस्तावना	९-१४
संपादकीय	१५-२०
विषयानुक्रमणिका	२१
उद्धरणसङ्केतसूचिः	२२
ग्रन्थारम्भप्रस्तावः	३-४
विवेकमाहात्म्यम्	२-३/५-६
मनःशुद्धिमाहात्म्यम्	४-५/६-७
मनःशुद्धिकारणानि	६/७-८
चतुःशरणप्रतिपत्तिद्वारम्—	
चतुःशरणप्रतिपत्तिः	७-१०/८
अर्हच्छरणाङ्गीकारः	११-१७/९-१०
तीर्थवन्दना	१८-१९/१०
साधुस्तुतिः	२०-२१/११-१२
गौतमगणधरस्तुतिः	२२/१२-१४
गणधरसामान्यस्तुतिः	२३/१४-१५
चक्रिराजर्षिस्तुतिः	२४/१५
बलभद्रमुनिस्तुतिः	२५/१५
गुणानुमोदनाद्वारम्—	
गुणानुमोदना	२६/१७

विषयः	गाथा/पृष्ठाङ्कः
भरतगुणस्तवनम्	२७-२८/१७-१८
भरतचक्रिकथा	२९/१९-६५
बाहुबलिगुणविलयम्	२९/१८-१९
सनत्कुमारकथा	३०/६६-८५
गजसुकुमारकथा	३१/८६-८७
ढण्ढणकुमारकथा	३२/८८-९०
स्थूलभद्रमुनिकथा	३३-३४/९२-१०६
दृढप्रहारिमुनिकथा	३५/१०७-१११
स्कन्दकाचार्यकथा	३६/११२-११५
चिलातीपुत्रकथा	३७-३८/११६-११९
अवन्तिसुकुमारकथा	३९/१२०-१२५
सुकोशलमुनिकथा	४०/१२६-१३०
शालिभद्रमुनिकथा	४१/१३१-१४२
वज्रस्वामिकथा	४२/१४३-१६८
मेतार्यमुनिकथा	४३/१६९-१७२
सुदर्शनश्रेष्ठिकथा	४४/१७३-१८५
दशार्णभद्रकथा	४५/१८६-१९१
प्रसन्नचन्द्रराजर्षिकथा	४६/१९२-१९७
कूरगडुकमुनिकथा	४७/१९८-२०३
अभयकुमारकथा	४८/२०४-२४२
जम्बूस्वामिकथा	४९/२४३-२५७

विषयः	गाथा/पृष्ठाङ्कः	विषयः	गाथा/पृष्ठाङ्कः
विष्णकुमारकथा	५०/२५८-२६५	इलातीपुत्रकथा	५१/३०१-३०६
अन्निकापुत्रकथा	५०/२६६-२७३	मेघकुमारकथा	५१/३०७-३१०
अतिमुक्तककथा	५०/२७४-२७७	पुण्डरीककथा	५१/३११-३१७
नागदत्तकथा	५०/२७८-२८७	नन्दिषेणकथा	५२/३१८-३२०
शय्यंभवसूरिकथा	५१/२८८-२९३	करकण्डुकथा	५२/३२१-३३०
माषतुषमुनिकथा	५१/२९४-२९६	कूर्मापुत्रकथा	५३/३३१-३३७
केशिगणधरकथा	५१/२९७-३००	मुनिसामान्यस्तुतिः	५४/३३८

● ● ●

उद्धरणसंकेतसूचिः

आ.नि.	आवश्यकनिर्युक्ति	पं.व.	पंचवस्तुक
उ.प.	उपदेशपद	बृ.सं.	बृहत्संग्रहणी
उव.मा.	उवएसमाला	भ.भा.	भवभावना
ग.व.	गणधरावली	मू.शु.	मूलशुद्धिप्रकरण
जग.सूत्र	जगचिन्तामणिसूत्र	यो.शा.	योगशास्त्र
द.वै.	दशवैकालिक	र.स.	रत्नसञ्चय
प्र.र.	प्रशमरति	व्य.भा.	व्यवहारभाष्य
प्र.सा.	प्रवचनसारोद्धार	सं.प्र.	सम्बोधप्रकरण

● ● ●

विवेकमञ्जरी

[भाग-१]

॥ अर्हम् ॥

श्रीबालचन्द्रसूरिविरचितवृत्तिसमुपेता

श्रीआसडकविकृता

॥ विवेकमञ्जरी ॥

श्री**नाभिनन्दन**विभोर्वदनं मुदेऽस्तु श्री**शारदा**सदनमक्षिगवाक्षरम्यम् ।
स्कन्धाचलोपरिकलश्रुतिदोलयोर्यत्पर्यन्तयोरुपवनीयति कुन्तलाली ॥१॥
देवाधिदैवतमतीव ततानि **शान्तिः** श्रेयांसि वो दिशतु संहृतविश्वतान्तिः ।
यत्पादयोर्नखरुचः प्रणतेषु शान्तितोयच्छटात्वमरुणाच्छवयः प्रयान्ति ॥२॥
मर्यादयापि कलितः प्रियनिम्नगोऽसौ कुग्राहवानतिगभीरपयोऽन्वितोऽपि ।
हित्वा समुद्रमिति कम्बुरगाद् यदङ्कं स श्रीजिनो वृजिनमस्यतु **शङ्खलक्ष्मा** ॥३॥
निर्मेघमेघपथमेचकदेहधामा **वामासुतः** स भवताद् भवतां विभूत्यै ।
यन्मौलिसीम्नि ऋषिमण्डलसप्तसप्तेः सप्तापि सप्तय इवाहिफणाः स्फुरन्ति ॥४॥
ते वः शिवश्रिय**मपश्चिमतीर्थनाथ**पादारविन्दनखचन्द्रमसो दिशन्तु ।
कामं कलङ्कविकलाः सकलाङ्कसिंहभीप्रोषितोदरमृगा इव ये विभान्ति ॥५॥
नम्रासुरत्रिदशकोटिकिरीटकोटिशाणानिशातपदपद्मनखेन्दुकान्ताः ।
कान्तानि वः शिवसुखानि दिशन्तु शश्वदन्येऽपि तीर्थपतयो**ऽजितनाथ**मुख्याः ॥६॥
मोहान्धकारधिक्कारदीपिका मुक्तिवर्त्मनि । **विवेकमञ्जरी**वृत्तिरियं निर्वर्त्यते मया ॥७॥

इह हि महितगुणमहिमकुमुदहिमकरस्य मकरकेतुबाणवित्रस्तसमस्तनजपरित्राण-वज्रपञ्जरस्य गूर्जरवसुन्धरावदनमण्डलमण्डली नगरमण्डनश्री**महावीर**चैत्यप्रतिष्ठा-कृतः सुकृतचरितचमत्कृतदेवेन्द्रस्य श्री**देवेन्द्रगुरु**स्वहस्तस्वपदविनिवेशितस्य भुवनभद्रङ्करस्य श्री**भद्रेश्वर**सूरिगुरो पट्टनभस्तलालङ्करणकिरणमालिना प्रतिवादिदैत्य-दमनसौरिणा श्रीम**दभयदेव**सूरिणा समुपदिष्टसकलसर्वज्ञसिद्धान्तसारः संसारवैराग्य-रसप्रसरपुष्टचेताः शिष्टसमयसरसिजवनीविकाशनैकरविश्रीम**दासड**कविः कविसभा-शृङ्गार इत्यपरनामधेयः श्रेयःप्रवृत्तिसुभगम्भावुकभविकजनचक्रप्रमोदसंपादनच्छेक-रुचि**र्विवेकमञ्जरी**प्रकरणकरणमभीष्टदेवतानमस्कारपुरस्सरं प्रतिजानीते, यथा—

सिद्धिपुरसत्थवाहं वीरं नमिऊण चरिमजिणनाहं ।
सवणसुहारससरिअं वुच्छामि विवेगमंजरिअं ॥१॥

[सिद्धिपुरसार्थवाहें वीरं नत्वा चरमजिननाथम् ।
श्रवणसुधारससरितं वक्ष्यामि विवेकमञ्जरीम् ॥]

व्याख्या । अहं **विवेकमञ्जरीं** वक्ष्यामीति संबन्धः । किंविशिष्टाम् ? 'सवण-सुहारससरिअं' **श्रवणयोः** कर्णयोर्विषयवार्ताविषमविषसमुच्छलितातुच्छमूर्च्छा-विच्छेदकत्वात् **सुधारससरिद्** अमृतनदी **ताम्** । किं कृत्वा ? 'नमिऊण' **नत्वा** । कम् ? 'चरमजिणनाहं' चरमश्चासौ जिननाथश्च **चरमजिननाथ**श्चतुर्विंशतितम-स्तीर्थनाथ**स्तम्** । किंविशिष्टम् ? 'सिद्धिपुरसत्थवाहं' सिद्धिरेव पुरं मुक्तिरेव नगरं तत्र सार्थो भव्यसत्त्वसंघातस्तं वाहयति प्रापयतीति **सिद्धिपुरसार्थवाहस्तम्** । भगवतः सार्थवाहत्वे निरुपणमिदमतिविशदमागमानुगामि, यदाहुः श्री**भद्रबाहुस्वा-मिपादाः**—

"[१]**पाविंति निव्वुइपुरं जिणोवइट्ठेण चेव मग्गेण ।**
अडवीइ देसियत्तं एवं नेयं जिणिंदाणं ॥" [आ.नि./९०६]

सार्थवाहत्वे चास्य सामर्थ्यं नाम्नैव प्रकाशयति । किंनामानम् ? **वीरम्** 'ईर गतौ कम्पने च' इत्यनेन विपूर्वेण विशेषेण ईरयति कम्पयति भावशत्रूनिति वीरस्तम् ।

---

१. प्राप्नुवन्ति निर्वृतिपुरं जिनोपदिष्टेनैव मार्गेण । अटव्यां देशिकत्वमेव ज्ञेयं जिनेन्द्राणाम् ॥

भगवतः सत्स्वपि **वर्धमाने**नेतिप्रभृतिषु नामसु '**वीरम्**' इत्यतः साभिप्राया कवेरुक्तिरिति। अत्राभिधेयं **विवेकमञ्जरी**प्रकरणम् । संबन्धो वाच्यवाचकरूपः वाच्या उपदेशाः, वाचको ग्रन्थः । प्रयोजनं च कर्तुरिह महती कीर्त्तिः, श्रोतुश्च तत्त्व-परिज्ञानम्। उभयोरपि परम्पराफलं मुक्तिरिति ॥१॥

अथ प्रतिज्ञातावतारणाय परमार्थसंपत्तावौपयिकमेकं विवेकं व्यतिरेकतः प्रस्तुव- 5
न्नाह —

दुट्ठट्ठकम्मवसगा भमंति भीमे भवम्मि निस्सीमे ।
भट्ठविवेगपईवा जीवा न मुणंति परमत्थं ॥२॥

[दुष्टाष्टकर्मवशगा भ्रमन्ति भीमे निःसीमे ।
भ्रष्टविवेकदीपा जीवा न जानन्ति परमार्थम् ॥] 10

व्याख्या । **जीवाः** प्राणिनो **भ्रमन्ति** भ्राम्यन्ति पादावर्तवदूर्ध्वाः कुलालचक्रवच्च तिर्यगनवस्थिता भवन्ति । क्व ? 'भवम्मि' **भवे** चतुर्गतिरूपे संसारे । किंविशिष्टे ? 'निस्सीमे' न विद्यते सीमा पर्यन्तो यस्यासा**वसीमा तस्मिन्** । अत एव **भीमे** भयङ्करे । भ्रमणे च तत्र तेषां विशेषणेन पारतन्त्र्यमाह—'दुट्ठट्ठकम्मवसगा' । **दुष्टानि** निष्कृपाणि च तान्यष्टौ **कर्माणि** ज्ञानावरणदर्शनावरणवेदनीयमोहनीयायुष्क- 15
नामगोत्रान्तरायनामानि, तेषां **वशगा** आयत्ताः । न केवलं भ्राम्यन्तीति तेषां शोच्यम्, किन्तु 'न मुणंति' न जानन्तीत्यपि । कम् ? 'परमत्थं' परमः पूज्यः शाश्वतानन्द-मयमुक्तिपुरीपथरूपोऽर्थः **परमार्थस्तम्** । तदज्ञाने च तेषां विशेषणेन कारणमाह— 'भट्ठविवेगपईवा' **भ्रष्टो विवेको** रागद्वेषमोहादिदोषेभ्यः पृथग्भावरूपो निरन्तरान्तर-तिमिरभरसंहरणप्रवणः **प्रदीपो येषां ते** तथा । भ्रंशश्चेह विश्लेषः । स च द्विविधः— 20
असंपत्तौ प्रथमः, द्वितीयश्च कषायविषयविनिर्मितविहस्ततया विश्रस्तत्वलक्षण इति ॥२॥

अधुना विवेकस्यैवान्वयेन माहात्म्यमुन्मीलयंस्तस्यैव हेतुमाह —

इह जीवाण विवेगो परमं चक्खू अकारणो बंधू ।
जइ कहमवि पाविज्जइ असरिसकम्मक्खओवसमा ॥३॥ 25

[इह जीवानां विवेकः परमं चक्षुरकारणो बन्धुः ।
यदि कथमपि प्राप्यतेऽसदृशकर्मक्षयोपशमात् ॥]

व्याख्या । **इहास्मिन्** जगति **जीवानां विवेकः परमं चक्षुः** प्रकृष्टं लोचनम्, यदुक्तम् –

"**एकं हि चक्षुरमलं सहजो विवेकस्तद्विद्धिरेव सह संवसतिर्द्वितीयम् ।**
एतद्द्वयं भुवि न यस्य स तत्त्वतोऽन्धस्तस्याप्यमार्गचलने वद कोऽपराधः ? ॥" [ ]

तथा **अकारणो बन्धुः** कारणनिरपेक्षः स्वजनः । बन्धुर्हि कारणमन्तरेण न कोऽपि सौजन्यभङ्गीमङ्गीकरोति, यदुक्तमस्माभिः सूक्तपङ्क्तौ –

"**पद्माश्रय इति पद्मं धिनोति कुमुदं न यदब्जबन्धुरपि ।**
अब्जत्वे तुल्येऽपि हि तज्ज्ञातिः कारणात्मैव ॥" [ ]

एवंविधो विवेकः 'जइ कहमवि पाविज्जइ' **यदि कथमपि प्राप्यते,** तदानीं 'असरिसकम्मक्खओवसमा' **असदृशो**ऽनन्यसामान्यः **कर्मणां** मिथ्यात्वमोहनीयादीनामुदीर्णानां क्षयः, अनुदीर्णानां चोपशमः, क्षयेण युक्त उपशमः **क्षयोपशमस्तस्मात् ।** विवेको हि श्रुतज्ञानभावनासमुत्थः, तच्च श्रुतज्ञानं क्षायोपशमिकभावनासंभवम् । यदाहुः –

"[1]**भावे खओवसमिए दुवालसगं पि होइ सुयनाणं ।**
केवलियनाणलंभो नन्नत्थ खए कसायाणं ॥" इति ॥३॥ [आ.नि./१०४]

इह निसर्गमधुरमपि वस्तु कियतापि विभूषणेन विना न चमत्करोतीति, अतस्तस्य विभूषणमाह –

तस्स विभूसणमेगं मणसुद्धी मंजरीव रुक्खस्स ।
तीइ समिद्धो एसो सुहफलरिद्धिं पयच्छेइ ॥४॥

[तस्य विभूषणमेकं मनः शुद्धिर्मञ्जरीव वृक्षस्य ।
तया समृद्ध एष सुख(शुभ)फलर्द्धिं प्रयच्छति ॥]

---

१. भावे क्षायोपशमिके द्वादशाङ्गमपि भवति श्रुतज्ञानम् । कैवल्यज्ञानलाभो नान्यत्र क्षयात् कषायाणाम् ॥

व्याख्या । **तस्य** विवेकस्य **एकम**साधारणं **विभूषणा**मलङ्करणम् । का ? 'मणसुद्धी' मनसः शुद्धि**र्मनःशुद्धिः** कृष्णनीलकापोतलेश्यात्रितयकलङ्कपङ्करहितात्मसमुत्थमतिशयश्चेतसो नैर्मल्यमिति भावः । केव ? **मञ्जरीव** पुष्पगुच्छ इव । कस्य ? 'रुक्खस्स' **वृक्षस्य** । न केवलमियं मनःशुद्धिर्विवेकस्य वृक्षस्येव मञ्जरी विभूषणमात्रम्, किन्तु 'तीइ समिद्धो एसो' **तया** मनःशुद्ध्या **एष** विवेकः **समृद्धः** सन् 'सुहफलरिद्धिं' सुखानि राज्यस्वर्गापर्गसंभवानि, तान्येव फलानि तेषामृद्धिः संपत् **सुखफलर्द्धिस्तां** 'पयच्छेइ' **प्रयच्छति** । वृक्षस्तु मञ्जर्या समृद्धः शुद्धफलर्द्धिं परिपाकपेशलफलस्फार्तिं प्रयच्छतीति गतम् ॥४॥

अथ सर्वोपदेशसंग्रहकारिकामाह —

तम्हा खलु आयहियं चिंतंतेणं विवेगिणा एसा ।
कायव्वा मणसोही न होइ जह दुल्लहा बोही ॥५॥

[तस्मात् खल्वात्महितं चिन्तयता विवेकिनैषा ।
कर्तव्या मनःशुद्धिर्न भवति यथा दुर्लभो बोधिः ॥]

व्याख्या । **तस्मात्** पूर्वोपदिष्टाद् हेतोः खलु निश्चितं 'आयहियं' **आत्महितं** स्वपथ्यम्, यद्वा, आयो ज्ञानादीनां लाभस्तस्मै हितं **आयहितं** 'चिंतंतेणं' **चिन्तयता** विमृशता **विवेकिना** विवेको रागद्वेषादिदोषेभ्यः पृथग्भावरूपो गुणो विद्यते यस्य स विवेकी तेन 'एसा' **एषा** 'कायव्वा मणसोही' **मनःशुद्धिः कार्या,** तपःश्रुतयमप्रायैः किमन्यैः कायदण्डनैरिति भावः । यथा किम् ? 'न होइ जह दुल्लहा बोही' **यथा बोधिर्जिनधर्मावाप्तिर्न दुर्लभा भवती**ति ॥५॥

अथ मनःशुद्धिकारणान्याह —

चउसरणे पडिवत्ती सम्मं अणुमोअणा गुणाण तहा ।
दुक्कडगरिहा तह भावणा य मणसुद्धिबीआइं ॥६॥

[चतुःशरणस्य प्रतिपत्तिः सम्यगनुमोदना गुणानां तथा ।
दुष्कृतगर्हा तथा भावना मनःशुद्धिबीजानि ॥]

व्याख्या । चतुर्णामर्हत्सिद्धसाधुकेवलिप्रज्ञप्तधर्माणां शरणं **चतुःशरणं, तस्य प्रतिपत्तिः** स्वीकारः । प्राकृतत्वात् सप्तमी षष्ठ्यर्थे । 'सम्मं अणुमोअणा गुणाण तहा' तथा **सम्यग्** मनोवाक्कायकर्मभिरिति भावः, **अनुमोदना** अनुस्मरणम् । केषाम् ? **गुणानां** सत्यशौचतपस्त्यागाकिञ्चन्यब्रह्मचर्यादीनाम् । तथा 'दुक्कडगरिहा' **दुष्कृतानां** पापानां **गर्हा** निन्दा सा । तथा 'भावणा य' **भावना** द्वादशधा सा । **चः** समुच्चये । एतानि चत्वार्यपि 'मणसुद्धिबीयाइं' **मनःशुद्धेर्बीजानि** कारणानीति भाव इति ॥६॥

चत्वार्येतानि प्रकरणेऽत्र द्वाराणि, तत्रादौ चतुःशरणप्रतिपत्तिद्वारं गाथाचतुष्केणाह—

निट्ठवियअट्ठकम्मा देसियदुल्लक्खमुक्खपुरमग्गा ।
तेलुक्कपरमबंधू अरहंता मंगलं पढमं ॥७॥

सिद्धा य मंगलं सव्वे साहू मंगलमुत्तमं ।
धम्मो केवलिपन्नत्तो सव्वजीवाणं मंगलं ॥८॥

अरहंता लोगुत्तमा सिद्धा लोगुत्तमा तहा ।
साहू लोगुत्तमा एसो धम्मो लोगाणमुत्तमो ॥९॥

अरहंता मम सरणं सरणं सिद्धा य साहुणो सरणं ।
धम्मो करुणारम्मो सरणं जिणनाहनिद्दिट्ठो ॥१०॥

[निष्ठापिताष्टकर्माणो देशितदुर्लक्षमोक्षपुरमार्गाः ।
त्रैलोक्यपरमबन्धवोऽर्हन्तो मङ्गलं प्रथमम् ॥
सिद्धाश्च मङ्गलं सर्वे साधवो मङ्गलमुत्तमम् ।
धर्मः केवलिप्रज्ञप्तः सर्वजीवानां मङ्गलम् ॥
अर्हन्तो लोकोत्तमाः सिद्धा लोकोत्तमास्तथा ।
साधवो लोकोत्तमा एष धर्मो लोकानामुत्तमः ॥
अर्हन्तो मम शरणं शरणं सिद्धाश्च साधवः शरणम् ।
धर्मः करुणारम्यः शरणं जिननाथनिर्दिष्टः ॥]

सुगमाः ॥७॥८॥९॥१०॥

अथेह **भरत**भुवो वर्तमानान्, अतीतान्, अनागतांश्च जिनान् गाथाचतुष्टयेन शरण्यत्वेन प्रतिपद्यते, यथा —

सिरिरिसहअजियसंभवअभिनंदणसुमइपउमपहनाहा ।
जिणवरसुपासचंदप्पहसुविहिसीअलसिज्जंसा ॥११॥

वासुपुज्जविमलसामिअअणंतपहुधम्मसंतिकुंथुजिणा ।
अरमल्लिसुव्वयनमी नेमी पासो अ वद्धमाणो अ ॥१२॥

इअ चउवीसं तिहुयणनमंसिआ वट्टमाणतित्थयरा ।
केवलनाणदिणेसा हरंतु मम मोहतिमिरोहं ॥१३॥

केवलनाणिपमुहा अईअतित्थंकरा य चउवीसं ।
तह पउमनाहपमुहा मम सरणमणागया अरिहा ॥१४॥

[श्रीऋषभाजितिसंभवाभिनन्दनसुमतिपद्मप्रभनाथाः ।
जिनवरसुपार्श्वचन्द्रप्रभसुविधिशीतलश्रेयांसाः ॥
वासुपूज्यविमलस्वाम्यनन्तप्रभुधर्मशान्तिकुन्थुजिनाः ।
अरमल्लिसुव्रतनमयो नेमिः पार्श्वश्च वर्धमानश्च ॥
इति चतुर्विंशतिस्त्रिभुवननमस्यिता वर्तमानतीर्थङ्कराः ।
केवलज्ञानदिनेशा हरन्तु मम मोहतिमिरौघम् ।
केवलज्ञानिप्रमुखा अतीततीर्थङ्कराश्च चतुर्विंशतिः ।
तथा पद्मनाभप्रमुखा मम शरणमनागता अर्हन्तः ॥]

इमा अपि सुगमाः ॥११॥१२॥१३॥१४॥

अथ शाश्वतस्थापनार्हतः स्तौति —

सिरिउसभवद्धमाणयचंदाणणवारिसेणनामाणो ।
सासयजिणालयेसुं वंदे हं सासए जिणिंदे ॥१५॥

[श्रीऋषभवर्धमानचन्द्राननवारिषेणनाम्नः ।
शाश्वतजिनालयेषु वन्देऽहं शाश्वताञ्जिनेन्द्रान् ॥]

स्पष्टा ॥१५॥

अथ गाथायुगेन विहरमाणानर्हतः स्तौति –

पुव्वविदेहे सीमंधरसामी विहरमाणतित्थयरो ।
अवरविदेहे जुगमंधरसामी मम सिवं दिसउ ॥१६॥

मुक्खपहं पयडंतो बाहुजिणिंदो तहा सुबाहू य ।
अन्ने वि अरहंता हरंतु दुरिआइं विहरंता ॥१७॥

[पूर्वविदेहे सीमन्धरस्वामी विहरमाणतीर्थकरः ।
अपरविदेहे युगमन्धरस्वामी मम शिवं दिशतु ॥
मोक्षपथं प्रकटयन् बाहुजिनेन्द्रस्तथा सुबाहुश्च ।
अन्येऽप्यर्हन्तो हन्तु दुरितानि विहरन्तः ॥]

इमे अपि सुगमे ॥१६॥१७॥

अथ तीर्थानि शाश्वतान्यशाश्वतान्यपि गाथाद्वयेन वन्दते –

नंदीसरअट्ठावयसत्तुंजयउज्जयंतसम्मेअपमुहाइं ।
अहं वंदे तित्थाइं परमभत्तीए ॥१८॥

सासयजिणालयाइं असासयाइं पि जाइं सव्वाइं ।
उड्ढमहतिरियलोए तेसिं पणमामि भावेण ॥१९॥

[नन्दीश्वराष्टापदशत्रुञ्जयोज्जयन्तसम्मेत-
प्रमुखान्यहं वन्दे तीर्थानि परमभक्त्या ॥
शाश्वतजिनालयान्यशाश्वतान्यपि यानि सर्वाणि ।
ऊर्ध्वाधस्तिर्यग्लोके तानि प्रणमामि भावेन ॥]

स्पष्टे ॥१८॥१९॥

अथ गाथायुगलेन साधूनुपश्लोकयति –

अड्ढाइज्जा दीवा पन्नरस तेसु कम्मभूमीओ ।
जे के वि तत्थ साहू पंचमहव्वयधरा धीरा ॥२०॥

अट्ठारससीलंगसहस्सधुराधरणलद्धमाहप्पा ।
कंदप्पदप्पदलणा तेसिं चलणा सुहं दिंतु ॥२१॥

[अर्धतृतीयो द्वीपौ पञ्चदश तयोः कर्मभूमयः ।
ये केऽपि तत्र साधवः पञ्चमहाव्रतधरा धीराः ॥
अष्टादशशीलाङ्गसहस्रधुराधरणलब्धमाहात्म्याः ।
कन्दर्पदर्पदलनास्तेषां चरणाः सुखं ददतु ॥]

व्याख्या – 'अड्ढाइज्जादीवा' **"द्विवचनस्य बहुवचनम्"** [हे.प्रा. ३/१३०] इति प्राकृतलक्षणात्, अर्धं तृतीयः **पुष्करवर**नामा द्वीपो ययोस्ता**वर्धतृतीयौ द्वीपौ धातकीखण्डजम्बू**नामानौ 'पन्नरस तेसु कम्मभूमीओ' कर्मणां शुभानामशुभानामपि भूमयो जन्मस्थानानि **कर्मभूमयः** । तत्र जनितानि किमुच्यन्ते ? अन्यत्रोपार्जितान्यपि कर्माणि तासूत्पद्य जीवैर्भोगभूमिगतैरुपभुज्यन्त इति । क्व सन्ति ताः ? 'तेसु' **तयो**रर्धतृतीययोर्द्वीपयोः । कति ? 'पन्नरस' पञ्चपञ्च**भरतैरवतमहाविदेह**संज्ञिताश्च ताः **पञ्चदश** । 'जे के वि तत्थ साहू' **ये केऽप्य**र्निचवनीयमहिमास्तत्र **साधवो** मुनयः **सन्ति** । किंविशिष्टाः ? 'पंचमहव्वयधरा' **पञ्चमहाव्रतधराः** । अत एव धीरा धिया बुद्ध्या राजन्त इति धीराः । पुनश्च किंरूपा ? 'अट्ठारससीलंगसहस्सधुराधरणलद्धमाहप्पा' शीलानि सच्चरितानि तेषामङ्गान्यवयवाः शीलाङ्गानि, तेषां सहस्राः शीलाङ्गसहस्राः, अष्टादश ते च शीलाङ्गसहस्राश्च अष्टादशशीलाङ्गसहस्राः । तथा च **वाचकः** –

"धर्माद् भूम्यादीन्द्रियसञ्ज्ञाभ्यः करणतश्च योगाच्च ।
शीलाङ्गसहस्राणामष्टादशकस्य निष्पत्तिः" ॥ [प्र.२/२४४]

इति । तेषां धूर्भारोऽ**ष्टादशशीलाङ्गसहस्रधुरा**, तस्या **धरणं** यावज्जीवमुद्वहनम्, यदाहुः –

"[१]**वुब्भंति नाम भारा त च्चिय वुब्भंति वीसमंतेहिं ।**
सीलभरो वोढव्वो जावज्जीवं अविसामो ॥" [ ]

तेन लब्धं माहात्म्यं महिमा **यैस्ते** तथा । अत एव 'कंदप्पदप्पदलणा' कन्दर्पस्य सुरासुरविजयिनो मन्मथस्य दर्पं गर्वं दलयन्ति चूर्णयन्तीति **कन्दर्पदर्पदलनां** । 'तेसिं चलणां' **तेषामे**वंविधानां गुणरत्नसिन्धूनां साधूनां **चलनाः** पादाः 'सुहं दिंतु' **सुखं** समाधानं **ददत्वि**ति ॥२०॥२१॥

अथासन्नोपकारिणः श्री**वर्धमान**विभोः प्रथमगणधरमुपश्लोकयन्नाह –

सिद्धंतसुत्तहारो पयडियवरचरणकरणववहारो ।
भवियाण भवभयहरो सिरिगोयमगणहरो जयइ ॥२२॥

[सिद्धान्तसूत्रधारः प्रकटितवरचरणकरणव्यहारः
भविकानां भवभयहरः श्रीगौतमगणधरो जयति ॥]

व्याख्या – श्रिया ज्ञानलक्ष्म्या उपलक्षितो **गौतमो** गोतमगोत्रसंभवश्चासा**विन्द्रभूति**नामा **श्रीगौतमगणधरः, जयति** सर्वोत्कर्षेण वर्तते । किंविशिष्टः ? 'सिद्धंतसुत्तहारो' सिद्धान्तो द्वादशाङ्गं गणिपिटकं तस्य सूत्रं त्रिपदी तां धारयति विस्तारयतीति **सिद्धान्तसूत्रधारः**; यदुक्तमस्माभि**र्गणधरावल्याम्** –

"**श्रीमाननेकपभटैकपतिर्नवीनः पायादपायगहनाज्जगदिन्द्रभूतिः ।**
विस्तार्य मञ्जुलपदस्त्रीपदीमदीनजातिर्न जातु बत यः शिथिलीचकार ॥" [ ]

पुनः किंविशिष्टः ? 'पयडियवरचरणकरणववहारो' **प्रकटितः** प्रकाशितो **वरः शुद्धश्चरणकरणयोर्व्यवहारः** क्रिया येन **स** तथा । चरणकरणे च प्रत्येकं सप्ततिधा, यथा –

"[२]**वयसमणधम्मसंजमवेयावच्चं च बंभगुत्तीओ ।**
नाणाइतियं तवकोहनिग्गहा इइ चरणमेयं ॥" **[सं.प्र./७३६]**

---

१. उह्यन्ते नाम भारास्त एवोह्यन्ते विश्राम्याद्भिः । शीलभरो वोढव्यो यावज्जीवमविश्रामः ॥

२. व्रतश्रमणधर्मसंयमवैयावृत्त्यं च ब्रह्मचर्यगुप्ती । ज्ञानादित्रिकं तपः क्रोधनिग्रहाविति चरणमेतत् ॥

तत्र व्रतानि अहिंसानृतास्तेयब्रह्मचर्यापरिग्रहनामानि पञ्च । श्रमणधर्मस्तु क्षान्ति-मार्दवार्जवमुक्ततपःसंयमसत्यशौचाकिञ्चन्यब्रह्मचर्यादभेदैर्दशधा । अन्यच्च पञ्चाश्रवाद् विरमणम्, पञ्चेन्द्रियनिग्रहः, कषायजयः, दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः वैयावृत्त्यं त्वाचार्योपाध्यापतपस्विशैक्षकग्लानकुलगणसङ्घसाधुसमनोज्ञेषु शुश्रूषाभेदैर्दशधा । अपरं च — 5

"[१]वसहिकहनिसिज्जिंदियकुड्डंतरपुव्वकीलियपणीए ।
अइमायाहारविभूसणाइं नव बंभचेरगुत्तीओ" ॥ [सं.प्र./११५६]

ज्ञानादित्रिकं तु विदितम् । तपस्तु बाह्याभ्यन्तरषट्षडभेदैर्द्वादशधा, यथा —

"[२]अणसणमूणोयरिया वित्तिसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया य बज्झो तवो होइ" ॥ [सं.प्र./१२६५] 10

"पायच्छित्तं विणओ वेयावच्चं तहेव सज्झाओ ।
झाणं उस्सग्गो वि य अब्भिंतरओ तवो होई" ॥ [सं.प्र./१२६६]

अपि च क्रोधादीनां चतुर्णां कषायाणां निग्रहः क्रोधनिग्रहः । अत्र शाकपार्थिवादिदर्शनाद् मध्यमपदलोपी समास इति संपिण्डितं चरणं सप्ततिधा ।

"[३]पिंडविसोही समिई भावणा पडिमा य इंदियनिरोहो । 15
पडिलेहणगुत्तीओ अभिग्गहा चेव करणं तु" ॥ [सं.प्र./७३७]

तत्र पिण्डादीनां चतुर्णां पिण्डवस्त्रशय्यापात्राणां विशिष्टा शुद्धिः पिण्डविशुद्धिः, यदाहुः —

"[४]पिंडं वत्थं च सेज्जं च चउत्थं पायमेव य ।
अकप्पियं न गिण्हिज्जा पडिगाहिज्ज कप्पियं" ॥ [द.वै./६/४८] 20

---

१. वसतिकथानिषद्येन्द्रियकुड्यान्तरपूर्वक्रीडितप्रणीतम् । अतिमायाहारविभूषणानि नव ब्रह्मचर्यगुप्तयः ॥
२. अनशनमूनोदरिता वृत्तिसंक्षेपणं रसत्यागः । कायक्लेशः संलीनता च बाह्यं तपो भवति ।
प्रायश्चित्तं विनयो वैयावृत्त्यं तथैव स्वाध्यायः । ध्यानमुत्सर्गोऽपि चाभ्यन्तरं तपो भवति ॥
३. पिण्डविशुद्धिः समितिर्भावना प्रतिमा चेन्द्रियनिरोधः । प्रतिलेखनगुप्ती अभिग्रहाश्चैव करणं तु ॥
४. पिण्डं वस्त्रं च शय्यां च चतुर्थं पात्रमेव च । अकल्पितं न गृह्णीयात् परिगृह्णीयात् कल्पितम् ॥

अपि च । ईर्याभाषैषणादाननिक्षेपोत्सर्गसञ्ज्ञिताः पञ्च समितयः । भावनाश्चानित्यतादयो द्वादश वक्ष्यन्ते । प्रतिमाश्च भिक्षूणां द्वादश । तत्र स्वनामसदृशार्था प्रथमा एकमासिकी, द्वितीया द्विमासिकी, तृतीया त्रिमासिकी, चतुर्थी चतुर्मासिकी, पञ्चमी पञ्चमासिकी, षष्ठी षाण्मासिकी, सप्तमी सप्तमासिकी, अष्टमी नवमी दशमी च सप्तसप्ताहोरात्रिकी, एकादशी तु अहोरात्रिकी, द्वादशी चैकरात्रिकी; यदाहुः

"[१]मासाई सत्तंता पढमा दु तईय सत्तराइंदी ।
अहराई एगराई, भिक्खुपडिमाण बारसगं" ॥ [सं.प्र./७३८]

इन्द्रियनिरोधस्तु पञ्चविधः स्पष्टः । प्रतिलेखनाश्च पञ्चविंशतिवस्त्रस्य वपुषः पात्रस्य च, तद्यथा –

"[२]इग दिट्ठी छप्पुरिमा नव अखोड पखोड वत्थपणवीसा ।
भुयजुयसिरमुहहियए तिय तिय चउ पुट्ठि छ पय पणवीसा ॥ [

बारस बाहिं ठाणा बारस ठाणा य हुंति मज्झम्मि ।
पत्तपडिलेहणाए पणवीसयमो करप्फंसो" ॥ [ ]

तिस्रो गुप्तयस्तु विश्रुताः । अपि चाभिग्रहा द्रव्य-क्षेत्र-काल-भावभेदैश्चत्वार इत्येकत्र संमीलितं करणमपि सप्ततिधा । पुनः किंविशिष्टो भगवान् **गौतमः** ? 'भयभयहरो' भवात् संसाराद् भयं भवभयं तद् हरत्यपनयतीति भवभयहरः । केषाम् ? 'भवियाणं' **भविकानामिति** ॥२२॥

अथ बाहुल्येन सर्वानपि गणभृतः स्तौति –

सिरिपुंडरीयगोयमपमुहा गणहारिणो महामुणिणो ।
तिहुयणपणमियचरणा सरणं मम मोहनिट्ठवणा ॥२३॥

---

१. मासादयः सप्तान्तां प्रथमा द्वितीया तृतीया सप्तरात्रिदिवसिकी ।
अहोरात्रिक्यैकरात्रिकी, भिक्षुप्रतिमानां रूादशकम् ॥

२. एका दृष्टिः षट् पूर्वभागा नवेतस्ततो वस्त्रपञ्चविंशतिः ।
भुजयुगाशिरोमुखहृदयस्य त्रयस्त्रयश्चत्वारः पृष्ठस्य षट् पादस्य पञ्चविंशतिः ॥
द्वादश बहिः स्थानानि द्वादश स्थानानि च भवन्ति मध्ये ।
पात्रप्रतिलेखनायां पञ्चविंशतितमः करस्पर्शः ॥

[श्रीपुण्डरीकगौतमप्रमुखा गणधारिणो महामुनयः ।
त्रिभुवनप्रणतचरणाः शरणं मम मोहनिष्ठापनाः ॥]

स्पष्टा ॥२३॥

अथेह **भरते** द्वादश चक्रिणोऽभूवन्, तेषु च त्रयः **शान्ति-कुन्थु-अरनाथा**-स्तीर्थनाथा अपि बभूवुः । ते तु जिनाधिनाथवीथीषु शरणीकृतपूर्वाः । द्वौ च **सुभूमब्रह्मदत्त**नामानौ दुर्गतिगतत्वादयोग्यौ । शेषांश्चक्रिराजर्षीन् शरणीकुर्वन्नाह —

भरहो सणंकुमारो सगरो मघवं जओ य हरिसेणो ।
तह सुपउमो य सत्त वि चक्कवईमुणिवई सरणं ॥२४॥

[भरतः सनत्कुमार सगरो मघवा जयश्च हरिषेणः ।
तथा सुपद्मश्च सप्तापि चक्रवर्तिमुनिपतयः शरणम् ॥]

इयमपि सुगमैव ॥२४॥

अथ **बलभद्र**मुनीन् शरणीकुर्वन्नाह —

तिव्वतवखग्गखंडियभवपायववियडपयडियपहावा ।
सरणं नवबलदेवा वरगुणरयणायरा मज्झ ॥२५॥

[तीव्रतपःखड्गखण्डितिभवपादपविकटप्रकटितप्रभावाः ।
शरणं नवबलदेवा वरगुणरत्नाकरा मम ॥]

व्याख्या । नव च ते बलदेवा **नवबलदेवा अचल-विजय-भद्र-सुप्रभ-सुदर्शन-आनन्द-नन्दन-पद्म-राम**नामानो बलदेवा राजर्षयो 'मज्झ' **मम शरणं** 'भवन्तु' इति शेषः । किंविशिष्टाः ? 'वरगुणरयणायरा' **वराणि** निर्दूषणानि च तानि तपोदमजपोद्यमसंयमस्वाध्यायध्यानरूपा **गुणा एव रत्नानि तेषामाकराः** प्रभव-भूमयः । पुनः किंविशिष्टाः ? 'तिव्वतव' — इति पूर्वार्धम्, तीव्रं तीक्ष्णं च तत् तपश्च **तीव्रतपस्तदेव खड्ग**स्तरवारिस्तेन **खण्डित**श्चासौ **भवपादपः** संसारतरुश्च स तथा तेन **विकटं** विपुलं **प्रकटितः** प्रकाशितः **प्रभावो** महिमा **यैस्ते** तथा ॥२५॥

इत्याचार्यश्रीबालचन्द्रविरचितायां विवेकमञ्जरीवृत्तौ
चतुःशरणप्रतिपत्तिद्वारविवरणं नाम प्रथमः परिमलः समाप्तः ॥

● ● ●

शेषाहिमूलकलितः सुरशैलशाखी ताराप्रसूनकलितोरुदिगन्तशाखः ।
सूर्येन्दुमण्डलफलः स्फुटमेष यावत् तावज्जयं कलयतादिह जैत्रसिंहः ॥१॥

● ● ●

अथ गुणानुमोदनाद्वारमाह –

भरहाईण मुणीणं गुणगारववण्णणेण पावमलं ।
पक्खालेमि य सव्वं पवित्ततित्थोदएणं व ॥२६॥

[भरतादीनां मुनीनां गुणगौरववर्णनेन पापमलम् ।
प्रक्षालयामि च सर्वं पवित्रतीर्थोदकेनेव ॥]

व्याख्या । न केवलमर्हदादीन् चतुःशरणं प्रपद्ये, किन्तु 'पक्खालेमि य' **प्रक्षाल-याम्यपनयामि** च । किं तत् ? **पापं, अलम**तिशयेन । नैहिकभवमेवेत्याह–'सव्वं' **सर्वं** पूर्वभवसंततिविततमपीतीति भावः । केन ? 'गुणगारववण्णणेण' गुणानां गौरवं महिमा **गुणगौरवं तस्य वर्णनमु**त्कीर्तनं तेन । केषाम् ? 'मुणीणं' **मुनीनाम्** । किंविशिष्टानाम् ? 'भरहाईणं' **भरतः** श्री**युगादिजिन**सूनु**रादौ** येषां ते तथा **तेषाम्** । केन ? 'पवित्ततित्थोदएणं व' पवित्रं पङ्कपटलपिच्छलतारहितं च तत् तीर्थं नद्यादेरवतारस्थानं च **पवित्रतीर्थं तस्य उदकं** जलं तत्तथा **तेनेव** । कोऽत्र भावः ? यथा पवित्रतीर्थोदकेन पापमलो निन्द्यमलः सर्वोऽपि वस्त्रदेहादेः प्रक्षाल्यते केनचित्, तथाहं **भरता**दिमुनिगणगौरववर्णनेन पापमधर्म्यं कर्म अलमतिशयेनापनयामीति ॥२६॥

अधुना **भरत**गुणान् गाथायुगेनाह –

विहियं वेयावच्चं विहिणा साहूण सुद्धसीलाण ।
सिरिरिसहसुओ भरहो जाओ भरहाहिवो तेणं ॥२७॥

[विहितं वैयावृत्त्यं विधिना साधूनां शुद्धशीलानाम् ।
श्रीऋषभसुतो भरतो जातो भरताधिपस्तेन ॥]

व्याख्या । **श्रीऋषभसुतो भरतो भरताधिपः** षट्खण्ड**भरत**क्षेत्रभूमण्डलाखण्डलस्**तेन जातः** संवृत्तः । यत्तदोर्नित्यसंबन्धित्वाद् येन साधूनां यतीनां शुद्धशीलानामजिह्मब्रह्मचारिणां **वैयावृत्त्यं** भक्तपानीयादिसंपादनरूपं **विहितं**

निर्मितम् । केन ? 'विहिणा' विधिना पिण्डैषणाध्ययमप्रणीताचारेण, यदुक्तम्- "[1]दाणेणं हुंति उत्तमा भोगा" [ ] इति ॥२७॥

सो पढमचक्कवट्टी भरहो भवियाण कुणउ कल्लाणं ।
[2]आयरिसघरे केवललच्छीए जो सयं वरिओ ॥२८॥

[स प्रथमचक्रवर्ती भरतो भविकानां करोतु कल्याणम् ।
आदर्शगृहे केवललक्ष्म्या यः स्वयं वृतः ॥]

व्याख्या – **सो**ऽनन्यसामान्यगुणगरिम्णा जगद्विख्यातः **प्रथमचक्रवर्ती भरतो भविकानां कल्याणं** शिवं **करोतु** । यः किम् ? यः स्वयमात्मना रुच्येति भावः, 'वरिओ' **वृतो**ऽङ्गीकृतः । कया ? 'केवललच्छीए' **केवलज्ञानलक्ष्म्या** । किमुपशमस्थाने क्वापीत्याह - 'आयरिसघरे' **आदर्शगृहे** तच्च मोहस्यैकं निकेतनम् । यतोऽत्र विनश्वराशुचिकृतघ्नविभिन्नस्वरूपेऽपि वपुषि वैपरीत्येनाभिमानो भृशमुज्जृम्भते । अत एव **स्वयं वृतो**ऽसौ, न तु तेन सा वृत्ता । एतावता किमुक्तम् ? पूर्वस्मिन् भवे शुद्धशीलसाधुवैयावृत्त्यं यथाविधि वितन्तवाऽनेन तत्पुण्यगण्यमुपार्ज्यत, येन त्रिलोकीतिलकैरभिगम्ययापि केवललक्ष्म्या स स्वयमभिसृत इति ॥२८॥

अथात्मभाषाविभूषाय **बाहुबलि**गुणविलयं कलयन्नाह –

बालाण तवस्सीण य थविरगिलाणाण जेण साहूणं ।
वीसामणयं काही बाहुबली तेण बाहुबली ॥२९॥

[बालानां तपस्विनां च स्थविरग्लानानां येन साधूनाम् ।
विश्रामणामकार्षीद् बाहुबलिस्तेन बाहुबली ॥]

व्याख्या – **बाहुबलिर्भरतेश्वर**लघुभ्राता **बाहुबली** बाह्वोर्बलमतीव श्रेष्ठं यस्येति बाहुबली, तेन हेतुना, येन 'वीसामणयं काही' **विश्रामणामकार्षीत्** 'पूर्वजन्मनि'

---

१. दानेन भवन्त्युत्तमा भोगाः ।
२. क. ग. आयंस ।

इति शेषः । केषाम् ? 'साहूणां' **साधूनाम्** । किंविशिष्टानाम् ? 'बालाणं' **शैक्षकाणाम्** । न केवलमेषाम्, 'तवस्सीण य' तपो विद्यते येषां ते **तपस्विनस्तेषां च** । न केवलममीषां 'थविरगिलाणाणं' **स्थविरा** वयोवृद्धाः, **ग्लानाः** स्वाध्यायाध्ययनानुष्ठानखिन्ना रोगपीडिता वा ते तथा **तेषामिति** संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः, तच्चैतत् — 5

§§ अस्त्य**योध्ये**ति संपद्भिरूरीकृतजना पुरी ।
यद्वधूमुखलावण्यहन्तकारिनिशाकरम् ॥१॥
तारकाः प्रतिरूपन्ते नक्तं यन्मणिवेश्मसु ।
संगीतलब्धचन्द्रैणमुपलब्धुमिवागताः ॥२॥
जिनधर्मक्रियासूरान् पौरान् सौराद्यदर्पितान् । 10
कामार्थावनुवर्तेते यत्रैतौ किङ्करावि व ॥३॥
यत्र कल्पद्रुमानेवोपादानीकृत्य निर्मिताः ।
पौरास्ते दानिनस्तेन दृश्यन्ते च द्रुमा न ते ॥४॥
भोगिनस्तरुणा यत्र प्रियासङ्गमलालसाः ।
मुनयोऽपि महात्मानः प्रियासङ्गमलाऽलसाः ॥५॥ 15
सदासमदयापूर्णाशयाऽत्र बहुशोभया ।
देदीप्यते मुनिश्रेणीक्षोणीन्दोरपि संसदा ॥६॥

[उक्तानुक्तकर्तृपदः श्लोकः]

परितः परिखाम्भोधिवेलाशैल इवोच्चकैः ।
गुहागृहायितैः शालः शालते यत्र गोपुरैः ॥७॥ 20
पवनोल्लासितैः पापगलग्रहमुजैर्ध्वजैः ।
आनयन्तीव चैत्यानि यत्र दिग्भ्योऽपि संपदः ॥८॥
एकसत्येकमित्रैकबुधैकपुरुषोत्तमा ।
द्यौर्जितैकधनाध्यक्षा तदनेकजुषा यया ॥९॥

तस्यामिक्ष्वाकुवंशादिकन्दः श्रीऋषभः प्रभुः ।
आसीज्जिनोऽवसर्पिण्यास्तृतीयारे नरेश्वरः ॥१०॥

समस्ताचारचातुर्यं शिष्याचार्यतया तया ।
स्रष्टेत्यरूपि-पुरुषोत्तमनाभिप्रसूरसौ ॥११॥

मरुदेवा नृदेवानामपि वन्द्या कथं न सा ।
ययाऽऽदिक्षोणिमानाऽऽदिजिनश्चायमजन्यत ॥१२॥

निरागसो निरातङ्का निराशङ्का निरीतयः ।
सुप्रजाः सुप्रजास्तत्र प्रजापाले बभुः प्रजाः ॥१३॥

नर-व्यन्तर-विद्याभृद्देव-दानव-मानवः ।
यदाज्ञामवहन् दत्ता रक्षामिव शिरःस्थिताम् ॥१४॥

मारिः सारिफलं बन्धः स्रजं रोधश्च निम्नगाम् ।
कलिर्वनं विनाऽन्यत्र तस्मिन् नाजनि राजनि ॥१५॥

दूरेऽन्ये धन्विनः सन्तु भ्रूमात्राद् यत्र शास्तरि ।
इन्द्रस्तमुग्रधन्वापि नत्वाऽधत्त निजं धनुः ॥१६॥

शोभेव शेषकौलेन्द्रकुलाद्रिकमठादिभिः ।
धरेयं धार्यतेऽद्यापि प्रभावेणैव तस्य तु ॥१७॥

तारापुष्पोपहारेण मण्डितेऽम्बरमण्डपे ।
यत्कीर्तिनर्तकीरङ्गविटवद् भाति चन्द्रमाः ॥१८॥

सुमङ्गला सुनन्दा च तस्य पत्न्यावुभे शुभे ।
विरिञ्चनस्येव सावित्री गायत्री च बभूवतुः ॥१९॥

ताभ्यां सोऽयमनासक्तमना वैषयिकं सुखम् ।
भेजे भोगफलं कर्मौदासीन्येनैव सादयन् ॥२०॥

इतो बाहुः सुबाहुश्च भक्तिविश्रामणे क्रमात् ।
यतिपञ्चशतीवैयावृत्त्यं नित्यं वितेनतुः ॥२१॥

शुभेन विधिना तेन **बाहु**श्चक्रिपदप्रदम् ।
सुबाहुस्तु बलाधायि कर्म निर्मितवान् मुनिः ॥२२॥
प्रशंसां च तयोश्चक्रे **वज्रनाभ**मुनीश्वरः ।
तेन **पीठ-महापीठौ** जातौ दुर्मनसौ मुनी ॥२३॥
तदीर्ष्याजनितं कर्म ताभ्यामालोचनं विना । 5
स्त्रीभावफलदं चक्रे मायामिथ्यात्वयोगतः ॥२४॥
वज्रनाभमुनीन्द्रोऽर्हद्भक्त्यादिस्थानैः पुनः ।
विंशत्याऽऽराधयामास तीर्थकृन्नामकर्म सः ॥२५॥
क्रमात् पञ्चापि ते पूर्वलक्षानं दीक्षां चतुर्दश ।
पालयित्वाऽथ **सर्वार्थसिद्ध**श्रियमशिश्रियन् ॥२६॥ 10
ततोऽसौ **वज्रनाभा**त्मा च्युत्वाऽऽत्मा जगतामयम् ।
श्री**नाभि-मरुदेवा**ङ्गजन्मा **ऋषभो**ऽभवत् ॥२७॥
सुमङ्गला-सुनन्दे ते नन्दतः स्म सविस्मयम् ।
प्रियात्वं तस्य विश्वैकप्रभोः प्राप्य कथञ्चन ॥२८॥
अधादपूर्णषट्पूर्वलक्षा गर्भे **सुमङ्गला** । 15
तौ **बाहु-पीठयो**र्जीवौ च्युतौ **सर्वार्थसिद्ध**तः ॥२९॥
सुनन्दापि कृतानन्दा तदानीमुदरे दधौ ।
तौ **सुबाहु-महापीठौ** तत एव दिवश्च्युतौ ॥३०॥
दृष्ट्वा चतुर्दश स्वप्नानथ देवी **सुमङ्गला** ।
स्वाम्युक्तचक्रिमातृत्वप्रीता युग्ममसूत सा ॥३१॥ 20
सुतो **भरत** इत्यस्या **ब्राह्मी**ति च सुताऽभवत् ।
सुनन्दा बाहुबलिनं सुन्दरीमप्यजीजनत् ॥३२॥
पुनरेकोनपञ्चाशत्पुत्रयुग्मानि जीवसूः ।
असूत सुकृताहूतमङ्गलानि **सुमङ्गला** ॥३३॥

काश्मीरकीरकाबेरकाम्बोजकमलोत्कलाः ।
करहाटकुरूत्काणाक्रथकेशिककोशलाः ॥३४॥

केशकारुतकारुषकच्छकर्णाटकाकटाः ।
केककोल्लगिरी कामरूपकङ्कणकुन्तलाः ॥३५॥

कलिङ्गकलकूटौ च करकण्ठश्च केरलः ।
खसखर्खरखेटाश्च गौडाङ्गौ गोप्यगाङ्गकौ ॥३६॥

चौडचिल्लरचैद्याश्च जालन्धरकटङ्कणौ ।
टक्को डियाणडाहालतङ्गतायकतोसलाः ॥३७॥

दशार्णदण्डकौ देवसभनेपालनर्तकाः ।
पञ्चालपल्लवौ पौण्ड्रपाण्ड्यप्रत्यग्रथार्बुदाः ॥३८॥

बर्बराभीरभट्टीयमाहिष्मकमहोदयाः ।
मेरण्डमरुलौ मेदमेरुमुद्गमङ्कनाः ॥३९॥

मल्लवर्तमहाराष्ट्रयवनारामराढकाः ।
लाटब्रह्मोत्तरब्रह्मावर्तब्राह्मणवाहकाः ॥४०॥

विदेहवङ्गवैराटवनवासवनायुजाः ।
वाह्रीकवल्लवावन्तिवह्नयः शकसिंहलौ ॥४१॥

सुह्मसूर्परसौवीरसुराष्ट्रसुहडास्मकाः ।
हूणहूरकहम्यौंजहंसा हुडुकहंरकौ ॥४२॥

इत्यष्टानवतिः सर्वेऽप्यभ्यधीयन्त ते सुताः ।
स्वामिना कृततज्जन्मोत्सवेनोत्सवपूर्वकम् ॥४३॥

स्वामिनस्तान्यपत्यानि धात्रीभिः पञ्चपञ्चभिः ।
पाल्यमानान्यवर्धन्त भावनाभिर्व्रतानि वा ॥४४॥

विभोर्धर्मशताङ्गस्याङ्गानीव शतमङ्गजाः ।
रेजिरे ते च ते च द्वे वैजयन्त्याविवाङ्गजे ॥४५॥

भरताय कला **बाहुबलये**ऽश्वादिलक्षणम् ।
ब्राह्मयै लिपीर**पीक्ष्वाकुः सुन्दर्यै** गणितं ददौ ॥४६॥

सदानक्षत्ररोचिष्णुकटकश्रेणिशोभिताः ।
विराजन्ति विभोः पुत्राः पादा इव गिरीशितुः ॥४७॥

§§ "**अथैकदा समुन्मील्य चक्षुरान्तरमात्मनः ।**
विभुर्व्यभावयद् दुःखवेष्टितं भवचेष्टितम् ॥४८॥

गतसारेऽत्र संसारे सुखभ्रान्तिं शरीरिणाम् ।
लालापानमिवाङ्गुष्ठे बालानां स्तन्यविभ्रमः ॥४९॥

उत्पद्यन्ते विपद्यन्ते तद्रसास्वादसादराः ।
शरीरिणोऽत्र संसारे कृमयो गोमये यथा ॥५०॥

लोकः परिचितद्वेषी नवेच्छश्चेत्यहो ! मृषा ।
यद् भवे न विरज्येत न रज्येतापुनर्भवे ॥५१॥

दुःखात्मनि भवे सक्तां शलभा इव दीपके ।
न कल्याणे तु वैकल्यादङ्गिनोऽमी सुखात्मनि ॥५२॥

सरस्तोयमिवास्थास्नु भवसौख्यमुपाधिजम् ।
निरुपाधि शिरानीरमिव मुक्तिसुखं स्थिरम् ॥५३॥

तदाश्रित्य व्रतं पारवर्त्मेव भवनीरधेः ।
मोक्षं यामि जनोऽप्येष यथा मामनुवर्तते" ॥५४॥

अत्रान्तरेऽन्तरुद्भूतालोको **लोकान्तिकैः** सुरैः ।
व्यज्ञप्यतेति कल्पज्ञैः समयज्ञोऽपि स प्रभुः ॥५५॥

अवसर्पिण्यामिहाज्ञानतमःप्रकरभास्कर ! ।
राज्यवत् प्रथमं नाथ ! धर्मतीर्थं प्रवर्तय ॥५६॥

इति विज्ञप्य यातेषु तदा तेषु जगत्पतिः ।
भरतं बाहुबल्यादियुतं सुतमजूहवत् ॥५७॥

प्रणम्याग्रे निविष्टाय तस्मै स्वामीदमादिशत् ।
वत्स ! राज्यमिदं धत्स्व प्रविव्रजिषवो वयम् ॥५८॥

"प्राह वाणीमिमां पाणी संपुटीकृत्य सोऽप्यथ ।
राज्यं त्वत्सेवनादन्यत् तातेच्छामि न किञ्चन ॥५९॥

त्वदग्रे प्लवमानस्य स्वेदाम्भोऽभिमतं यथा ।
तथा तात ! न मे राज्याभिषेकावर्जितं पयः ॥६०॥

तात ! त्वच्चरणाम्भोजरजसा मे यथा मुदः ।
न तथा पट्टबन्धेन मूर्ध्नि साम्राज्यशंसिना ॥६१॥

यथा तुष्यामि ते तात ! सुप्रसादविलोकितैः ।
तथा न वारवनितोल्लासितैः सितचामरैः ॥६२॥

छायां पुरो निविष्टस्ते हस्तेन स्पृशता शिरः ।
यथा भेजे तथा नाहमातपत्रेण कर्हिचित् ॥६३॥

त्वदीयशासनगिरा प्रीयेते मे यथा श्रुती ।
न तथा तात ! संभ्रान्तबन्दिवृन्दसुभाषितैः" ॥६४॥

"सेवारम्भरतं प्राह **भरतं** प्रभुरप्यथ ।
वत्स ! सेवा पितुः सेयमाज्ञाऽवज्ञायते न यत् ॥६५॥

अन्वर्था नन्दनास्ते ये सितासितकृतः पितुः ।
परेऽङ्गजत्वमात्रेण द्वेष्यां खलु मला इव ॥६६॥
निश्चिन्ता मुक्तिहेतूनि कुर्वन्तो न पतन्ति यत् ।
पूर्वजा वत्स ! तनयस्तेनापत्यमितीष्यते ॥६७॥

पुरुषार्थत्रयीभारमाद्रियस्व तदद्य मे ।
निश्चिन्तोऽहं चतुर्थाय पुमर्थाय यते यतः" ॥६८॥

आज्ञां सुरासुरैर्मान्यां निशम्येति निशातधीः ।
द्विधाऽप्यवाङ्मुखस्तस्थौ **भरतः** पुरतः प्रभोः ॥६९॥

स्वाम्यादिष्टास्ततो हृष्टाः सचिवाः शुचिवारिभिः ।
भरतं परतन्त्रेच्छमभ्यषिञ्चन् पितुः पदे ॥७०॥

तद्बाहुबलिमुख्यानामपि बाहुबलिस्पृशाम् ।
विभुर्विभज्य भूभागानङ्गजानामदाद् मुदा ॥७१॥

दत्तवार्षिकदानोऽथ **चैत्रश्यामाष्टमी**तिथौ । 5
दिवाचन्द्रोत्तराषाढायोगे यामे च पश्चिमे ॥७२॥

सुरासुरनरैः सेन्द्रैः कृतनिष्क्रमणोत्सवः ।
व्रतकामी वनं स्वामी **सिद्धार्था**भिधमभ्यगात् ॥७३॥ युग्मम् ॥

शिबिकायास्तदोत्तीर्य तले किङ्किल्लिभूरुहः स्वयं ।
जगदलङ्कारोऽलङ्कारानमुचद् विभुः ॥७४॥ 10

श्रृङ्गे सुवर्णशैलस्य सिद्धसिन्धुप्रवाहवत् ।
वासवोंसेऽथ देवस्य देवदूष्यं न्यवेशयत् ॥७५॥

दशमद्वाररोधेन सापराधानिव प्रभुः ।
ततश्चतसृभिः केशानुच्चखानैष मुष्टिभिः ॥७६॥

स्कन्धकल्याणकुम्भाग्रपल्लवाः सन्त्वमी कचाः । 15
इत्यसौ पञ्चमीं मुष्टिममोचि वृत्रविद्विषा ॥७७॥

ततः क्षीरार्णवे क्षिप्त्वा केशमुष्टिचतुष्टयम् ।
तुमुले कुलिशास्त्रेण सकले मुकुरीकृते ॥७८॥

चीर्णाष्टमतपाः स्वामी कृत्वा सिद्धनमस्क्रियाम् ।
सर्वसावद्ययोगानां प्रत्याख्यानमुदीरयन् ॥७९॥ 20

अङ्गीचकार चारित्रं वहित्रं भवनीरधेः ।
तन्मनःपर्यवज्ञानमरित्रीमिव चाददे ॥८०॥ विशेषकम् ॥

चतुःसहस्रसंख्यैश्च समं भर्त्रा समन्ततः ।
भूपैः **कच्छ-महाकच्छ**मुख्यैर्दीक्षा तदाददे ॥८१॥

स्तुत्वा नत्वा च यातेषु सुतेषु त्रिदशेष्वपि ।
मौनेन जगदाधारो विजहारोर्वरातले ॥८२॥

विभुना भ्रमता प्रापि भिक्षा न क्वापि पारणे ।
भिक्षानभिज्ञः स्वर्णादि तदा लोको ह्यढौकयत् ॥८३॥

तथाप्यनार्तः क्षुत्तृष्णाघातैः **कच्छादि**भिः प्रभुः ।
आलोच्याऽमोचि तस्थे च **गङ्गा**प्रस्थे फलाशनैः ॥८४॥

§§ अथ **कच्छ-महाकच्छसु**तौ पूर्वनियोजितैः ।
तदा **नमि-विनम्या**ख्यौ पित्रोः पादान्तमीयतुः ॥८५॥

अथैतौ प्रेषितौ ताभ्यां सेवितुं **भरतेश्वरम्** ।
अभ्यधत्तां गिरं गर्वगिरिस्रोतस्विनीमिति ॥८६॥

विभुं विहाय **नाभेयं** नावां सेवावहे परम् ।
घनाद् विनाऽन्यतस्तोयं किं बप्पीह समीहते ? ॥८७॥

सन्धामिति विधायाथ पित्रोरापृच्छय च क्रमान् ।
प्रभुं गत्वा च नत्वा च तौ व्यजिज्ञपतामिति ॥८८॥

क्षेत्रमात्रापि किं तात ! भागेऽस्माकं न भूरभूत् ? ।
विज्ञप्तोऽपीत्यदाद् वाचं ताभ्यां वाचंयमो न सः ॥८९॥

अथ भक्तिमतन्वातां तौ भर्तर्यवक्तर्यपि ।
नेत्रैः कक्षापटः स्वर्गवासो वेति कृताग्रहे ॥९०॥

तत्कृपाणरूयीमध्यगतो विभुरशोभत ।
जलकान्त इवापास्तपापनीरो भवाम्बुधौ ॥९१॥

प्रभुं प्रणन्तुमायातोऽन्यदाऽहीन्दुरुवाच तौ ।
कौ युवां संश्रितौ किं वा मौनध्यानधनं जिनम् ? ॥९२॥

पृष्टाविति **फणीन्द्रे**ण हृष्टावेतस्य तावपि ।
एकस्वामिव्रतावात्मवित्ताग्रहमशंसताम् ॥९३॥

तयोः **फणिपतिः** प्रीतः **प्रज्ञप्ति**प्रमुखां ददौ ।
पाठसंसिद्धविद्याष्टचत्वारिंशत्सहस्त्रिकाम् ॥९४॥

विद्याः किलैता **वैताढ्यं** दक्षिणोत्तरपक्षयोः ।
प्राभवं प्रथयिष्यन्ति भवतोरित्युवाच च ॥९५॥

प्रभुप्रभावसंप्राप्तविद्यौ हृद्यौजसाविमौ । 5
गतौ **वैताढ्य**मावेद्य पितृभ्यां **भरताय** च ॥९६॥

वर्षान्तेऽथ विभुः श्रेयान् **श्रेयांसो**द्भुतश्रिया ।
अकार्यतेक्षुसारेण पारणं पुण्यकारणम् ॥९७॥

अथ वर्षसहस्रान्ते विश्रान्तेषु विकर्मसु ।
फाल्गुने मासि **कृष्णा**यां प्रहरे**कादशीतिथौ** ॥९८॥ 10

चन्द्रे च **सोत्तराषाढे** न्यग्रोधस्य तरोस्तले ।
अवाप केवलज्ञानं शुक्लध्यानधनो जिनः ॥९९॥ युग्मम् ॥

तदैत्य वासवा भक्तिकलिताश्चलितासनाः ।
स्वामिनः केवलोत्पत्तिमहिमानं वितेनिरे ॥१००॥

§§ "इतश्च भक्तिभरतो **भरतो** मातरं पितुः । 15
तदागमद् नमस्कर्तुं कुलदेवीमिवात्मनः ॥१०१॥

तां च पुत्रवियोगार्त्यां कुर्वन्तीमश्रुवर्षणाम् ।
नीलीलुप्तदृशं मेघच्छन्नार्केन्दुं यथा दिवम् ॥१०२॥

पौत्रोऽद्याऽऽयानयं मातस्त्वत्पादानभिवन्दते ।
विज्ञप्यैवं प्रणम्यास्या न्यविक्षद् **भरतः** पुरः ॥१०३॥ 20

अथ तेनात्मपुत्रेण समं प्रोषितसंमदा ।
तदा सा निजगादेति शोकगद्गदया गिरा ॥१०४॥

अवनं श्रितवान् वत्स ! त्वमतुच्छपरिच्छदः ।
मदीयपुत्रको गात्रमात्रस्तु वनमासदत् ॥१०५॥

शरीरे सुकुमारे यत् तपस्तेन निवेशितम् ।
पद्मपत्रपुटीपात्रे तत् प्रदीपः प्रवर्तितः ॥१०६॥

क्व तास्तस्याद्भुताभोगभोगमुख्याः सुखश्रियः ?
क्वेदानीं शीतवातादिपुष्टाः कष्टास्तपःश्रियः ? ॥१०७॥

नाशनं नासनं नैव प्रच्छदं न परिच्छदम् ।
अवगच्छामि वत्सस्य जीवाम्यद्यापि पापिनी'' ॥१०८॥

भरतस्तामथावादीदनादीनवया गिरा ।
मातः ! प्रसीद तस्य त्वं मत्तातस्य जनन्यसि ॥१०९॥

''विज्ञापि किमविज्ञेव पुत्रवात्सल्यमोहिता ।
विचिन्तयसि तातेऽपि मातर्मानवमात्रताम् ? ॥११०॥

स हित्वा लोकिकीं लक्ष्मीं लिप्सुरलोकोत्तरां श्रियम् ।
यद् विधत्तेऽधुना मातस्त्वं फलं तस्य पश्यति'' ॥१११॥

पवित्रामिति पौत्रस्य समासाद्य सरस्वतीम् ।
सा विषादनिषादस्य मालिन्यं यावदत्यजत् ॥११२॥

ज्ञापितौ वेत्रिणा तावत् पुरुषौ द्वावथेयतुः ।
तयोरेकोऽवदत् प्रीतिरोचितो रचिताञ्जलिः ॥११३॥

दिष्ट्याऽद्य वर्धसे देव ! कानने शकटानने ।
उत्पेदे केवलज्ञानं **युगादिजगदीशितुः** ॥११४॥

अथावदद् द्वितीयस्तमद्वितीयगुणं नृपम् ।
आविरासीत् प्रभो ! चक्रर्नामायुधवेश्मनि ॥११५॥

पूर्वं तातस्य कुर्वेऽहं महं चक्रस्य वाऽथवा ।
क्व परत्र हितस्तातश्चक्रं च क्वेदमैहिकम् ? ॥११६॥

ध्यात्वेति तुष्टिदानेन हृष्टवन्तौ विसृज्य तौ ।
मरुदेवामिति प्रीतिभरतो **भरतो**ऽभ्यधात् ॥११७॥

मातः ! सुतवियोगेन दुःखिता त्वं पुरा चिरम् ।
रूक्षाक्षरं समादिक्षः परं पश्य सुतश्रियम् ॥११८॥

पितामहीं महीन्द्रोऽभिधायेत्यारोप्य च द्विपम् ।
आत्मनापि समारोहत् कृतकौतुकमङ्गलः ॥११९॥

सान्तः पुरपरीवारो नगराद् निरगादयम् ।
हास्तिकाश्वीयपातसैन्यसंचलितावनिः ॥१२०॥

अथ व्रजन् गजारूढो **मरुदेवा**मुवाच सः ।
मातराकर्ण्यतामात्मसुतवैभवमद्भुतम् ॥१२१॥

रूप्यकल्याणमाणिक्यमयशालत्रयं सुराः ।
इदं यद्देशनासद्म चक्रिरे शक्रशासनात् ॥१२२॥

अथ वन्दारुभिर्वृन्दारकैर्बन्दिवरैरिव ।
त्वत्पुत्रस्य पुरो मातः ! क्रियते विजयध्वनिः ॥१२३॥

अयं दुन्दुभिराकाशे घनाघन इव ध्वनन् ।
मातस्त्वत्पुत्रसेवार्थमिवाह्वयति दिक्पतीन्'' ॥१२४॥

श्रुत्वेति **मरुदेवा**या हर्षबाष्पामृतैस्तदा ।
नेत्रयोर्नीलिकापङ्क्तिः साक्षात् प्रक्षालितः क्षणात् ॥१२५॥

स्वयमेवाथ पश्यन्ती सा तादृग्विभुवैभवम् ।
आनन्दविस्मयस्मेरलोचनेदमचिन्तयत् ॥१२६॥

'अये ! वैभवमस्तीदृग् मद्भुवो भुवनाद्भुतम् ।
भरतस्य वराकस्य वृथा दोषमदामहम् ॥१२७॥

शयिनो यावदुत्सङ्गे सुतास्तावत् किलात्मनः ।
यदीदृग्वैभवः पुत्रो मय्यौदासीन्यवानयम् ॥१२८॥

मुधा तदहमप्यासं पुत्रमोहकदर्थिता ।
स्वार्थं विनाऽत्र संसारे न स्वः कस्यापि कोऽपि यत्'' ॥१२९॥

इत्यस्यां सह मोहेन विलीनं चित्तमप्यथ ।
तद्विप्रतारकस्थानभरदानभयादिव ॥१३०॥

परमे परमेश्वर्यास्तस्या ज्ञाने विजृम्भिते ।
आत्मा शरीरमप्यौज्झद् न स्वमेतदपीति वा ॥१३१॥

अस्यामस्यावसर्पिण्यां प्राच्यसिद्धस्य तद् वपुः ।
अभ्यर्च्य निदधुस्तूर्णं विबुधाः क्षीरनीरधौ ॥१३२॥

भरतः शोकहर्षाभ्यां कवोष्णश्रुविमिश्रदृक् ।
स्वामिनो देशनासद्म प्रविशेश यथाविधि ॥१३३॥

त्रिः परीय जगन्नाथं प्रणिपत्य च भूपतिः ।
निषसाद यथास्थानं पद्मकोशीकृताञ्जलिः ॥१३४॥

आयोजनविसर्पिण्या सर्वभाषानुरूपया ।
भारत्या भगवान् धर्मदेशनामिति निर्ममे ॥१३५॥

"असावपारसंसारपारावारान्तरा तरी ।
धर्मप्रवृत्तिरेकैव युज्यते कर्तुमात्मसात् ॥१३६॥

सर्वदेशविरत्यात्मभेदाभ्यां सा दिरूपभाक् ।
शीघ्राद्यभेदा व्यस्तान्यभेदा मोक्षाय गच्छति ॥१३७॥

दान-शील-तपो-भावफलकैः परिकल्पितां ।
सुसम्यकत्वप्रतिष्ठानासदा चारित्रशोभिता ॥१३८॥

गुरूपदेशनिर्यामवाचा संचारिता जनैः ।
कर्मावर्ताष्टकं हित्वा परं पारं प्रयात्यसौ ॥१३९॥ युग्मम् ॥

तद् मोक्ष इति विख्यातमनन्तमपुनर्भवम् ।
अनामयमनाबाधमचलं शिवमक्षयम्" ॥१४०॥

श्रुत्वेति स्वामिनः शर्मदेशिनीमिति देशनाम् ।
यतिधर्ममधुः केऽपि श्राद्धधर्मं च केचन ॥१४१॥

व्रतिनः **पुण्डरीका**द्याः साध्व्यो **ब्राह्मी**पुरस्सराः ।
श्राद्धाः **श्रेयांस**मुख्याश्च श्राविकाः **सुन्दरी**मुखाः ॥१४२॥
इत्थं चतुर्विधः सङ्घः स्थापितः प्रभुणा तदा ।
पूज्यतेऽद्यापि लोकेषु देव-दानव-मानवैः ॥१४३॥
तदोत्पत्ति-व्यय-ध्रौव्यत्रिपदीतो विनिर्ममे । 5
द्वादशाङ्गी गणधरैः **पुण्डरीका**दिभिः प्रभोः ॥१४४॥
अथ स्वामी चामीकरगिरिवरो जङ्गम इवा-
सुरेन्द्रैर्देवेन्द्रैर्मुनिभिरपि तैस्तैः परिवृतः ।
व्यहार्षीदुत्कर्षी प्रमदभरतः किञ्च **भरतः**,
क्षमाचन्द्रोऽतन्द्रोदयनिधि**रयोध्या**मधिययौ ॥१४५॥ 10

॥ इति भरतभूषणनामनि महाकाव्ये प्रथमः सर्गः ॥

● ● ●

§§ अथायुधागारमुपेत्य चक्ररत्नं नभोरत्नमिवावतीर्णम् ।
युक्तं सहस्रेण करैरिवारैर्ननाम भूमान् **भरतो**ऽभितुष्टः ॥१॥
नैवेद्यजातैर्नवभिर्वितन्वन् पूजामघं पार्थिवपूजनीयः ।
तस्याहितक्ष्माभृदनिष्टमष्टाहिकोत्सवं सारमतिश्चकार ॥२॥ 15
अथानुचक्रं दिशि जृम्भजेतुर्महेभरत्नेन महीमहेन्द्रः ।
प्रास्थानिके लग्नदिने स जातप्रस्थानकल्याणविधिः प्रतस्थे ॥३॥
छत्राश्वसेनान्यसिदण्डचर्मपुरोधसः काकिणिवर्धकी च ।
मणिः कुडुम्बीत्यपराणि रत्नान्यनेकशोऽमूनि तमन्वगुश्च ॥४॥
प्रयाणढक्का **भरता**ग्रसैन्यनरैरताड्यन्त भृशं रसन्त्यः । 20
तदा रिपूणां हृदयानि किन्त्वाश्चर्यं व्यदीर्यन्त दिगन्तरेषु ॥५॥

सेनाशतक्षोदितभूमिगोलप्रेङ्खोलधूलीस्थगितस्तदाऽर्कः ।
भेरीरवत्रस्ततुरङ्गकृष्टरथः पपातेव कुहापि कुञ्जे ॥६॥

अस्मत्प्रभोः सैन्यभरेण भग्नफणाः फणीन्द्रो मियते वराकः
इतीव तक्षन्त इलां किलाश्ववराः खुराग्रैस्तलिमां वितेनुः ॥७॥

रथा रथाङ्गध्वनिर्भिमहेभा गर्जाभिरश्वा अपि हेषितेन ।
जनो जनैः शब्दपरम्पराभिरलक्ष्यत क्षोणिरजोऽन्धकारे ॥८॥

ध्वस्तालकेव ग्लपितैर्वनान्तैः खुरैर्हरीणां सनखक्षतेव ।
प्रम्लानमाल्येव जलैर्विदूनैर्भुक्तोज्झिता भूः कटकैस्तदाऽऽसीत् ॥९॥

अथानुचक्रं **भरतेश्वर**स्य यान्ती द्विगव्यूतिमितैः प्रयाणैः ।
सा वाहिनी पूर्वपयोधिकान्तोपकण्ठसंश्लेषवती बभूव ॥१०॥

तत्कालमाद्वादशयोजनान्तं समन्ततो वर्धकिनिर्मितेषु ।
समावसन्नाशु निवासकेषु तत्सैनिकाः स्वेष्विव मन्दिरेषु ॥११॥

तत्रादधात् पौषधशालिकां च रत्नोच्चयैर्वार्धकिरत्नमुच्चैः ।
महेभशैलादवतीर्य सत्यां देवो व भास्वान् **भरतो** विवेश ॥१२॥

कुशीलशास्ता कुशसंस्तरे स कृतोपवासत्रितयोऽह्नि तुर्ये ।
स्नात्वाऽथ कृत्वा बलिकर्म शस्त्रपूर्णं रथं सौर्यमिवारुरोह ॥१३॥

स वीरघण्टायुगयुग्मरम्यं द्वीन्दुं द्विभास्वन्तमिवामराद्रिम् ।
महारथः सारथिना प्रणुन्नस्थ्यं समुद्रेऽथ रथं निनाय ॥१४॥

नाभेयसूरम्भसि नाभिदघ्ने रथं समुद्रान्तरथो निवेश्य ।
अधिज्यकोदण्डगुणप्रणादाद् यादांसि चक्रे चकितश्रवांसि ॥१५॥

पयोनिधे**र्मागध**तीर्थनाथदेवं वशीकर्तुमसौ नृदेवः ।
स्वनामचिह्नं किल धूतबाणमुद्धूतरुग्दूतमिवोत्ससर्ज ॥१६॥

सपक्षसूत्कारभरेण भीमः शर गरूत्मानिव चण्डवेगः ।
गत्वा सभां **मागध**तीर्थभर्तुर्भर्तुर्जयस्तम्भ इवोल्ललास ॥१७॥

उद्वीक्ष्य तं कोपकडारचक्षुरित्यब्रवीत् पूर्वपयोधिपाता ।
अरे ! सभायां मम कः ससर्ज शरं करं मौलिमणाविवाहेः ? ॥१८॥
इति ब्रुवाणः स्वयमेव बाणमुत्थाय तं पाणितले चकार ।
प्रकोपकम्प्राधरपल्लवस्तत्पुङ्खाक्षरश्रेणिमवाचयच्च ॥१९॥
नाभेयजन्मा भरताभिधानः समेत्य शास्ता दिशतीति चक्री । 5
यच्छन्तु दण्डं मम रत्नराज्या राज्यानि कर्तुं यदि वोऽस्ति वाञ्छा ॥२०॥
इत्यक्षरालीमवलोक्य मन्त्रमिवोरगस्तत्क्षणमाप्य शान्तिम् ।
रत्नौघमादाय च **मागधे**शस्तमादिचक्रायुधमाजगाम ॥२१॥
तत्काण्डदण्डेन समं स दण्डं समर्प्य तं प्राञ्जलिरित्युवाच ।
अद्याद्यहं देव ! तव प्रसादवशाद् वसामीह निदेशकारी ॥२२॥ 10
श्रुत्वेति तद्भक्तिवचः प्रसन्नचेताः स चक्री तमथो विसृज्य ।
निवर्तयामास रथं पयोधेः संरम्भतः स्वस्य मनोरथं च ॥२३॥
निष्कण्टकोऽसौ कटकं समेत्य द्विड्वारणो निर्मितपारणोऽथ ।
अष्टाहिकां **मागध**तीर्थनाथमुद्दिश्य चक्री रचयाञ्चकार ॥२४॥
क्रमादपाच्यां **वरदाम**तीर्थाधिपं **प्रभासा**धिपतिं प्रतीच्याम् । 15
सिन्धुस्रवन्तीपतिमप्यजैषीत् प्राग्वद् मनीषी **भरतो** नृपेन्द्रः ॥२५॥
सैन्यैरदैन्यैरनुचक्ररत्नं गन्ता दिगन्तानपि गाहमानः ।
वैताढ्यशैलं **भरतार्ध**फालीद्वयान्तरासीवनिकामगात् सः ॥२६॥
सैन्यं निवेश्यास्य च दक्षिणस्यामुपत्यकामामथ पार्थिवेन्द्रः ।
विशिष्टभासा तपसाऽष्टमेनाचकर्ष **वैताढ्यकुमार**देवम् ॥२७॥ 20
आगत्य सद्यश्चलितासनोऽस्मै प्रौढानि कृत्वापि च ढौकनानि ।
अद्यादि दासोऽस्मि तवेत्युदित्वा यथागतं सोऽपि जगाम धाम ॥२८॥
कृत्वा नृपः पारणमाहिताष्टाहिकोऽथ सेनापतिरत्नमूचे ।
सखे ! **सुषेणा**भिध ! शाधि **सिन्धु-वैताढ्ययो**र्दक्षिणनिष्कुटं त्वम् ॥२९॥

उत्तीर्य **सिन्धुं** कृतचर्मरत्नसेतुं **सुषेणो**ऽपि ततः सुखेन ।
म्लेच्छान् विजित्यैत्य च सर्वदण्डं दण्डाधिपो ढौकयति स्म तस्मै ॥३०॥

दिष्टः पुनश्चक्रभृता **तमिस्त्रां** गुहामथोद्घाटयितुं **सुषेणः** ।
उद्दिश्य चक्रे **कृतमाल**यक्षमष्टाहिकां तत्र कृताष्टमान्ते ॥३१॥

ततोऽश्वरत्नाधिगतः कपाटेर्त्रिदण्डरत्नेन जघान तस्याः ।
भिन्ने च ते ग्रन्थिदले यथैवापूर्वेण कर्णे करणेन पूर्णम् ॥३२॥

अथ प्रतीपत्वरिताश्वरत्नेनैत्येत्यनेनात्मविभोर्न्यवेदि ।
चक्री त्वचालीद् मणिरत्नमस्य निवेश्य कुम्भेऽधिगतो महेभम् ॥३३॥

गुहां **तमिस्त्रा**मविशत् तमिस्त्रावलीं विलुम्पन् मणिरत्नभासा ।
स्वसैनिकैः साकमयं शशाङ्कः इवोडुभिः क्रोडमिवाम्बरस्य ॥३४॥

अनुप्रयातां ध्वजिनीजनानामालोकहेतोः पविकाकिणीतः ।
एकोनपञ्चाशतमर्कभांसि चक्री चकारापि च मण्डलानि ॥३५॥

पाषाणतार्यां रयभीषणां **चोन्मग्ना**मदीनानुचरो नदीं सः ।
अलङ्घयद् वार्धकिबद्धसेतुमतूलतार्यामिह निम्ननां च ॥३६॥

उदग्गुहाद्वारकपाटदत्तविनिर्गमोऽसौ विलसत्प्रतापः ।
चक्रेण राजन् दिवसोऽंशुनेवोत्तरं विजेतुं **भरतार्ध**माटत् ॥३७॥

सम्पातसंज्ञैरिह भिल्लभूपैरदृष्टपूर्वाभिभवैरदान्तैः ।
तस्यातिघोरोऽजनि सङ्गरस्तत्तातस्य दुष्टैरिव कर्मवीरैः ॥३८॥

तैरग्रसैन्ये तरलीकृतेऽस्याश्वरत्नमारुह्य धृतासिरत्नः ।
चचाल सेनापतिरत्नमेत्तान् हन्तुं सितध्यानमिवान्तरारीन् ॥३९॥

तेन **व्यधीयन्त** गतप्रपञ्चाः पञ्चाननेव गजा द्विषन्तः ।
गत्वा च ते **सिन्धु**तटान्तमारादाराधयन्नात्मकुलाधिदेवान् ॥४०॥

तदा तदाराधनतोऽभ्युपेत्येत्याहुः सुरा **मेघमुखा**भिधास्तान् ।
हंहो ! महोत्साहभरेण **वत्सा** विधानमारम्भि मुधा किमेतत् ? ॥४१॥

दूरे वयं जेतुमयं न शक्यः पुरन्दरेणापि कृतादरेण ।
तथापि युष्मज्जनितान्निरोधाद् विधास्यते कश्चिदुपप्लवोऽस्य ॥४२॥

पुरः प्रतिश्रुत्य तदेतदेषां ते व्यन्तरा **मेघमुखा**भिधानाः ।
विकृत्य मेघान् नवचक्रिसैन्योपरि व्यधुर्वृष्टिमतीव घोराम् ॥४३॥

वर्षद्भिरुच्चैर्मुशलप्रमाणधाराभिरन्धातमसं सृजद्भिः । 5
अराणि मेघैः श्रुतिकोटराणि विदारयद्भिस्तडितो वमद्भिः ॥४४॥

जाते तदानीं कटकस्य कण्ठदघ्ने घनाम्भस्यभितः क्षणेन ।
चक्री स्वहस्तेन स चर्मरत्नं व्यस्तारयद् द्वादश योजनानि ॥४५॥

तसस्योपरिष्टात् कटकेऽधिरूढे सच्छत्ररत्नं च ततान तरूत् ।
तद्दण्डमौलौ मणिरत्नमात्मलोकावलोकाय ततान देवः ॥४६॥ 10

उप्तानि धान्यानि कुडुम्बिरत्नेनाह्नो मुखेऽन्ते च गतानि सिद्धिम् ।
प्राप्तानि शश्वत् प्रतिवेश्म सैन्यजनस्य दैन्यप्रसरं ममन्थुः ॥४७॥

चर्मातपत्ररूयसंपुटं तत्तोयान्तरालेतरदण्डतुल्यम् ।
ब्रह्माण्डसंज्ञा भुवनेऽत्र शङ्के विलोक्य लोकेन तदादि चक्रे ॥४८॥

सप्ताश्वतेजाः किल सप्तमेऽह्नि चकार चिन्तामिति चक्रवर्ती । 15
यत्प्रत्यनीकं प्रथते ममापि कः प्रत्यनीकोऽजनि धूमयोनेः ? ॥४९॥

इत्यस्य चिन्तामवधार्य चित्तानुवर्तनध्यानपरास्तदैवाः ।
सुराः सहस्रां खलु षोडशापि बभाषिरे **मेघमुखा**नुपेत्य ॥५०॥

रे रे शठाः ! केन हठाशयेन दैवेन दत्ता मतिरीदृशी वः ? ।
चक्री भवद्भिर्यदि नेक्षितोऽयं तत् किं समाकर्ण्यत नाख्ययापि ? ॥५१॥ 20

तद् यात तद्देवहताः सुदूरमरे ! नरेन्द्रो न हि यावदेषः ।
चक्रेण शक्रायुधदुःसहेन भिनत्ति भीमो भवतां शिरांसि ॥५२॥

श्रुत्वेत्यमी यक्षवचांसि काकनाशं प्रणेशुद्रुतमेव देवाः ।
घनौघमुक्तः प्रततताप चार्कस्तदार्षभेर्मूर्त इव प्रतापः ॥५३॥

म्लेच्छाधिपास्ते सह वाजिहस्तिप्रष्ठैः कनिष्ठाङ्गुलिमात्रदानात् ।
एत्यार्षभिं क्रुद्धमतीव दक्षा निजोत्तमाङ्गानि ततो रक्षुः ॥५४॥

अथोत्तरं सिन्धुतटं सुखेन सुषेणसेनापतिना विजित्य ।
अक्षुद्रधीः क्षुद्रहिमालयं स चक्री गुणक्रीतयशा जगाम ॥५५॥

गिरेर्नितम्बे किल दक्षिणेऽस्य निवेश्य विष्वक् शिबिरं नरेशः ।
कृत्वाष्टमं स्यन्दनसंस्थितोऽथ ससर्ज बाणं हिमवत्कुमारे ॥५६॥

द्वासप्ततिं तं खलु योजनानि गत्वा पतन्तं हिमवत्कुमारः ।
दृष्ट्वाऽत्र नामापि निरीक्ष्य शान्तकोपो नृपं प्राप समं शरेण ॥५७॥

विनिर्मितोपायनमार्षभिस्तं विसृज्य तत्रर्षभकूटकूटे ।
जयप्रशस्तिं निजनामचिह्नामह्नाय चक्रे किल काकिणीतः ॥५८॥

अष्टाहिकां तत्र समाध्य चक्री चक्रानुगो दिग्विजयाद् निवृत्तः ।
उदग्नितम्बे कटकानि कान्त्याद्वैतानि वैताढ्यगिरेरनैषीत् ॥५९॥

तस्मिन् विजेतुं विनमिं नमिं चोदग्दक्षिणश्रेणिखगाधिनाथौ ।
अभ्यक्षिपत् क्षोणिभृतां प्रतीक्षः क्षणादभग्नप्रसरं शरं सः ॥६०॥

क्रुद्धावथ द्वावपि वीक्ष्य सद्यस्तं सायकं भूपतिनायकस्य ।
विद्याधरानीकयुतौ समीकमाधातुमेतेन समीयतुस्तौ ॥६१॥

दलान्ययुध्यन्त समत्सराणि तेषां मिथो द्वादश वत्सराणि ।
एकानि भूमौ दिवि चापराणि नाराचतीरीशरचापराणि ॥६२॥

अथार्षभिः सङ्गरतर्षभिन्नमनाः पुनानः स्वयमात्मसैन्यम् ।
कोदण्डमुद्दण्डपराक्रमोऽरीञ्जेतुं भुजे तुङ्गरथो बभार ॥६३॥

भूस्थो नभःस्थानभितोऽपि राधावेधं वितन्वन्निवचक्रवर्ती ।
विव्याध विद्याधरसैन्यवीरान् धीराशयो व्योमसदां समक्षम् ॥६४॥

स्वस्मिन् खगेशौ विवशेऽथ सैन्ये प्रह्वौ सुबह्वौ जसिकावपीमौ ।
एत्यार्षभिं तं विनमि-र्नमिश्च प्रणम्य साष्टाङ्गमसान्त्वयेताम् ॥६५॥

नाभेयजन्मन्निदमावयोस्त्वं क्षमापते ! दुर्ललितं क्षमस्व ।
सतां हि भूयानपि गाढरूढाटोपः प्रणामावधिरेव कोपः ॥६६॥

अथ प्रसन्नस्य **नमि**श्चिरत्नान्यमुष्य रत्नान्युपदीचकार ।
स्त्रीरत्नमेकं **विनमिः सुभद्रां** पुत्रीं तु मूर्तामिव चक्रिलक्ष्मीम् ॥६७॥

तुष्टाशये**नार्षभिणा** विसृष्टाविमौ विशिष्टाशयकौ स्वराज्ये । 5
सुतौ निवेश्य व्रतमादिषातां **युगादिनाथ**स्य विभोः समीपे ॥६८॥

चक्री पुनः **सिन्धु**वदात्मवश्यां विधाय **गङ्गा**मनुरागसङ्गात् ।
समासहस्रं बुभुजे **सुषेण**जितैर्नदीयोत्तरतीरदेशः ॥६९॥

खण्डप्रपाताख्यगुहाधिनाथं प्राग्वद् व्यजैषीदथ **नाट्यमाल**म् ।
गुहामतिक्रम्य च तां निवास्य **गङ्गा**तटे प्राप निधीन् नवापि ॥७०॥ 10

जित्वा **सुषेणेन** जयैकतागी**भागीरथी**दक्षिणनिष्कुटं सः ।
मृगाधिपः स्वीयगुहामिवैकभूमा**नयोध्यां** प्रति संचचाल ॥७१॥

अस्मत्प्रभोस्तेजसि जृम्भमाणो तमोपहे कोऽयमनात्मवेदी ? ।
इतीव सद्यस्तिरयाम्बभूवुस्त्विषां पतिं पादरजोभिरश्वाः ॥७२॥

करेणवो दानभरेण दत्तच्छटामिवोर्वीं विदधुस्तदाऽस्य । 15
खलीनखिन्नाननपातिभिश्च फेनैः सपुष्पप्रकारमिवाश्वाः ॥७३॥

हयांह्रिनिस्तक्षणाकर्षितोर्वीं सुखश्रवामात्मभुजप्रशस्तिम् ।
शृण्वन् भुजङ्गीगणगीयमानामियाय मानी निजराजधानीम् ॥७४॥

तदागमे पौरकृतावचूलदुकूलवद्व्योमनि हट्टमार्गे ।
तन्मञ्चरत्नेषु करं न चक्रे व्यलीकभीत्येव दिवाकरोऽपि ॥७५॥ 20

भूपं स्वकान्तप्रतिमल्लरूपं विलोकितुं पौरवधूमिषेण ।
मञ्चेषु पञ्चेषुवधूरिवास्थादेकाप्यनेकाः परिकल्प्य मूर्तीः ॥७६॥

नरेन्द्रवीक्षाकुतुकी प्रमोदादमानिवान्तर्नगरं जनौघः ।
अभ्रङ्कषागारशिखाधिरूढश्चतुर्थलोकायितमाततान ॥७७॥

श्रुत्वाब्दशब्दानिव पञ्चशब्दान् नृत्यद्भिरुतम्भितपिच्छभारैः ।
तदा मयूरैस्तरवोऽपि चक्रधरा इवासन् **भरता**नुषङ्गात् ॥७८॥

पुरीमथप्राविशदेष योषिद्विक्षिप्तलाजैरवकीर्यमाणः ।
दिग्विस्तृतैरिन्दुरिवोडुभिर्द्यां वनीमिवेभश्च लताप्रसूनैः ॥७९॥

स माङ्गलिक्यान् प्रतिमञ्चमुच्चैर्गृह्णन् विधीन् पौरविधीयमानान् ।
पूर्वाचलं भानुरिवात्मसौधमसौ धरावज्रधरो जगाम ॥८०॥

अभ्येत्य महोत्सवेन विधीयमानं विधिवद् नरेन्द्रैः ।
स चक्रवर्तित्वपदाभिषेकं भेजे भृशं द्वादश वत्सराणि ॥८१॥

कृशां शशाङ्कस्य कलामिवाथ स **सुन्दरीं** सादरमीक्षमाणः ।
तत्काश्यर्हेतूनि (?) नियोगिनः स्वान्य(न्यं) पृच्छतेऽपीति शशंसुरस्मै ॥८२॥

स्वामिन् ! भवद्दिग्विजयादिघस्रात् षष्टिं सहस्राणि समाः समाघात् ।
व्रतग्रहाभिग्रहसंचयाचामाम्लान्यसौ म्लानिकराण्यघस्य ॥८३॥

श्रुत्वेति भूमीपतिना विसृष्टा नष्टापद**दष्टापद**पर्वतेऽथ ।
युगादिदेवस्य पितुः करेण जग्राह दीक्षां गृहनिःस्पृहा सा ॥८४॥

§§ अनागतान् द्वादशवार्षके साम्राज्याभिषेके **भरतेश्वरो**ऽथ ।
आह्वातुमष्टानवतिं निजानुभुवः प्रभूतान् प्रजिघाय दूतान् ॥८५॥

राज्यानि कर्तुं यदि वोऽस्ति वाच्छा तदेत्य नाथं **भरतं** श्रयध्वम् ।
निशम्य दूतोदितमित्यमी त्वरूक्षाक्षरं मङ्क्षु बभाषिरेऽदः ॥८६॥

अस्माकमस्यापि भवत्प्रभोर्भोः ! प्रादायि तातेन विभज्य राज्यम् ।
अस्मच्छकाशात् स किमिच्छतीदमाच्छेत्तुमच्छेतरलोभपुष्टः ॥८७॥

नास्माकमस्मादधिकेन कार्यं स्वं रक्षितुं च स्वयमेव शक्ताः ।
तद् दूत ! भर्ता भवतामयोगक्षेमङ्करः स्यात् कथमेष नाथः ? ॥८८॥

अयं च यद्यस्ति समस्तवीरावलीबलीयानऽनलीकमेव ।
तदेतु युद्धेन वयं पराम्बास्तस्यैव तातस्य यतः सुताः स्मः ॥८९॥

स्वच्छन्दसः किन्तु न विद्यमाने ताते नितान्तेन वयं भवामः ।
तत् तं समापृच्छय सहाग्रजेन योत्स्यामहे तेन युयुत्सुनापि ॥९०॥

उक्त्वेत्यथाष्टापदपर्वतेऽमी गत्वा जिनं निर्वृजिनं प्रणम्य ।
सर्वं तमस्मै भरताभियोगं विज्ञाय ते विज्ञपयाम्बभूवुः ॥९१॥

सिञ्चन्निवैतानमृताम्बुवृष्ट्या दृष्ट्या प्रसादाञ्चितया च वाचा । 5
तत्कालमुन्मीलितकोपवह्नेरह्लाय शान्त्यै भगवानुवाच ॥९२॥

"वत्साः ! किमिच्छाऽसुकृतैकलक्ष्मीभूतेहलक्ष्मीमधिगन्तुमेताम् ? ।
चलाचलेयं कपिकामिनीव स्वा स्याद् न कस्यापि भवान्तरेऽपि ॥९३॥

कृत्वा क्षयं स्नेहदशागुणानां प्रदीपलेखेव पलायते श्रीः ।
अवश्यमेकं त्ववशिष्यते तन्मालिन्यमस्मिञ्जनितं तया यत् ॥९४॥ 10

सुप्ताः प्रमत्ता निपुणा अपीह यथा तथा वा बहु किं ब्रवीमः ।
श्रिया पुमांसश्चलयाऽनुवेलं न वञ्चिताः के शठयोषयेव ? ॥९५॥

इदं वपुर्मे मम राज्यमेतत् पुत्रा ममैते मम योषितोऽभूः ।
रत्नभ्रमाद् मन्दधियामिहात्मीकारो मुधाऽयं भवबुद्बुदेषु ॥९६॥

हीनैर्विलीनैरसनातनैश्च संसारभोगैः परहन्तकारैः । 15
तुष्यन्ति रङ्का इव देहिनोऽमी न मोक्षसाम्राज्यमुपार्जयन्ति ॥९७॥

कृमिर्यथा कातरको हरिद्भिर्यथालसस्तुष्यति नापि मृद्भिः ।
संसारभोगैर्न तथा जडात्माऽनुजन्म तिष्ठेत च मृत्यवेऽसौ ॥९८॥

असेवमानः पुरुषः पुमर्थं चतुर्थमन्यार्थविमोहितात्मा ।
उत्पद्यते चापि विलीयते च जले यथा पूरतको भवेऽत्र ॥९९॥ 20

अनेकशो ये किल घृष्टपृष्ठा भोगास्तदर्थं विमुखाभिलाषाः ।
मोक्षाय दक्षा भृशमुत्सहन्ते सोऽनन्तसुज्ञानमयो ह्यपूर्वः ॥१००॥

इच्छामशेषां समपास्य वत्सा मोक्षाय तद् यूयमपि त्वरध्वम् ।
असद्गतौ शश्वदुपस्थितायां क्वेदृक् पुनः क्षेत्रकुलादिलाभः ?" ॥१०१॥

"श्रुत्वेत्यमी स्वामिवचः प्रबुद्धां शुद्धाशयाः संयममाद्रियन्त ।
विवृत्य दूता अपि विस्मयेन स्वस्वामिने तत् प्रथयाम्बूभूवुः ॥१०२॥
प्राज्यानि राज्यानि ततः समृद्ध्याऽखर्वाणि सर्वारण्यपि सार्वभौमः ।
स जग्रसे वह्निरिवेन्धनानि भूयांसि भोज्यानि च भस्मकीव" ॥१०३॥

अथैकदा दिक्पतिमौलिमाल्यमधूदकस्नातपदारविन्दम् ।
संसद्गतं श्रीभरतं **सुषेणः** सेनापतिः प्राञ्जलिरित्युवाच ॥१०४॥
स्वामिन्नसामान्यमहःप्रतिष्ठानिकेतकाष्ठाविजयेऽपि क्लृप्ते ।
नैतद् विशत्यायुधवेश्म चक्रमद्यापि मत्तः करटीव शालाम् ॥१०५॥
अथावदद् बुद्धिनिधिः **सुबुद्धिरमात्यनाथो भरताधिनाथम्** ।
कोऽद्यापि नाथ ! त्वयि विश्वजैत्रे तिष्ठेत पूष्णीव तमिस्रलेशः ? ॥१०६॥
आ ज्ञातमेको न वशंवदोऽस्ति तवैव देव ! प्रथमोऽनु जन्मा ।
बाह्वोर्बली **बाहुबली** रसायामसावसामान्यपराक्रमो यत् ॥१०७॥
राज्याङ्गसप्तार्चिरहो ! महासिविलासिधूमान्धितवैरिवर्गः ।
अमर्षवायूल्लसितः कथञ्चिदयं दिगन्तानपि दग्धुमीशः ॥१०८॥
निस्तेजयित्वापि दिगन्तभर्तृनमुं धरित्रीधरमुच्चशृङ्गम् ।
स्वामिन्ननाक्रम्य तव प्रतापसूरस्य दूरप्रसरः कथं स्यात् ? ॥१०९॥
अण्डीरदोर्दण्डममुं त्वजित्वा दिग्जैत्रयात्राक्रमकैतवेन ।
त्वयैकराज्याय विभो ! वणिज्याकृतेव देशान्तर एव चक्रे ॥११०॥
तत् तुल्यसंबन्धपराक्रमस्ते नोपेक्षितुं युज्यत एव देव ! ।
आलानदण्डे किमुभौ मदेभौ स्यातां किमेकत्र वने च सिंहौ ? ॥१११॥
अथादितस्त्वं यदि योद्धुमीहसे न बान्धवं तं किल बन्धुवत्सलः ।
तथापि दूतऽस्य मनस्विनीतिभिः परीक्षितुं कश्चिदपि प्रहीयते ॥११२॥
दूताहूतः सामदानादिभिस्त्वां वीरम्मन्यो मन्यते नो यदा तत् ।
गौरव्योऽपि द्विष्टदन्तीव यन्तुर्देवस्यास्ते स क्षणं शिक्षणीयः ॥११३॥

इति सचिवचयेन्दोर्मन्त्रमुत्साहकन्दोपममवनिसुधाशुः प्राप्य तस्मादुपांशुः ।
वचनरचनपूतं शिक्षयित्वाऽथ दूतं तमभि च वसुवेगं प्रैषयत् तार्क्ष्यवेगम् ॥११४॥

॥ इति भरतभूषणनामनि महाकाव्ये द्वितीयः सर्गः ॥

● ● ●

§§ अथ दूतपुमानशोभनैः शकुनैः सोऽध्वनि वारितोऽप्यगात् ।
निजनाथनियोगकारितापरतन्त्रा हि सदाऽनुजीविनः ॥१॥

व्यतिलङ्घ्य नदीनगावलीनगरग्रामधरां वसुन्धराम् ।
बहुलं बहुलम्पटैर्भटैर्**बहली**देशमसावथासदत् ॥२॥

सुषमानृपतेरिव स्थलैरथवा क्रीडनगैरिव श्रियः ।
अनुगोष्ठमहो महोन्नतैः कलितं धान्यकदम्बराशिभिः ॥३॥

अनुशालिवनं च गोपिकानिवहैरिक्षुतले निषादिभिः ।
बलि**बाहुबलि**क्षितीशितुश्चरितोद्गानपरैः परिष्कृतम् ॥४॥

प्रतिशालमनाविलादिकृद्गुणगीतिप्रवणैः सुरीगणैः ।
कनकाचलतोऽभ्युपागतैरविशून्यद्रुमराजिराजितम् ॥५॥

मणिभूषणकान्तिमञ्जरीवितमिस्त्रासु तमस्विनीष्वपि ।
दिवसेष्विव पान्थवाणिनीगणपाणिन्धमवर्त्मधोरणिम् ॥६॥

समुपेत्य सरोजलोचनाद्भुतलावण्यदिदृक्षया दिवः ।
त्रिदशैरतिशायिभोगतो मुदितैर्दुपरिहार्यभूतलम् ॥७॥ पञ्चभिः कुलकम् ॥

अकृशाद्भुतवैभवान्वितं **बहली**देशमसाववाप्य तम् ।
स्वमिहैव भवे जवाद् भवान्तरमायातमिवोदमन्यत ॥८॥

अथ **तक्षशिला**भिधामसौ वसुधाशेखरशालशोभिताम् ।
दृढबाहुबलस्य सम्पदा बहुलां **बाहुबले**ः पुरीमगात् ॥९॥

परितोऽपि निभालयन्नयं वचनागोचरमत्र वैभवम् ।
पुरवासिभिरुन्मुखो निरैक्ष्यत विक्रीतजनादिवोद्धृतः ॥१०॥
घटिकागृहमेत्य भूपतेः क्षणमुत्तीर्य रथादथास्थित ।
स निजेश्वरवाचिकं तथाद्भुतवीक्षाविगत स्मरन्निव ॥११॥
अथ संसदि स प्रवेशितः प्रतिहारेण नृपस्य शासनात् ।
मणिकुट्टिमसंभृताम्भसंभ्रमसंकोचितचीरपल्लवः ॥१२॥
तरणेरिव तेजसा हरेरिव लक्ष्म्याऽहिपतेरिवौजसा ।
इह **बाहुबलेः** क्षितीशितुः प्रणिपत्यैष पुरो निविष्टवान् ॥१३॥
मुखपद्मनिविष्टभारतीकरवीणाक्वणकेलिबान्धवीम् ।
इति वाचमुवाच विस्मितद्युतिसच्चामरवीजितां नृपः ॥१४॥
अयि शंस **सुवेग** ! वेगतः कुशली साम्प्रतमग्रजो मम ।
अयि तेन च शासिताः प्रजाः कुशलिन्यो गुरुसम्पदश्च ताः ? ॥१५॥
अजितस्य च राज्यमुन्नतिं भजतेऽङ्गेषु सदैव सप्तसु ।
अपि **भारत**भूमिमण्डलं कुशलेनैष जिगाय वाऽखिलम् ? ॥१६॥
अयि भूमिभुजोऽग्रजेन मे विर्जितावर्जितदासिताः क्रमात् ।
न भवन्ति विषादभाजनं दधतोऽप्यस्य सदैव शासनम् ? ॥१७॥
समशीर्षिकया प्रवर्धिसद्भुवनानामनुरागवैभवैः ।
अयि तस्य न बाधते क्वचित् पुरुषार्थत्रितयं परस्परम् ? ॥१८॥
इति वाचमुदीर्य भूपतौ स्थितिमासेदुषि सोऽब्रवीत् पुनः ।
कुशलं क्व नु तस्य पृच्छ्यते कुशलं हन्त भुवोऽपि यः स्वयम् ॥१९॥
अपि चाकुशलं प्रजासु तास्वथ राज्ये क्व नु तत्र संभवेत् ? ।
ननु यत्र समस्ति शास्तिकृद् द्विषदाक्रान्तिगजस्तवाग्रजः ॥२०॥
ननु तिष्ठतु वीरमण्डलीजयिनो दिग्विजये पुरोऽस्य कः ।
क्रमते तिमिरस्य विक्रमः कुत एव प्रतपत्यहर्पतौ ? ॥२१॥

ननु तस्य दिगन्तपार्थिवैः सममाज्ञैकतमाप्यनेकशः ।
शिरसा नियतेव जन्मिभिर्भृशमिच्छा नियतेरिवोह्यते ॥२२॥

अविबाधितवृत्तिभिर्मिथः पुरुषार्थैस्त्रिभिरेष सेव्यते ।
भुवनैरिव हेमभूधरो दिवसः सान्ध्यविभागकैरिव ॥२३॥

अपरैः परितो नृपैः परः शतसङ्ख्यैः परिषेवितोऽप्ययम् । 5
अनुजानतिदूरगान् निजानविपश्यन् न कदापि मोदते ॥२४॥

जगतीमवजित्य भारतीं **भरत**स्यात्मपुरीमुपेयुषः ।
नृपराजपदोत्सवं नृपाः समुदो द्वादशवार्षिकं व्यधुः ॥२५॥

अवबुध्य निजाननागताननुजांस्तत्र महे महीयसि ।
अयमेकनृपः स्वपूरुषान् द्रुतमाह्वातुममूननोदयत् ॥२६॥ 10

अथ ते तु महाधियोऽन्तरा सविकल्पां परिकल्प्य किञ्चन ।
बत तातपदद्वयान्तिके द्रुतमेत्य व्रतमेव भेजिरे ॥२७॥

तदपारवियोगविक्लवव्यसनावर्तविवर्तगर्ततः ।
तदमुं तव देव ! साम्प्रतं द्रुतमुद्धर्तुमुपेत्य साम्प्रतम् ॥२८॥

ननु यद्यपि तत्र बन्धुताविवशस्त्वं न पुरः समागमः । 15
परिवक्ति तथापि तेऽन्यथा सहजादेव दुराशयो जनः ॥२९॥

महतोऽप्यपथे यथा तथाप्युपरागादपचीयते महः ।
तपनो हि तुलाविशुद्धिमानपि कन्यां गत इत्यतादृशः ॥३०॥

तदहं नृप ! वच्मि ते हितं **भरता**धीश्वरलोचनाञ्चलैः ।
जनवादरजःप्रमार्जनं कुरु सम्प्रत्यपि नापराध्यसि ॥३१॥ 20

स्वयमेव सदाऽनुजीविनामसमानार्थविसर्जनापरः ।
अभिमानधनप्रियस्तव प्रणतेर्नान्यदयं समीहते ॥३२॥

द्रविणाय न किन्तु तेजसे किल धीराः कलयन्ति विक्रमम् ।
विनिहन्ति पतङ्गपुङ्गवः फणिनः किं फणरत्नवाञ्छया ? ॥३३॥

मम बन्धुरसाविति भ्रमादभयस्त्वं क्वचनापि मा स्म भूः ।
विजिगीषुमतेषु राजसु क्व नु सम्बन्धकथोपयुज्यते ? ॥३४॥
अथवा यदि वीरमानिताग्रहिलो वीरममुं न मन्यसे ।
ज्वलनेऽत्र हविर्भुजीव तल्लभसे त्वं शलभत्वमञ्जसा ॥३५॥
अथ जीवितराज्ययोः स्पृहा यदि काचित् तव विद्यते हृदि ।
भरतेश्वरशासनं तदा परभूपैरिव मूर्ध्नि धार्यताम् ॥३६॥
ननु यत्र विधीयतेऽन्वहं वरिवस्या त्रिदशासुरैरपि ।
तदिह प्रणतिं वितन्वतो नरमात्रस्य तवास्तु का त्रपा ? ॥३७

§§ इति दूतगिरामनन्तरं स्वभुजौ **बाहुबलि**र्विलोकयन् ।
अधरद्युतिकैतवात् क्रुधारुणितां वाचमुवाच निश्चलः ॥३८॥
अयि दूत ! स मे समागमं यदि बन्धुः प्रथमः समीहते ।
उपपन्नमिदं यदेष नः परिपूज्यः खलु तातसंनिभः ॥३९॥
इदमप्यतिसुन्दरं तव प्रभुराह्वास्त यदेष बान्धवान् ।
महतां न हि कृत्यवस्तुषु स्मृतिवैकल्यमिहोपजायते ॥४०॥
बत तातपदानुगामिषु स्वयमेतेषु तदीयसम्पदः ।
यदयं गिलति स्म बान्धवः प्रतिबन्धोऽस्य स दूत ! नूतनः ॥४१॥
भरतक्षितिरूपमामिषं यदवाप्यैष तिरोदधेऽनुजान् ।
तदहं भवदीयभूपतेरिह गृद्धस्य च वेद्मि नान्तरम् ॥४२॥
किल भूदिह मा स्म निर्जितो लघुभिर्ज्येष्ठ इति प्रजारवः
यदि तातमशिश्रियन्नमी जितकाशी किमयं तव प्रभुः ? ॥४३।
सकलामवजित्य मेदिनीमवनीशस्तव मां विरोधयन् ।
बहुगर्भितशस्यमात्मनः कृषिकर्माऽद्य मलीकरोत्ययम् ॥४४॥
अयि दूत ! जनो विभाषते बत मय्येव तव प्रभोर्न किम् ? ।
लघुबान्धववैभवानि योऽग्रसदुद्वान्तमिवाशु कुक्कुरः ॥४५॥

मम दूत ! **युगादितीर्थकृद्** वरिवस्यः प्रभुरेक एव नु ।
किमनेन स लप्स्यते यदि प्रणतिं ज्येष्ठतयाऽन्यथा तु न ॥४६॥

यदि चैष महोऽभिनाथते यदि मत्तोऽपि तवावनीपतिः ।
निशि दीपचिकीः फणीशितुः शिरसस्तन्मणिमात्तुमीहते ॥४७॥

विजिगीषुमतेषु राजसु क्व नु सम्बन्धकथोपयुज्यते । 5
इति ते वचनं वृथा, यतो मयि सत्येष कुतो विजृम्भते ? ॥४८॥

ज्वलनेऽत्र हविर्भुजीव ये शलभत्वं कलयन्ति ते परे ।
अहमस्य तु शान्तये शरावलिवर्षी सधनुर्घनाधनः ॥४९॥

भुवनाधिपसेवितक्रमः सविता यस्य **युगादितीर्थकृत्** ।
भुजविक्रमतस्तृणीकृतत्रिजगत्कोऽनुज एष मद्विधः ॥५०॥ 10

स सुरैरसुरैरनारतं वरिवस्यः कियदेतदभ्यधाः ? ।
इति दूत ! वदास्य दास्यकृत् ! यदसामान्यपराक्रमो वृथा ॥५१॥ युग्मम् ॥

तदमुष्य न सेवने त्रपा करुणा किन्तु ममाद्भुता हृदि ।
अवलोक्य यदेष मां पुरा खुरलीकेलिजितं ह्युपैष्यति ॥५२॥

उदलालि पुरा ततो दिवः स पतन् कन्दुकवद् धृतो मया । 15
तदमुष्य किमद्य विस्मृतं स्मयमानस्य चटुज्ञचाटुभिः ? ॥५३॥

अथवा तव दूत ! भूपतिः स्मयते चक्रबलेन सम्प्रति ।
तदितोऽपि वहत्वहंयुतां शकटं चक्रयुगं बिभर्ति यत् ॥५४॥

व्रज तत् त्वमहोतिरंहसा स समायातु तव स्वयं विभुः ।
करवाणि यथा स्वसायकैः स्मयगम्भीरगडोश्चिकित्सनाम् ॥५५॥ 20

समयः स सभागृहाद**थार्षभि**दूतस्त्वरितं विनिर्ययौ ।
अरुणोक्षणमीक्षितश्चिरं बलिभि**र्बाहुबले**ः पदातिभिः ॥५६॥

विविधायुधभीषणान् भटान् यमदूतप्रतिमान् विलोकयन् ।
नृपतेः सदनाद् निरीय तन्नगरीतोऽपि निरीयते स्म सः ॥५७॥

मनसासमरंहसा व्रजन् **बहली**देशमतीय कृच्छ्रतः ।
निजनायकदेशमाप्य च स्वमयं मानितवान् पुनर्नवम् ॥५८॥

अथ **बाहुबले**र्भयाकुलान् परतोऽप्य**ुत्तरकोशला**नयम् ।
रचयन् निजरंहसाऽऽगतो **भरता**येति चरो व्यजिज्ञपत् ॥५९॥

यदि नाथ ! कथञ्चिच्चलैरपि धीयेत सहस्रदीधितिः ।
वनवह्निरपह्नुतेन्धनो यदि गृह्येत च मुष्टिना क्वचित् ॥६०॥

न तथापि तवानुजस्तृणीकृतविश्वत्रितयः स्वदोर्बलात् ।
विगृ(ग्र)हीतुमहो महस्विभिः परिशक्येत सुरासुरैरपि ॥६१॥

समरैकरतेरमुष्य दोर्ध्वनिकोलाहलकाहलारवैः ।
श्रुतिमार्गमुपैति नापरः सुभटः स्वर्गिनरासुरेष्वपि ॥६२॥

वरिवस्यति मामयं पुरेत्यथ कुर्या मनसापि मा भ्रमम् ।
भरतोऽप्यभिनामनक्रियातरलो यस्त्रपया निवार्यते ॥६३॥

इति मङ्क्षुनिशम्य चारतो **भरतः** क्षोणिपतिः क्रुधा ज्वलन् ।
अभियातिमभि प्रयाणकाहतढक्काभिरवोचदुत्तरम् ॥६४॥

रथचीत्कृतिवाजिहेषितैः करभक्रन्दितहस्तिबृंहितैः ।
पटुचेटरवैर्मिथस्तदा निनदाद्वैतमभूत् प्रयाणके ॥६५॥

करभैः क्व च वाजिभिः क्व च द्विरदैः क्वापि रथैरथ क्व च ।
तदनेहसि पादचारिणां निगमा दुर्गमतां प्रपेदिरे ॥६६॥

परितोऽपि तदाऽश्वदारितावनिधूलीमयधूमधोरणेः ।
भरतेशमहोहविर्भुजः किल कीलाः करिकेतवो बभुः ॥६७॥

क्षितिरेणुतमस्सु दुन्दुभिप्रतिनादैः परितोऽपि यान्त्यपि ।
कटकानि बहुत्वतोऽत्यजन्नवियोगं **भरता**ग्रसेनया ॥६८॥

अविलम्बकृतैः प्रयाणकैर्निजदेशं व्यतिलङ्घ्य कैश्चन ।
भरताधिपतिः समासदद् **बहली**मण्डलमेदिनीमुखम् ॥६९॥

§§ अथ **बाहुबलि**र्महाबलस्तरसाऽऽकर्ण्य तदा तदागमम् ।
जयडिण्डिमघोषडम्बरैरभियानाय बलान्यतत्वरत् ॥७०॥

अतिवीर्यतया चतुर्भुजश्चतुरम्भोधितटीषु विश्रुतः ।
अचलश्चतुरङ्गसेनया स चतस्रोऽपि दिशो विलोडयन् ॥७१॥

प्रविशन्तु भृशं कुहाप्यमी रिपवो **बाहुबले**: प्रणश्य मा । 5
शुषिराणि रजोभिरुद्धतैस्तिरयामासुरितीव वाजिनः ॥७२॥

करिकेतुसमन्वितं रजःपटलं व्योमतले तदा बभौ ।
फणिलोकयुता मही महाबलसंमर्दभयादिवोद्गता ॥७३॥

द्विषतां वदनानि तरूधूनयनानीह विहाय सर्वतः ।
तृणमम्बु च नान्यतो नरैर्ददृशे **बाहुबले**: प्रयाणके ॥७४॥ 10

अथ चक्रिचमूपकण्टभूवलये **बाहुबले**: पताकिनी ।
समुपेत्य निवासमग्रहीद् विगृहीतेरिव मूलमात्रिका ॥७५॥

अनयोर्जगदादिवीरयोः समरः प्रातरहो भविष्यति ।
इति वक्तुमिवागतस्तदा वरुणास्यारुणसारथिर्ययौ ॥७६॥

व्रजतोऽस्तमहपतेर्महः पटलैः पाटलितानि तान्यथ । 15
कटकान्युभयान्यपि क्रुधा ज्वलितानीव मिथो विरेजिरे ॥७७॥

परिसंवृत्तवत्यहो महः पटमास्फोट्य दिवातनं खौ ।
तमसोच्छलितं पुराचलद्बलमालारजसेव तद्युता ॥७८॥

उडुभिः सममिन्दुरुद्ययौ परितो द्रष्टुमिवाथ कौतुकात् ।
असिजागरणानि दोर्भृतामुभयोरार्षभिसैन्ययोस्तयोः ॥७९॥ 20

असिजागरवाद्यनिःस्वनश्रुतिवित्रस्तमिवैणमीक्षितुम् ।
निसृगाद् मृगलाञ्छनो निशाविगमेऽस्ताचलचूलिकावनम् ॥८०॥

सकलां रजनीं स्थितः क्वचिद् निजमन्त्राणि निमन्त्रयन्निव ।
रणवीक्षणहेतवे तयोरुदयाद्रावधिरूढवान् रविः ॥८१॥

उभयोरपि योद्धुकामयोरुदयास्ताद्रिगतौ खगात्रिजौ ।
क्षणमार्षभिसैन्ययोस्तयोः करदण्डाद् दधतुस्तदाऽन्तरा ॥८२॥

§§ अथ भक्तिभरेण तावुभावृषभस्वामिनमार्षभी नृपौ ।
परिपूज्य रणोद्यतावववीवदतां दुन्दुभिमात्मसैन्ययोः ॥८३॥

रणदुन्दुभिनादसञ्ज्ञया समनह्यन्त तयोर्बलान्यथ ।
अमिलंश्च युगान्तमत्तयोरिव पाथांसि मिथः समुद्रयोः ॥८४॥

सुभटैः सुभटा रथै रथास्तुरगैश्चापि तुरङ्गमास्तदा ।
करिभिः करिणो रणोत्सवं किल तुल्यप्रतिपन्थिनो व्यधुः ॥८५॥

प्रथमं रणतूर्यगर्जितैस्तदनु क्षोणिरजोभिरुद्धतैः ।
शरधोरणिभिस्ततोऽपि च प्रतिलेशं पिदधे नभस्तदा ॥८६॥

द्विषतां निधनाय धन्विभिः प्रहिताः प्रोतधृतोडुदीपकाः ।
निजवध्यजनं रजस्तमस्यभिपश्यन्त इवेषवोऽभ्रमन् ॥८७॥

सुभटक्षतस्रवन्तिका विलसन्त्यो वसुधातले बभुः ।
रणरेणुतमोऽन्धलैः शरैरवलूना इव सूर्यरश्मयः ॥८८॥

प्रहतेभरदाशनस्त्रुटिं समवाप्योच्छलिता भटासयः ।
रणरेणुपयोदमण्डले दधुरुदण्डतडिल्लतायितम् ॥८९॥

द्विषदाहितकुन्तयष्टिभिः करिणः शल्यकशूलिता बभुः ।
उपरूढकुमारिकौषधीसमुदण्डप्रचिता इवाद्रयः ॥९०॥

हतयुग्यहयाः कथञ्चनाप्यतिदूरे रथिनः पुरः स्थितान् ।
तरलास्त्रनदीतरद्रथाः समुपेत्यात्मरिपून् न्यपातयन् ॥९१॥

करभद्वयसासृगापगातरदुत्तुङ्गतरङ्गशालिनाम् ।
गजमौलिगतैर्निषादिभिः समकक्षाऽजनि सादिनामपि ॥९२॥

विकरालकरांह्रिपङ्कजे युधि कीलालचराचरे तदा ।
भटमस्तकनालिकेरके यमदूता निभृतोत्सवं व्यधुः ॥९३॥

अथ **बाहुबलि**चमूचरा **भरताधीश**पताकिनीभटान् ।
तरणेः किरणाग्रपल्लवास्तिमिराणीव तिरोदधुः क्षणात् ॥९४॥

अथ **भारत**भूमिवासवः स्वयमाटोपमवाप कोपजम् ।
प्रचचाल युधे चलच्चमूभरनिष्पीडितपन्नगेश्वरः ॥९५॥

अवधार्य निजार्यमात्मना विलसत्सङ्गकर्मसङ्गरम् ।
समकालमहर्षहर्षयोरभवद् **बाहुबलिः** पदं तदा ॥९६॥

अथ सोऽपि महाभुजः स्वयं रणदीक्षामधिगम्य रंहसा ।
उदयाद्रिमिवार्यमा क्षमापतिरारोहदिभेन्द्रमुच्चकैः ॥९७॥

§§ स्वयमेव महाभुजाविमौ समरायातिनिरीक्ष्य सोद्यमौ ।
द्युसदोऽपि चकम्पिरे तदा प्रसभं हन्त ! युगान्तशङ्कया ॥९८॥

भरतं समुपेत्य रंहसा वितरन्तोऽस्य जयाशिषं सुराः ।
इदमूचुरथौचितीचितं रचितप्राञ्जलयः प्रशान्तये ॥९९॥

तव साधयतोऽखिलामिलां यदि कश्चिद् न हि संमुखोऽभवत् ।
भुजखर्जुभिदे स्वबन्धुना रणकामः किमु लज्जसे न तत् ? ॥१००॥

अथ भूपतिराह भारतस्त्रिदशान् युक्तमिदं भवद्वचः ।
अधुना रणकारणं पुनर्बत जानीथ न यूयमावयोः ॥१०१॥

भुजखर्जुभिदा निबन्धनं न युधः किन्तु रथाङ्गमङ्ग ! मे ।
न हि शस्त्रगृहे विशत्यदः शिशुरत्यन्तशठो यथा मठे ॥१०२॥

अचिरात् तदनुप्रविश्य मामिदमप्यस्त्रगृहं प्रवेश्य च ।
सकलस्य किलास्य काश्यपीवलयस्यास्तु ममानुजः पतिः ॥१०३॥

बत बोधयताऽमुना मनाग् वचसा **बाहुबलिं** महाबलम् ।
यदि युद्धनिषेधहेतवे भवतामस्ति मनस्युपक्रमः ॥१०४॥

अथ ते पुनरुचुरेष चेद् न हि बुध्येत तथापि न त्वया ।
रणकर्म विधेयमायुधैः शपथाः श्री**ऋषभप्रभो**रिह ॥१०५॥

ननु दृष्टिवचःसुसृष्टिदोर्विलसन्मुष्टिसुयष्टियुद्धतः ।
युवयोरमरैर्बलाबलं परिभाव्यं, निशितैः किमायुधैः ? ॥१०६॥

इति भूमिभृता प्रतिश्रुते वचने **बाहुबलिं** ययुः सुराः ।
समुदीर्य जयाशिषं पुरस्तमभाषन्त गिरा सुधाकिरा ॥१०७॥

नयनिष्ठ ! तवैष बान्धवः प्रथमः सत्क्रियते न किं त्वया ? ।
भरतं प्रति देव ! सम्प्रति प्रधनारम्भमपोढुमर्हसि ॥१०८॥

ऋषभस्य विभोर्न संमता नियतं तावदमी क्रुधादयः ।
तदमीषु तदङ्गजस्य ते परिपोषः किमयं बतोचितः ? ॥१०९॥

नतमात्रतया तवैष यः परितोषं भजते किलाग्रजः ।
प्रणिपत्य तमर्हमानतेः कुरुषे किं न महीमिहात्मसात् ? ॥११०॥

अथ **बाहुबलि**र्गभीरया गिरया प्राह स तानभी रयात् ।
कथमित्थमहो ! भवादृशैरपरिज्ञातकथैरिवोच्यते ? ॥१११॥

बत बन्धुतया ममान्तिकाद् यदि सत्कारमयं समीहते ।
उपपन्नमिदं तदेव यद् मम तातप्रतिमोऽयमग्रजः ॥११२॥

जितकाशितया परं महस्वितिया मामवकृत्य नामयेत् ।
न तदेतदहं सहे, **'सतां धनमेकं भुवि मान एव यत्'** ॥११३॥

न विनष्टममुष्य किञ्चन स्फुटमद्यापि महौजसोऽथवा ।
अपसर्पतु सङ्गरादसावहमप्येष निवृत्त एव तत् ॥११४॥

निजशासनमन्यमेदिनीपतिसामान्यचिकीरसौ मयि ।
समुपेत्य गिराविवास्फलन् रदभङ्गं करटीव लप्स्यते ॥११५॥

न भवेऽत्र भवे परत्र च प्रभुरन्यो मम तातमन्तरा ।
अभिगम्य रुचामधीश्वरं न विधीयेत बुधैः प्रदीपकः ॥११६॥

अथ **बाहुबलि** जगुः सुरा जगतीमण्डलमौलिमण्डन ! ।
विशदापि सदापि शेमुषी न हि कार्ये भवतीह संमुखी ॥११७॥

भरतेश्वरचक्रमेकतो भवदीयप्रणतेः समीहया ।
न गुहामिव केशरी विशत्यकृतार्थं ध्रुवमायुधालयम् ॥११८॥

विनये वयमन्यतस्तवातिशयं वीक्ष्य न वक्तुमीश्महे ।
पुनरेकमिहार्थयामहे न हि योद्धव्यमसुव्यथायुधैः ॥११९॥

नयनादिरणैर्बलाबलं प्रसमीक्ष्याशु जयव्यवस्थितिः । 5
युवयोः प्रविधास्यते, ध्रुवं वयमेवात्र भवाम साक्षिणः ॥१२०॥

प्रतिपन्नवतीदमत्रते त्रिदशाः श्री**ऋषभा**ज्ञया भटान् ।
विनिषिध्य युधः शुचिं व्यधुर्भुवमङ्गाङ्गिरणार्थमेतयोः ॥१२१॥

उभयोरपि सैन्ययोर्भटा विनिषिद्धाः प्रभुपूरुषैरपि ।
समरादवलम्भरोषिता इव मुष्टा इव लज्जना इव ॥१२२॥ 10

अथ मङ्क्षु मिथो जयैषिणौ स्मयपाथोधितमीशमीयतुः ।
नभसीव विभाविभावरीरमणौ तौ रण**मार्षभी** नृपौ ॥१२३॥

स्फुटदृष्टिविवादसादरौ चिरमेतौ समतिष्ठतां स्थिरौ ।
घटिताविव चित्रिताविवाहितयोगाविव विस्मिताविव ॥१२४॥

अतिकौतुकतोऽनिमेषिभिस्तदनुध्यानवशादिवाथ तौ । 15
अमरैर्नभसि स्थितैर्भुविस्थितिविद्भिश्च नरैर्निरीक्षितौ ॥१२५॥

अथ **बाहुबले** रवेरिव प्रसरद्दीधितिदर्शनार्दिते ।
भरतः स्वदृशौ निमीलयन् विजयायाऽऽदित तोयमश्रुभिः ॥१२६॥

अवितर्कमहो जितं जितं बलिना **बाहुबलि**क्षितीन्दुना ।
नभसीति दिवौकसो व्यधुः स्तुतिघोषं जयसाक्षिणस्तदा ॥१२७॥ 20

अथ दृष्टिजितेन चक्रिणा सह तेनासहनीयविक्रमः ।
सुरसार्थसमक्षमाधित क्षितिपस्**ताक्षशिलः** स्वमाहवम् ॥१२८॥

भरतस्य मृगेन्द्रगर्जितध्वनितेन प्रसभं विसर्पता ।
फणिनां च नृणां च नाकिनामपि बाधिर्यमजायत क्षणाम् ॥१२९॥

अथ **तक्षशिलापति**र्मृगाधिपतिध्वानमसूत्रयत् तथा ।
चलितं धरया यथाऽचलैः पतितं दिक्करिभिश्च मूर्च्छितम् ॥१३०॥

प्रलयाम्बुदशब्दबन्धुना परितः क्षुब्धपयोधिनाऽमुना ।
भरतः पुनरेव निर्जितो वचसा **बाहुबले**र्बलीयसा ॥१३१॥

अथ मुष्टिरणाय सोद्यमावपसृत्याशु नराधिपाविमौ ।
भयदो भुवनेऽप्यधावतां करमुत्याट्य वनद्विपाविव ॥१३२॥

अनयोः पदपीडितस्थिराभरपेषेण फणः सहस्रधा ।
फणिनः स्फुटितः, करेर्मुखं विनतं, सङ्कुचितश्च कच्छपः ॥१३३॥

भरतस्य करप्रहारतः पुरतस्**तक्षशिला**नरेश्वरः ।
क्षणमेकममूर्च्छदन्तरा जयलाभौपयिकं मृशन्निव ॥१३४॥

अथ तामवधूय तत्कराहतिमूर्च्छां, **भरतं** स मुष्टिना ।
निजघान तथाऽपतद् यथा सममेषोऽथ भटाश्रुबिन्दुभिः ॥१३५॥

अथ चन्दनवारिसेकतः प्रगुणं **बाहुबलि**र्व्यधादमुम् ।
हृदि मत्सरपूरितेऽप्यहो ! न हि नाभिः प्रतिबन्धचौरिका ॥१३६॥

अथ संभृतदण्डसङ्गरार्थितया निर्मितसङ्गरावि मौ ।
दृढदण्डकरावधावतां जगतां त्रासकरौ यमाविव ॥१३७॥

बहलीपतिराशु ताडितः शिरसि श्री**भरते**न दण्डतः ।
घनघातितवज्रवत् तदाऽबुडदाजानु वसुन्धरोपरि ॥१३८॥

अथ पङ्किलतः किल क्षमातलतः स्वावकृष्य च क्रमौ ।
भरतं दृढदण्डघाततस्तरसाऽऽकण्ठमसावमज्जयत् ॥१३९॥

नृपरत्नमथैष रोहणादिव 'हा दैव !' गिराङ्कितानतैः ।
प्रविदार्य महीमकृष्यताऽऽयतकुद्दालकरैः स किङ्करैः ॥१४०॥

किमु नाहमिलातले त्वयं बत चक्रीति विषादमीयुषः ।
भरतस्य करे समाययावथ चक्रं ज्वलदर्कबिम्बवत् ॥१४१॥

अनुजस्य वधाय तत्क्षणात् त्रिदशांस्त्रासयदम्बरस्थितान् ।
अविशङ्कमसौ मुमोच तत् प्रलयाम्भोद इवाशनिं नदन् ॥१४२॥

तदनेकभटासिपट्टिसप्रकरप्रासनिरुद्धमप्यथ ।
बहलीपतिमापतद् भृशं **भरत**स्येव जयाशयोऽङ्गसन्(ग्रसत्) ॥१४३॥

स्वकुले प्रभवेद् न चक्रमित्यभितो **बाहुबलिं** परीय तत् । 5
भरतेशकरे पुनर्ययौ निशि पक्षीव कुलाय पादपे ॥१४४॥

अयमेष करोमि भस्मसात् सहसादद्य सचक्रमप्यमुम् ।
अथ **बाहुबलिः** क्रुधा करं समुदस्याचलदग्रजं प्रति ॥१४५॥

गत एव निकेतनान्तिकं हहहाऽसौ प्रतिचक्रवर्त्यसौ ।
इति नागमनुष्यनाकिना तुमुलो व्योमतलं व्यगाहत ॥१४६॥ 10

अत्रान्तरे विलसितोरुविवेकसूरः,
शाम्यत्तमा विमृशति स्म स वीरमानी ।
क्रोधादिभिर्विजितमेनमिहाग्रजं मे
जेतुं हहा ! विफल एव मनोऽभिलाषः ॥१४७॥

एतान् विश्वत्रयविजयिनो यद्यहं जेतुमीशे, 15
तत्तातस्य त्रिभुवनगुरोरस्मि तस्याङ्गजन्मा ।
इत्युन्मीलन्मतिरयमपाकर्तुमन्तर्द्विषन्तं,
तूलानीवोदखनदखिलान् पाणिना तेन केशान् ॥१४८॥

वन्द्याः केवलिनः कथं नु लघवः स्वे बन्धवस्ते मया,
तत्तेषां समतामवाप्य नियतं याम्यामि तातान्तिकम् । 20

इत्यालोच्य समाधिसाधितशमानन्दः **सुनन्दा**ङ्गजः,
सज्ज्ञानं प्रतिपालयन्निव समागच्छत् तदोर्ध्वं स्थितः ॥१४९॥

सानन्दं वादयन्तस्तदनु तनुमतां ध्वस्तकल्पान्तशङ्कै,
शङ्कैणत्रासकृत्तद्ध्वनिभिरभिनभो दुन्दुभीरिन्दुभीमाः ।

देवाः के वा न सेवालुलदलिकलितस्फीतसंगीतबन्धां
गन्धाम्भःपुष्पवृष्टिं विदधुरिह **सुनन्दासुत**स्योपरिष्टात् ? ॥१५०॥

॥ इति भरतभूषणानामनि महाकाव्ये तृतीयः सर्गः ॥

● ● ●

§§ तं तथाविधमालोक्य बान्धवं बाष्पमुद्गिरन् ।
विषण्णकर्मणा स्वेन चक्री चेतस्यचिन्तयत् ॥१॥
धिग धिग् मे चक्रवर्तित्वं बन्धुभिर्विरहो यतः ।
फलवत्त्वं मधूकद्रोः पत्रद्रोहि स्तवीति कः ? ॥२॥
धुनबन्धुरहं निन्द्यः कालकुक्कुटयोरपि ।
यौ ग्रासमुपभुञ्जाते सममेव स्वबन्धुभिः ॥३॥
स्वपक्षमद्विषंस्तेजस्व्यपि राजति नान्यथा ।
सूर्याचन्द्रमसोश्चन्द्र एव राजा ग्रहेषु यत् ॥४॥
ध्यात्वेति चिरमध्यात्मबन्धुरं बन्धुमात्मनः ।
निपत्य पदयोश्चक्री निजगाद सगद्गम् ॥५॥
भ्रातस्तातसुतोऽसि त्वं नैवाहमधमाधमः ।
वध्येऽपि मयि यः कुर्वन् कृपां शममशिश्रियः ॥६॥
हतकोऽहं पुरा त्यक्तः समग्रैरपि बन्धुभिः ।
त्यजंस्त्वमपि मामेकाकिनं सम्प्रति मा कृथाः ॥७॥
तातराज्यमिदं ततुल्यस्त्वं पातुमर्हसि ।
चक्रवर्त्यपि वर्तिष्ये तवाहं दासलेशवत् ॥८॥
तात ! तात ! स्वकर्मानुशयाशनिहविर्भुजा ।
मह्यं प्रदह्यमानाय देहि वागमृतच्छटाम् ॥९॥

भरतो विलपन्नेवममात्यैरित्यबोध्यत ।
नाथ ! **बाहुबलि**र्नाऽथ वक्तासौ निश्चितव्रतः ॥१०॥
इति तद्वचनैश्चक्री जानन् बान्धवनिश्चयम् ।
उन्मुखः साश्रुदृक् पादन्यस्तहस्तोऽवदन् पुनः ॥११॥
न चेद् दास्यसि तद् मा दा वाचं वाचंयमोत्तम ! । 5
प्रसाददृष्टिदानेऽपि किं कापि स्याद् व्रतक्षितिः ? ॥१२॥
अथ दृष्ट्वा मुनीन्द्रेणसुधावृष्ट्येव किञ्चन ।
भूभृत् संभावितः सोऽयं जातरोमाङ्कुरोऽभवत् ॥१३॥
ततो **बाहुबले**ः पादौ प्रक्षाल्याश्रुजलप्लवैः ।
धम्मिल्लेन च संमार्ज्य निर्ययौ **भरतेश्वर**ः ॥१४॥ 10
अथ **सोमयशा बाहुबले**ः सूनुरनूनरुक् ।
स्वयं **तक्षशिला**राज्ये **भरते**न न्यषिच्यत ॥१५॥
ततः सकटकः कुर्वञ्जलस्थलविपर्ययम् ।
यया**वयोध्या**मध्यास्त चक्र मप्यायुधालयम् ॥१६॥
चतुःषष्टिः सहस्राणि तस्यासन् शासितुः प्रियाः । 15
द्वात्रिंशच्च सहस्रा भूभुजो मुकुटवर्धनाः ॥१७॥
प्रत्येकं च रथाश्वेभं लक्षाश्चतुरशीतयः ।
षट्पञ्चाशत् कोटयश्चाभूवंस्तस्य पदातयः ॥१८॥
निधयो नव रत्नानि चतुर्दश च जज्ञिरे ।
तस्य विश्वजयस्फातिसुभगङ्करणौजसः ॥१९॥ 20
अनन्यशासनामब्धिमेखलामखिलामपि ।
स शशास महीमेतामहीनभुजविक्र मः ॥२०॥
इतश्च भगवान् **बाहुबलि**ः कलितनिश्चयः ।
तस्थौ स्तम्भमिवारोप्य जेतुमान्तरवैरिणः ॥२१॥

जयतस्तस्य षड्वर्गं दृढासनपरिग्रहात् ।
ऋतवस्तेनिरे पार्ष्णिघातं षडपि दुःसहम् ॥२२॥
हिमाद्रिबाणयन्त्रोत्थैराशुगैः स तथाऽऽशुगैः ।
हेमन्तः कारणयन्नस्थीन्युल्ललास दिवानिशम् ॥२३॥
वायव्यास्त्रैरपाकुर्वन् सालेषुदलमालिकाम् ।
शिशिरः प्रासरत् सूरमण्डलं रजसा गिलन् ॥२४॥
प्रावर्तत वसन्तोऽथ निःसरत्पल्लवच्छलात् ।
ग्राहयन्नेव संन्यस्तशस्त्रानप्यस्त्रमंह्रिपान् ॥२५॥
ग्रीष्मो भीष्मोल्लसल्लूकापावकास्त्रविसर्जनैः ।
चूर्णयन् भूभृतस्तूर्णमथ प्रादुरभूद् भुवि ॥२६॥
स रोहितधनुर्मुञ्चन् धारानाराचधोरणिम् ।
तर्जयन् विद्युदङ्गुल्या प्रावृट्कालस्ततोऽभवत् ॥२७॥
यत्राप चक्रभृच्चक्रममोघमपि मोघताम् ।
शरासारः कथङ्कारमत्र मे प्रभवत्ययम् ? ॥२८॥
प्रावृडेतद् विमृश्येव ते मुनिं विटपावनैः ।
नागपाशैरिवाबध्नात् क्षितिबन्धाद् विनिःसृतैः ॥२९॥ युग्मम् ॥
वाहिनीर्गलपयन् बाणासनन्यस्तशिलीमुखः ।
राजहंसपरीतोऽथ शरत्कालः समाययौ ॥३०॥
ऋतवोऽभ्येत्य सर्वेऽपि क्रमेण कृतविक्रमाः ।
तत्र न प्राभवन् मत्तद्विपा इव नगोत्तमे ॥३१॥
वर्षानशनयोगेन मत्वा तमथ निर्मलम् ।
तत्पथ्यहेतवे **ब्राह्मी-सुन्दर्यौ** प्रैषयत् प्रभुः ॥३२॥
युवाभ्यामिति वाच्योऽयं **'मत्तेभाद् भ्रातरुत्तर'** ।
इत्यादाय प्रभोः शिक्षां व्रतिन्यौ ते निरीयताम् ॥३३॥

स्थानं तदथ ते याते न तं मुनिमपश्यताम् ।
दृष्टो गुल्मस्तु वल्लीनां सोच्छ्वासः पुरुषाकृतिः ॥३४॥

तत्र संभाव्य तं ताभ्यां केवलाकृष्टिमन्त्रवत् ।
उक्तां निशम्य तां वाचं मुनिः सोऽपीत्यचिन्तयत् ॥३५॥

शब्दोऽयं नियतं **ब्राह्मी-सुन्दर्योः** श्रुतिसुन्दरः । 5
भाषेते नानृतं चैते न चारूढोऽस्मि हस्तिनम् ॥३६॥

विकल्पात् कल्पयन्नेवं दध्यौ वन्दे लघून् न यत् ।
मानोऽयमेव मे हस्ती तमारूढोऽस्मि दुर्विधः ॥३७॥

सत्यं मत्वेति तातेन मय्यतीव दयालुना ।
प्रेषिते प्रतिबोधाय महासत्याविमे उभे ॥३८॥ 10

लघूनपि गुणज्येष्ठान् बन्धून् केवलबन्धुरान् ।
सिद्धार्थानिव तान् मूर्ध्नि करिष्ये सिद्धिहेतवे ॥३९॥

इत्यमानोऽवलद् यावज्ज्ञानेनापि स तत्क्षणात् ।
समानशीलयोः सख्यमित्यमानेन सस्वजे ॥४०॥

दिवि दुन्दुभयो नेदुरासेदुः पुष्पवृष्टयः । 15
प्रापुस्तं च तदा । भक्तिभासुरा वन्दितुं सुराः ॥४१॥

अथैषसुरसार्थेन स्तूयमानो मुनीश्वरः ।
जगाम देशनाधाम **युगादि**जगदीशितुः ॥४२॥

प्रभुं प्रदक्षिणीकृत्य गत्वा केवलिपर्षदि ।
केवली निषसादोडुमण्डले सितरश्मिवत् ॥४३॥ 20

अन्यदा समवासर्षी**दष्टापद**गिरौ विभुः ।
समं समीयतुश्चात्र **भरतेश्वर-वासवौ** ॥४४॥

देशनान्ते ततश्चक्री बन्धूनालोक्य वत्सलः ।
तेषां भोगविभागाय जिनराजं व्यजिज्ञपत् ॥४५॥

अथादिदेश भगवान् भूपते ! बन्धवस्तव ।
भोगान् रोगानिवापास्य किं भूयोऽभिलषन्त्यमी ? ॥४६॥
आनाय्य भोज्यामथ भूनाथो नाथं व्यजिज्ञपत् ।
भोजनायादिश स्वामिन् ! तर्हि मे बान्धवानमून् ॥४७॥
अथावादीज्जिनो नेदं प्रकारैः कल्पते त्रिभिः ।
कारिताभ्याहृतत्वाभ्यां राजपिण्डत्वतोऽपि च ॥४८॥
स्वामिनेति निषिद्धेऽस्मिन् सर्वथा तत्खिदाभिदे ।
अवग्रहभिदाः पृष्टः शक्रेणाख्यज्जगद्गुरुः ॥४९॥
शक्रस्य चक्रिणो राज्ञः स्थानेशस्य गुरोरपि ।
पञ्चधाऽवग्रहो भावात् पञ्चानामपि पुण्यकृत् ॥५०॥
अथ शक्रः प्रणम्याह प्रभो ! क्षेत्रेऽत्र **भारते** ।
मया वासाय साधूनां प्रदत्तोऽयमवग्रहः ॥५१॥
आकर्ण्य **भरतो**ऽपीति प्रीतो नत्वा जगद्गुरुम् ।
अनुजज्ञे निवासाय साधूनां **भारतीं** भुवम् ॥५२॥
अथापृच्छद् द्युभर्तारं महीभर्ता ससंमदः ।
देयं कस्यान्नामानीतमिदमेवं निवेद्यताम् ॥५३॥
गुणाधिकेषु कर्तव्या पूजेत्युक्ते बिडौजसा ।
साधून् विना गुणी कोऽस्ति मत्तोऽपीति विचिन्तयन् ॥५४॥
ज्ञातं सन्तितमां मत्तः श्रावकाः सद्गुणाधिकाः ।
तेषां पूजा विधेयेति **भरतो** निश्चयं व्यधात् ॥५५॥ युग्मम् ॥
अथ नत्वा जिनं शक्रो द्या**मयोध्या**मिलापतिः ।
भगवानपि चान्यत्र जगा**माष्टापदा**चलात् ॥५६॥
भरतोऽपि रतो धर्मे श्राद्धानाहूय भूयसः ।
इदं जगाद भोक्तव्यं भवद्भिर्मम मन्दिरे ॥५७॥

क्रियासु कृषिमुख्यासु कार्य चेतोऽपि न क्वचित् ।
भवद्भिः केवलं भाव्यं धर्मकर्मसु कर्मठैः ॥५८॥

पाठ्यमेतच्च निश्राव्यं भोजनान्ते मदग्रतः ।
जितो भवान् भयं चास्ति तस्माद् मा हन मा हन ॥५९॥

मत्वेदमथ ते श्राद्धा भवने तस्य भुञ्जते । 5
पठन्ति च वचस्तत् तद्व्यामोहगरगारुडम् ॥६०॥

सोऽपि श्रुत्वा प्रमादीदं व्यमृक्षद् विजितोऽस्मि कैः ।
कषायैर्भयमेतेभ्यस्तद् घात्याः प्राणिनो न मे ॥६१॥

प्रमादजाड्ययुक्तस्य नित्यं **भरत**भूपतेः ।
तद्वाक्यैरभवद् धर्मध्यानानलहसन्तिका ॥६२॥ 10

श्राद्धश्राद्धविवेकित्वे तन्नियोगिनिवेदिते ।
चक्री चक्रे परीक्षां तदणुव्रत-गुणव्रतैः ॥६३॥

श्रावकाणां तदा चक्रे निर्व्यूढानां परीक्षणे ।
रेखात्रयं स काकिण्या ज्ञानादित्रयसूचकम् ॥६४॥

तत्स्वाध्यायकृते वेदान् यान् निश्चिक्ये स चक्रभृत् । 15
तीर्थच्छेदे त्वनार्यत्वं मिथ्यात्वं चाभजन्त ते॥६५॥

§§ इतश्च तीर्थ**मृषभसेना**दिमुनिसिद्धितः ।
स्वपादस्पर्शनाच्चापि प्रकाश्य **विमलाचल**म् ॥६६॥

स्वामी मत्वा स्वनिर्वाणसमयं समयागतम् ।
प्रत्यक्शैलमिवोष्णांशुरारूढोऽष्टा**पदा**चलम् ॥६७॥ 20

प्रत्यपद्यत साधूनां सहस्रैर्दशभिः सह ।
चतुर्दशतपोयोगात् पादपोपगमासनम् ॥६८॥ विशेषकम् ॥

तथावस्थितमद्रीशपालो व्यालोक्य तं प्रभुम् ।
गत्वा विज्ञपयामास भूमिवासव**मार्षभि**म् ॥६९॥

श्रुत्वा चतुर्दशाहारपरिहारं जगद्गुरोः ।
न चतुर्दशभिर्भेजे रत्नैरपि नृपो मुदम् ॥७०॥

ततश्चरणचारेण चचाल **भरतेश्वरः** ।
परितो हरितो रुन्धन्नष्टा**वष्टापदं** प्रति ॥७१॥

वेगादयमथारूढस्तं तथावस्थितं प्रभुम् ।
अपश्यत् प्रसभोन्मीलद्बाष्पावलिविलोचनः ॥७२॥

स प्रणम्याभवद् यावदुपास्तिप्रस्तुताशयः ।
अपश्यत् तावदायातान् सर्वान् गीर्वाणनायकान् ॥७३॥

भक्तिशोकभरस्तोमभङ्गुरैः कृतकन्धरैः ।
तैः समं शमिनामीशमुपासामासिवानसौ ॥७४॥

माघकृष्णत्रयोदश्यां पूर्वाह्णेऽ**भीचिगे** विधौ ।
विध्वस्तकल्मषो मोक्षं स्वाम्येकसमयादयात् ॥७५॥

क्षपकश्रेणिमारह्य **बाहुबल्या**दयोऽपि च ।
मुक्तिं दश सहस्राणि मुनयः प्रभुवद् ययुः ॥७६॥

प्रभोर्मोक्षक्षणे तत्र नारकेष्वपि सौख्यदे ।
अज्ञातरुदितश्चक्री मूर्च्छितः क्ष्मातलेऽपतत् ॥७७॥

शोकग्रन्थिविभेदाय रुदितं शिक्षयन् हरिः ।
तस्य कण्ठमथालम्ब्य पूत्कारं तारमातनोत् ॥७८॥

लब्धसञ्ज्ञोऽथ राजापि रुदन्नुच्चैः स्वरं चिरम् ।
विह्वलं शोकपूरेण विलापानकरोदिति ॥७९॥

"नाथ ! त्यक्तः कुतो दोषादनाथोऽयं जनस्त्वया ।
युष्मद् विना कथं भावी भवारण्येऽशरण्यकः ? ॥८०॥

वियोगः सह्यते भानोः पुनरुद्गमनाशया ।
अनावृत्तिपदस्थस्य भवतस्तु सुदुःसहः ॥८१॥

मूलतोऽपि न यैर्दृष्टस्तेऽस्मत्तोऽतिवरं प्रभो ! ।
अदृष्टऽर्थे न तद् दुःखं दृष्टनष्टे हि यद् भवेत् ॥८२॥
बन्धवोऽप्यनुगन्तारस्त्वाममी मम सर्वथा ।
एक एवाहमत्रास्मि त्वया पङ्क्तिबहिष्कृतः" ॥८३॥
भूत्वापि तत्सुतश्च किमिति शोकवशंवदः । 5
अपि मुक्तिपदप्राप्तं किं व्रीडयसि तं प्रभुम् ? ॥८४॥
नृपः प्रलापान् कुर्वाणः स्वयं गीर्वाणभूभुजा ।
इत्थं प्रबोधितः स्तोकशोकशङ्कुर्बभूव सः ॥८५॥ युग्मम् ॥
§§ "अ**थादिनाथ**तज्जातीतरसिद्धाङ्गसंस्कृतिम् ।
यथाविधि विधायेन्द्रास्तत्र स्तूपत्रयं व्यधुः ॥८६॥ 10
ततश्चाष्टाहिकां **नन्दीश्वरे** कृत्वाऽऽश्रयं गताः ।
न्यस्य **माणवक**स्तम्भे विभुदंष्ट्रामपूपुजन् ॥८७॥
भरतोऽपि विभोरङ्गसंस्कारासन्नभूतले ।
त्रिगव्यूतोन्नतं चैत्यं चक्रे योजनविस्तृतम् ॥८८॥
तत्र चैत्ये चर्तुद्वारे प्रतिद्वारं स मण्डपान् । 15
विचित्रान् सूत्रयामास मणिभिर्मांसलप्रभैः ॥८९॥
प्रत्येकं तत्पुरः प्रेक्षामण्डपांश्चतुरो व्यधात् ।
अक्षपाटकचैत्यद्रुपीठपुष्करणीयुतान् ॥९०॥
तं गिरिं दण्डरत्नेन समीकृत्य स तेनिवान् ।
सोपानैर्योजनोच्छ्रायैरष्टाभिः परिवेषितम् ॥९१॥ 20
लोहयन्त्रमयानेष्यज्जनाशातनशङ्कया ।
रक्षका**नार्षभि**स्तत्राकार्षीदुद्गीर्णमुद्गरान् ॥९२॥
तस्य **सिंहनिषद्या**ख्यप्रासादस्य च मध्यतः ।
देवच्छन्दं व्यधाच्चक्री रत्नपीठप्रतिष्ठितम् ॥९३॥

प्रभूपदिष्टपूर्वैस्तद्वर्णचिह्नप्रसादिभिः ।
बिम्बानि **ऋषभा**दीनां चतुर्विंशतिमातनोत् ॥९४॥

कृत्वा रत्नमयी सर्वभ्रातृणां प्रतिमा अपि ।
तत्रोपास्तिपरां चक्री स्वमूर्तिमपि निर्ममे ॥९५॥

बहिश्चैत्यं चितास्थाने प्रभोः स्तूपमपि व्यधात् ।
भ्रातृणामपि च स्तूपान् नवतिं स नवाधिकाम् ॥९६॥

प्रतिष्ठाप्य च बिम्बानि तत्र चैत्ये यथाविधि ।
चक्रभृत् पूजयामास पूजया त्रिप्रकारया ॥९७॥

स चक्री चैत्यमुत्पश्यन् मुहुर्वलितकन्धरः ।
वस्त्रान्तमार्जितोन्मज्जद्बाष्पाविलविलोचनः ॥९८॥

निभृतं मौनिभिर्भूपैर्वृतोऽप्येक इव व्रजन् ।
मन्दं मन्दांह्रिसंचारमुत्ततार गिरेस्ततः'' ॥९९॥ युग्मम् ॥

असौ सैन्यजनैः स्वस्ववाहनत्वरणालसैः ।
शोकप्रच्छादितोत्साह**मयोध्यामा**गमत् पुरीम् ॥१००॥

नाभेयप्रभुपादानां दिवानिशमसौ स्मरन् ।
त्यक्तान्यव्यापृतिस्तत्र तस्थावस्वस्थमानसः ॥१०१॥

तममात्यजनो वीक्ष्य सर्वकृत्यपराङ्मुखम् ।
इति प्रबोधयामास पितृभ्रातृशुचाकुलम् ॥१०२॥

''जगतोऽपि कृतालोकं लोकाग्रपदसंस्थितम् ।
तातं हृतविपत्पातं शोचितुं तव नोचितम् ॥१०३॥

मृत्युनापहृते बन्धुजने रोदिति बालिशः ।
कृती तु तद्विघाताय धर्ममादाय धावति ॥१०४॥

त्वमप्याक्रान्तलोकेन शोकेन यदि जीयसे ।
शौण्डीर्यगर्जितं तत्ते न धत्ते ध्रुवमूर्जितम्'' ॥१०५॥

शक्रोऽप्यक्रीडयत् पीडाविस्मारणविधित्सया ।
एनं प्रतिदिनं नानाविनोदैरात्तसंमदम् ॥१०६॥
सांसारिकसुखम्भोधिमग्नो **भरत**भूपतिः ।
विभोर्मोक्षदिनात् पञ्च पूर्वलक्षाण्यवाहयत्त् ॥१०७॥

§§ "अन्येद्युः स्नात्रनिर्णिक्तगात्रष्टिरिलापतिः । 5
अन्तरन्तः पुरावासं भूरिभूषणभूषितः ॥१०८॥
रत्नादर्शगृहं प्राप वारस्त्रीपरिवारितः ।
तारिकानिकरोद्भासी शशीव गगनाङ्गणम् ॥१०९॥ युग्मम् ॥
तदा विलोकमानस्य नृपस्य मणिदर्पणम् ।
रूपादप्रतिरूपस्य प्रतिरूपमजायत ॥११०॥ 10
न्यस्तं मोहेन हिञ्जीरमिव तस्य महीशितुः ।
तदा लीलालुलत्पाणेर्निर्जगामाङ्गुलीयकम् ॥१११॥
विना तेनाङ्गुलीयेन तदादर्शे कनिष्ठिका ।
निःश्रीका निष्कलेवेन्दुमूर्तिस्तेन विलोकिता ॥११२॥
सौभाग्यं भूषणैरेव बिभर्ति वपुरङ्गिनाम् । 15
निश्चेतुमिति मोक्तुं स प्रारेभे भूषणावलीम् ॥११३॥
विमुच्य मुकुटं हैममयं मौलिं व्यलोकयत् ।
च्युतार्कबिम्बमुदयगिररिश्रृङ्गमिवास्तरुक् ॥११४॥
मुक्ते मौक्तिकताडङ्कयुगे च मुख**मार्षभिः** ।
अहंसमिथुनोद्भासिपार्श्वमब्जमिवैक्षत ॥११५॥ 20
व्यलोक्यत् परित्यक्तहारां स हृदयावनीम् ।
द्यामिवोद्वसितज्योतिश्चक्रां चक्रायुधाग्रणीः ॥११६॥
ग्रीवां विमुक्तमाणिक्यग्रैवेयाममैक्षत ।
शलाकामिव चैत्यस्य गलितामलसारिकाम् ॥११७॥

स भुजौ च्युतलक्ष्मीकौ निरैक्षिष्ट निरङ्गदौ ।
प्रतिमानविनिर्मुक्तौ दन्तीन्द्रदशनाविव ॥११८॥

हस्तावपास्तमाणिक्यकङ्कणौ पश्यति स्म सः ।
अनालवालवलयाविव किङ्किल्लिकन्दलौ ॥११९॥

शेषा अप्यङ्गुलीमुक्ताङ्गुलीयाः स व्यलोकयत् ।
अपुष्पाश्चम्पकतरोः शाखा इव गतत्विषः ॥१२०॥

एवं विमुक्तालङ्कारं सोऽपश्यद् वपुरप्रभम् ।
फाल्गुने मासि विस्रस्तपलाशमिव पादपम्'' ॥ १२१॥

''अचिन्तयच्च देहोऽयं भूषणैरेव भासते ।
पलालपूरिता चर्मवर्णकैरिव गब्दिका ॥१२२॥

शरीरं मलमञ्जूषा बहिर्दुर्गन्धभीरुभिः ।
मूढैः कर्पूरकस्तूरीचन्दनैरधिवास्यते ॥१२३॥

मलोत्पन्नाद् मलैः पूर्णदतोऽङ्गाल्लीनमन्तरा ।
बोधिजं ज्ञानमादेयं सरसो जलजं यथा ॥१२४॥

स्वकीयान् बान्धवानेव मन्ये धन्यतमानिमान् ।
यैरिदं राज्यमुत्सृज्य लेभे लोकोत्तरं पदम् ॥१२५॥

अहं तु विषयास्वादपङ्कनिःशूकशूकरः ।
गणयामि न नामैवमात्मानं मानुषेष्वपि'' ॥१२६॥

''चिन्तयन्नित्ययं धीमानपूर्वकरणक्रमात् ।
भावनां भवनाशाय भावयामास भूपतिः ॥१२७॥

अथोच्चैः सिद्धिसौधाग्रसङ्गजायन्मनोरथः ।
क्षितीशः क्षपकश्रेणीनिःश्रेणीमारुरोह सः ॥१२८॥

मुनिस्तदानीमानीतकेवलश्रीकरग्रहः ।
उत्सवोत्सुकचित्तेन सुरेन्द्रेणाभ्यगम्यत ॥१२९॥

ख्यापयित्वा बलीयस्त्वं व्यवहारनयस्य सः ।
शक्रेणाभिदधे दीक्षालिङ्गग्रहणहेतवे ॥१३०॥

केशसंभारमुत्पाट्य मुष्टिभिःपञ्चभिर्नृपः ।
दत्तं देवतया शेषं मुनिवेषमुपाददे ॥१३१॥

सममेव महीशानां सहस्रैर्दशभिस्तदा । 5
साग्रहैर्जगृहे दीक्षा दक्षैः स्वाम्यनुवृत्यते ॥१३२॥

तदानीं केवलज्ञानमहिमानं महामनाः ।
व्यधत्त तस्य **नाभेयप्रभो**रिव क्रतुप्रभुः ॥१३३॥

भरतोऽपि ततस्तातवर्तनीमनुवर्तयन् ।
असिञ्चद् देशनासारसुधाभिरवनीवनीम् ॥१३४॥ 10

अतिक्रम्य ततः पूर्वलक्षं दीक्षादिनादसौ ।
आरोहद् मुषिताशेषकष्ट**मष्टापदा**चलम् ॥१३५॥

तत्रैष मासक्षपणं विधाय शैलेशिकायोगपरायणोऽथ ।
जगाम् सिद्धिं सुरसार्थनाथनिर्वृत्तनिर्वाणमहोत्सवश्रीः'' ॥१३६॥२९॥

॥ इति भरतभूषणनामनि महाकाव्ये चतुर्थः सर्गः ॥ 15

● ● ●

अथ **सनत्कुमार**गुणसारमसमानमनुमोदन्नाह –

सु च्चिय सणंकुमारो सलहिज्जइ जो तहा समत्थो वि ।
मोत्तूण दव्वरोगे चिगिच्छगो भावरोगाणं ॥३०॥

[स एव सनत्कुमारः श्लाघ्यते यस्तथा समर्थोऽपि ।
मुक्त्या द्रव्यरोगांश्चिकित्सको भावरोगाणाम् ॥]

व्याख्या – 'सुच्चिय' **स एव** 'सणंकुमारो' **सनत्कुमारनामा** राजर्षिः 'सलहिज्जइ' **श्लाघ्यते** स्तूयते । 'जो तहा समत्थो वि' **यस्तथा** तेन **जय-विजय**वैमानिकसुरपुरतः करकनिष्ठाङ्गुलीपुनर्नवीकरणरूपिणा प्रकारेण **समर्थोऽपि** खेलौषधीप्रभृतिलब्धिरत्नाब्धिरपि 'मुत्तूण दव्वरोगो' **द्रव्यरोगान्** कासकुष्ठादीननेकशो **मुक्त्वा**ऽवधीर्य 'चिगिच्छगो' **विचिकित्सकः** । केषाम् ? 'भावरोगाणं' **भाव-रोगाणां** दुष्कर्मणामिति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ स्वस्तिभागस्ति **कनकपुरं** पुरमिवामरम् ।
विक्रमी **विक्रमयशा**स्तत्राजनि रसापतिः ॥१॥

पञ्च तस्यासन् राज्ञ्यः स्त्रीरसिकात्मनः ।
तथाप्यतृप्ततस्ताभ्योऽग्नि समिद्भ्य इव सोऽभवत् ॥२॥

एकदाऽसौ व्रजन् राजपाटिकायामलोकत ।
विष्णुश्रियं गवाक्षस्थां **नागदत्ते**भ्यवल्लभाम् ॥३॥

श्रीधाम्नोऽस्य प्रविश्यान्तः सा मोहतिमिरोदये ।
प्राणेन पञ्चबाणस्य चित्तरत्नमचूचुरत् ॥४॥

कामादात्मसनाभेस्तां विदित्वा चित्तचौरिकाम् ।
वृत्ताक्षेपेण चिक्षेपान्तःपुरे पृथिवीपतिः ॥५॥

अलङ्कारान्वितां बाहुपाशबद्धामिमामयम् ।
चकार विलसद्भूतिं महत्कूटाश्रयात् ततः ॥६॥

लम्पाकाया वियोगेऽस्या राकाय इव चन्द्रमाः ।
तमसा स्कन्दितो **नागदत्तो**ऽभूद् विकलः किल ॥७॥

हा ! हंसगमने ! चन्द्रवदने ! पद्मलोचने ! ।
प्रिये ! विष्णुश्रि ! क्वासि मे देहि दर्शनम् ॥८॥

क्रोशन्निति वृतौ बालैर्मशकैरिव गौरसौ । 5
संभ्रमी बम्भ्रमीति स्म चतुष्के चत्वरे त्रिके ॥९॥ युग्मम् ॥

राजा पुनस्तदासक्तस्त्याजान्तःपुरं परम् ।
नेहलोकं न च परं लोकं चिन्तयति स्म च ॥१०॥

स कामं करणाचारं मुक्त्वान्यमविचारकः ।
सकामं करणाचारं तयैव सह तेनिवान् ॥११॥ 10

एवं **विष्णुश्रिया** सार्धं मग्नस्य रतिसागरे ।
जगाम क्षणवत् क्षोणिपतेः कालः कियानपि ॥१२॥

अन्याभिरथ राज्ञीभिस्तस्याः कार्मणमादधे ।
सपत्न्येकापि दुःखाय तावत्यः किं पुनश्च ताः ॥१३॥

ततः श्रद्धालुनेवास्यामन्तकेनापि सा हृता । 15
राजा तु तच्छवं कृत्वोत्सङ्गे मूढोऽब्रवीदिति ॥१४॥

विनयातिक्रमः कोऽपि कोपने ! विहितो मया ।
यदद्य योगिनीव त्वं कृतमौना न भाषसे ॥१५॥

निजं स्मरामि येनागस्तद् मनोऽग्रे त्वया हृतम् ।
आदेशं देहि मे देवि ! किङ्करः किं करोमि तत् ? ॥१६॥ 20

इत्यनेकप्रकारं स प्रणमन् मानिनीमिव ।
सान्त्वयामास तां मोहग्रहिलो महिलां नृपः ॥१७॥

तं तथा विकलं वीक्ष्य मन्त्रव्याजेन मन्त्रिणः ।
अनयन्नन्यतो मन्त्रिनरास्तच्च शवं बहिः ॥१८॥

नृपतिर्यावदायासीदालोच्य सचिवैः सह ।
वासौकस्तावदद्राक्षीद् मृगाक्षीशून्यमञ्जसा ॥१९॥

अथ क्रशन्नमूंस्तेषामधावत वधाय सः ।
उल्लण्ठोल्लण्ठवद् दूरं मुमुचे सचिवैस्त्वयम् ॥२०॥

द्वित्रैर्दिनैः समागत्यामात्या वात्यायितं नृपम् ।
प्रहासगर्भितैर्भक्तियुक्तिवाक्यैरसान्त्वयन् ॥२१॥

"किमर्थ देव ! कोपोऽयं कृतकोपशमे त्वयि ।
कश्च ते मनसो मोहः परमोहभिदाभृतः? ॥२२॥

जितविश्वकलाकेले ! कलाकेलिरयं किमु ।
बाधते त्वां निजक्षत्त्रवंशकेतो ! विशारद ! ॥२३॥

देव ! त्वमसि नो नाथः सदादेशं तवान्वहम् ।
वयं विदध्महे तस्मात् प्रसीद किमु सीदसि ?" ॥२४॥

श्रुत्वेति वचनं तेषां स्वाग्रहग्रहिलो नृपः ।
विष्णुश्रीर्दर्श्यतां मह्यमुवाच सचिवानिति ॥२५॥

प्रोचुस्ते देव ! सा चण्डकोपाऽध्यास्ते पुराद् बहिः ।
मानिनीं मानयामस्तां संभूय चलताऽधुना ॥२६॥

इत्युक्त्वा नृपतिर्नीतो विनीतैरिव मन्त्रिभिः ।
तत्र राज्ञीशवं यत्रारक्षै रक्षितमस्ति तत् ॥२७॥

तत्र दुर्गन्धमाघ्राय सर्वे नाशापुटं व्यधुः ।
हा ! किमेतदिति प्रोक्ता मन्त्रिणोऽप्यूचिरे नृपम् ॥२८॥

देव ! कोपेन कुथिता देवी कुञ्जेऽत्र वर्तते ।
गन्धोऽयं दुस्सहोऽन्येषां तस्य गन्धकरेरिव ॥२९॥

तद् यूयमेव गत्वा तां पुरः सान्त्वयत क्षमम् ।
उपरोत्स्यामहे पश्चादागत्य वयमप्यमूम् ॥३०॥

मन्त्रिभिः प्रेरितो राजा तत् कुञ्जं यावदभ्यगात् ।
पवनापूर्णभस्त्रावदुच्छूनं तावदग्रतः ॥३१॥
चलत्कृमिकुलाकीर्णं फलमौदुम्बरं यथा ।
नवश्रोत्रमुखोद्वान्तविस्रपूयास्रकिल्बिषम् ॥३२॥
फेरुण्डखण्डितोपाङ्गं शकुन्याकृष्टलोचनम् ।
अद्राक्षीदेष बीभत्सतमं **विष्णुश्रियः** शवम् ॥३३॥ विशेषकम् ॥
स दृष्ट्वेदं सनिर्वेदं चिन्तयामासिवानिति ।
वराकीयं मृता हन्त ! नाज्ञासिषमिदं हहा ! ॥३४॥
अहं कदाग्रही बाल इव मूर्ख इवान्धवत् ।
शुचिभिः सचिवैरस्मि साधु साधु विबोधितः ॥३५॥
"रे जीव ! यत्कृते जातिर्लज्जा शीलं कुलं यशः ।
त्वया त्यक्तं तया त्यक्तो भवानेकपदेऽपि हि ॥३६॥
त्यक्तोऽनया यथाऽकस्मादायुषपि भवांस्तथा ।
त्यक्ष्यतेऽसौ यथा त्यक्ता तज्जीव ! सुकृतं कुरु' ॥३७॥
विचिन्त्येति निवर्त्याधं स्वमनोऽश्वं च चञ्चलम् ।
सौधमागत्य सामन्तचक्रे चक्रेऽधिपं सुतम् ॥३८॥
सुव्रताचार्यतः प्राप्य स व्रतं संवृतेन्द्रियः ।
मृत्वा कल्पेन कल्पेऽभूत् तृतीये त्रिदशस्ततः ॥३९॥
§§ इतश्चास्ति पुरं **रत्नपुरं** तत्राभवद् नृपः ।
नरवाहन इत्येष भिक्षुकाणां मते रतः ॥४०॥
तत्र च्युत्वा स देवत्वाज्जिनधर्मदृढाशयः ।
जिनधर्माभिधानोऽभूद् महेभ्यतनयो नयी ॥४१॥
संसारसागरे मर्त्यरत्नद्वीपमुपागतः ।
स दौर्गत्यच्छिदे रत्नत्रयार्जनपरोऽभवत् ॥४२॥

इतश्च **नागदत्तः** स्त्रीवियोगार्तो मृतस्ततः ।
भ्रान्त्वा तिर्यक्षु विप्रोऽग्निशर्मा **सिंहपुरे**ऽभवत् ॥४३॥

त्रिदण्डिव्रतमासाद्य द्विमासक्षपणादिकृत् ।
स **रत्नपुर**मायासीदज्ञासीद् नृपतिश्च तम् ॥४४॥

स राजपूजितः पूजां लोकतो लभते पुरे ।
श्राद्धस्तु **जिनधर्मो**ऽस्य भ्रूमात्रेणापि नानमत् ॥४५॥

त्रिदण्डी पूर्ववैरात् तमनमन्तं विशेषतः ।
रक्ताक्षो रोषतः सैष विकटादकटाक्षयत् ॥४६॥

अन्यदा पारणे भूपामन्त्रितः सोऽब्रवीदिति ।
मां भोजयसि चेत् तन्मेऽभिग्रहं भूपते ! श्रृणु ॥४७॥

जिनधर्माभिधश्रेष्ठिपृष्ठविन्यस्तभोजनः ।
पारये परमान्नेनावसथे तव नान्यथा ॥४८॥

राज्ञोचेऽन्यस्य पृष्ठेऽस्तु त्रिदण्डी नेति सोऽवदत् ।
द्विधापि **जिनधर्म**स्य नामन्यपि वहन् रुषम् ॥४९॥

तदा तदाग्रहं राज्ञ ज्ञापितः सत्त्ववानयम् ।
सद्धर्मद्वेषिणे तस्मै प्रष्ठः पृष्ठमदाद् मुदा ॥५०॥

स तप्तपायसोत्तप्तपात्रप्लोषितपुद्गलः ।
सत्त्वकाष्ठां परां प्राप सुवर्ण इव वर्णिकाम् ॥५१॥

"अचिन्तयच्च रे जीव ! पूर्वजन्मनि जन्मिनाम् ।
हृत्तापकारिन् ! किं पृष्ठतपं न सहसेऽधुना ? ॥५२॥
अग्निकर्म विना कर्म कर्मरोगस्य किं स्पृशेत् ? ।
रे जीव ! तव वक्रस्य कथं वाऽऽर्जवसंभवः ?" ॥५३॥

इत्यदीनेन लीनेन सत्त्वे सत्त्ववताऽमुना ।
सुस्थितेन स्थितं यावत् परिव्राजकभोजनम् ॥५४॥

कल्याणपात्रं कल्याणपात्रस्यास्य त्वचेतनम् ।
भागीव भागमादाय पृथग् जज्ञे नृपाग्रतः ॥५५॥

"अथागत्य निजागारमापृच्छ्य स्वजनानयम् ।
दीक्षां गृहीत्वाऽध्यारोहद् विवेकमिव पर्वतम् ॥५६॥
साक्षादिवाप्रमत्तत्वशिखरं मुनिशेखरः । 5
तत्रारूह्य किलामुह्यन्नसावनशनं व्यधात् ॥५७॥
अन्वर्धमासं प्रत्याशं परां काष्ठां चकार सः ।
लोकपालैः समं सख्यं भावीन्द्रो घटयन्निव ॥५८॥
तस्योत्सर्गजुषो गृध्राः पृष्ठमांसादनं व्यधुः ।
अतः सत्यं चकाशे यद् मुनेरपि वनेऽरयः ॥५९॥ 10
तत्रैवं सूत्रयन्तस्ते क्षते क्षारमिव न्यधुः ।
महात्मा सोऽधिसेहे तु निजदेहेऽपि निःस्पृह ॥६०॥
षष्टिं दिनान्यनाहारः प्राप्यायुः पारमात्मनः ।
इन्द्रो बभूव **सौधर्मे** जिनधर्मो महामुनिः" ॥६१॥
त्रिदण्ड्यप्याभियोग्येन कर्मणोपार्जितेन सः । 15
मृत्वाऽस्य वाहनत्वेन तत्राभूदभ्रमूपतिः ॥६२॥
कदाचित् कर्मणा जीवस्तेन कर्म कदाचन ।
यथाऽधः क्रियतेऽभूतां तौ भवान्तरितौ तथा ॥६३॥
गजश्च्युत्वा भवं भ्रान्त्वा मर्त्ये चाज्ञानकष्टतः ।
यक्षोऽ**सिताक्ष** इत्यासीदसौ **कैलास**भूधरे ॥६४॥ 20

§§ इतश्च **भारते** क्षेत्रे **कुरु**मण्डलमण्डनम् ।
इहास्ति **हास्तिनपुरं** पुरं सुरपुरोपमम् ॥६५॥
शुनासीरनिभस्तत्रारिभूभृत्पक्षशातनः ।
विश्वव्याप्यश्वसेनोऽभूद् **विश्वसेनो** नरेश्वरः ॥६६॥

सहदेवीति तस्यासीद् देवी देवीव रूपतः ।
दासो यदाननस्येन्दुरङ्कितः शङ्कितो जनैः ॥६७॥
च्युत्वाऽथ जिनधर्मेन्द्रस्तस्याः कुक्षिकुशेशये ।
चतुर्दशमहास्वप्नसूचितः समवातरत् ॥६८॥
जिनो वा चक्रवर्ती वाऽवतीर्णेऽयमिति स्वयम् ।
मिथः स्वप्नान् विचार्याऽन्वमोदेतां राजदम्पती ॥६९॥
अथो नवसु मासेषु पूर्णेषु नृपवल्लभा ।
विश्वजैत्रमियं पुत्रमसूत श्रीरिव स्मरम् ॥७०॥
जन्मोत्सवं विधायोच्चैः पितरौ दुस्तरौजसः ।
सनत्कुमार इत्यस्य व्यधातामभिधामथ ॥७१॥
पञ्चोच्चग्रहजन्माऽसौ पुत्रः पञ्चजनेशितुः ।
धात्रीभिः पञ्चभिः पाल्यमानोऽभूत् पञ्चवार्षिकः ॥७२॥
शस्त्रशास्त्रकलापात्रं वर्धमानः क्रमादयम् ।
रमारामाभिरामाङ्गोऽभवद् यौवनमाश्रितः ॥७३॥
महेन्द्रसिंहनामाऽस्य सपांशुक्रीडितः सुहृत् ।
बभूव **शूर-कालिन्दी**सुतः सत्प्रीतिविश्रुतः ॥७४॥
अन्यदा वन्यदावाग्निव्यंशुकानिह किंशुकान् ।
तन्वंस्तापयितुं पान्थान् वसन्तर्तुरवर्तत ॥७५॥
समं **सनत्कुमारेण** **समहेन्द्रेण** भूपतिः ।
उद्यानमगमत् क्रीडाविधौ तत्र मधूत्सवे ॥७६॥
कुमारः सारवीक्षार्थं निजाश्वस्य कशामदात् ।
यावद् तावदसौ भेजे मनसोऽपि नवं जवम् ॥७७॥
तस्मिन्नदर्शनीभूते वृत्तान्तं **विश्वसेन**राट् ।
ज्ञात्वाऽनुयान् **महेन्द्रेण** निषिद्धः स्वपदग्रहम् ॥७८॥

देव ! प्रसादमाधाय निवर्तस्व पुरं प्रति ।
अहं शुद्धिं कुमारस्यानेष्ये कतिपयैर्दिनैः ॥७९॥

एवमुक्त्वा नृपं म्लानमुखाब्जं **शूरनन्दनः** ।
जगाम मित्रमन्वेष्टुं सन्ध्याराग इव क्षणात् ॥८०॥

स भ्राम्यन्मन्युहृत्पूरपूरितः परितोऽपि हि । 5
सनत्कुमारमग्रस्थं जातरूपमथैक्षत ॥८१॥

प्रतिग्रामं प्रतिपुरं प्रत्यद्रि प्रतिपत्तनम् ।
पर्यटन्नटवीं चापि विशश्राम न नाम सः ॥८२॥

यावत् संवत्सरं भ्राम्यन् **सनत्कुमार**दिदृक्षया ।
प्रवृत्तिमपि न प्राप क्वापि दुःस्थ इव श्रियम् ॥८३॥ 10

सदा भ्रमन्नरण्यानीं सदागतिरिवान्यदा ।
क्षीरार्णवमिवाद्राक्षीदग्रतो विपुलं सरः ॥८४॥

स-हंसवयसं स्वच्छं प्रकृत्या विपुलाशयम् ।
दृष्ट्वैष मुमुदे सारं कासारं तं कुमारवत् ॥८५॥

तत् प्रविश्य सरो यावज्जलकेलिं चकार सः । 15
तावदस्याभवत् कर्णसङ्गी संगीतकध्वनिः ॥८६॥

ततस्तदनुसारेण व्रजन्नेण इवोच्चकैः ।
शिबिरं सरसः सेतुमृष्टरेणु स दृष्टवान् ॥८७॥

उलत्पुच्छकल्लोलं वाजिवृन्दं समुद्रवत् ।
तत्रैकतो ददर्शैष गजानपि घनानिव ॥८८॥ 20

शिबिरदक्षिणेनैक्षि तेना**शोकवनी**तले ।
आस्थानी च **सुधर्मे**व शस्या कस्यापि भूपतेः ॥८९॥

परितस्तां च स स्फारस्फरानैक्षिष्ट खड्गिनः ।
अर्केन्दुकलिताँल्लोकालोककूटानिवोद्भटान् ॥९०॥

कारयन्तं च सङ्गीतं तदन्तः स्फीतवैभवम् ।
वारस्त्रीचामरोद्वीज्यमानं सानन्दमानसम् ॥९१॥
दृष्ट्वा **शौरिस्तदाकारं** सर्वथा पृथिवीपतिम् ।
किं कुमारोऽयमित्यन्तश्चिन्तयामास विस्मितः ॥९२॥ युग्मम् ॥
एकाकिनोऽस्य तुरगापहृतस्य कुतो ह्यदः ।
साम्राज्यमथवा कश्चिद् नृपोऽन्योऽयं तदाकृतिः ॥९३॥
इत्ययं संशयानोऽत्र क्षणे बन्दिवचोऽश्रृणोत् ।
सनत्कुमार ! नन्द त्वं **विश्वसेन**नृपाङ्गज ! ॥९४॥
श्रुत्वेति मुदितः **शौरिर्**ननर्त विलसद्भुजः ।
धन्योऽहमद्य धन्योऽहमित्युच्चैरुच्चरन् वचः ॥९५॥
श्रुत्वेति तं च दृष्ट्वोपलक्ष्य चैषोऽभ्यधावत ।
परिरब्धुं कुमारोऽब्धिरिव राकानिशाकरम् ॥९६॥
मिथः स्वजन्तौ तौ बाष्पाम्बुभिः स्नेहमहीरुहम् ।
चक्रतुर्विरहप्लुष्टं रोमाञ्चैः पत्रलं किल ॥९७॥
अन्तः प्रवेष्टुमनसौ किल तौ मिलितौ मिथः ।
भुजार्गलापिनद्धौ न व्यघटेतां कपाटवत् ॥९८॥
शूरसूनुरनूनेन विनयेन नृपाङ्गजम् ।
अथो ननाम रजसा स्वं ललाम ललामयन् ॥९९॥
यथासनमथासीनौ तावुभावथ भूपभूः ।
उवाच **शौरिं** कच्चित् ते शुभं तातम्बयोरपि ॥१००॥
सोऽप्यूचेव देव ! विश्वस्य विश्वस्याप्यद्य विद्यते ।
शुभं त्वयि जगज्जीवे दिष्ट्या दृष्ट्या विलोकिते ॥१०१॥
इति क्रमेण कथिताशेषवार्तोऽरमादरात् ।
कुमारादेशतो वारस्त्रीभिः स्नानमकारयत् ॥१०२॥

भुक्तोत्तरमथावोचत् कुमारमिति **शूरसूः** ।
स्वामिन्नश्वापहारोर्ध्वं यथावत् कथयस्व मे ॥१०३॥

स्वयं स्ववृत्तमाख्यातुं नोचितं महतामिति ।
कुमारो **बकुलमतीं** दयितामादिशद् दृशा ॥१०४॥

सा तु **प्रज्ञप्ति**विद्याया: प्रभावात् परिभाव्य तत् ।
कुमारे किल निद्राणेऽस्मै तद्वृत्तमचीकथत् ॥१०५॥

शृणु देवर ! देवोऽयमपहृत्यार्वणा तदा ।
क्षिप्त: पापात्मनाऽरण्यं भवी भवमिवासख: ॥१०६॥

कर्षं कर्षमयं वल्गां विभु: खिन्नकरोऽमुचत् ।
अश्वोऽपि सोऽन्यथाशिक्षस्तैरेव चरणै: स्थित: ॥१०७॥

ततोऽवतीर्य पर्याणमुन्मोच्य सुहृदा तव ।
यदाऽमोचि तदा प्राणैरपि स्वामिद्विषन्निति ॥१०८॥

आर्यपुत्रस्ततस्तृष्णातुरोऽनाप्तजल: क्वचित् ।
गच्छन् सप्तच्छदच्छायं मूर्च्छितो न्यपतद् भुवि ॥१०९॥

तद्वृक्षवासिना यक्षेणोक्षितोऽयं ततोऽम्भसा ।
लब्धसञ्ज्ञो जलं पीत्वाऽपृच्छत् कस्त्वं कुतो जलम् ? ॥११०॥

निष्कारणोपकारी स कुमारेणोदितोऽवदत् ।
अहं यक्ष: समानैषं मानसात् त्वत्कृते जलम् ॥१११॥

ऊचे कुमारस्तापो मे शाम्यस्तत्रैव मज्जनात् ।
यक्षश्चक्रे तथाऽमज्जदयं सज्जश्च जातवान् ॥११२॥

तत्र**असिताक्ष**यक्षेण वीक्षित: पूर्ववैरिणा ।
खलीकृतश्च, यत्प्रेम-द्वेषो जन्मानुगामिनौ ॥११३॥

कुमारयक्षौ तौ कल्पाम्भोदसोदरगर्जितौ ।
युध्यन्तौ मल्लयुद्धेन ददृशाते सुरैरपि ॥११४॥

यक्षो मुष्टिप्रहारेण कुमारेण हतोऽनशत् ।
हृष्टाश्चास्योपरिष्टाच्च पुष्पवृष्टिं व्यधुः सुराः ॥११५॥

मानसादवतीर्णेऽयमथ स्त्रीपदपद्धतिम् ।
अद्राक्षत् पथि पञ्चेषुतूणालीमिव सर्जिताम् ॥११६॥

विस्मितोऽग्रे गतोऽपश्यदसावष्टौ कुमारिकाः ।
आसामाशाधिदेवीनामिवामज्जच्च मानसे ॥११७॥

अतिसृत्य कुमारस्ता **नन्दनो**द्यानमध्यगाः ।
अपृच्छद् नाम का यूयं किमरण्येऽत्र तिष्ठथ ? ॥११८॥

ताः प्रोचुरित एवास्ति पुरी नः प्रियसंगमा ।
विद्याधरपति**र्भानुवेगो**ऽस्यां तद्भुवो वयम् ॥११९॥

अस्तं रविरुपैत्येष भद्र ! तस्माद् भवानपि ।
विश्रामं कुरुतामेत्य नगर्यां नः, क्व यास्यति ? ॥१२०॥

इत्युक्त्वा ताभिरात्मीयकिङ्करैरर्दर्शिता ततः ।
नीतो नगर्या चण्डांशुरपि द्वीपान्तरं ययौ ॥१२१॥

ततः कञ्चुकिना ताभिर्नायितो राजमन्दिम् ।
असावभ्युत्थितो **भानुवेगे**नापि महीभुजा ॥१२२॥

विहितोचितसन्मानो राज्ञाऽसौ भणितस्ततः ।
कुमार ! विक्रमाधार ! ममाष्टौ कन्यका इमाः ॥१२३॥

जेता त**दसिताक्ष**स्य तामसस्येव भानुमान् ।
पतिर्दिशामिवैतासां त्वं दिष्टोऽ**स्यर्चिमालिना** ॥१२४॥

इमास्तदुद्वहेत्युक्तः कुमारस्तत् तथाऽकरोत् ।
ताभिः सहैकपल्यङ्के वासवेश्मन्यशेत च ॥१२५॥

अत्रान्तरे छलान्वेषी निद्राणं तं परिश्रमात् ।
असिताक्षः समुत्पाट्याक्षिपद् गिरिसरित्तटे ॥१२६॥

यावज्जागर्ति वयसां विरावैर्विगमे निशः ।
कुमारस्तावदात्मानं शयितं भुवि दृष्टवान् ॥१२७॥

न ताः कन्या न तद् वेश्म न तद् राज्यं न सा पुरी ।
किमेदित्यसावन्तर्विस्मितोऽथ व्यचिन्तयत् ॥१२८॥

पाणिग्रहस्वरूपः किं स्वप्नोऽभूदथवाऽस्त्ययम् ।
यद्वाऽयं न यतोऽश्वेनापहृतोऽस्म्येक एव हि ॥१२९॥

पाणिग्रहस्वरूपस्तद् नूनं स्वप्नोऽभवद् मम ।
सत्य एव पुनः पाणिकङ्कणेनामुना मनाक् ॥१३०॥

कुमारश्चिन्तयित्वैवमविखिन्नमनास्ततः ।
धम्मिल्लं परिधानं च दृढीकृत्याग्रतोऽचलत् ॥१३१॥

यावत् किञ्चिदसौ वर्त्म ययौ तावत् पुरो वने ।
दिव्यं भवनमद्राक्षीदेकमद्रितटीगतम् ॥१३२॥

इन्द्रजालं किमप्येतदपि स्यादिति जग्मिवान् ।
यावत् तावदिहाश्रौषीदेव स्त्रीरुदितध्वनिम् ॥१३३॥

अथ यावच्च कारुण्यात् केयं किं रोदितीत्ययम् ।
दध्यौ तावद् व्यलापीच्च सेति दीनतराक्षरम् ॥१३४॥

कुरुवंशनभश्चन्द्र ! **विश्वसेन**नृपाङ्गज ! ।
सनत्कुमार ! चेद् नेह भर्ताऽभूर्मे कथञ्चन ॥१३५॥

तत् परत्र भवेरित्थमुदीर्येति स्थिता ततः ।
कुमारो विस्मितोऽधावत् तत्स्वरूपं निरूपितुम् ॥१३६॥

उत्फालश्चन्द्रशालायां गतश्चायमलोकत ।
उद्बन्धनगतामेतामनिमेषां सुरीमिव ॥१३७॥

आर्यपुत्रस्तु तत्पाशग्रन्थिं क्षुरिकया रयात् ।
छित्त्वा तामङ्कमारोप्य वीजयामास वाससा ॥१३८॥

विलोक्य सापि मूर्च्छान्ते कुमारमिति साध्वसात् ।
अङ्काद् नोत्थातुमशकत् पङ्कादिव जरद्गवी ॥१३९॥
आर्यपुत्रोऽब्रवीदेतां स्मितविच्छुरिताधरः ।
किं ते **सनत्कुमारः** स्यादिति यस्य कृतेऽकृथाः ? ॥१४०॥
साऽभ्यधत्त स मे भर्ता मनोरथनिवेशितः ।
पितृभ्यां यदहं तस्योदकपूर्वमदायिषि ॥१४१॥
असंवृत्तविवाहां तु मामेकः खेचराङ्गजः ।
कुट्टिमादपहृत्येहानीय शून्याश्रयेऽमुचत् ॥१४२॥
आत्मना तु गतः क्वापीत्युक्तमात्रेऽनया तदा ।
कुमारः खेचरेणैत्योल्ललितः कन्दुको यथा ॥१४३॥
हाहारवपरा सा तु मूर्च्छिता पतिता भुवि ।
वज्रेणेव कुमारेण पतता स तु मारितः ॥१४४॥
आर्यपुत्रः समाश्वस्य तामथ स्वं न्यवेदयत् ।
स्त्रीरत्नं पर्यणैषीच्च **सुनन्दा**ख्यामिमां मुदा ॥१४५॥
कुमारमारितस्यास्य स्वसा **सन्ध्यावली**त्यथ ।
प्राप्ताऽद्राक्षीद् निजं **विद्युद्वेगा**ख्यं मृतमग्रजम् ॥१४६॥
क्रुद्धा साऽऽदौ ततोऽस्मार्षीदिति नैमित्तिकोदितम् ।
यद् भ्रातृवधकोऽमुष्याः परिणेता भविष्यति ॥१४७॥
विमृश्येति विवाहार्थमार्यपुत्रमुपास्थित ।
सुनन्दानुमतेनेयमप्युदुह्यत चामुना ॥१४८॥
अत्रान्तरे समायातौ खेचरौ द्वौ सुराविव ।
आर्यपुत्रं प्रणम्येति प्राञ्जली समभाषताम् ॥१४९॥
हरिचन्द्र-चन्द्रसेनौ देवाऽऽवामभिधानतः ।
चन्द्रवेग-भानुवेगखेचराधिपयोः सुतौ ॥१५०॥

तातावपि समायान्तौ तिष्ठतस्त्वामुपासितुम् ।
त्वदर्थं प्रहिते ताभ्यामेते च रथवर्मणी ॥१५१॥

यस्मादशनिवेगाख्यः खेचरेन्द्रस्तवोपरि ।
आगच्छन् सबलोऽस्त्यात्मसुतं श्रुत्वा त्वया हतम् ॥१५२॥

इति यावत् कुमाराग्रे शुद्धिमावेद्य तौ स्थितौ ।
चन्द्रवेग-भानुवेगौ तावत् तावप्युपागतौ ॥१५३॥

प्रज्ञप्तिमार्यपुत्राय तदा सन्ध्यावली त्वदात् ।
वेगादशनिवेगश्च परिपन्थी समागमत् ॥१५४॥

चन्द्रवेग-भानुवेगौ ससैन्यावतिदुर्धरौ ।
बलेनाशनिवेगस्य सह योद्धुमढौकताम् ॥१५५॥

सैन्ययोरुभयोः शस्त्राशस्त्रिवह्निकणाच्छलात् ।
तदा सङ्ग्रामभीत्येव तत्रसुस्तारका दिवि ॥१५६॥

मसृणा घुसृणेनेवास्त्रेण विस्रेण युद्धताम् ।
पाणिपादाननैः पद्मैरिव रेजे तदाजिभूः ॥१५७॥

कुमारोऽशनिवेगेनाङ्गाङ्गिशस्त्रास्त्रदारुणम् ।
रणं चकार परितो वीक्ष्यमाणः सुरासुरैः ॥१५८॥

अत्रान्तरे कुमारस्य पूर्वपुण्यमिवाङ्गवत् ।
चक्रमागात् करे तेन लूनं वैरिशिरोऽमुना ॥१५९॥

चक्री सनत्कुमारोऽयं चतुर्थो जयतादिह ।
इति देवाः स्तुवन्तोऽस्मिन् पुष्पवृष्टिं व्यधुस्तदा ॥१६०॥

ततः कुमारमशनिवेगविद्याधरेशितुः ।
राज्यलक्ष्मीरुपेयाय बालादित्यमिव द्युतिः ॥१६१॥

ततो वैताढ्यमगमच्चक्री विद्याधरैः सह ।
तत्र विद्याधराधीशपदे तैरभ्यषिच्यत ॥१६२॥

नन्दिनीश्चन्द्रवेगस्य शतमन्याः सहस्रशः ।
पर्यणैषीदसौ विद्याभृतां हृद्याः कुमारिकाः ॥१६३॥

वैताढ्यगिरिकूटेषु जिनायतनकोटिषु ।
कुमारः कारयामास ततोऽष्टाहीमहोत्सवान् ॥१६४॥

स्वैरं क्रीडन् कुमारोऽयमिहायातोऽद्य विद्यते ।
भवांश्च दत्तसंकेत इवास्य मिलितः पुनः ॥१६५॥

§§ उक्ते **बकुलमत्ये**ति स्वचरित्रेऽखिलेऽपि हि ।
मुक्तनिद्र इवोदस्थात् कुमारस्तल्पतस्तदा ॥१६६॥

ततश्चमूसमूहेन **वैताढ्यं** गतवानयम् ।
प्रस्तावे क्वापि विज्ञप्तः **शौरिणे**ति ससौष्ठवम् ॥१६७॥

तव देव ! वियोगेन पितरावतिदुःखितौ ।
तत् तयोर्दर्शनं कर्तुं प्रसादः क्रियतां मयि ॥१६८॥

श्रुत्वेति तत्क्षणादेव विमानैश्छादयन् नभः ।
प्राप्तः **सनत्कुमारो**ऽथ **हस्तिनाग्रपुरं** पुरम् ॥१६९॥

प्रजाः पुरप्रवेशेऽस्य मुदा स्थूलं भविष्णवः ।
असंमान्त्य इवामीषु वेश्मनामारुहन् शिखाः ॥१७०॥

कुमारं पितरौ दृष्ट्वाऽभजतां परमां मुदम् ।
ऋद्धिमस्य विलोक्यैतो तद् न विद्मो यदूहतुः ॥१७१॥

अथासौ साधयामास द्विस्त्रिखण्डामपि क्षितिम् ।
अखण्डितप्रतापश्च साम्राज्यं समपालयत् ॥१७२॥

§§ अथास्य चक्रिणो भोगान् भुञ्जानस्यान्यदा भुवि ।
सौधर्मेन्द्रसभां **प्रापेशान**तः **सङ्गमः** सुरः ॥१७३॥

सौधर्मवासिनो देवाः प्रभया तस्य निष्प्रभाः ।
जज्ञिरे भास्वतो भासा भर्त्सितास्ततारका इव ॥१७४॥

पृष्टोऽथ निखिलैर्देवैर्देवेन्द्रः सान्द्रविस्मयैः ।
कथं **सङ्गम**देवस्य स्वामिस्तेजोऽतिदुस्सहम् ? ॥१७५॥
शक्रोऽभ्यधत्त विदधे तपोऽनेनातिदुस्तपम् ।
आचाम्लवर्धमानाख्यं तेजस्तेनौजसायते ॥१७६॥
तथेति पुनरुचुस्ते कोऽप्यन्योऽपि क्वचिद् विभो ! । 5
विद्यते द्वयतेजोभिर्भासुरोऽयं सुरो यथा ? ॥१७७॥
ततः शक्रोऽब्रवीदस्ति **हस्तिनाग्रपुरे**श्वरः ।
क्षितौ **सनत्कुमारो**ऽस्मादपि रूपमहो महान् ॥१७८॥
जयश्च **विजय**श्चाथ देवौ शक्रस्य तद्वचः ।
अश्रद्दधानो तं द्रष्टुं स्वर्लोकादवतेरतुः ॥१७९॥ 10
विप्रवेषधरावेतौ प्रतीहारनिवेदितौ ।
प्रविष्टौ स्नानशालायं तदोर्वीशमपश्यताम् ॥१८०॥
अथो मिथोऽपि तौ तस्य रूपातिशयरञ्जितौ ।
रोमाञ्चोद्भुषितौ मौर्लिं धुन्वानाविदमूचतुः ॥१८१॥
अहो ! तैलाभिषक्तस्याप्यभूषणभृतोऽपि हि । 15
वराशिपरिधानस्याप्यस्य रूपं निरूप्यते ॥१८२॥
रूपं **सनत्कुमारे** यत् तद् न **वैमानिके**ष्वपि ।
इति शक्रवचो नूनमृषोद्यमजायत ॥१८३॥
अथाह चक्री हे विप्रौ ! किमागमनकारणम् ? ।
तावुचतुर्नृपान्यद् न तव रूपनिरूपणात् ॥१८४॥ 20
तद् भूप ! रूपयुक्तस्योत्तार्य वेधास्तवोपरि ।
अक्षिपल्लवणं दिक्षु तेन क्षारपयोधयः ॥१८५॥
रूपगर्वादथोर्वीशः स्मित्वाऽवोचद् द्विजोत्तमौ !
युवामसमये रूपं निरूपितुमुपागतौ ॥१८६॥

अतः क्षणं प्रतीक्षेथां स्नात्वा यावदहं तनूम् ।
अलङ्कुर्वे सभां चापि प्रतिहारादिनोद्धटाम् ॥१८७॥
ततस्तौ पट्टशालैकदेशे राज्ञोदितौ स्थितौ ।
स्नात्वा भूमानपि स्फारं चक्रे शृङ्गारमादरात् ॥१८८॥
चामरैर्वीज्यमानश्च स्तूयमानश्च बन्दिभिः ।
वन्द्यमानश्च भूपाद्यैरथासावासदत् सदः ॥१८९॥
कनकस्थालमारोप्य कणिकादीपिकास्ततः ।
चक्रे वारवधूमुख्यास्तस्य नीराजनाविधिम् ॥१९०॥
अथाहताविमौ विप्रौ चक्रिण वीक्ष्य तत्क्षणात् ।
जातौ दुःखाग्निधूम्याभिरिव कृष्णामुखच्छवी ॥१९१॥
अथाह विस्मितश्चक्री युवां किं विमुखाविव ? ।
तावूचतुरनित्यत्वं दृष्ट्वा रूपश्रियस्तव ॥१९२॥
यतो देव ! यदाऽभ्यङ्ग्यमानोऽभूस्त्वं तदा तव ।
आसीदप्रतिरूपस्य रूपलक्ष्मीरनश्वरी ॥१९३॥
अधुना तु धुनात्येषा मनसो मुदमावयोः ।
कुष्ठेनोत्तिष्ठमानेन लुप्यमाना शनैः शनैः ॥१९४॥
नृपोऽब्रवीद् युवां विप्रौ ! जानीथः कथमप्यहो ! ।
तावूचतुः सुरावावां जानीवो दिव्यचक्षुषा ॥१९५॥
तव रूपश्रियं शक्रादाकर्ण्यावां समागतौ ।
विप्रवेषधरावेतौ कौतुकेन विलोकितुम् ॥१९६॥
दृष्टा चेयं विनष्टा च धिग् नृणामस्थिरं वपुः ।
इत्युक्त्वा तौ सुरीभूय मड्क्षूदपततां दिवि ॥१९७॥
§§ ततो नरपतिः पश्यन् विस्मयेन निजं वपुः ।
ददर्शायं गतच्छायं भूषितं भूषणैरपि ॥१९८॥

''अथैष जातवैराग्यश्चिन्तयामासिवानिति ।
खलमैत्रीव देहोऽयमहो ! क्षणविनश्वरः ॥१९९॥
यत् प्रातः सिद्धमह्नायापराह्णेऽन्नं विनश्यति ।
तदाधारं वपुर्नृणां किल स्थैर्यकुतोऽश्नुताम् ? ॥२००॥
नवश्रोत्रविलेऽमुष्मिन् कलेवरगृहे किल ।
जीवस्य वसतः कालव्यालतः कुशलं कियत् ? ॥२०१॥
यद्भोगादन्नमुच्छिष्टं विनष्टं द्रव्यमुच्यते ।
मलिनं च पयोऽप्यस्य वपुषः केव शोचना ? ॥२०२॥
यो देव-साधु-बन्धुभ्योऽप्यधिकं वीक्ष्यते जनैः ।
दृष्टः पत्तिरिवानिष्टे स देहो नात्मनः सखा ॥२०३॥
तदस्य नश्यतो लाभं ग्रहीष्ये धर्मकर्मणा ।
अवक्रयकुटीवायं दह्यतां किमनेन मे ?'' ॥२०४॥
इत्थमुल्लसितस्वान्तबोधशान्तमना नृपः ।
सद्यो विहाय साम्राज्यं पटप्रान्तपरागवत् ॥२०५॥
सत्वरं व्रतमादाय **सुस्थिता**चार्यसंनिधौ ।
मृगराज इवैकाकी विजहार वनाद् वनम् ॥२०६॥ युग्मम् ॥
चतुःषष्टिसहस्रान्तःपुरस्त्रीपरिवारिता ।
निरानन्दा **सुनन्दा** स्त्रीरत्नं चाटूनि तन्वती ॥२०७॥
स्तुवन्तो दिव्यरूपेण **पद्मा**द्या निधयो नव ।
द्वात्रिंशच्च सहस्राणि भूपा मुकुटवर्धनाः ॥२०८॥
रत्नान्यपि चिरत्नानि चक्रादीनि चतुर्दश ।
आषण्मासीं वशिनं तमन्वगुः प्रतिकाननम् ॥२०९॥ विशेषकम् ॥
पुण्यकर्मणि तं राज्यमिति प्राज्यमनुव्रजत् ।
सिंहावलोकितेनालुलोके स्तोकं स तु प्रभुः ॥२१०॥

असौ कोद्रवकूरेण च्छगीतक्रेण पारणम् ।
चतुर्थतपसो लेभे ततः षष्ठतपोऽकरोत् ॥२११॥

ततः प्रभृति वेलातिक्रमैः कदशनैरपि ।
रोगास्तस्याभवन् काशकच्छूश्लेष्मज्वरादयः ॥२१२॥

शिरोऽक्षिकर्णहृत्कुक्षिनखपृष्ठेषु जज्ञिरे ।
तस्य शूलानि सप्तेति पूर्वकर्मविपाकतः ॥२१३॥

सप्तवर्षशतीमस्य सहतः शूलवेदनाः ।
कफविप्रुण्मलामर्शादयोऽजायन्त लब्धयः ॥२१४॥

स योगी निःस्पृहो देहे विषेहे रोगविप्लवम् ।
लब्धिमानपि दुष्कर्मविजयध्यानतन्मनाः ॥२१५॥

§§ अस्मिनन्नवसरे शक्रः **सुधर्मा**यामवस्थितः ।
प्राशंसत् तं शिरो धुन्वन् पुरतः स्वर्गिणामिति ॥२१६॥

सनत्कुमारयोगीन्दोरहो ! साहसामद्भुतम् ।
चिकित्सयति नो रोगान् प्रार्थितस्त्रिदशैरपि ॥२१७॥

जयश्च **विजय**श्चेति श्रुत्वा तावेन नाकिनौ ।
सत्त्वं **सनत्कुमार**स्य द्रष्टुमुत्तेरतुर्दिवः ॥२१८॥

वैद्यवेषधरौ गत्वा नत्वा तमिदमूचतुः ।
त्वामुल्लाघं मुने ! कुर्वोऽनुजानीहि चिकित्सितुम् ॥२१९॥

एवं पुनः पुनस्ताभ्यामर्थितः स महामुनिः ।
समाधिं पारयित्वाह भाषासमितिसमितः ॥२२०॥

धर्मशीलौ ! युवां वैद्यौ मम रोगांश्चिकित्सथः ।
पुनः कथयतं पूर्वं द्रव्यतो भावतोऽथवा ? ॥२२१॥

काशकुष्ठादयश्चैते द्रव्यात्, कर्माणि भावतः ।
तद् द्रव्यरोगानहमप्यलम्भूष्णुश्चिकित्सितुम् ॥२२२॥

तथाहि पश्यतमिति ब्रुवाणः स्वाङ्गुलीमथ ।
श्लेष्मणा मर्दयित्वाऽयं चक्रे दीपशिखासखीम् ॥२२३॥
ततश्चमत्कृतावेतौ चलत्कुण्डलधारिणौ ।
प्रत्यक्षीभूय तं योगिनाथमस्तुवतामिति ॥२२४॥

"यथाऽसि द्रव्यरोगाणमतिशायी चिकित्सकः ।
तथैव भावरोगाणामपि त्वं योगिनां वर ! ॥२२५॥
धन्यस्त्वं सुकृती सत्त्वश्लाधां यस्य पुरन्दरः ।
चक्रे, त्वां द्रष्टुमायावस्तेनावामपि कौतुकात् ॥२२६॥
लौकिका योगिनः कायस्थैर्योपायशिलोञ्छिनः ।
रङ्का इव न कर्मारिमारिमाधातुमीशते ॥२२७॥
भवांस्तु लब्धिमानेवमपि देहानुपेक्षया ।
समितावुद्यमन् कर्मानीकमर्माणि भेत्स्यति ॥२२८॥
तदुग्रमतिशीर्यन्तीं तनूं स्वामपि योऽन्वहम् ।
उपेक्षतेऽन्तरङ्गारीञ्जेतुं तस्मै नमोऽस्तु ते" ॥२२९॥

तौ स्तुत्वेति **सनत्कुमार**ममरौ नत्वा च सत्त्वात्मतां,
तत्वा चास्य तथा यथागतमगच्छतां **सुधर्मा**मभि ।
सोऽपि स्वं शमिराट् समाप्य शरदां लक्षैस्त्रिभिः संभृतं,
सर्वायुः समये विपद्य च सुरः कल्पे तृतीयेऽभवत् ॥२३०॥३०॥

॥ इति सनत्कुमारकथा ॥

● ● ●

अथ भवभ्रमणोपजातखेदविच्छेदनिबन्धनं **गजसुकुमाल**च्छायाशालमभिश्रयन्नाह—

जस्स जलणेण सीसं झाणेण य झत्ति कम्म नीसेसं ।
पज्जलियं समकालं गयसुकुमालं च तं नमिमो ॥३१॥

[यस्य ज्वलनेन शीर्षं ध्यानेन च झटिति कर्म निःशेषम् ।
प्रज्वलितं समकालं गजसुकुमालं च तं नमामः ॥]

संक्षेपार्थोऽस्या व्यक्त एव, व्यासार्थस्तु कथानकादवसेयः, तच्चैतत् —

§§ पुरी**द्वारवती**त्यस्ति पश्चिमाम्भोधिरोधसि ।
हेमहर्म्यां हरिहयो हरिहेतोर्व्यधत्त याम् ॥१॥

दशारो दशमस्तत्र **वसुदेवो** वसूपमः ।
आसीत् क्षत्त्रशिरोरत्नं पिता पिताम्बरस्य यः ॥२॥

देवकी सेवकीभूतभूर्भुवःस्वर्वधूजना ।
तत्प्रियाऽजनि यत्कुक्षावुवास **गरुडध्वजः** ॥३॥

सान्यदा **यदु**रत्नस्य **नेमिनाथ**जिनेशितुः ।
नत्वा पादौ समायान्ती याप्ययानमधिष्ठिता ॥४॥

निजसौधतले काञ्चित् पुत्रं पुत्रवर्ती निजम् ।
चुम्बन्तीं लालयन्ती चोल्लापयन्ततीमलोकत ॥५॥ युग्मम् ॥

ततोऽसौ चिन्तयामास बाष्पाविलविलोचना ।
धन्येयं या स्वयं स्वीयमेवं लालयते सुतम् ॥६॥

धिक् पुनः पुण्यविकलां किल मां कोकिलामिव ।
यदपत्यान्यपाल्यन्त यदन्यैश्चिरजीविभिः ॥७॥ युग्मम् ॥

मत्वा मातुरभिप्रायं श्री**कृष्णो नैगमेषिणम्** ।
देवमाराधयामास तुष्टः सोऽप्येवमब्रवीत् ॥८॥

भावी तवानुजः किन्तु यौवने प्रव्रजिष्यति ।
तस्मिन् गते ततः **कृष्णः** प्रातर्मातुर्न्यवेदय् ॥९॥

तदा च **देवकी**कुक्षौ देवः कोऽपि दिवश्च्युतः ।
अवतीर्णो गजस्वप्नसूचिताद्भुतवैभवः ॥१०॥

बभूव समये विश्वरूपरूपस्ततः सुतः ।
नाम्ना **गजसुकुमालो देवक्या** लालितः स्वयम् ॥११॥
उपयेमे क्ष्मापसुतामेष नाम्ना **प्रभावतीम्** ।
सोमां च क्षत्रियाजातां **सोमशर्म**द्विजाङ्गजाम् ॥१२॥
उद्यौवनः समं ताभ्यां प्रियाभ्यामन्यदा **गजः** ।
श्री**नेमि**व्याख्यया जातवैराग्यो व्रतमग्रहीत् ॥१३॥
पृष्ट्वा प्रभुं स्मशाने स मतिमान् प्रतिमां व्यधात् ।
दृष्टः श्वशुरकेणात्र ब्रह्मणा **सोमशर्मणा** ॥१४॥
सैष प्रव्रज्य मत्पुत्रीं व्यडम्बयदिति क्रुधा ।
तन्मूर्ध्नि विदधे पालीं मृदाऽमृदुमना द्विजः ॥१५॥
चिताङ्गारचितां चक्रे तामसौ तामसौजसा ।
गजस्तया ज्वलन्त्याऽऽसीदोषध्येव नगो निशि ॥१६॥
उत्तमाङ्गे ज्वलत्युच्चै**र्गजो** जगनिमीलिकाम् ।
चक्रे शरीरं मन्वानः सर्वथा पृथगात्मनः ॥१७॥
वह्निर्यथा यथा तस्याऽज्वलद् मूर्ध्नि तथा तथा ।
पातालयन्त्रवच्चेतः शमामृतमजीजनत् ॥१८॥
अन्यत्र कारणं कार्यमन्यत्रास्य तदाऽभवत् ।
जज्वालास्य शिरस्यग्निः कर्माऽदह्यत चेतसि ॥१९॥
अन्यच्च कारणं पश्चात् कार्यं चित्रमभूत्पुरः ।
तमो विलीनमग्रेऽस्य पश्चाज्ज्ञानेन्दुरुद्ययौ ॥२०॥
उदूढज्ञानश्रीप्रणयरसनिर्वासितरजा,
गजात्मा शैलेशीविधिमयवधूप्रोषितवपुः ।
कपाले दीप्राग्नौ त्रुटदिति विभिन्ने किल
तदा मुदा ब्रह्मद्वारादविशदपुनर्जन्मभवनम् ॥२१॥३१॥

॥ इति श्रीगजसुकुमालकथा ॥

● ● ●

अथ दौर्गत्यदलनदृढसार**ढण्ढणकुमार**गुणरत्नभारमुदाहरन्नाह —

घोरंतरायकम्माणुसएणं सो वि ढंढणकुमारो ।
उम्मूलइ उज्जुत्तो सव्वाइं चेव कम्माइं ॥३२॥

[घोरान्तारयकर्मानुशयेन सोऽपि ढण्ढणकुमारः ।
उन्मूलयत्युद्युक्तः सर्वाण्येव कर्माणि ॥]

व्याख्या । **अपी**तिसंभावनायाम् । यस्य **यदु**वंशनभोरत्नं नवमोऽर्धचक्री पिता, द्वाविंशतितमश्च जिनेश्वरो गुरुः, अतः सुप्रसिद्धो **ढण्ढणकुमारः** 'उज्जुत्तो' **उद्युक्तो**-ऽङ्गीकृताभियोगभङ्गीकः, 'सव्वाइं चेव' **सर्वाण्येव** कर्माणि ज्ञानावरणादीनि 'उन्मूलइ' **उन्मूलयति** समूलकाषं कषति, गुम्फनकाले कविमनसि वर्तमानत्वाद-स्येति वर्तमाना । केन हेतुना ? 'घोरंतरायकम्माणुसएणं' **घोरे** भयङ्करे **अन्तराय-कर्मणि** यो**ऽनुशयो** दृढमत्सरः स तथा तेन, यदुक्तमस्माभिः —

"**एकापराधे तद्गोत्रं निर्मूलं कुरुते जयी ।**
निहन्ति यत्तमोजातं तमसार्कः खलीकृतः" ॥ [ ]

इति संक्षेपार्थो, व्यासार्थस्तु कथानकादवसेयः, तच्चैतत् —

द्वारकेत्यस्ति नगरी गरीयः श्रीनिकेतनम् ।
स्फारहारायिताम्भोधिं निकषा नाभिवद् भुवः ॥१॥

तत्रार्धचक्री नवमः **कृष्ण**नामाऽभवद् नृपः ।
यत्प्रतापप्रदीपस्य कज्जलं मण्डलं दिवः ॥२॥

द्वात्रिंशच्च सहस्राणि तस्यासन् शासितुः प्रियाः ।
तास्वभूद्**ढण्ढणा** नाम राज्येकाऽनेकसद्गुणा ॥३॥

तत्कुक्षिशुक्तिकारत्नं तस्य त्रासविवर्जितः ।
पुत्रो बभूव **ढण्ढणकुमार** इति विश्रुतः ॥४॥

उद्यौवनः क्रमेणायं करिणीभिरिव द्विपः ।
कन्याभिरवनीशानां हरिणा परिणायितः ॥५॥

श्रीनेमिरेकदा विश्वं बोधयन् रैवताचले ।
समेत्य समवासर्षीद्दषीन्द्रपरिवारितः ॥६॥

श्रुत्वेति द्वारकानाथः सनाथः संमदश्रिया ।
सान्तः पुरपरिवारो विभुं वन्दितुमाययौ ॥७॥

यथाविधि नमस्कृत्य निविष्टेषु नृपादिषु । 5
स्वामी मुक्तिपुरीमार्गदर्शिनीं देशनां व्यधात् ॥८॥

देशनान्ते गतौ पुर्यामापृच्छ्य पितरावथ ।
कुमारौ ढण्ढणः स्वामिसविधे व्रतमग्रहीत् ॥९॥

तप्यमानस्तपस्तीव्रं सहमानः परीषहान् ।
स्पष्टं सोऽध्यैष्ट सिद्धान्तं स्थविरेभ्यः स्थिराशयः ॥१०॥ 10

अन्यदा कर्म तस्योच्चैरान्तरायकमुद्ययौ ।
हन्ताऽयं लाभहन्ताऽभूद् येन स्वस्य परस्य च ॥११॥

साधवोऽथ जगन्नाथमपृच्छन किं न ढण्ढणः ।
कुत्रापि लभते किञ्चिन्नगर्यामृद्धिभाज्यपि ॥१२॥

"अथावदद् विभुर्ग्रामे धान्यपूराभिधे पुरा । 15
द्विपो मगधदेशेऽभूदयं नाम्ना परासरः ॥१३॥

ग्रामे राजनियुक्तोऽसौ ग्राम्यैः क्षेत्राणि वापयन् ।
सीतामाकर्षयद्भक्तेऽभ्युपेतेऽपि पृथक् पृथक् ॥१४॥

बुभुक्षितानपि श्रान्तानपि तृष्णातुरानपि ।
वृषान् दासांश्च स क्रूरो न मुमोच कथञ्चन ॥१५॥ 20

इत्यन्तरायमर्जित्वा कर्म भ्रान्त्या चिरं भवे ।
ढण्ढणो विष्णुपुत्रोऽभूत् पूर्वकर्मोदितं च तत्" ॥१६॥

समाकर्ण्येति संविग्नः कृष्णासूनुः पुरः प्रभोः ।
अभ्यग्रहीदिदं यद् नो भोक्ष्येऽहं परलब्धिभिः ॥१७॥

परलब्धं न तद् भुङ्क्ते लभते न स्वयं क्वचित् ।
कालक्षेपमसावित्थं चक्रे दुष्करकारकः ॥१८॥

वासुदेवोऽन्यदाऽपृच्छद् **नेमि**नाथं समास्थितम् ।
मुनीनामन्तरे ह्येषां को नु दुष्करकारकः ? ॥१९॥

स्वाम्याह दुष्करकराः सर्वेऽमी **ढण्ढण**स्त्वति ।
इयन्तं योऽत्यगात् कालं सोढा लाभपरीषहम् ॥२०॥

नत्वाथ स्वामिनं **कृष्ण**ः पुरीं **द्वारवतीं** विशन् ।
मुनिं **ढण्ढण**मालोक्याऽनमदुत्तीर्य कुञ्जरात् ॥२१॥

विष्णुनापि ववन्देऽसाविति केनापि मोदकैः ।
ढण्ढणो गृहमायातः श्रेष्ठिना प्रत्यलाभ्यत ॥२२॥

ढण्ढणोऽभ्येत्य सर्वज्ञं नत्वा चैवं व्यजिज्ञपत् ।
किं मेऽन्तरायकं कर्म क्षीणं भिक्षां यदाप्नवम् ? ॥२३॥

जिनो जगाद नो कर्म क्षीणं लब्धिश्च नैव ते ।
वन्दमानं **हरिं** दृष्ट्वा यत् त्वां स प्रत्यलाभयत् ॥२४॥

रागादिरहितः सोऽथ परलब्धिरसाविति ।
परिष्ठापयितुं भिक्षां प्रारेभे स्थण्डिलावनौ ॥२५॥

मोदकानिष्टकादाहचूर्णेन सह चूर्णयन् ।
सशब्दमयमात्मारिगात्रभङ्गमिवातनोत् ॥२६॥

कराभ्यां मोदकानेष कणशः कणशो बहिः ॥
कर्माणि चूर्णयामास शुक्लध्यानेन चान्तरा ॥२७॥

किमन्यदथ स प्राप ज्ञानं मोदकमद्भुतम् ।
एकोऽपि मण्डकः पञ्च पलानि किमु वा बहु ? ॥२८॥

कृतकेवलिमहिमा सुरसार्थैः श्री**नेमि**ना समं विहरन् ।
कालक्रमेण मोक्षं गतवान् **ढण्ढणकुमारो**ऽयम् ॥२९॥३२॥

॥ इति ढण्ढणकुमारकथा ॥

● ● ●

अथ **स्थूलभद्र**मुनिसुभटचारभटीं प्रकटीकुर्वन्नाह –

उब्भडवेसा वेसा सा कोसा तस्स थूलभद्दस्स ।
किं कुणइ जस्स न मणं मणं पि धीरत्तणं मुअइ ? ॥३३॥

[उद्भववेषा वेश्या सा कोशा तस्य स्थूलभद्रस्य ।
किं करोति यस्य मनो मनागपि धीरत्वं न मुञ्चति ? ॥]

व्याख्या – **तस्य** जगद्विदितमहिम्नः **स्थूलभद्रस्य शकटाल**सुतमहामुनेः **सा** 'कोसा' **कोशा**नाम्नी 'वेसा' **वेश्या** 'उब्भडवेसा' **उद्भटः** स्फारः कोटीरहारकेयूर-कर्णपूरतिलकताडङ्कचीरमञ्जीरमेखलाकनकशृङ्खलावलयाङ्गुलीयकाद्यशेषो **वेषो** मण्डनं यस्याः **सा** तथा, 'किं कुणइ' **किं करोति,** न किमपीति भावः । यस्य किम् ? 'जस्स मणं' यस्य **मन**श्चित्तं 'मणं पि' **मनागपि** लेशमात्रमपि 'न धीरत्तणं मुयइ'न **धीरत्वं न** धैर्यं मुञ्चति । यतः –

"विषयगणः कापुरुषं करोति वशवर्तिनं न सत्पुरुषम् ।
बध्नाति मशकमेव हि लूतातन्तुर्न मत्तेभम्" ॥ [ ]

अथ तमेव भक्तिभरतरलतया पुरःस्थमिव पश्यन्नुपश्लोकयति –

जं दुक्करदुक्करकारउ त्ति भणिओ सि थूलभद्द ! तुमं ।
मयणभडवायभंजण ! तं छज्जइ तुज्झ गुरुवयणं ॥३४॥

[यद् दुष्करदुष्करकारक इति भणितोऽसि स्थूलभद्र ! त्वम् ।
मदनभटवादभञ्जन ! तद् राजते तव गुरुवचनम् ॥]

व्याख्या । **हे स्थूल**भद्र ! 'जं' **यत्** 'तुमं' **त्वं** 'भणिओ सि' **भणितो**ऽसि । किम् ? 'दुक्करदुक्करकारउ त्ति' **दुष्करदुष्करकारकेति** । 'मयणभडवायमंजण' मद-नस्य मन्मथस्य भटवादः सुरासुरनरेश्वरविजयरूपा चारभटीमदनभटवादः तं भनक्ति विसूत्रयतीति स तथा तस्य सम्बोधनं **हे मदनभटवादभञ्जन !** 'तं' **तद्** 'गुरुवयणं' गुरोः श्री**विजयसम्भूति**नाम्नो वचनं **गुरुवचनं** पूर्वोक्तम्, यद्वा, गुरु सिंहगुहा-दृग्विषाहिकूपोपकण्ठकृतस्थितिषु यतिषु दुष्करकारकेतिस्वागतवाक्यातिरेकेण

गरीयो वचनं **गुरुवचनं** 'तुह' **तव** 'छज्जइ' **राजते** इति संक्षेपार्थः। व्यासार्थस्तु कथानकादवसेयः। तच्चैतत् –

§§ देवसौधमणिज्योत्स्नापटलैः पाटलीकृतम्।
पाटलीपुत्रमित्यस्तिपुरं पुरमिवामरम् ॥१॥

त्रिखण्डशासिता चण्डवैरिमुण्डविखण्डनः।
गुणैर्विश्वजनानन्दो **नन्दो**ऽभूदिह भूपतिः ॥२॥

प्रकटः सेवधिः श्रीणां धियां कुट्टिमसङ्कटम्।
शकटाल इति ख्यातस्तस्यामात्यवरोऽभवत् ॥३॥

सुतावजनिषातां द्वौ तस्यार्केन्दू इव त्विषा।
स्थूलभद्रस्तयोर्ज्येष्ठः कनिष्ठः **श्रीयक**ः पुनः ॥४॥

यक्षा यक्षदत्ता भूता भूतदत्ता तथैव च।
सेणा वेणा तथा **रेणा** प्राज्ञाः पुत्र्योऽस्य मन्त्रिणाः ॥५॥

उर्वशीवावतीर्णोर्व्यां वशीकृतजगन्मनाः।
वेश्याऽऽसीत् तत्र **कोशे**ति रतिकोशो मनोभुवः ॥६॥

प्रत्यहं **स्थूलभद्रो**ऽनुकूलभोगपरायणः।
वसति स्म तदावासे समा द्वादश तन्मनाः ॥७॥

श्रीयकस्त्वङ्गरक्षोऽभूद्दक्षो **नन्द**स्य भूपतेः।
जृम्ममाणोरुविश्रम्भस्तस्य स्वान्तमिवाङ्गवत् ॥८॥

अभूच्च तत्र कवितारुचि**र्वररुचि**र्द्विजः।
नन्दमानन्दयत्काव्यैर्नयैरयमहर्निशम् ॥९॥

मन्त्री त्वेकादिसंस्थाभिः स्वपुत्रीभिस्तमन्यदा।
पराभूय प्रभोस्तुष्टिदानापात्रमसूत्रयत् ॥१०॥

ततो **वररुचि**श्चक्रे **गङ्गा**न्तर्यन्त्रमत्र च।
वस्त्रे बद्ध्वा न्यधाद् यष्टौ दीनारशतमष्टयुक् ॥११॥

प्रगे **गङ्गा**मयं स्तुत्वा यन्त्रमाक्रमदंह्रिणा ।
दीनारास्ते च तस्यास्मादुत्पत्य न्यपतन् करे ॥१२॥

एवं स विदधेऽकस्माद् विस्मापितजनोऽन्वहम् ।
राजा तच्च समाकर्ण्य कथयामास मन्त्रिणे ॥१३॥

इदं यद्यस्ति सत्यं तत् प्रातर्वीक्षामहे स्वयम् ।
इत्युक्तो मन्त्रिणा राजा तथेपि प्रत्यपद्यत ॥१४॥

दत्त्वा शिक्षां चरः सायं प्रेषितस्तत्र मन्त्रिणा ।
शरस्तम्बनिलीनोऽस्थात् पक्षीवानुपलक्षितः ॥१५॥

तदा **वररुचि**र्गत्वा मन्दं **मन्दाकिनी**जले ।
दीनाराष्टोत्तरशतग्रन्थिं न्यस्य ययौ गृहे ॥१६॥

दीनारग्रन्थिमादाय तज्जीवितमिवैष तु ।
चरः समर्पयामास गत्वा तां लघु मन्त्रिणे ॥१७॥

स्वयं गुप्तात्तदीनारस्ततोऽमात्यो निशात्यये ।
ययौ राज्ञा समं **गङ्गा**मागाद् **वररुचिश्च** सः ॥१८॥

द्रष्टुकामं नृपं दृष्ट्वोत्कृष्टमानो विकृष्टवाक् ।
गङ्गामढौकत स्तोतुं मूढो **वररुचि**स्ततः ॥१९॥

स्तोत्रान्तेऽचालयद् यन्त्रमंह्रिणासौ परन्तु न ।
दीनारग्रन्थिरुत्पत्य पपात करकोटरे ॥२०॥

तत्ततोऽन्वेषयन्नेष मन्त्रिणाऽभाषि किं न ते ।
दत्ते न्यस्तमपि द्रव्यं **गङ्गा** यन्मुहुरीक्षसे ? ॥२१॥

उपलक्ष्य गृहाणेदं निजद्रव्यमिति ब्रुवन् ।
तस्मै दीनाय दीनारग्रन्थिमर्पयति स्म सः ॥२२॥

निशि विन्यस्य विप्रोऽयं विप्रतारयितुं प्रजाः ।
द्रव्यं प्रातरसौ गृह्णातीति च प्राह भूपतिम् ॥२३॥

छद्मेदं साधु विज्ञातमिति मन्त्रिणमालपन् ।
आययौ विस्मयस्मेरः स्ववेश्म वसुधाधवः ॥२४॥
अमर्षणो **वररुचिः** प्रतिकाराय मन्त्रिणः ।
पृच्छन् गृहकथामित्थमज्ञासीच्चेटिकामुखात् ॥२५॥
श्री**श्रीयक**विवाहेऽथ नृपामन्त्रणतत्परः ।
मन्त्री प्रगुणयन्नस्ति शस्त्रादि प्राभृताय च ॥२६॥[१]
छलज्ञस्तच्छलं प्राप्य वरं **वररुचि**स्ततः ।
चणकादि प्रदायेति डिम्भरूपाण्यपाठयत् ॥२७॥
न वेत्ति राजा यदसौ **शकटालः** करिष्यति ।
नन्दं व्यापाद्य राज्येऽस्य **श्रीयकं** स्थापयिष्यति ॥२८॥
एवं दिने दिने डिम्भान् पठतः प्रतिचत्वरम् ।
जनश्रुत्या ततोऽश्रौषीदिति चाचिन्तयद् नृपः ॥२९॥
बालका यच्च भाषन्ते भाषन्ते यच्च योषितः ।
औत्पातिकी च या भाषा मृषा भवति सा न हि ॥३०॥
तत्प्रत्ययाय राज्ञाथ मन्त्रिवेश्मनि ।
पुरुषः सर्वमागत्य यथादृष्टं व्यजिज्ञपत् ॥३१॥
नमतो मन्त्रिणोऽथाभूद् भूपः कोपात् पराङ्मुखः ।
तद्भाववेदी वेश्मैत्याऽमात्यः **श्रीयक**मब्रबीत् ॥३२॥
राज्ञेऽस्मि कथितः केनाप्यभक्तोऽहं द्विषन्निव ।
असावकस्मादस्माकमुद्ययौ तत्कुलक्षयः ॥३३॥
रक्षंस्तं नमतो राज्ञे शिरश्छिद्या ममासिना ।
अभक्तः स्वामिनो वध्यः पितापीति वदेस्ततः ॥३४॥
जरसापि यियासौ मय्येवं याते परासुताम् ।
त्वं मत्कुलगृहस्तम्भो नन्दिष्यसि चिरं ततः ॥३५॥

---

१. क. ख. यन्नृपः **श्रीयको**द्वाहे भोक्ष्यते मन्त्रिवेश्मनि । तङ्कौकनाय शस्त्रादि सज्ज्यमानमिहास्ति च ॥२६॥

श्रीयकोऽपि रुदन्नेवमाह गद्गदया गिरा ।
तात ! घोरमिदं कर्म कुर्वीत श्वपचोऽपि किम् ? ॥३६॥

अमात्योऽथाब्रवीदेवमेवं कुर्वन् विचारणाम् ।
मनोरथान् पूरयसि वैरिणामेव केवलम् ॥३७॥

पितृहत्यापि ते नात्तविषं मां हिंसतस्तदा ।
पित्रैवं बोधितोऽसौ तत् प्रतिपेदे चकार च ॥३८॥

किमकारि त्वयेत्युक्तः क्ष्माभुजा **श्रीयको**ऽवदत् ।
अभक्तो यत्प्रभोस्तेन पितापि निहतो मया ॥३९॥

कृतौर्ध्वदेहिकं **नन्द**स्ततः **श्रीयक**मब्रवीत् ।
सर्वव्यापारसहिता मुद्रेयं गृह्यतामिति ॥४०॥

व्यजिज्ञपदिति क्ष्मापं **श्रीयको**ऽस्ति ममाग्रजः ।
स्थूलभद्रः समः पित्र्योपकोशं भोगलालसः ॥४१॥

आहूयाथ **स्थूलभद्र**स्तमर्थं भूभुजोदितः ।
पर्यालोच्यामुमादेशं करिष्यामीत्यभाषत ॥४२॥

अद्यैवालोचयेत्युक्तः **स्थूलभद्रो**ऽथ भूभुजा ।
अशोकवनिकां गत्वा विममर्शेति चेतसा ॥४३॥

"अशनं शयनं स्नानमन्यच्च सुखहेतुकम् ।
कालेऽपि नानुभूयेत दुर्गतैरिव सेवकैः ॥४४॥

त्यक्त्वा निजार्थमत्यर्थं राजार्थं कुर्वतामपि ।
उपद्रवन्ति पिशुना उद्बद्धानामिव द्विकाः ॥४५॥

यथा स्वदेहसर्वस्वव्ययेनापि प्रयत्यते ।
राजार्थं तद्वदात्मार्थं यत्यते किं न धीमता ?" ॥४६॥

विमृश्यैवं व्यधात् केशोत्पाटनं पञ्चमुष्टिभिः ।
दत्तं देवतया शेषमुनिवेषमथाददे ॥४७॥

ततश्च स महासत्त्वो गत्वोपनृपति ब्रुवन् ।
आलोचितमदं धर्मलाभः स्तादिति निर्ययौ ॥४८॥

किमेष कपटं कृत्वा यायाद् वेश्यागृहं पुनः ।
इत्यप्रत्ययतः क्ष्मापः सौधाग्रस्थस्तमैक्षत ॥४९॥

प्रदेशे शवदुर्गन्धेऽप्यकूणितविकूणिकम् ।
यान्तं दृष्ट्वा यतीन्द्रं तं नरेन्द्रोऽघूर्णयच्छिरः ॥५०॥

भगवान् वीतरागोऽसावस्मिन् धिग्मे कुचिन्तितम् ।
इत्यात्मानं निनिन्दोच्चैर्**नन्द**स्तमभिनन्दयन् ॥५१॥

स्थूलभद्रोऽपि गत्वा श्री**सम्भूति**विजयान्तिके ॥
दीक्षां सामायिकोच्चारपूर्विकां प्रत्यपद्यत ॥५२॥

उपरुध्य नृपेणापि कृतः श्रीकरणाधिपः ।
चकार **श्रीयको** राज्यचिन्तामवहितः सदा ॥५३॥

कोशाया नित्यमावासे विनीतः **श्रीयको** ययौ ।
स्थूलभद्रवियोगार्ता सापि तं वीक्ष्य चाऽरुदत् ॥५४॥

तेनोचेऽसौ **वररुचिः** पापो नस्तातघातकः ।
स्थूलभद्रवियोगं ते विदधे दावदारुणम् ॥५५॥

त्वद्याम्या**मुपकोशा**यामासक्तो यावदस्त्ययम् ।
तावत्प्रतिक्रियां काञ्चिद् विचिन्तय मनस्विनि ! ॥५६॥

तदादि**शोपकोशां** यत् प्रतार्य कथमप्यसौ ।
विधीयतां **वररुचि**र्मद्यपानरुचिस्त्वया ॥५७॥

प्रेयोवियोगजाद् दुःखाद् दाक्षिण्याद् देवरस्य च ।
तत्प्रतिज्ञाय सा सद्यस्तत्तथा सर्वमातनोत् ॥५८॥

अथ **कोशा**मुखान्मत्वा **श्रीयक**स्तं सुरारतम् ।
लेभे जनकवैरस्य विदितं प्रतियातनम् ॥५९॥

शकटालमहामात्यात्ययात् प्रभृति सोऽप्यभूत् ।
भट्टो **वररुचि**र्भूपसेवावसरतत्परः ॥६०॥

अन्यदा **नन्द**भूपालः **शकटाल**स्य संस्मरन् ।
सदसि **श्रीयका**मात्यमित्युवाच सगद्गदम् ॥६१॥

भक्तिमान् शक्तिमान् मन्त्री **शकटालो** ममाभवत् ।
दिवस्पतेरिव प्राज्यप्रज्ञोपेतो बृहस्पतिः ॥६२॥

एवमेव विपन्नोऽसौ दैवादथ करोमि किम् ? ।
मन्ये शून्यमिवास्थानमहं तेन विनात्मनः ॥६३॥

उवाच **श्रीयको**ऽप्येवमिह किं देव ! कुर्महे ? ।
इदं **वररुचि**ः सर्वं पापं व्यधित मद्यपः ॥६४॥

सत्यमेष सुरां भट्टः पिबतीति नृपोदिते ।
श्वोऽमुं दर्शयितास्मीति **श्रीयक**ः प्रत्यवोचत ॥६५॥

प्रातः सोऽथ सदस्यानां पद्ममेकैकमार्पयत् ।
तस्मै भट्टाय मदनफलाम्भोभावितं पुनः ॥६६॥

भट्टः सोप्यनयद् घ्रातुं घ्राणाग्रे पङ्कजं निजम् ।
चन्द्रहाससुरां रात्रिपीतां सद्यो ववाम च ॥६७॥

सर्वैराक्रुश्यमाणोऽथ निर्ययौ सदसो द्विजः ।
विप्रेभ्यश्च सुरापानप्रायश्चित्तमयाचत ॥६८॥

तापितत्रपुणः पानमेतस्मै ते न्यवेदयन् ।
तदाचर्य विपेदेऽसावमोघास्त्रं हि धीः सताम् ॥६९॥

§§ **स्थूलभद्रो**ऽपि **सम्भूतिविजया**चार्यसन्निधौ ।
अपालयद् व्रतं पारदृश्वा विश्वागमाम्बुधेः ॥७०॥

प्रावृष्यथ गुरुं नत्वाऽभ्यगृह्णन् यतयः क्रमात् ।
सिंहं दृग्विषसर्पौकःकूपेष्वनशनां स्थितिम् ॥७१॥

योग्यान् मत्वा गुरुः साधून् यावत्तानन्वमन्यत ।
स्थूलभद्रः पुरोभूय नत्वैवं तावदब्रवीत् ॥७२॥
कोशाभिधाया वेश्याया गृहे या चित्रशालिका ।
तत्राकृततपकर्मविशेषः षड्रसाशनः ॥७३॥
स्थास्यामि चतुरो मासानिति मेऽभिग्रहः प्रभो ! ।
ज्ञात्वोपयोगाद् योग्यं तं गुरुस्तत्रान्वमन्यत ॥७४॥
साधवोऽथ ययुः सर्वे स्वं स्वं स्थानं प्रतिश्रुतम् ।
स्थूलभद्रोऽपि च प्राप **कोशा**वेश्यानिकेतनम् ॥७५॥
तमभ्युदस्थात् **कोशा**पि विकोशाब्जमुखी ततः ।
ऊचे च स्वागतं स्वामिन्! किङ्करी किं करोमि ते ? ॥७६॥
चतुर्मासीवसत्यै मे चित्रशालेयमर्प्यताम् ।
इत्याह **स्थूलभद्र**स्तां सा तूचे गृह्यतामिति ॥७७॥
तया प्रगुणिते सद्यो वासवेश्मन्युवास सः ।
मुनिरूप इवोर्वाग्निस्तत्र कामरसार्णवे ॥७८॥
अथ सा षड्रसाहारभोजनस्यापि नाऽशकत् ।
मनः क्षोभयितुं तस्य विश्वचेतोहरापि हि ॥७९॥
मुनेस्तस्येन्द्रियजयप्रकर्षेण चमत्कृता ।
प्रपेदे श्रावकत्वं सा गृहीत्वैवमभिग्रहम् ॥८०॥
तुष्टः कदापि कस्मैचिद् ददाति यदि मां नृपः ।
विना पुमांसमेकं तमन्यत्र नियमो मम ॥८१॥
निर्व्यूढाभिग्रहांस्त्रींस्तान् प्रावृषोऽतिक्रमाद् यतीन् ।
स्वागतं दुष्करकरा इत्यूचे गुरुरागतान् ॥८२॥
अथायान्तं **स्थूलभद्र**मुत्थाय गुरुरब्रवीत् ।
दुष्करदुष्करकर ! स्वागतं ते महामुने ! ॥८३॥

सासूयाः साधवस्तेऽथाचिन्तयन्नित्यहो ! गुरोः ।
इदमामन्त्रणं मन्त्रिपुत्रताहेतुकं खलु ॥८४॥

यद्यसौ तत्तथा वृत्त्या कृतदुष्करदुष्करः ।
इदं वर्षान्तरे तर्हि प्रतिज्ञास्यामहे वयम् ॥८५॥

क्रमादथाष्टमासान्ते प्रणिपत्य पुरो गुरोः । 5
साधुः सिंहगुहावासी चकारेति प्रतिश्रवम् ॥८६॥

कोशावेश्यागृहे नित्य षड्रसाहारभोजनः ।
भगवन् ! समवस्थास्ये चतुर्मासीमिमामहम् ॥८७॥

स्थूलभद्रस्य मात्सर्यादेतदङ्गीकरोत्ययम् ।
विचार्येत्युपयोगेन ज्ञात्वा च गुरुरब्रवीत् ॥८८॥ 10

वत्स ! माभिग्रहं कार्षीरतिदुष्करदुष्करम् ।
क्षमः कर्तुममुं **स्थूलभद्र** एवाद्रिनिश्चलः ॥८९॥

न हि मे दुष्करोऽप्येष कथं दुष्करदुष्करः ।
तदवश्यं करिष्यामीत्युक्त्वा **कोशा**मगाद् मुनिः ॥९०॥

स्पर्धया **स्थूलभद्र**स्यायाति मन्ये तपस्व्यसौ । 15
भवे पतन् रक्षणीय इत्युत्थाय ननाम सा ॥९१॥

वसत्यै याचितां चित्रशालां तस्य समर्प्य सा ।
चक्रे भुक्त्वोर्ध्वमागत्य क्षणं सत्त्वपरीक्षणम् ॥९२॥

चुक्षोभ स मुनिः प्रेक्ष्य तत्क्षणं तां मृगेक्षणाम् ।
स्मरसन्धुक्षणं तादृग् भोज्यं हि स्त्री च तादृशी ॥९३॥ 20

स्मरार्त्या याचमानं तं **कोशा**ह भगवन् ! वयम् ।
वेश्या धनस्य वश्यां स्मो मन्मथस्यापि नान्यथा ॥९४॥

स मुनिः प्राह लोलाक्षि ! प्रसीद मयि सीदति ।
अस्ति द्रव्यं किमस्मासु तैलं च चणकेष्विव ॥९५॥

नेपालभूधवोऽपूर्वसाधवे रत्नकम्बलम् ।
दत्ते तमानयेत्यूचे सापि खेदयितुं मुनिम् ॥९६॥

तत्राकालेऽपि गत्वा भूपालात् कम्बलमाप्य च ।
स मुनिर्ववले तत्र वर्त्मन्यासंश्च तस्करः ॥९७॥

आयाति लक्षमित्याख्यात्तेषां सिद्धाञ्जनः शुकः ।
तैरप्युपेक्षिते भिक्षौ याति यातीति चावदत् ॥९८॥

मुनिं चौरपतिः प्राह सत्यं वद किमस्ति ते ? ।
तेन वंशान्तरस्तीति ख्याते सोऽमुच्यताऽमुना ॥९९॥

समागत्य च **कोशा**यै स ददौ रत्नकम्बलम् ।
साऽक्षिपत् क्षालपङ्के तं सोऽब्रवीत् किमिदं शुभे ! ॥१००॥

सोचे शोचसि मूढेदं न स्वं नरकपातिनम् ।
सोऽवदद् बोधितः साधु साध्वहं रक्षितो भवात् ॥१०१॥

शुद्ध्यै गुरुं प्रयास्यामि धर्मलाभोऽस्तु तेऽनघे ! ।
साह क्षमेथा बोधाय मया यदसि खेदितः ॥१०२॥

इच्छामीति भणित्वा स गुर्वन्तिकमुपेत्य च ।
गृहीत्वालोचनां तीव्रमाचचार पुनस्तपः ॥१०३॥

राज्ञादीयत **कोशा**पि तुष्टेन रथिनेऽन्यदा ।
नृपायत्तेति सा रागं विनापि तमुपाचरत ॥१०४॥

स्थूलभद्रगुणस्तोत्रपरायै शयितो रथी ।
बाणाल्यानीतमाकन्दलुम्ब्याऽस्यै स्वमरोचयत् ॥१०५॥

सापि सर्षपराश्युप्तसूचीन्यस्तसुमोपरि ।
नरिनर्ति स्म नो सूच्या विद्धा राशिश्च न क्षतः ॥१०६॥

स ततः प्राह तुष्टोऽस्मि दुष्करेणामुना तव ।
सोवाच विस्मयेथा मा किमभ्यासस्य दुष्करम् ? ॥१०७॥

माकन्दलुम्बीछेदस्ते नृत्यं मे च न दुष्करम् ।
अशिक्षितं **स्थूलभद्र**श्चक्रे यत्तत् तु दुष्करम् ॥१०८॥

द्वादशाब्दानि बुभुजे यत्र भोगान् मया सह ।
तत्रैव चित्रशालायां तस्थौ सोऽखण्डितव्रतः ॥१०९॥

स्थूलभद्रं विनान्येषां मनो मथ्नाति मन्मथः । 5
न सुरा नासुराः केचिदत्र भग्ना महारथ ! ॥११०॥

श्री**नेमि**तोऽपि **शकटाल**सुतं,
विचार्य मन्येत को न भुवने भटमेकमेव ।
देवोऽद्रिदुर्गमधिरुह्य जिगाय मोहं,
यन्मोहनालयमयं त्वधिगम्य धीरः ? ॥१११॥ 10

जगदेकमुनेस्तस्य संसर्गेण ममाप्यहो ! ।
नृपादिष्टं विनाऽन्यस्य पुंसोऽस्ति नियमः खलु ॥११२॥

श्रुत्वेति सोऽवदद् भद्रं **स्थूलभद्रा**य साधवे ।
यास्यामि तस्य पन्थानं भवत्यैव निवेदितम् ॥११३॥

भद्रमस्तु च ते भद्रे ! पालय स्वमभिग्रहम् । 15
उक्त्वैवं सुगुरोः पार्श्वे स गत्वा व्रतमाददे ॥११४॥

द्वादशाब्दीयदुष्कालसङ्कटे गलितं श्रुतम् ।
संभूयाऽमीमिलत् सङ्घः **पाटलीपुत्र**पत्तने ॥११५॥

सङ्घेन प्रहितौ गत्वा **नेपाले** यतिनावुभौ ।
दृष्टिवादभृतं **भद्रबाहु**माह्वयतामथ ॥११६॥ 20

सोऽप्युवाच महाप्राणध्यानसिद्धौ समेष्यते ।
तद्वचस्तौ मुनी सङ्घस्यागत्याशंसतामथ ॥११७॥

सङ्घेन प्रहितावन्यौ शिक्षयित्वेत्यथो मुनी ।
सङ्घाज्ञालोपिनो दण्डः कः स्यादिति स वाच्यताम् ॥११८॥

सङ्घाद् बहिः सत्कर्तव्य इति वक्ति यदा तु सः ।
तर्हि तद्दण्डयोग्योऽसीत्याचार्यो वाच्य एव सः ॥११९॥

ताभ्यां गत्वा तथैवोक्तो **भद्रबाहु**रथावदत् ।
मैवं करोतु भगवान् सङ्घः किन्तु करोत्वदः ॥१२०॥

मयि प्रसादं कुर्वाणः श्रीसङ्घः प्रहिणोत्विह ।
शिष्यान् मेधाविनस्तेभ्यो दास्यामि खलु वाचनाः ॥१२१॥

ताभ्यामेत्य तथाऽऽख्याते श्रीसङ्घोऽपि प्रमोदभाक्।
प्राहिणोत् **स्थूलभद्रा**दिमुनिपञ्चशतीमथ ॥१२२॥

सूरिस्तान् वाचयामास तेऽप्यानन्त्यात् श्रुताम्बुधेः ।
उद्भज्येयुर्निजं स्थानं **स्थूलभद्र**स्त्ववास्थित ॥१२३॥

उद्भज्यसे किमित्युक्तः सूरिणा सोऽब्रवीदिदम् ।
नोद्भज्ये भगवन् ! किन्तु ममाल्पा एव वाचनाः ॥१२४॥

सूरिरूचे मम ध्यानं पूर्णप्रायमिदं ततः ।
तदन्ते वाचनास्तुभ्यं प्रदास्यामि त्वदिच्छया ॥१२५॥

पूर्णे ध्याने ततः सूरिर्भूरिशस्तमपाठयत् ।
द्विवस्तूनानि पूर्वाणि दश यावत् पपाठ सः ॥१२६॥

सूरयः **पाटलीपुत्र**मथाजग्मुः सहामुना ।
तस्थुश्चोपवने प्रापुश्चात्र वन्दारवो जनाः ॥१२७॥

व्रतिन्यः **स्थूलभद्र**स्य भगिन्यो वन्दनागताः ।
गुरुं प्रणम्य पप्रच्छुं **स्थूलभद्र** ! क्व नु प्रभो ! ॥१२८॥

इह यक्षालयेऽस्तीति गुरूक्ते ता उपेयुषीः ।
दृष्ट्वा चित्रयितुं **स्थूलभद्रः** शार्दूलतामधात् ॥१२९॥

वीक्ष्य सिंहं तु भीतास्ताः सूरिमेत्य व्यजिज्ञपन् ।
ज्येष्ठार्यं जग्रसे सिंहस्तत्र सोऽद्यापि विद्यते ॥१३०॥

ज्ञात्वोपयोगादाचार्योऽप्याह सिंहो न सोऽस्ति तु ।
अथोपेताश्च ताः **स्थूलभद्रं** वीक्ष्य ववन्दिरे ॥१३१॥

यक्षोचे **श्रीयको** दीक्षां मया सह समाददे ।
क्षुधालुः कारितश्चायं तपः पर्युषणादिने ॥१३२॥

पौरुष्या सार्धपौरुष्याऽपार्धेनानशनं क्रमात् । 5
बालवत्कवलैर्भोज्यं कारितोऽसौ मया मुनिः ॥१३३॥

निशीथे स ततो धर्मध्यानान्मृत्वा दिवं गतः ।
मया च याचितः सङ्घः प्रायश्चित्तं तदेनसः ॥१३४॥

अदुष्टभावात् त्वं शुद्धेत्युक्ताऽनेन तथाप्यहम् ।
ताम्यन्ती प्रापिता देवतया **सीमन्धरं** जिनम् ॥१३५॥ 10

भरतादागताऽऽर्येयं निर्दोषेत्यवदज्जिनः ।
कृपया मन्निमित्तं च व्यांचक्रे चूलिकाद्वयम् ॥१३६॥

ततोऽहं छिन्नसंदेहा देव्यात्र प्रापिता पुनः ।
श्रीसङ्घस्यार्पितवती चूलिकाद्वितयं च तत् ॥१३७॥

उक्त्वेति **स्थूलभद्राय** ययुस्तां सोऽप्यगाद् गुरुम् । 15
न ददौ वाचनां तस्यायोग्योऽसीति गुरुर्जगौ ॥१३८॥

दीक्षादिनात् प्रभृत्येषोऽप्यपराधानचिन्तयत् ।
ऊचे च न स्मराम्यागो गुर्वादिष्टोऽस्मरच्च तत् ॥१३९॥

न करिष्यामि भूयोऽद इत्युदित्वा नमन्नयम् ।
गुरुणोचेऽथ ते दास्ये न पुरो वाचनामहम् ॥१४०॥ 20

स्थूलभद्रार्थितेनाथ सङ्घेन भणितो गुरुः ।
जगौ यथा विचक्रेऽनेनान्योऽपि विकरिष्यति ॥१४१॥

स सङ्घेनाग्रहादुक्तो विवेदेत्युपयोगतः ।
न मत्तः शेषपूर्वाणमुच्छेदो भाव्यतोऽस्तु तत् ॥१४२॥

अन्यस्मै शेषपूर्वाणि प्रदेयानि त्वया न हि ।
इत्यभिग्राह्य भगवान् **स्थूलभद्र**मवाचयत् ॥१४३॥

सर्वपूर्वधरमथ **स्थूलभद्र**महामुनिम् ।
तमाचार्यपदे श्रीमान् **भद्रबाहु**रतिष्ठपत् ॥१४४॥

गते वर्षशते **वीर**मोक्षात् सप्ततिकाधिके ।
भद्रबाहुरथ स्वामी ययौ स्वर्गं समाधिना ॥१४५॥

आचार्यः **स्थूलभद्रस्तु श्रावस्त्या**मन्यदा ययौ ।
उद्यानेऽस्थाच्च ते नन्तुमागमच्च पुरीजनः ॥१४६॥

नत्वा पुरो निविष्टेषु भव्येषु भगवानपि ।
चिरं चकार संसारत्रासिनीं धर्मदेशनाम् ॥१४७॥

देशनान्ते स्वसुहृदं **श्रावस्ती**वासिनं विभुः ।
धनदेवमनायातं विज्ञायैवमचिन्तयत् ॥१४८॥

स नः प्रियः सुहृन्नूनमिह नास्ति कुतोऽन्यथा ।
पुर्लोकः सकलोऽप्यागान्न पुनः स्नेहलोऽपि सः ॥१४९॥

गतो देशान्तरं वा स्याद् रोगी वा स्यादिति स्वयम् ।
गच्छामस्तद्गृहमपि सोऽनुग्राह्यो विशेषतः ॥१५०॥

इति निश्चित्य भगवान् सङ्घलोकसमन्वितः ।
बन्दिभिः स्तूयमानः स्त्रीगीयमानतपोगुणः ॥१५१॥

नगरीमध्यचैत्यानि वन्दमानः पदे पदे ।
जगाम पूर्वसुहृदो **धनदेव**स्य धामनि ॥१५२॥ युग्मम् ॥

विशंस्तत्र **धनेश्वर्या धनदेव**गृहस्थया ।
अभ्युत्थाय ववन्देऽसावासितश्च महासने ॥१५३॥

भगवानप्यथो धर्मवार्ताभिरनुगृह्य ताम् ।
पप्रच्छ धर्मशीले ! किं **धनदेवो** न दृश्यते ॥१५४॥

धनेश्वर्यप्यदोऽवादीत् भगवन् ! श्रावको **धनम्** ।
व्ययते स्म, निधिं पश्चादपश्यद् न च पैतृकम् ॥१५५॥

ततोऽर्थहीनस्तृणवल्लघुम्मन्योऽत्र पत्तने ।
ययौ देशान्तरमसौ द्रविणार्जनहेतवे ॥१५६॥

ज्ञात्वोपयोगाद्धर्मोपदेशव्याजादथ प्रभुः । 5
अधःस्थितिनिधिस्तम्भं दर्शयन् हस्तसञ्ज्ञया ॥१५७॥

व्याहार्षीदयि ! संसारस्वरूपं पश्य कीदृशम् ।
गृहमीदृग्भवद्भर्तुर्वाणिज्यं तस्य तादृशम् ॥१५८॥ युग्मम् ॥

भगवानेवमाख्याय **धनेश्वर्यै** मुहुर्मुहुः ।
ययौ विहर्तुमन्यत्र जिनधर्मं प्रभावयन् ॥१५९॥ 10

यथागतागतस्याख्यद् **धनदेव**स्य तत्प्रिया ।
धर्म्यां स्तम्भं समुद्दिश्य **स्थूलभद्र**कथां तथा ॥१६०॥

व्यमृशद्धनदेवोऽपि स्तम्भमुद्दिश्य देशनाम् ।
चक्रे यद्भगवान्नूनमिह भाव्यो निधिस्ततः ॥१६१॥

बुद्ध्वेति तत्क्षणत्तेन स्तम्भमूलमखन्यत । 15
निधिश्चाविरभूत् तत्र कन्दः पुण्यतरोरिव ॥१६२॥

धनदेवोऽभवत् तेन धनेनातिधनेश्वरः ।
स्थूलभद्रप्रसादोऽयमिति च व्यस्मरद् न हि ॥१६३॥

धनदेवोऽन्यदा गत्वा **पाटलीपुत्र**पत्तनम् ।
स्थूलभद्रमवन्दिष्ट तमूचे च कृताञ्जलिः ॥१६४॥ 20

त्वत्प्रसादेन दारिद्र्यसमुद्रं तीर्णवानहम् ।
त्वं गुरुस्त्वं च मे स्वामी तदाविश करोमि किम् ? ॥१६५॥

भूयास्त्वमार्हत इति **स्थूलभद्र**स्य भाषितम् ।
धनदेवोऽभिगृह्याथ स्वस्थानमगमत् पुनः ॥१६६॥

स्थूलभद्रोऽथ शिष्यौ द्वै **महागिरि-सुहस्तिनौ**
यक्षार्यापालितावेतावित्यार्योपपदौ व्यधात् ॥१६७॥

तौ **स्थूलभद्र**हेमाद्रिसूर्याचन्द्रमसाविव ।
साङ्गानि दश पूर्वाणि महाप्रज्ञावधीयतुः ॥१६८॥

विश्वदर्शितया नेत्रे बहुश्रुततया श्रुतौ ।
जनोद्धारतया हस्तौ तौ श्रुतस्य विरेजतुः ॥१६९॥

तपोनिधी तौ समधीतविद्यौ शान्तौ च दान्तौ गुरुलब्धिमन्तौ ।
क्रमादथाचार्यपदे निवेश्य श्रीः**स्थूलभद्र**स्त्रिदिवं जगाम ॥१७०॥३४॥

॥ इतिश्रीस्थूलभद्रकथा समाप्ता ॥

● ● ●

अथ **दृढप्रहारि**मुनिपरिदृढतामभिष्टौति —

छम्मासनिराहारो तवसोसियघोरकम्मपब्भारो ।
सिद्धिसुहं संपत्तो दढप्पहारी महासत्तो ॥३५॥

[षण्मासनिराहारस्तपःशोषितघोरकर्मप्राग्भारः ।
सिद्धिसुखं संप्राप्तो दृढप्रहारी महासत्त्वः ॥]

अस्याः पदार्थः स्पष्टः, व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् —

§§ पुरा **सुसीमनि** ग्रामे **भूतशर्मा**ऽभवद् द्विजः ।
तस्यासीत् **कपिला** विद्युदिव वारिमुचः प्रिया ॥१॥
छायार्कयोरिव शनिस्तयोरजनि नन्दनः ।
पिङ्गलः कपिवत्क्रीडाकम्पिताखिलबालकः ॥२॥
तद् दुष्कर्मोपतप्ताभ्यां पितृभ्यामयमन्यदा ।
गृहाद् निर्वासितश्चौरपल्लीमेकां समासदत् ॥३॥
नृशंसचरितैस्तैस्तैरात्मनस्तुल्य इत्यसौ ।
चौरसेनाधिपतिना पुत्रत्वेनाऽन्वमन्यत ॥४॥
चौरपल्लीपतौ तस्मिन् यातेऽथ यमधामनि ।
तत्पुत्र इति चौरैस्तत्पदेऽसौ विनिवेशितः ॥५॥
निस्त्रिंशघातैरुद्दण्डैर्गण्डशैलानपि क्षिपन् ।
असौ **दृढप्रहारी**ति नाम्ना निजगदे जनैः ॥६॥
अन्यदा विश्वलुण्टाकः स लुण्टाकचमूवृत्तः ।
ग्रामं **कुशस्थलं** लुण्टलम्पटो लुण्टितुं ययौ ॥७॥
ब्राह्मणो **देवशर्मे**ति तत्रासीत तस्य मन्दिरे ।
धेनोर्नवप्रसूताया राद्धं दुग्धेन पायसम् ॥८॥
भाजनेषु शिशूनां तद्गेहिनी पर्यवेषयत् ।
यावत्तावदमी चौरास्तत्रैव समुपाययुः ॥९॥ युग्मम् ॥

चकृषुर्डिम्भरूपाणां भुञ्जतां भाजनानि ते ।
तत्पायसं चखादुश्च दुश्चरित्रा द्विका इव ॥१०॥

दृष्ट्वेति डिम्भरूपाणि विलपन्ति निशम्य च ।
देवशर्मा कुधा घोरः परिघेण जधान तान् ॥११॥

शस्यानीव खले तेन कुट्यमानान् विलोक्य तान् ।
त्रस्यतश्च स्थिरीकुर्वन् प्राप चौरचमूपतिः ॥१२॥

तत्रागत्यासिदण्डेन द्विजमुण्डमखण्डयत् ।
तदस्रगन्धविभ्रान्ता त्रोटयामास दाम गौः ॥१३॥

शृङ्गाग्रैरुल्लिखन्ती सा दस्यून् पूत्कारभीषणा ।
उल्ललाल खुरोदग्रा पताकीकृत्य वालधिम् ॥१४॥

तामप्येषोऽर्जुनीं विश्वदुर्जनीभावदुर्मदः ।
द्विधा कृत्वाऽसिधातेन पातयामास पातकी ॥१५॥

आः पाप ! निष्कृप ! कृतं किमेतदिति वादिनी ।
वेलामासवती तेनाभ्यायान्ती ब्राह्मणी हता ॥१६॥

ततो जरायुमध्यस्थं तस्या गर्भं द्विधा कृतम् ।
विस्फुरन्तमुदैक्षिष्ट स पापिष्ठशिरोमणिः ॥१७॥

दृष्ट्वेति विह्वलस्यास्य निस्त्रिंशो न्यपतत् करात् ।
तन्मूलेव मनःस्थानेऽशुष्यन्निस्त्रिंशतापि सा ॥१८॥

ततः प्रोद्भूतकारुण्यपरिवाहैरिवाश्रुभिः ।
पूर्यमाणेक्षणः सोऽयं चिन्तयामासिवानिति ॥१९॥

"आस्तदेतद् मयाऽकारि कुर्यान्न श्वपचोऽपि यत् ।
दर्शयिष्ये च कस्याहमद्रष्टव्यमुखो मुखम् ?॥२०॥

अस्यैकस्यात्मजीवस्य कृते किं किं कृतं मया ।
इदं तु तत्कृतं यस्य फलं दुर्गतिरप्यणु ॥२१॥

सगोभ्रूणौ हतौ हन्त ! मयैतौ द्विजदम्पती ।
अमून्येतदपत्यानि जीवन्त्यपि हतानि हा ! ॥२२॥
वराकाणामीषां कः पालको हा ! भविष्यति ? ।
ममापि कः शरण्यः स्याद् घोरदुर्गतिपातिनः ? ॥२३॥
ध्रुवमेतन्न मे कोऽपि प्रायश्चितं प्रदास्यति ।
ज्वलन्तमग्निमात्मीयगेहे क्षिपति कः किल ? ॥२४॥
ईदृग्पापकृतः प्रायः प्रायश्चित्तं न मे भवेत् ।
श्वेतिमा क्वापि जायेत नीलीरक्तस्य वाससः ? ॥२५॥
तदहं भैरवं पातं करिष्यामि गिरेरतः ।
शरीरं पापकारीति खण्डशो येन जायते'' ॥२६॥
दृढप्रहारी सुदृढं चिन्तयन्निति यातवान् ।
प्रत्यासन्ने गिरौ तन्न मुनीन् दृष्ट्वा ननाम च ॥२७॥
धर्मलाभाशिषं दत्त्वा समभाषन्त तेऽपि तम् ।
परिम्लानमुखो भद्र ! भग्नमान इवासि किम् ? ॥२८॥
''स तूवाचेत्यहं पापी भाष्यमाणेऽपि पाप्मने ।
मलिनः स्पृश्यमानोऽपि मलिनीकुरुते परम् ॥२९॥
येषामेकतममपि श्वभ्रपाताय तान्यहम् ।
ब्रह्म-स्त्री-भ्रूण-गोघातपातकान्यकृपोऽक्लृपम् ॥३०॥
मामीदृशमपि त्रातुं साधवो यूयमर्हथ ।
किमपि स्थानमस्थानं भानोर्भासयतो भुवम्'' ॥३१॥
''अथ ते यतयस्तस्मै यतिधर्ममुपादिशन् ।
सर्वपापक्षयोपायमखिलापायतायिनम् ॥३२॥
भो भद्र ! कियदेवैतदैहिकं तव पातकम् ? ।
तपसा हन्यतेऽनन्तभवसम्भृतमप्यदः ॥३३॥

नीचोऽपि क्रियते मूर्ध्नि पात्रीभूय कृतव्रतः ।
विषोढानलसम्पर्कः पङ्क एव निरूपणम् ॥३४॥

तपःसंपल्लतामूलं प्रतिकूलं शुचां तपः ।
तपो भवाम्बुधेः कूलं कुकूलं कर्मणा तपः ॥३५॥

मनःक्षेत्रे शुभध्यानकृषिर्मोक्षफला तदा ।
एधते ऽघतृणौघं चेत् क्षेत्रज्ञो ननु निन्दति'' ॥३६॥

इति श्रुत्वा श्रुतिसुधाकिरस्तेषामयं गिरः ।
व्रतं निर्वृतिकामोऽथ समादत्त समाहितः ॥३७॥

न भोक्ष्ये तत्र यत्राह्नि स्मरिष्याम्यस्य पाप्मनः ।
करिष्ये सर्वथा क्षान्तिं सोऽग्रहीदित्यभिग्रहौ ॥३८॥

पूर्वावस्कन्दिते तस्मिन्नेव ग्रामे **कुशस्थले** ।
विवेकी विजहारात्मकर्मक्षयचिकीरसौ ॥३९॥

स एवायं बकध्यानी पापः पापीयसामपि ।
इत्यभर्त्स्यत लोकेन स तस्मिन् विहरन् मुनिः ॥४०॥

ब्रह्म-स्त्री-भ्रू-गोघातपातकी बत कीदृशः ।
निस्त्रपो दर्शयत्यास्यमूर्ध्वस्फोटं न याति किम् ? ॥४१॥

परतः स्फिट पापिष्ठ ! व्रती केनासि निर्मितः ? ।
दूष्यते व्रतमप्येतद् गरेणेव पयस्त्वया ॥४२॥

जल्पतेति जनेनोच्चैः श्वेव लोष्टैरकुट्यत ।
विशन् गृहेषु भिक्षार्थं स ईर्यासमितो मुनिः ॥४३॥ विशेषकम् ॥

स्मार्यमाणो जनेनेति तत्पापमयमन्वहम् ॥
शान्तस्वान्तो न भुङ्क्ते स्म तादृशां किमु दुष्करम् ? ॥४४॥

लेष्टुभिर्मुष्टिभिः पांशुवृष्टिभिर्यष्टिभिर्जनाः ।
यज्जघ्नुः सोऽधिसेहे तत् सम्यक् चैवमभावयत् ॥४५॥

"आत्मन् ! मा खेदमायासीरमी कर्मप्रदीपनम् ।
शमयन्तीति कुर्वाणास्त्वयि तेनोपकारिणः ॥४६॥
शापाभिचारमन्त्रेण कर्मदोषं तवोत्कटम् ।
अमी स्वयं निगृह्णन्तः किं न स्युरुपकारिणः ? ॥४७॥
दूये तु कर्मदोषोऽयं मां विमुच्य कथञ्चन ।
निष्कारणोपकर्तृणाममीषां यल्लगिष्यति" ॥४८॥

"एवं **मैत्री**पवित्रेण **मुदिता**मोदशालिना ।
उपेक्षापक्ष्मलेनाऽन्तः**करुणा**शरणात्मना ॥४९॥
क्षुत्तुषालाभशीतोष्णवधाक्रोशपरीषहान् ।
सहता तेन षण्मासी दिनैकवदलङ्घ्यत" ॥५०॥
इत्थं तेन **दृढप्रहारि**मुनिना कर्मैधचक्रे(?) तपो-
वह्निना भवभीतिशीतजनिताम् त्रातुं स्वमुत्कम्पतः ।
लोकालोकतमोऽपहेन महसा तत्कालमुन्मीलता,
दृष्ट्वैवैष पुरो विमुक्तिवनितामाकृष्य भेजेऽपि च ॥५१॥३५॥

॥ इति दृढप्रहारिकथा ॥

● ● ●

अथ **स्कन्दकाचार्य**शिष्यचरित्रचित्रीयमाणचित्तः प्रवक्ति –

खंदगसीसेहिं तहा पीलिज्जंतेहिं अहह जंतेहि ।
जं तेहिं पीलियाइं नियकम्माइं तमच्छेरं ॥३६॥

[स्कन्ददशिष्यैस्तथा पीड्यमौनरहह ! यन्त्रैः ।
यत् तैः पीडितानि निजकर्माणि तदाश्चर्यम् ॥]

व्याख्या – **स्कन्दकाचार्यशिष्यै**स्तथा **तेन प्रकारेण** घोरेणेत्यर्थः, 'पीलिज्जंतेहि' **पीड्यमानैः**, **अहहे**त्यनेकार्थत्वात् तादृग्निरपराधमुनिविनाशविडम्बनानुस्मरणात् खेदे अद्भुते च, वक्ष्यमाणमाह – 'जंतेहिं' **"द्वितीयातृतीययोः सप्तमी"** [है.प्रा.३/१२५] इति प्राकृतलक्षणाद् **यन्त्रेषु** पीलनोपकरणेषु 'जं तेहिं' **यत्तैः पीलितानि** पेषितानि 'नियकम्माइं' निजानि च तानि कर्माणि च **निजकर्माणि**, 'तमच्छेरं' **तदाश्चर्यम्** । अपि चोक्तमस्माभिः –

"कल्याणवर्णिकावृद्ध्यै गरीयान् सहजानरीन् ।
क्लिश्यमानोऽपि क्लिश्नाति नागो धातूनिवाखिलान्" ॥ [ ]

इति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तश्चैतत्

§§ **श्रावस्ती** नाम **भरत**भूमावस्तीह पूर्वरा ।
जितशत्रुरिति ख्यातस्तत्र धात्रीधवोऽभवत् ॥१॥
धारिणीति कलामालभारिणी तस्य वल्लभा ।
तस्यां च **स्कन्दकः** पुत्रः **पुरन्दरयशाः** सुता ॥२॥
कुम्भकारकृताभिख्यपुरक्षोणीभृता वृत्ता ।
राज्ञा **दण्डकि**सञ्ज्ञेन नीता च परिणीय सा ॥३॥
एकदा **पालको** नाम मन्त्री **दण्डकी**भूपतेः ।
श्रावस्त्यामययावात्मराज्यकार्येण केनचित् ॥४॥
जितशत्रुमहीभर्तुः प्रतीहारनिवेदितः ।
स विवेश सदःसद्म कासारमिव कासरः ॥५॥

तदा तु राजा सर्वज्ञोपज्ञतत्त्वविशारदः ।
आसीत् कुर्वन् समं सभ्यैर्धर्माधर्मविचारणाम् ॥६॥

पालकः स तु चार्वाकचातुरीं तत्र सूत्रयन् ।
छिन्नजिह्व इवाकारि **स्कन्दकेन** निरुत्तरः ॥७॥

ततः सभाजनैः सर्वैरपि गर्वस्य पाततः । 5
हसितो न्यङ्मुखीभूय विलक्षः स्वपुरं ययौ ॥८॥

श्रावस्त्यामन्यदा स्वामी **सुव्रतः** समवासरत् ।
स्कन्दकेन समं राजाऽभ्येतं प्रणनाम च ॥९॥

प्रणम्योचितभूपीठप्रतिष्ठेषु नृपादिषु ।
भगवान् भववैराग्यजननीं देशनां व्यधात् ॥१०॥ 10

श्रुत्वाथ भगवद्व्याख्यां **स्कन्दको** नृपनन्दनः ।
राजपुत्रैः समं पञ्चशत्या व्रतमुपाददे ॥११॥

भगवानथ सद्भव्यराजीराजीवभास्करः ।
विजहार भुवं ग्रामनगराकरमण्डिताम् ॥१२॥

तप्यमानस्तपस्तीव्रमधीयानः श्रुतं महत् । 15
कालक्रमेण गणभृत्पदस्थः **स्कन्दको**ऽभवत् ॥१३॥

स राजपुत्रमुनिभिस्तैरेव सह दीक्षितैः ।
पञ्चशत्यावृत्तोऽदीपि यूथाधिप इव द्विपः ॥१४॥

अन्येद्युः प्रतिबोधाय **पुरन्दरयशः**स्वसुः ।
स्कन्दको नाथमापृच्छत् कुम्भकारकृतं प्रति ॥१५॥ 20

स्वाम्यूचे वत्स ! भावी तेऽनर्थस्तत्र व्ययात्मकः ।
त्वं विनाऽऽराधकाः सर्वे भविताश्च संयताः ॥१६॥

यदमी साधकाः सर्वे तदा प्राप्तं न किं मया ? ।
चिन्तयित्वेति चलितः **स्कन्दक**स्तत्पुरं प्रति ॥१७॥

पालकस्तु समाकर्ण्य समायान्तं स्फुरत्तमाः ।
आयुधानि न्यधाच्छन्नं प्रासुकोद्यानभूमिषु ॥१८॥
एत्य च **स्कन्दका**चार्यो मुनिपञ्चशतीवृतः ।
तत्रैव समवासार्षीत् तं नन्तुं चाययौ नृपः ॥१९॥
श्रुत्वा तद्देशनां क्षीराश्रवलब्ध्यातिबन्धुराम् ।
प्रशंसन् **दण्डकी** राजा प्रविवेश पुरं ततः ॥२०॥
याचित्वैकान्तमेकान्ते मत्सरी **पालको** नृपम् ।
जगाद् **स्कन्दको**ऽयं ते राज्यार्थ्यस्ति समागतः ॥२१॥
अनेन सह योद्धारः सर्वे पाखण्डधारिणः ।
शस्त्राणि गोपयित्वोर्व्यां सर्वे त्वां हन्तुमुद्यताः ॥२२॥
सज्जनाकृतयः कुर्युर्दुर्जना जनयातनाम् ।
हेरर्दंष्ट्राङ्कुराः किञ्चन निघ्नन्तीन्दुकलाकलाः ॥२३॥
प्रत्येषि यदि मे न त्वं स्वयं तदवधारय ।
सन्त्यायुधानि यद्येषां तत्पमाणं वचो मम ॥२४॥
श्रुत्वेति तद्गिरं राजा शङ्कितस्तत् तथाऽकरोत् ।
दृष्ट्वा च भुवि शस्त्राणि कुप्यति स्माविचारकः ॥२५॥
ऊचे च **पालकं** साधु साधु जातमिदं त्वया ।
अतः परं त्वमेवैतान् निगृहाण यथारुचि ॥२६॥
संसिद्धेप्सितमानी स कीनाश इव निर्घृणः ।
मुनीनां पीलनायाथ वने यन्त्रमसूत्रयत् ॥२७॥
प्रत्येकं पीलयामासातीवदुष्टो यतीनयम् ।
तेषां तु **स्कन्दका**चार्यः पर्यन्ताराधनां व्यधात् ॥२८॥
अथैकं क्षुल्लकं दृष्ट्वा पर्यन्ताराधनोद्यतम् ।
जगाद **स्कन्दका**चार्यः शिष्यवात्सल्यमोहितः ॥२९॥
बालकस्यास्य पुरतो यन्त्रो मां क्षिप **पालक** !
यथात्मलोचनैरस्य पश्यामि मरणं न हि ॥३०॥

श्रुत्वेति **पालक**स्तस्य विशेषार्त्तिकृते शठः ।
तमेव क्षुल्लकं यन्त्रे क्षिप्त्वा पूर्वमपीलयत् ॥३१॥

यतीनां पील्यमानानां कपालैः साकमत्रुटन् ।
कर्माणि सर्वथा शुद्धभावनाभावितात्मनाम् ॥३२॥

संप्राप्य केवलालोकं लोकम्पृणगुणाश्रियः ।
ते सर्वेऽपि सदानन्दं महानन्दं प्रपेदिरे ॥३३॥

अथोत्पन्नमहाकोपो निदानं **स्कन्दको**ऽकरोत् ।
पालकेऽस्मिन् वधाय स्यां दुष्टे राष्ट्रे च राजनि ॥३४॥

इत्थं कृतनिदानोऽसौ सद्यो यन्त्रातिथीकृतः ।
स्कन्दकस्तु विप**द्याग्निकुमारे**षूदपद्यत ॥३५॥

नयन्त्यस्राविलं तस्य रजोहरणमम्बरे ।
पुरन्दरयशःसौधे शकुनी समपातयत् ॥३६॥

पुरन्दरयशा वीक्ष्योपलक्ष्य च तदग्रतः ।
रुरोद रोदयन्ती सा प्रासादं प्रतिनिःस्वनैः ॥३७॥

विलपन्त्याह भर्तारं हा पाप ! किमिदं कृतम् ।
रजोहरणमेतन्मे बन्धोस्तत् किं हतस्त्वया ? ॥३८।

त्वां विना तव सङ्केतं विना वात्रैव पत्तने ।
को हन्ति हन्त ! वैरीति निरीहस्यास्य कः पुनः ? ॥३९॥

बहुधा विलपन्तीति रुदती सातिदुःखतः ।
सद्यो निहन्तुमात्मानं भूम्यां चास्फोटयच्छिरः ॥४०॥

अत्रान्तरे समागत्य **स्कन्दकोऽग्निकुमारकः** ।
नीत्वा **सुव्रत**पादान्ते व्रतिनीं तामकारयत् ॥४१॥

ततः सदेशं सपुरं च सप्रजं **सपालकं दण्डकिनं** प्रकोपवान् ।
आच्छाद्य संवर्तकमारुताहृतैः काष्ठैः स देवः कुरुते स्म भस्मसात् ॥४२॥३६॥

॥ इति स्कन्दककथा ॥

● ● ●

अथ गाथायुगेन **चिलातीपुत्र**चरित्रसद्भावमुद्भावयन्नाह –

सोणियगंधविणिग्गयपिवीलिया वज्जकीलियाउ व्व ।
जस्स पविट्ठा चलणेहिं णिग्गया सीसदेसम्मि ॥३७॥

अहह ! मह पावदुव्विलसियाणमेयं कियत्ति चितंतो ।
पत्तो चिलाइपुत्तो सुरलोअं निच्चउज्जोयं ॥३८॥

[शोणितगन्धविनिर्गतपिपीलिका वज्रकीलिका इव ।
यस्य प्रविष्टाश्चरणेषु निर्गताः शीर्षदेशे ॥
अहह ! मम पापदुर्विलसितानामेतत् कियदिति चिन्तयन् ।
प्राप्तश्चिलातीपुत्रः सुरलोकं नित्योद्द्योतम् ॥]

व्याख्या – **शोणितगन्धेन** कृत्तसुंसुमाशिरः प्रसरद्रुधिरपरिमलेन **विनिर्गता** निःसृताश्च ताः **पिपीलिकाः** कीटिकाश्च शोणितगन्धविनिर्गतपिपीलिका कर्त्र्यः । का इव ? 'वज्जकीलियाउ व्व' **वज्रकीलिका इव** 'जस्स पविट्ठा' **यस्यं प्रविष्टाः** । केषु ? 'चलणेहिं' **चरणेषु** न केवलं प्रविष्टाः किन्तु 'निग्गया' **निर्गता** निःसृताः । क्व ? 'सीसदेसम्मि' **शीर्षस्य देशः** प्रदेशस्तत्र ॥ 'यत्तदोर्नित्यसंबन्धः' इति वाक्यात् स **चिलातीपुत्रः** सुरलोकं देवलोकं नित्योद्द्योतं सततप्रकाशभासमानं 'पत्तो' **प्राप्तः** । किं कुर्वन् ? 'चिंतंतो' **चिन्तयतन्** । किम् ? '**अहह**' इति खेदे, 'मह पावदुव्विलसियाणमेयं कियत्ति' **मम पापदुर्विलसितानामेतत्** पिपीलिकोपसर्गवेदनारूपं **कियत्** ? न कियदेवेति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ **क्षितिप्रतिष्ठित**पुरे **यज्ञदेवो** द्विजः पुरा ।
विजित्य पण्डितम्मन्यो सूरिणैकेन दीक्षितः ॥१॥

ततः शासनदेव्याऽसौ चित्ताह्लादकिरा गिरा ।
दृढीकृतो व्रते **विन्ध्या**नीतो गज इवानिशम् ॥२॥

ततः प्रभृति चारित्रं विपुलं पालयन्नयम् ।
दीनः प्राचीनसंस्काराद् हीनदेहमलोऽभवत् ॥३॥

तस्य प्रियाऽनुरागार्तिमनुज्झन्त्यन्यदा पुनः ।
वश्यो मेऽस्त्विति मूढाऽस्मै पारणे कार्मणां ददौ ॥४॥

क्षीयमाणोऽमुना मृत्वा स मुनिः स्वर्गमासदत् ।
तत्प्रियाथ परिव्रज्य तदनालोच्य देव्यभूत् ॥५॥

यज्ञदेवस्य जीवोऽथ च्युत्वा **राजगृहे** पुरे ।
धनसार्थपतेश्चेट्या**श्चिलात्या**स्तनयोऽभवत् ॥६॥

यज्ञदेवप्रिया जीवश्च्युत्वाऽनुसुतपञ्चकम् ।
भद्राया **धन**भार्यायाः **सुंसुमे**ति सुताऽजनि ॥७॥

धनो नियोजयामास **चिलातीतनयं** च तम् ।
सुंसुमायायाः स्वदुहितुर्बालग्राहकर्मणि ॥८॥

शैशवे वर्तमानामप्यसौ प्राग्भवसंस्कृतः ।
नीलीरागो बभाजैतां रोलम्ब इव मालतीम् ॥९॥

तदन्यायरतो दासः श्रेष्ठिना निरवासि सः ।
गवां स्तनानभिलिहन्निव दूरेण कुक्कुरः ॥१०॥

सोऽथ सिंहगुहां चौरपल्लीं गत्वा तदीशितुः ।
पुत्रकोऽभूदपुत्रस्य चौरमुख्यो बभूव च ॥११॥

यौवनं **सुंसुमा**ऽप्यापदसमा रूपसम्पदा ।
दूरस्थोऽपि स तां दध्यौ मत्तेभ इव **नर्मदा**म् ॥१२॥

चैलातेयऽन्यदोचे स्वानस्ति **राजगृहे** पुरे ।
अन्तर्धनो **धनः** श्रेष्ठी दुहिता चास्य **सुंसुमा** ॥१३॥

तस्कराः ! तत्र गच्छामो धनं वः **सुंसुमा** च मे ।
आस्थायेति व्यवस्थां सोऽपत**द्धन**गृहे निशि ॥१४॥

क्लृप्त्वाऽवस्वापिनीं विद्यां चौरैर्ग्राहयद्धनम् ।
ज्ञापयित्वा स्वमायातं **सुंसुमा** स्वयमग्रहीत् ॥१५॥

हृदि स्मरास्त्रभिन्नेऽथ स कृत्वा **सुंसुमौ**षधीम् ।
चैलातेयः पलायिष्ट सलोप्त्रैः सह दस्युभिः ॥१६॥

आहूयारक्षपुरुषान् **धन**श्रेष्ठीत्यभाषत ।
वित्तं वस्तस्करोपात्तं समानयत मे सुताम् ॥१७॥

तत **धनः** सहारक्षैः पुत्रैश्चायुधपाणिभिः ।
पुरोगः स्वामनः स्पर्द्धयेव त्वरितमन्वगात् ॥१८॥

इतः पीतमितो भुक्तमितः स्थितमितो गतम् ।
एवं वदद्भिः पदिकैः स दस्यून् समया ययौ ॥१९॥

हंहो ! हत हताह्वाय गृह्णीतेति च भाषिणः ।
मलिम्लुचानाममिलन्नारक्षपुरुषास्ततः ॥२०॥

काकनाशं ननाशुस्ते हित्वा लोप्त्रं मलिम्लुचाः ।
सुंसुमां स तु नामुञ्चत् पुरश्चेवाऽपूपिकाम् ॥२१॥

आरक्षपुरुषास्ते तु तद्धनं प्राप्य पुष्कलम् ।
व्यावर्तन्त कृतार्थो हि सर्वः स्यादन्यथामतिः ॥२२॥

कृपाणं पाणिनैकेन द्वितीयेन च **सुंसुमा**म् ।
उरूहन्नविशत् पल्लीं **चिलातीतनयः** पुनः ॥२३॥

धनस्तु तदनु प्राप सूनुभिः सह पञ्चभिः ।
मोचयिष्यन् सुतां तस्माद् मृगीमिह मृगादिव ॥२४॥

धने सविधमायाते रागान्धोऽथ मलिम्लुचः ।
सारग्राही भवामीति तत्क्षणोत्पन्नया धिया ॥२५॥

शिरः प्रधानं गात्रस्येत्युत्कृत्याऽऽदत्त तन्मुखम् ।
वीक्षमाणस्ततस्तूर्णं पलायिष्ट प्लवङ्गवत् ॥२६॥ युग्मम् ॥

सुंसुमायां कबन्धस्यान्तिके स्थित्वा रुदन् **धनः** ।
वारीव बाष्पदम्भेन नयनाञ्जलिभिर्ददौ ॥२७॥

तच्च संस्कार्यं तत्रैव पुरे गत्वौर्ध्वदेहिकम् ।
कृत्वा वैराग्यतो धीरपादान्ते व्रतमग्रहीत् ॥२८॥

चैलातेयोऽपि संतापहरं छायातरुं यथा ।
मुनिमेकं ददर्शाग्रे कायोत्सर्गस्थितं पथि ॥२९॥

स स्वेन कर्मणा तेन किञ्चिदुद्विग्नमानसः । 5
तमुवाच समाख्याहि धर्मं संक्षेपतो मम ॥३०॥

अन्यथा **सुंसुमा**शीर्षच्छेदोत्कर्षवताऽसिना ।
शिरस्ते पातयिष्यामि फलं तालतरोरिव ॥३१॥

स ज्ञानाद् मुनिरज्ञासीद् बोधिबीजमिहाहितम् ।
सरजस्केऽपि सत्क्षेत्र इव स्फातिं गमिष्यति ॥३२॥ 10

विधेह्युपशमं छेक ! विवेकमथ संवरम् ।
इत्युक्त्वा स मुनिर्व्योम्न्युत्पपाताकाशचारणः ॥३३॥

पदानि मन्त्रवत्तानि परावर्तयतस्ततः ।
जज्ञे **चिलातीपुत्र**स्य पदार्थोल्लेख ईदृशः ॥३४॥

"भवेदुपशमः क्रोधे क्षयमीयुषि तत्करेऽस्ति मे । 15
तत्त्याज्यमङ्गनावक्त्रमिति तच्चापि सोऽमुचत् ॥३६॥

भवेच्च संवरः सर्वेन्द्रियाणामिह संवृत्तौ ।
सा तु योगनिरोधे स्यादित्युत्सर्गेण सोऽस्थित" ॥३७॥

ततोऽस्य विस्रगन्धास्रमिश्रे वपुषि कीटिकाः ।
रन्ध्राणि पापनिस्सारद्वाराणीव वितेनिरे ॥३८॥ 20

सकीटिकः क्षीणविकर्मसेनाजयप्रशस्ति परितो दधानः ।
चारित्रभूपालपवित्रकीर्त्तिस्तम्भो यथाऽराजत सुप्रतिष्ठः ॥३९॥

दत्त्वा सुरङ्गा इव कीटिकाभिः **कृष्टश्रिलातीतनय**स्य जीवः ।
पुरान्तरायुर्विधृतोऽपि सार्धाहोरात्रयुग्मेन ययावथ द्याम् ॥४०॥३८॥३९॥

॥ इति चिलातीपुत्रकथा ॥ 25

● ● ●

अथावन्तीसुकुमालमुत्तालभक्तिभरसिद्धाञ्जनोज्जृम्ममाणान्तश्चक्षुषा पुरःस्थमिव पश्यन्नाह –

जं दुट्ठसिगालीए ववसिअमसमंजसं तए सहियं ।
तं मह सुअं पि सामिय ! अवंतिसुउमाल ! भयजणयं ॥३९॥

[यद् दुष्टश्रृगाल्या व्यवसितमसमञ्जसं त्वया सहितम् ।
तद् मम श्रुतमपि स्वामिन् ! अवन्तिसुकुमाल ! भयजनकम् ॥]

व्याख्या – **हे स्वामिन् ! अवन्तीसुकुमाल !** 'जं दुट्ठसिगालीए ववसियं' **यद् दुष्टश्रृगाल्या** क्षुधा परिक्षीणतया निष्करुणफेरुण्डरण्डया **व्यवसितं** कृतं आपादान्ताङ्गोपाङ्गभक्षणमिति भावः । किंविशिष्टम् ? **असमञ्जसम**रीतिकम् । श्रृगाला हि जीबतो वपुषि न लगन्तीत्यमीषां नीतिः, तया तु जीवतोऽपि तव वपुरुपाजीव्यतेत्यतोऽसमञ्जसम्, 'तए सहियं' **त्वया सहितं** मर्षितम्, 'तं मह सुयं पि' **तद् मम श्रुतमप्या**कर्णितमपि 'भयजणयं' **भयजनकमा**तङ्कहेतुरित्यक्षरार्थः । व्यासार्थस्तु कथानकादवसेयः, तच्चैतत् –

§§ अस्त्यवन्तिषु विख्या**तोज्जयिनी**ति पुरी वरा ।
पुरन्दरपुरोदारसंपदुज्जयिनी श्रिया ॥१॥
त्रिखण्डभोक्ता भङ्क्ताऽरिभूविभूग्रभुजोष्मणः ।
सम्प्रतिस्तत्र नाम्नाऽभूद् गुणैरप्रतिमो नृपः ॥२॥
इभ्यपुत्रोऽभवत्तत्र सुत्रामसुतसन्निभः ।
अवन्तीसुकुमालाख्यः सुकुमालः प्रसूनवत् ॥३॥
यस्य कोटिध्वजच्छायाः कामं मायामशिश्रियन् ।
वेश्मनि द्रविणद्रोहरक्षादक्षाऽहिसन्ततेः ॥४॥
भाग्यलक्ष्मीरिवामुष्य प्राचीनभवसम्भवा ।
माता **भद्रे**ति सर्वाणि गृहकार्याण्यचिन्तयत् ॥५॥

स्वदेहलक्षणश्रीभिरिव मूर्त्ताभिरेष तु ।
द्वात्रिंशता स्त्रीभिः प्रेमवतीभिः सुखमन्वभूत् ॥६॥

सूरिरार्यसुहस्त्यागादन्यदा तत्र पत्तने ।
जीवन्तस्वामिनं नन्तुं मुनिपञ्चशतीयुतः ॥७॥

बाह्योद्याने च भगवान् सुहस्ती समवासरत् । 5
मध्ये पुरि च स प्रैषीद्वसतिं याचितुं मुनी ॥८॥

तौ तु भद्राभिधानायाः श्रेष्ठिन्या जग्मतुर्गृहे ॥
पप्रच्छ सापि तौ नत्वा किं नामाऽऽदिशतां युवाम् ? ॥९॥

तावप्यूचतुरावां हि शिष्यावार्यसुहस्तिनः ।
तदादेशेन कल्याणि ! वसतिं प्रार्थयावहे ॥१०॥ 10

अथैकां सार्पयामास वसत्यै विकटां कुटीम् ।
चारित्रनृपहस्तीति सुहस्ती तामशिश्रियत् ॥११॥

परावर्तितुमारेभे स्वाध्यायसमयेऽन्यदा ।
आचार्यैर्नलिनीगुल्माभिधमध्ययनं निशि ॥१२॥

वधूभिः सह भाद्रेयः सप्तभूमगृहोपरि । 15
क्रीडंस्तदा ददौ कर्णं तत्र कर्णरसायने ॥१३॥

अवन्तीसुकुमालस्तत् श्रुत्वा गीतमिवोत्सुकः ।
कस्तूरिकामृगः सूरिवसतिद्वारमाययौ ॥१४॥

अनुभूतं मया क्वेदमिति चिन्तापरः स तु ।
जातजातिस्मृतिज्ञानो ययावाचार्यसन्निधौ ॥१५॥ 20

नत्वा चोवाच भगवन् ! भद्रायास्तनयोऽस्म्यहम् ।
पुरा च नलिनीगुल्मविमाने त्रिदशोऽभवम् ॥१६॥

कदाचिद् यूयमप्यत्र तस्मादेवसमागताः ।
जानीथ नलिनीगुल्मेतिवृत्तं कथमन्यथा ॥१७॥

सूरिरुचे महाभाग ! न तस्माद् वयमागताः ।
लोकालोकः समग्रोऽपि साक्षात् स्वाध्यायिनां पुनः ॥१८॥
श्रुत्वेत्युवाच **भाद्रेयो** यदीदं ब्रुत तत्प्रभो !
विमानं **नलिनीगुल्मे** पथा केन प्रयाम्यहम् ? ॥१९॥
"सूरिराह व्रतं वत्सोपात्तमेकदिनेऽपि हि ।
अनन्यमनसो मोक्षं न चेद्दत्ते दिवं ध्रुवम्" ॥२०॥
सोऽप्याह **नलिनीगुल्मं** जातिस्मृत्याऽहमस्मरम् ।
तत्रैव गन्तुं भूयोऽपि परिविव्रजिषाम्यतः ॥२१॥
प्रव्राजयत मामेवमार्थयत् तममुं गुरुः ।
जगादेदं वरं किन्तु सुकुमालोऽसि बालक ! ॥२२॥
सुचर्व्या लोहचणकाः सुपेया वह्निहेतयः ।
दुष्करं तु जिनोपज्ञमतीचारोज्झितं व्रतम् ॥२३॥
भाद्रेयोऽभिदधे भूम्ना प्रव्रज्योत्कण्ठितोऽस्म्यहम् ।
सामाचारीं चिरं कालं न च पालयितुं क्षमः ॥२४॥
आदावेव परिव्रज्यां तस्मादनशनान्विताम् ।
आदास्ये सत्त्वमालम्ब्य स्तोकखेदमिदं खलु ॥२५॥
गुरुरूचे महाभाग ! जिघृक्षसि यदि व्रतम् ।
अनुज्ञापय तद् बन्धूनन्धूनिवान्धकारिणः ॥२६॥
सोऽप्याह किमनुज्ञातैरेतैर्विघ्नविधायिभिः ।
एष व्रती भवन्नस्मीत्युच्चखान शिरोरुहान् ॥२७॥
स्वेनैवोपात्तलिङ्गोऽसौ मा भूदिति **सुहस्त्य**पि ।
तं परिव्राजयामास प्रव्रज्याविधिमुच्चरन् ॥२८॥
§§ चिरकालं तपःकष्टनिर्जरां कर्तुमक्षमः ।
गुरूनापृच्छ्य सोऽन्यत्र ययावनशनं चिकीः ॥२९॥

अवन्तीसुकुमालस्य पादयोः सुकुमारयोः ।
असृग्बिम्बैरभूत् क्षोणिः शोणाब्जैर्मालभारिणी ॥३०॥

श्रृगालाकृष्टकङ्कालमृदङ्गरवडम्बरम् ।
नृत्यद्वैतालमुत्तालशिवारुदितगीतिकम् ॥३२॥

प्रतिस्थानं चितावह्निज्वालापल्लवितं ततः ।
सोऽगात् पितृवनं क्रीडावनं पितृपतेरिव ॥३२॥ युग्मम् ॥

कन्थारिकाकुडङ्गान्तस्तस्थावनशनेन सः ।
समाहितः स्मरन् पञ्चपरमेष्ठिनमस्कृतिम् ॥३३॥

तत्पदान्यस्रविस्रागि लिहन्ती सह बालकैः ।
शृगाली कापि तत्रागात् तत्कुडङ्गं विवेश च ॥३४॥

शोधयन्ती च सा प्राप तत्पदं चासृगास्पदम् ।
तं च खादितुमारेभे कृतान्तस्येव किङ्करा ॥३५॥

त्रोटं त्रोटं पलं पायं पायं रुधिरमन्तरा ।
तं भङ्गं भञ्जमस्थ्यश्नात् पादं सा कर्कटीमिव ॥३६॥

तस्यैकं भक्षयन्ती सा तं पदं निरशेषयत् ।
तड्डिम्भरूपाण्यपरं प्रथमे प्रहरे निशः ॥३७॥

तथापि न चकम्पे स दध्यौ प्रत्युत सात्त्विकः ।
शरीरं जीव ! काराभं भज्यते यदि भज्यताम् ॥३८॥

एवं द्वितीययामे तदूरू क्रुरा चखाद सा ।
जीवोऽयं क्षुधितस्तृप्यत्विति चक्रे कृपां स तु ॥३९॥

तत्तुन्दं भक्षयामास तृतीये प्रहरे च सा ।
स तु दध्यौ तुदत्यंहोवृन्दं तुन्दमियं न मे ॥४०॥

यामे तुर्ये च यामिन्या महासत्त्वो विपद्य सः ।
विमाने **नलिनीगुल्मे** महर्द्धिरमरोऽभवत् ॥४१॥

महाव्रती महापुण्यो महासत्त्वोऽयमित्यथ ।
तत्कालभूमौ तत्कालं विदधे महिमाऽमरैः ॥४२॥

तत्प्रियास्तमपश्यन्त्यः पृच्छन्ति स्म **सुहस्तिनम्** ।
आख्याहि भगवन्नस्मत्पतिः कथमभूदिति ? ॥४३॥

उपयोगेन विज्ञाय **सुहस्त्यपि** च तत्तथा ।
तद्वृत्तं सर्वमाचख्यौ ताभ्यो मधुकिरा गिरा ॥४४॥

अवन्तीसुकुमालस्य वध्वो गत्वाथ धामनि ।
भद्रायां पुरतः सर्वास्तं वृत्तान्तं न्यवीविदन् ॥४५॥

वज्रपातोपमं **भद्रा** तं निशम्य निशात्यये ।
स्मशाने प्रययौ तत्र कन्थारिवनभारिते ॥४६॥

आकृष्टं दिशि पूर्वस्यां दृष्ट्वा सूनोः क्लेवरम् ।
रुरोद सवधूकापि **भद्रे**ति विललाप च ॥४७॥

"हा वत्स ! यदि वैराग्यादस्मास्तृणवदत्यजः ।
शरीरं तत्किमत्याक्षीर्यदाद्यं धर्मसाधनम् ? ॥४८॥

हा वत्स ! दीक्षितोऽपि त्वमेकस्मिन्नपि वासरे ।
किं नाऽलमकृथाः स्वस्य विहारेण गृहाङ्गणम् ? ॥४९॥

हा वत्स ! शयने पुष्पपत्रपीडाऽसहिष्णु ते ।
वपुः कथं विषेहेऽदः क्रोष्ट्रीदशनदारणम् ? ॥५०॥

हा वत्स ! यदि निर्मोहस्त्वमत्याक्षीः कुटुम्बकम् ।
तद् गुरुष्वपि निर्मोहः किमभूस्ते यदुज्झिताः ? ॥५१॥

हा वत्स ! रात्रिः कल्याणी का भविष्यत्यतः परम् ।
स्वप्ने या दर्शयित्वा त्वामस्मान् संजीवयिष्यति ?" ॥५२॥

अनेकशो विलप्येति **भद्रा सिप्रा**नदीतटे ।
तस्यौर्ध्वदेहिकं चक्रे रुदती समयोचितम् ॥५३॥

भद्रासूनोर्गृहिण्योऽपि विलप्य च विलप्य च ।
सिप्रायां चक्रिरे शङ्खोद्धरणं क्लिन्नवाससः ॥५४॥

सुतमृत्युसमुद्भूतशोकानलकरालिता ।
भद्रा तदैच्छत्प्रव्रज्यां शमामृततरङ्गिणीम् ॥५५॥

समेत्य सदने साथ मुक्त्वैकां गुर्विणी वधूम् । 5
सवधूका परिव्रज्य व्यहरद् गुरुभिः समम् ॥५६॥

गुर्विण्यास्तनुभूः क्रमाच्च जनतः श्रुत्वेति यन्मे पिता,
चक्रे कालमहो महान्तमिह तन्मूर्त्या सनाथं ततः ।
प्रासादं तटिनीतटेऽतिविकटं निर्मापयामासिवान्,
अद्याप्यस्ति स विश्रुतः किल **महाकाला**ख्ययाऽ**वन्ति**षु ॥५७॥३९॥ 10

॥ इत्यवन्तिसुकुमालकथा ॥

● ● ●

अथ **सुकोशल**मुनेर्वधपरीषहसहनकौशलकलाकिसलयेनात्मवार्णी वसन्तय-न्नाह—

जणणी जाया वग्घी तीए तह दारिओ वि मुणिवसहो ।
अहियासिंतो अहिअं सुकोसलो निव्वुइं पत्तो ॥४०॥

[जननी जाता व्याघ्री तया तथा दारितोऽपि मुनिवृषभः ।
अधिसहमानोऽधिकं सुकोशलो निर्वृत्तिं प्राप्तः ॥]

व्याख्या — **जननी** माता **व्याघ्री** सिंही जाता, **तया तथा** तेन प्रकारेण दारुणे-नेत्यर्थः, **दारितोऽपि** खण्डशः कृतोऽपि 'मुणिवसहो' **मुनिवृषभो** मुनिषु प्रतिप-न्नपरिषहोपसर्गनिर्वहणतया वृषभो धवलः स तथा, यद्वा, **मुनिश्रेष्ठः**, 'सुकोसलो' **सुकोशलनामा** 'निव्वुइं पत्तो' **निर्वृत्तिं** सुखं **प्राप्तः** । यः किल विदार्यते स कथं सुखमाप्नोति ? इति व्यतिरेकोऽयम् । अन्वयस्तु निर्वृत्तिं प्राप्तः । किं कुर्वाणः ? 'अहियासंतो' **अधिसहमानः** किं तत् ? 'अहियं' **अहितं** वपुर्विदारणस्वरूपं, यद्वा, अधिकं

"सह कलेवरखेदमचिन्तयन् स्ववशतापि पुनस्तव दुर्लभा ।
चिरतरं च सहिष्यसि जीव हे परवशो न च तत्र गुणोऽस्ति ते"॥ [ ]

इति भावनातिरिक्तं यथा भवतीति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् —

अस्ति श्रीदत्तसङ्केतं **साकेत**मिति पत्तनम् ।
तत्रासीदिन्दुविशदकीर्त्तिः **कीर्त्तिधरो** नृपः ॥१॥
सहदेव्या महादेव्या सह वैषयिकं सुखम् ।
असक्तहृदयोऽभुङ्क्त **हृषीकेशः** श्रियेव सः ॥२॥
कालक्रमेण तनयः **सहदेव्या सुकोशलः** ।
असूयत सुधाम्भोधिवेलयेव सुधाकरः ॥३॥
अथान्यसंयताभावादात्मानं भवचारकात् ।
मोचयिष्यन् नृपस्तत्र मुदितः पुत्रजन्मनि ॥४॥

मोक्षार्थकुशलो बालमपि राज्ये **सुकोशलम्** ।
विन्यस्य **विजया**चार्यपादान्ते व्रतमग्रहीत् ॥५॥ युग्मम् ॥

धात्रीभिः पञ्चभिः पाल्यमानो वृद्धिं **सुकोशलः** ।
भेजे समितिभिर्धर्मोऽनिशं **कीर्त्तिधर**स्य तु ॥६॥

सुकोशलः क्रमेणाप वर्धमानः स यौवनम् । 5
मुनिः **कीर्त्तिधरो** गुर्वनुज्ञया तु ययौ वनम् ॥७॥

"उद्योगवान् रिपून् जिग्ये बहिरङ्गान् **सुकोशलः** ।
मुनिः **कीर्त्तिधर**स्तूच्चैरन्तरङ्गान्निरन्तरम् ॥८॥

एको गुणान् परो जीवनिकायान् षडपालयत् ।
उपायांश्चतुरश्चैकः सद्ध्यानांशान् परोऽश्रयत् ॥९॥ 10

एकः शक्तित्रयं चान्यो गुप्तित्रयमपालयत् ।
राज्यचिह्नान्यधादेकोऽपरः पञ्च व्रतानि च" ॥१०॥

साकेतनगरे मासोपवासी पारणेच्छया ।
भिक्षार्थमाजगामासौ मध्याह्ने तत्र चाभ्रमत् ॥११॥

सहदेवी गवाक्षस्थां तं च दृष्ट्वेत्यचिन्तयत् । 15
पत्यौ प्रव्रजितेऽमुष्मिन् पतिहीना पुराऽभवम् ॥१२॥

सुकोशलोऽपि दृष्ट्वैनं दैवतः प्रव्रजेद् यदि ।
निर्वीरायास्तदा मेऽद्य भुवि हस्तावुभावपि ॥१३॥

तस्मान्निरपराधोऽपि भर्तापि व्रतधार्यपि ।
राज्यस्थेमकृते सूनोर्निर्वास्योऽपुराद् मया ॥१४॥ 20

इत्यन्यलिङ्गिभिः सार्धं राज्ञी तं निरवासयत् ।
किमेकमिव कुर्वीत नाकृत्यं जन्तुरात्मने ? ॥१५॥

धात्री **सुकोशल**स्याथ स्वामिनं व्रतधारिणम् ।
पुरान्निर्वासितं मत्वा रोदिति स्म दिवानिशम् ॥१६॥

सुकोशलोऽथ तामूचे मातः ! किमिति रोदिषि ? ।
सापीति कथयामास तस्मै गद्गदया गिरा ॥१७॥

राज्ये त्वां बालकं न्यस्य तव **कीर्त्तिधरः** पिता ।
प्रावाजीदद्य सोऽविक्षद् भिक्षार्थमिह पत्तने ॥१८॥

तद्दर्शनात् तवाप्यद्य व्रतग्रहणशङ्कया ।
निर्वासितः स ते मात्रा दुःखेनानेन रोदिमि ॥१९॥

श्रुत्वा **सुकोशलो**ऽप्येतद् गत्वा च पितुरन्तिके ।
प्रणम्य प्राञ्जली राज्यविरक्तोऽयाचत व्रतम् ॥२०॥

तत्प्रिया **चित्रमालाथ** गुर्व्येत्य सह मन्त्रिभिः ।
उवाचाऽस्वामिकं स्वामिन् ! न राज्यं त्यक्तुमर्हसि ॥२१॥

नृपोऽप्युवाच गर्भस्ते गोपताविह नन्दने ।
त्यक्तगुर्यद्यहं यामि राजा तत्रोचितं न किम् ? ॥२२॥

इत्युक्त्वाऽमात्यसात् कृत्वा राज्यं स्वपितुरन्तिके ।
सुकोशलः प्रवव्राज कुशलो धर्मकर्मसु ॥२३॥

तप्यमानौ तपस्तीव्रं सहमानौ परीषहान् ।
महीतले महर्षी तौ पिता-पुत्रौ विजह्रतुः ॥२४॥

तनुजस्य वियोगेन खेदभाक् **सहदेव्य**पि ।
आर्तध्यानपरा मृत्वा व्याघ्रभूद् गिरिगह्वरे ॥२५॥

§§ इतश्च तावपि मुनी कुत्रापि गिरिकन्दरे ।
स्थितौ वर्षाचतुर्मासीमासीनौ ध्यानवर्त्मनि ॥२६॥

प्रावृडन्ते प्रयान्तौ तौ पारणाय महामुनी ।
दृष्टौ मार्गे तथा व्याघ्र्या कालरात्र्येव घोरया ॥२७॥

व्यात्तवक्त्रान्तरा लोलजिह्वासौ दीप्रलोचना ।
घुर्घुरामुखरा घ्नन्ती पुच्छेनोर्वीमधावत ॥२८॥

एतस्यामापतन्त्यां तावतिमात्रक्षमाधरौ ।
क्षमाधरौ यथाऽस्थातां कायोत्सर्गेण निश्चलौ ॥२९॥

''सा तु व्याघ्री समुत्प्लुत्य पपातादौ **सुकोशले** ।
दूरापातप्रहारेण पृथ्व्यां च तमपातयत् ॥३०॥

दारं दारं वपुस्तस्य रक्तं पापा पपावियम् ।
त्रोट त्रोटं पलं चाश्नाद् भञ्जं भञ्जमथास्थ्यपि ॥३१॥

मर्माणि न हि कर्माणि सहायेयं भिनत्ति मे ।
इति भेजे मुदं मम्लौ स मुनिर्न मनागपि ॥३२॥

व्याघ्रेति भक्ष्यमाणोऽपि शुद्धध्यानपरायणः ।
उत्पन्नकेवलो मोक्षं **सुकोशल**मुनिर्ययौ'' ॥३३॥

''मुनिः **कीर्त्तिधरो**ऽप्युच्चैस्तदा व्याघ्रीभयादिव ।
क्षपकश्रेणिमारूढः केवलज्ञानमासदत्'' ॥३४॥

''सापि व्याघ्री तदङ्गानि खादं खादमशेषतः ।
तृप्ता **सुकोशल**स्यास्यं विलोक्येदमचिन्तयत् ॥३५॥

ईदृग्मुखं मया क्वापि विलोकितचरं किल ।
इत्यूहापोहतो जातिस्मृतिं शिश्राय सा क्षणात् ॥३६॥

अहं पूर्वभवे **कीर्त्तिधर**स्य पृथिवीभृतः ।
सहदेवीति कान्ताऽऽसं मम पुत्रः **सुकोशलः** ॥३७॥

तौ व्रतं प्रतिपेदाते तद्वियोगादहं पुनः ।
आर्तध्यानाद् विपद्याऽस्मि जाता व्याघ्री वनान्तरे ॥३८॥

तदिदं मुखमेतद्धि **सुकोशल**मुखोपमम् ।
आः ! स्वपुत्रो मया प्राज्यपापया मारितः स्वयम् ॥३९॥

अयं **कीर्त्तिधरः** साधुर्यो मया मन्दभाग्यया ।
पारणायै भ्रमन् भिक्षां नगराद् निरवास्यत ॥४०॥

अधिकाधिकपापिष्ठां धिग् धिग्मां पूर्वजन्मतः ।
धन्यावेतौ पिता-पुत्रौ पुनः सत्कर्मनिर्मलौ ॥४१॥
अधमा पापिनी दुष्टा तदहं करवाणि किम् ? ।
पतामि पर्वताद् येन प्रयामि विशरारुताम् ॥४२॥
विशामि ज्वलति क्वापि यद्वा दवहुताशने ।
भस्मीभवामि येनेति चिन्तयन्ती लुलोठ सा ॥४३॥
चक्रन्द दीनवदना स्वनखैर्विलिलेख च ।
दन्तैः पाणी चखादोच्चैः क्षितावास्फोटयच्छिरः'' ॥४४॥
''अथाह केवली **कीर्त्तिधर**स्तां करुणापरः ।
शुभे ! संसारललितमीदृगेव शरीरिणाम् ॥४५॥
अविचारितरम्योऽयं भवोऽनर्थपदं पुनः ।
तृष्णा तस्यापि चूलेयं देवासुरविडम्बिनी ॥४६॥
जन्तवोऽपशवोऽप्येतद्वशाः स्युरविवेकिनः ।
पशुजन्मनि जातायाः शुभे ! तव किमुच्यते ? ॥४७॥
यत्त्वं चिन्तयसे पातं गिरेर्वह्नौ प्रवेशनम् ।
तन्न भद्रे ! समीचीनं धर्मध्यानं तु संश्रय ॥४८॥
दान-शील-तपो-भावभेदैस्तच्च चतुर्विधम् ।
पशोस्ते तु तपःशीलभावैस्त्रैधं विशुद्धिदम् ॥४९॥
तत्रापि भावनाशुद्धं तप एवाघमर्षणम् ।
यदाराध्य दिवं प्रापुः पञ्च पातकिनोऽपि हि'' ॥५०॥
श्रुत्वा **कीर्त्तिधरा**दिति व्यतिकरं धर्मस्य निर्माय च,
व्याघ्री सानशनं विपद्य च पदं **वैमानिका**नामगात् ।
राजर्षिः स तु धर्षितान्तररिपुस्तत्रैव शैले स्थितः
शैलेशीकरणं विधाय करणं मुक्त्वा च मुक्तिं ययौ ॥५१॥४०॥

॥ इति सुकोशलमुनिकथा ॥

● ● ●

अथ तद्गुणानुध्यानरसैकतानमानसतया पुरो दृष्टेवानुत्तरविमानमणिकिङ्किणी-क्वणलयपरायणं **शालिभद्र**मुन्निद्रयन्नाह –

तह सुकुमालो तह भोगलालसो सालिभद्द ! कह णु तुमं ।
दुद्धरनियमधुरं पडिवन्नो नमिऊण वीरजिणं ? ॥४१॥

[तथा सुकुमालस्तथा भोगलालसः शालिभद्र ! कथं नु त्वम् ।
दुर्धरनियमधुरां प्रतिपन्नो नत्वा वीरजिनम् ? ॥]

व्याख्या – **हे शालिभद्र !** 'कह णु तुमं' **'नु'** इति वितर्के, **कथं त्वं दुर्धर-नियमधुरां** दुर्वहाभिग्रहधुरां पादपोपगमानशनरूपां 'पडिवन्ना' **प्रतिपन्नः** । किं कृत्वा ? 'नमिऊण वीरजिणं' **वीरजिनम**पश्चिमतीर्थनाथं **नत्वा,** तदाज्ञामादायेति भावः । किंविशिष्टस्त्वम् ? 'तह सुकुमालो' **तथा** तेन प्रकारेण **सुकुमारो** यथा महाराज-**श्रेणिक**स्यापि वपुरुष्मणा त्वं व्यथां प्राप्तः । 'तह भोगलालसो' **तथा** तेन प्रकारेण **भोगा** विषयास्**तेषु लालसो** लम्पटः, यथा साक्षादात्मवपुर्लक्षण-लक्ष्मीभिरिव द्वात्रिंशता वधूभिरसूर्यम्पश्याभिः सह सुरलोकादागतं गन्धमाल्यवसन-मण्डनाऽशनरसमनुदिवसमवशमानसस्त्वं विलसन्नात्मनः स्वामिसत्तामपि नाज्ञा-सीरित संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ अस्ति **राजगृहं** हस्तिविराजद्गोपुरं पुरम् ।
धराहारसमाकारप्राकारपरिवारितम् ॥१॥
चतुरङ्गरणक्रीडास्वजेयो द्यूतकारवत् ।
वशीभूताक्षचारोऽत्र नृपः **श्रेणिक** इत्यभूत् ॥२॥
प्रिया तस्य प्रियालापचणाऽभूच्**चल्लणा**भिधा ।
यस्या मुख्यस्य खण्डाभ्रमचण्डद्युतिमण्डलम् ॥३॥
पुरे तत्र सुरेन्द्रश्रीकोशागारिकवैभवः ।
पुण्यैः षट्खण्डगो भद्रः श्रेष्ठी **गोभद्र** इत्यभूत् ॥४॥
गेहिनी गेहिनीतिज्ञा तस्य श्रीरिव जङ्गमा ।
निष्कलङ्कमहाशीलभद्रा **भद्रा**भिधाऽभवत् ॥५॥

शालिक्षेत्रमहास्वप्नसूचितं गर्भमन्यदा ।
बिभरामास सा रत्नं रत्नभूधरभूरिव ॥६॥

उद्दामदानसद्धर्ममतिसन्दोहदानथ ।
दोहदान् भद्रधीरस्या **गोभद्रः** पर्यपूरयत् ॥७॥

पूर्णे काले ततः पुत्रः पूर्णेन्दुरिव पूर्वया ।
तयाऽसूयत सुश्रेष्ठं श्रेष्ठी जन्मोत्सवं व्यधात ॥८॥

दृष्टस्वप्नानुसारेण चक्रतुः पितरावथ ।
सूनोः श्रीशालिनः **शालिभद्र** इत्यभिधां ततः ॥९॥

धारणाभिर्यथा ध्यानं तपः समितिभिर्यथा ।
ववृधे पाल्यमानोऽसौ धात्रीभिरथ पञ्चभिः ॥१०॥

स पञ्चवर्षदेशीयोऽध्यापकानां समर्पितः ।
सिन्धोराप इवागस्त्यो निष्पपौ सकलाः कलाः ॥११॥

अनङ्गीकृत्य पञ्चेषुं तदङ्गेनेव निर्मितः ।
स प्राप यौवनं स्त्रेणनेत्रालिलवलीवनम् ॥१२॥

धन्या द्वात्रिंशतं कन्याः पित्रा सुपात्रसन्निभः ।
अथैष लक्ष्मीसंवासहरिणा परिणायितः ॥१३॥

शालिभद्रः समं ताभिस्ताराभिरिव चन्द्रमाः ।
पितृभ्यां पूर्यमाणेष्टभोगो भोगानभुङ्क्त सः ॥१४॥

दान्तः श्री**वीर**पादान्ते **गोभद्रो** व्रतमग्रहीत् ।
कृत्वा चानशनं मृत्वाऽमर्त्यभूमिं जगाम सः ॥१५॥

पूरयामास तत्पुण्याद् दिव्यभोगानथान्वहम् ।
आगत्य सवधूकाय **शालिभद्राय** सोऽमरः ॥१६॥

कार्यं मर्त्योचितं यद्यद् **भद्रा** तत्तदसाधयत् ।
पूर्वपुण्यप्रभावेण भोगानैवैष भुक्तवान् ॥१७॥

वणिजोऽन्येद्युराजग्मुर्गृहीत्वा रत्नकम्बलान् ।
महार्घानिति नादत्त नृपो **भद्रा**ऽग्रहीत्तु तान् ॥१८॥

चिल्लणाप्रार्थितेनाथ राज्ञकं रत्नकम्बलम् ।
याचिता वणिजोऽशंसन् **भद्रा** तानग्रहीदिति ॥१९॥

प्रधानपुरुषेणाथ भूविभू रत्नकम्बलम् ।
महामूल्यं यथामूल्यमेकं **भद्रा**मयाचयत् ॥२०॥

भद्रोचे तान् वधूपादप्रोञ्छनीकृतवत्यहम् ।
सन्त्येतानि तु जीर्णानीत्यतो विज्ञप्यतां विभुः ॥२१॥

स गत्वैतज्जगौ राज्ञे राज्ञ्यूचे **चिल्लणा** त्वदः ।
पश्याऽस्मद्वणिजां काचवैडूर्याणामिवान्तरम् ॥२२॥

तमेवपुरुषं प्रेष्य **श्रेणिकेना**तिकौतुकात् ।
शालिभद्रे समाहूते गत्वा **भद्रे**दमब्रवीत् ॥२३॥

बहिर्न हि महीनाथ ! जातु निर्याति मेऽङ्गजः ।
प्रसादः क्रियतां देव ! तद्गृहागमनेन मे ॥२४॥

कौतुकात् प्रतिपेदे तद् भूभुजा श्रेष्ठिनी ततः ।
आराजसौधं स्वगृहादतिशोभामकारयत् ॥२५॥

"तयाहूतस्ततो राजा पुष्पैराजानुराजिताम् ।
ज्वलद्धूपघटीधूमां क्षौमांशुकसमुच्छ्रयाम् ॥२६॥

रम्भासमूहसंरम्भामतिजम्भारिपत्तनाम् ।
चन्द्रोदयचमूहृद्यामतिद्यां च पुरः पुरः ॥२७॥

विपञ्च्यमानसङ्गीतां प्रतिमञ्चं पदे पदे ।
स्थाने स्थाने च निष्पाद्यमाननीराजनोत्सवाम् ॥२८॥

परिस्फूर्जत्पुरक्षोभां हट्टशोभां निभालयन् ।
प्राप संपत्कलाशालि**शालिभद्र**निकेतनम्" ॥२९॥ कलापकम् ॥

"गोपुरोभयतः क्लृप्तेन्द्रनीलकदलीवनम् ।
मणिमयप्रतीहारस्तम्भितेक्षणमङ्गिनाम् ॥३०॥
परःसहस्रमाणिक्यस्तम्भं कनकभित्तिमत् ।
सुजात्यरूप्यवलभि कुरुविन्दाश्मकुट्टिमम् ॥३१॥
सप्तभूमितया सप्तलोक्या मण्डनिकामिव ।
साहस्राक्षमिवाङ्गं वा गवाक्षैर्गणनातिगैः ॥३२॥
नानादिव्यांशुकोल्लोचरोचमानं समन्ततः ।
प्रतिकोणं ज्वलद्धूपघटीधूमाधिवासितम् ॥३३॥
कृतकस्तूरिकालेप स्वस्तिकन्यस्तमौक्तिकम् ।
स्वर्णपिष्पलस्रग्दामश्रेणिविश्राणितोत्सवम् ॥३४॥
विमानमिव जित्वेदं नृत्यकोटिध्वजाभुजैः ।
विलसद्विस्मयावेशस्तद्विवेश विशां पतिः" ॥३५॥ षड्भिः कुलकम् ॥
तस्याधस्त्रीन् क्षणान् धात्रीविभुरालोक्य विस्मयात् ।
तुरीयं क्षणमारुह्य सिंहासनमुपाविशत् ॥३६॥
सप्तम्यां भुवि **भद्रैत्य** **शालिभद्र**मजूहवत् ।
आयातः **श्रेणिको**ऽस्तीह वत्स ! तं द्रष्टुमेह्यधः ॥३७॥
अम्ब ! त्वमेव यद् वेत्सि तत् मूल्यं तस्य कारय ।
किं मया तत्र कर्तव्यमिति **भद्रामु**वाच सः ॥३८॥
अथाह **भद्रा** हे वत्स ! क्रेतव्यं वस्तु न ह्यदः ।
किन्त्वसौ सर्वलोकानां युष्माकमपि च प्रभुः ॥३९॥
श्रुत्वेति **शालिभद्रो**ऽन्तः सविषादमचिन्तयत् ।
धिक् सांसारिकमैश्वर्यं यद् ममाप्यपरः प्रभुः ॥४०॥
रोगैरिवाहिभोगैर्वा भोगैरलमतः परम् ।
करिष्यामि तथा स्वामी यथा नान्यो भवेद् मम ॥४१॥

अथोपरुद्धो मात्राऽयमुत्ततार शिरोगृहात् ।
समं वधूभिराकाशादप्सरोभिरिवामरः ॥४२॥

वेणीभुजगमञ्जीरभृङ्गसञ्जितसंयुताः ।
कर्पूरवृक्षं निकषा श्रीखण्डलतिका इव ॥४३॥

अन्वायान्तीर्वधूः **शालिभद्र**मैक्षिष्ट भूपतिः । 5
अभ्येत्य सोऽपि राजानमनमद् विनयान्वितः ॥४४॥ युग्मम् ॥

सस्वजे **शालिभद्रो**ऽथ स्वाङ्के सुत इवासितः ।
राज्ञा शिरसि चाघ्रातः खिन्नो म्लानोऽभवत् क्षणात् ॥४५॥

ततो **भद्रा** जगादैवं देवायं मुच्यतां यतः ।
मनुष्यमाल्यगन्धेन मनुष्योऽप्येष बाध्यते ॥४६॥ 10

देवभूमिं गतः श्रेष्ठी सभार्यस्यास्य यच्छति ।
दिव्यनेपथ्यवस्त्राङ्गरागादि प्रतिवासरम् ॥४७॥

ततो राज्ञा विसृष्टेऽस्मिञ्चन्द्रशालामुपेयुषि ।
भोक्तुं **भद्रा**र्थितः सस्नौ राजा मुद्राऽस्य चापतत् ॥४८॥

गवेषयति राज्ञीमां **भद्रा**देशेन दासिकाः । 15
वाप्यम्भोऽन्यत्र निन्युः सोऽपश्यत् तत्र महो महत् ॥४९॥

तन्मध्ये मुद्रिकां चन्द्रबिम्बाङ्ककलिकामिव ।
दृष्ट्वा स फुल्लनयनो विस्मयादुदधारयत् ॥५०॥

किमेतदिति राज्ञोक्ता दास्यवादीदिहान्वहम् ।
निर्माल्यं **शालिभद्र**स्य सभार्यस्यापि धीयते ॥५१॥ 20

सर्वथा धन्य एवायं धन्योऽहमपि यस्य मे ।
सज्ये येनेदृशाः सन्तीत्यन्तरा मुमुदे नृपः ॥५२॥

राजाथ बुभुजे जातसंमदः सपरिच्छदः ।
स्वालयं च ययौ वस्त्ररत्नालङ्कारपूजितः ॥५३॥

§§ **शालिभद्रो**ऽपि संसारविरक्तः सुहृदाऽन्यदा ।
वर्धितो **धर्मघोष**स्य प्रभोरागतिवार्तया ॥५६॥

आरुह्य रथमभ्येत्याचार्यपादान् प्रणम्य च ।
निविष्टो देशनान्तेऽसौ पप्रच्छेति कृताञ्जलिः ॥५७॥

प्रभो ! के ते महापुण्या येषां स्वामी न विद्यते ? ।
भगवानप्युवाचैवं दीक्षां गृह्णन्ति ये जनाः ॥५८॥

आपृच्छ्याम्बां व्रतमहं ग्रहीष्यामीत्युदीरयन् ।
गुरून् नत्वा गृहं गत्वा सावित्रीमित्ययं जगौ ॥५९॥

अम्बाऽद्याशृणवं धर्मं **धर्मघोष**प्रभोरहम् ।
भद्राऽवादीद् वरं वत्स ! पितुस्तस्यासि नन्दनः ॥५९॥

नत्वोचे **शालिभद्र**श्चेद् मातरेवं प्रसीद तत् ।
ग्रहीष्यामि परिव्रज्यां पितुस्तस्य सुतोऽस्म्यहम् ॥६०॥

भद्राऽभ्यधत्त ते योग्यो नास्ति साधुव्रतोद्यमः ।
किञ्चात्र पुत्र ! पेयाग्निज्वालामाला निरन्तरम् ॥६१॥

कुमार ! सुकुमारस्त्वं दिव्यभोगैश्च लालितः ।
रम्भास्तम्भो गजालानमिव किं वाच्छसि व्रतम् ? ॥६२॥

शालिभद्रोऽभ्यधाद् मातः ! सत्त्वस्य किमु दुर्घटम् ।
मृणालमृदुलः शेषः क्षमाभारं दधाति यत् ? ॥६३॥

भद्राऽवादीत् पुरो वत्स ! भोगाननुदिनं त्यज ।
सहस्व त्वं मनुष्याणां गन्धान् पश्चाद् व्रतं भज ॥६४॥

शालिभद्रस्ततो **भद्रा**वचनं प्रतिपद्य तत् ।
भार्यां च तूलिकामेकां मुञ्चति स्म दिने दिने ॥६५॥

§§ इतश्चासीत् पुरे तस्मिन् **धन्यः** सत्कर्मधन्यधीः ।
सुभगम्भावुकः श्रीभिः **शालिभद्र**स्य भावुकः ॥६६॥

शालिभद्रस्वसा साश्रु स्नपयन्ती तु तं तदा ।
किं रोदिषीति तेनोक्ता जगादेति सगद्गदम् ॥६७॥

व्रतं ग्रहीता मे भ्राता मुञ्चत्येकां दिने दिने ।
भार्या च तूलिकां चाहं तेन रोदिभि हेतुना ॥६८॥

धन्यः सनर्म तामूचे वराकः फेरुपोतवत् ।
हीनसत्त्वस्तव भ्राता य एवं कुरुते किल ॥६९॥

अन्याभिरिति च प्रोचे स भार्याभिः सनर्मकम् ।
सुकरं चेद् व्रतं नाथ ! किं त्वयाऽऽद्रियते न हि ? ॥७०॥

धन्योऽप्यूचे व्रते विघ्नो भवत्यस्ताश्च पुण्यतः ।
अनुमन्त्र्योऽद्य मेऽभूवन् प्रव्रजिष्यामि तद् द्रुतम् ॥७१॥

अथोचुस्ताश्च भर्तारमश्रुमिश्रविलोचनाः ।
प्रसीद नाथ ! नो हासविकासं कर्तुमर्हसि ॥७२॥

"अथाह **धन्यः** स्नेहस्य भव्या द्रव्यात्मनोऽपि न ।
संसक्तिः पश्यतैतस्यां जायते यद्यदङ्गिनाम् ॥७३॥

क्रियते मानुषः पोत्तिं परिधाप्य बहिःश्रियः ।
मर्द्यते निर्दयं हस्तैः पादैश्च परिपीड्यते ॥७४॥

पिष्टैरावर्त्यते स्वैरं खटीभिश्च खरण्ट्यते ।
चपेटाभिश्च हन्येत निरागोऽपि हि मूर्धनि ॥७५॥

इत्थं विगोपकात् तस्मान्नम्भसा तपसा यथा ।
गतस्नेहमलं भूयोऽप्यलङ्कुर्वीत सम्पदे ॥७६॥

भावस्नेहस्य तद् ब्रूमः किमतोऽधिक एव सः ।
बलीयान् बहिरङ्गाद् यदन्तरङ्गो विधिः स्मृतः" ॥७७॥

मत्वेति भवतीभिस्तद् वाच्यमेव न किञ्चन ।
अवश्यं प्रव्रजिष्यामीत्यालपन् **धन्य** उत्थितः ॥७८॥

त्वामनु प्रव्रजिष्याम एवमुक्तवतीश्च ताः ।
अन्वमन्यत **धन्यो**ऽपि धन्यम्मन्यो महामनाः ॥७९॥
गिरावितश्च वैभारे श्री**वीरः** समवासरत् ।
मनोऽभिमतसामग्रीं सतां हि परिपच्यते ॥८०॥
दत्तदानः सदारोऽसावारुह्य शिबिकामथ ।
गत्वा श्री**वीर**पादान्ते मुदाऽन्तेवास्यभूदयम् ॥८१॥
श्रुत्वेति **शालिभद्रो**ऽपि धन्यम्मन्योऽतिविस्तरम् ।
गत्वातिसत्वरं **वीर**पादान्ते व्रतमग्रहीत् ॥८२॥
ततः सपरिवारोऽपि विजहार जिनेश्वरः ।
महीं ग्रामाकरद्रोणमडम्बपुरमण्डिताम् ॥८३॥
धन्यश्च शालिभद्रश्च विश्रुतौ तौ बहुश्रुतौ ।
अभूतां तपसा क्षामौ श्यामौ दग्धाविव द्रुमौ ॥८४॥
तौ विश्वतिलकौ धर्मोद्यानपालेन सद्गतौ ।
आरोपितुमिवाङ्गारभावं नीतौ तपोऽग्निना ॥८५॥
अन्यदा श्री**महावीर**स्वामिना सह तौ मुनी ।
आजग्मतुः पुरं **राजगृहं** जन्मभुवं निजाम् ॥८६॥
ततो निकटारामस्थं प्रणन्तुं परमेश्वरम् ।
समीयुः परितः पौराः सुराज्यविपुलश्रियः ॥८७॥
तौ मासपारणे **शालिभद्र-धन्या**वुभावपि ।
काले विहर्तुं भिक्षायै भगवन्तं प्रणेमतुः ॥८८॥
पारणं मातृहस्तेन तेऽद्येति स्वामिनोदितः ।
इच्छामीति भणन् **शालिभद्रो धन्य**युतौ ययौ ॥८९॥
भद्रागेहाङ्गणे गत्वा तावस्थातां महामुनी ।
तपःकृशतया किञ्चोपालक्ष्येतां न केनचित् ॥९०॥

सशालिभद्र-धन्यः श्रीवीरो वन्दिष्यतेऽधुना ।
इति हल्लेखिता भद्रा नाऽद्राक्षीदपि तौ पुरः ॥९१॥
क्षणमेकमिह स्थित्वा निर्गतौ नगरादपि ।
समायान्ती जरत्येका दध्ना तौ प्रत्यलाभयत् ॥९२॥
श्रीवीरस्थान्तिके गत्वा तदालोच्य कृताञ्जलिः ।
शालिभद्रोऽभ्यधान्नाथ ! मातृतः पारणं कथम् ? ॥९३॥
"सर्वज्ञोऽभिदधे वत्स ! पुरस्यास्य समीपगे ।
शालिग्रामे समागच्छद् धन्येत्युच्छन्नवंशिका ॥९४॥
कृत्वा परगृहे कर्म सा जीवति वराकिका ।
बालः सङ्गमकस्तस्या वत्सरूपाण्यचारयत् ॥९५॥
दृष्ट्वान्येद्युरथ ग्रामडिम्भान् पायसमश्नतः ।
गत्वा स्वगेहे जननीं पायसं सोऽप्ययाचत ॥९६॥
साप्युवाच दरिद्राऽस्मि मद्गेहे पायसं कुतः ।
स त्वज्ञानतया बालो ययाचे पायसं मुहुः ॥९७॥
तेनेति याच्यमानाथ दारिद्र्याच्च तथात्मनः ।
शोचन्ती पूर्वविभवं स्मारं स्मारं रुरोद सा ॥९८॥
कुररीमिव तारं तामुररीकृतरोदनाम् ।
श्रुत्वेति प्रातिवेश्मिन्यः पप्रच्छुर्दुःखकारणम् ॥९९॥
ताभ्योऽभ्यधत्त सा दुःखकारणं गद्गदाक्षरैः ।
क्षीराद्यदुश्च तास्तस्यै साऽपचत् पायसं ततः ॥१००॥
खण्डाज्यपायसभृतं स्थालं बालस्य तस्य सा ।
अर्पयित्वा ययौ कर्म निर्मातुं परवेश्मनि ॥१०१॥
विचरन् पारणायात्र क्षणे मासमुपोषितः ।
यतिरेकः समागच्छत् तपः क्षामोऽतिरेकतः ॥१०२॥

सोऽचिन्तयदिदं साधु साधुपात्रमुपस्थितम् ।
चित्तं पात्रं च मे वित्तं त्रिवेणीसङ्गमोऽद्य तत् ॥१०३॥
अथोत्थाय मुनिं नत्वा प्राञ्जलिः प्रार्थयद् मुदा ।
गृहाणं पायसमिदं प्रसीद परमेश्वर ! ॥१०४॥
इत्यसौ स्थालमुत्पाट्य पायसं मुनये ददौ ।
जग्राह मुनिरप्यस्यानुग्रहाय महाशयः ॥१०५॥
§§ मुनिर्ययौ च **धन्या** च परगेहादिहागमत् ।
मत्वा भुक्तमनेनास्मै पायसं सा पुनर्ददौ ॥१०६॥
अनासदितपूर्वं तद् बालोऽपि बुभुजेतमाम् ।
तदजीर्णेन यामिन्यां स्मरन् साधुं व्यपद्यत ॥१०७॥
तेन दानप्रभावेण स त्वं **गोभद्र**नन्दनः ।
सा च पूर्वभवाऽम्बा ते ययाऽसि प्रतिलाभितः'' ॥१०८॥
श्रुत्वेति पारणं कृत्वाऽनुज्ञाप्य च जिनाधिपम् ।
स**धन्यः शालिभद्रो**ऽद्रौ **वैभारे**ऽनशनं व्यधात् ॥१०९॥
तदा तदम्बा **भद्रा** च **श्रेणिक**श्च महीपतिः ।
भक्तियुक्तावुपेयातां श्री**वीर**चरणान्तिके ॥११०॥
नत्वा **भद्रा**ऽभ्यधाद् **धन्य-शालिभद्रौ** क्व तौ मुनी ।
भिक्षार्थं नागतौ कस्मादस्माकं भवने विभो ! ? ॥१११॥
सर्वज्ञौऽभिदधे **भद्रे** ! भवद्देशमागताविमौ ।
ज्ञातौ त्वया तु नैवेहागमनव्यग्रचित्तया ॥११२॥
प्राग्जन्ममाता सूनोस्ते यान्ती पुरं प्रति ।
ददौ दधि तयोस्तेन तौ व्यधत्तां च पारणम् ॥११३॥
उभावपि शुभावेतौ भवत्यागाय सत्वरौ ।
पादपोपगमं कृत्वा **वैभारा**द्रौ स्थितावथ ॥११४॥

वैभाराद्रिं ययौ **भद्रा श्रेणिकेन** समं ततः ।
तथास्थितावपश्यच्च पतितौ तौ द्रुमाविव ॥११५॥

तद्दुःखमिति पश्यन्ति स्मरन्त्यपि च तत्सुखम् ।
रुरोद रोदयन्ती सा कन्दराः प्रतिनिःस्वनैः ॥११६॥

"हा वत्स ! गृहमायातोऽप्यद्य निष्पुण्यया मया ।
न ज्ञातोऽसि प्रमादेन प्रसीद मयि मा रुषः ॥११७॥

हा वत्स ! यद्यपि त्वं नोऽत्याक्षीः पूर्वं तथाप्यभूत् ।
मनोरथो यदागत्य शिशिरीकुरुषे दृशौ ॥११८॥

हा वत्स ! वपुषस्त्यागहेतुनाऽनेन कर्मणा ।
मनोरथं तमपि मे भङ्क्तुमुद्यतवानसि ॥११९॥

हा वत्स ! हंसतूलीषु वपुस्ते सुखलालितम् ।
कथं विषहते ब्रूहि कठोराश्मतलव्यथाम् ? ॥१२०॥

हा वत्स ! श्रेणिकस्यापि यदम्लायि वपूष्मणा ।
तत्कथं कर्कशां भूमिं सहते शंस ते वपुः ? ॥१२१॥

हा वत्स ! मृदुसङ्गीतपानदुर्ललितौ तव ।
सहिष्येते कथङ्कारं कर्णौ फेरुण्डफूत्कृतिम्" ॥१२२॥

"अथोचे **श्रेणिको** हर्षस्थाने रोदिषि किं शुभे ! ।
ईदृग् यस्याः सुतः स्त्रीषु त्वमेका पुत्रवत्यसि ॥१२३॥

असौ तृणमिवात्याक्षील्लक्ष्मीं भोगांश्च रोगवत् ।
मुक्तिसम्पत्प्रदान् पादान् प्रपेदे स्वामिनः पुनः ॥१२४॥

असौ श्री**वीर**शिष्यत्वानुरूपं तप्यते तपः ।
त्वया तु स्त्रीस्वभावेन मुधा मुग्धेऽभितप्यते" ॥१२५॥

इत्थं **श्रेणिक**भूभुजा निजकरैरालुम्पताश्रूदक-
श्रेणिं पङ्कजबन्धुनेव नलिनीवालम्ब्य संबोधिता ।

भद्रा धाम जगाम सा निजमथो भूमानपि स्वामिनः
श्री**वीर**स्य पदौ प्रणम्य विमनाः स्वां राजधानीमगात् ॥१२६॥

अथ जगति सधन्यः **शालिभद्रः** स धन्यः,
सुकृतनिकृतकर्मा भिन्नसंसारमर्मा ।
अनशनमिति कृत्वा भावशुद्धं च मृत्वा,
वितुषसुखसमृद्धिं प्राप **सर्वार्थसिद्धि**म् ॥१२७॥४१॥

॥ इति श्रीशालिभद्रकथा समाप्ता ॥

● ● ●

अथ श्री**वज्रस्वामि**नं तदपूर्वगुणग्रहणपूर्वं प्रणमन्नाह –

तरुणीजणेण धणसंचएण तह गुरुअबंधुनेहेण ।
न विलुद्धं जस्स मणो तस्स नमो वयरसामिस्स ॥४२॥

[तरुणीजनेन धनसञ्चयेन तथा गुरुबन्धुस्नेहेन ।
न विलुब्धं यस्य मनस्तस्मै नमो वज्रस्वामिने ॥]

व्याख्या – **तस्मै वज्रस्वामिने नमः**, 'जस्स मणो' **यस्य मनः** 'न विलुद्धं' । केन ? 'तरुणीजणेण' प्रार्थनापरवशाभिनवयौवन**युवतीजनेन** । न केवलमनेन, किन्तु **धनसञ्चयेन** धनानां गणिमधरिममेयपारिच्छेद्यानां संचयः समूहस्तेन । न केवलममुना, 'तह' तथा 'गुरुअबंधुनेहेण' गुरुरेव गुरुकः स चासौ बन्धुस्नेहोऽत्र मातृवात्सल्यं **गुरुकबन्धुस्नेहस्तेन** । यदुक्तमस्माभिरपि **गणधरावल्याम्** –

"बाल्ये न मातृवचनैरतिदीनदीनैः स्निग्धाङ्गनार्थनगिरा न हि यौवनेऽपि ।
श्रीसञ्चयैरपि चचाल मनो न यस्य तस्मै नमोऽस्तु दशपूर्वभृतेऽन्तिमाय ॥" [ ]

इति संक्षेपार्थः, व्यासार्थस्तु कथानकादवसेयः; तच्चैतत् –

§§ अस्त्य**वन्तिषु** विख्यातं पुरं **तुम्बवना**भिधम् ।
श्रेष्ठी **धनगिरि**र्नाम् तस्मिन् गुरुधनोऽभवत् ॥१॥

स बाल्यादपि संसारविरक्तात्मा **सुनन्दया** ।
धनपालेभ्यनन्दिन्याऽऽग्रहतः पर्यणीयत ॥२॥

अन्यदा तु ऋतुस्नातां **सुनन्दां** ब्रह्मधीरपि ।
भेजे **धनगिरि**र्भोगफलं कर्म हि नान्यथा ॥३॥

इत**श्चाष्टापद**गिरौ **गौतमे**न गणेन्दुना ।
प्रथितं **पुण्डरीका**ख्याध्ययनं यः पुराऽशृणोत् ॥४॥

स हि **वैश्रवणा**भिख्यः यक्षसामानिकः सुरः ।
प्रच्युत्यावतरत्तस्यां **सुनन्दाया**स्तदोदरे ॥५॥ युग्मम् ॥

अन्तर्वत्नीमथो पत्नी मत्वा **धनगिरिर्जगौ** ।
एष गर्भो द्वितीयस्ते भविता प्रव्रजाम्यहम् ॥६॥
अमनीषित एवाभूत संबन्धोऽपि त्वया सह ।
प्रव्रज्यैव प्रिया मेऽतः परं स्वस्त्यस्तु ते पुनः ॥७॥
उक्त्वेत्युज्झाञ्चकारैतामवक्रयकुटीमिव ।
गुरोः **सिंहगिरेः** पार्श्वे गत्वा च व्रतमाददे ॥८॥
सुनन्दासोदरोऽग्रेऽत्राभू**दार्यसमितो** व्रती ।
समं तेन तपस्तेपे स विषोढपरीषहः ॥९॥
नवमास्यां व्यतीतायां **सुनन्दापि** हि नन्दनम् ।
अजीजनज्जनानन्दकन्दमिन्दुमिवेन्द्रदिक् ॥१०॥
§§ **सुनन्दा**प्रीतिपात्राणि सख्यो[1] याः सूतिकागृहे ।
प्रतिजागरणायातास्ता बालमिदमूचिरे ॥११॥
यदि जात ! न ते तातः प्राव्रजिष्यत्तदोत्सुकः ।
तव जन्मोत्सवः श्रेयानभविष्यत् तदा खलु ॥१२॥
विना पुमांसं नायान्ति नार्यः कार्योपयोगिताम् ।
अङ्गुल्यो मुष्टिबन्धाय विनाङ्गुष्ठं भवन्ति किम् ? ॥१३॥
स तु बालोऽपि सञ्ज्ञावान् ज्ञानावरणलाघवात् ।
तासामाकर्णयामास तं संलापं समाहितः ॥१४॥
अचिन्तयच्च मे तातः परिव्रज्यामुपाददे ।
एवं स चिन्तयन्नेव जातिस्मरणमासदत् ॥१५॥
जातजातिस्मृतिज्ञानः संसारासारतां विदन् ।
अकुण्ठः क्षीरकण्ठोऽपि तातमार्गमियेष सः ॥१६॥
कथमुद्विज्य मां माता त्यक्ष्यतीति विचिन्त्य सः ।
मातुरुत्सङ्गलीनोऽपि रोदिति स्म दिवानिशम् ॥१७॥

---

१. क. ख. नायिकाः ।

गानैर्न क्रीडनैर्नाङ्कनृत्यैर्न च न चाटुभिः ।
वाद्यैर्न चुम्बनैर्नापि विरराम स रोदनात् ॥१८॥

एवं च रुदतस्तस्य शिशोर्मासाः षडत्यगुः ।
सुनन्दापि सदोद्विग्नाऽजनि तेन तनूभुवा ॥१९॥

तत्र **सिंहगिरि**स्त्वागादन्यदा सन्निवेशने । 5
विनेयै**र्धनगिर्यार्यसमिता**दिभिरावृतः ॥२०॥

तं गुरुं **धनगिर्यार्यसमिता**वित्यपृच्छताम् ।
प्रभो ! नौ स्वजना ह्यत्र तान् विवन्दयिषावहे ॥२१॥

निमित्ततः कुतोऽप्याह यियासन्ताविमौ गुरुः ।
भावी लाभो महान् ग्राह्यं सचित्ताचित्तमद्य तत् ॥२२॥ 10

सदनेऽथ **सुनन्दा**या जग्मतुस्तौ महामुनी ।
तस्याः सखीभिः सानन्दं द्वार्यायातौ निवेदितौ ॥२३॥

सोत्प्रासमूचिरे सख्यः **सुनन्दे** ! नन्दनस्त्वया ।
अर्पणीयो **धनगिरे**ः क्व नेष्यत्येष दृश्यताम् ॥२४॥

सुनन्दापि निरानन्दा तमादाय स्तनन्धयम् । 15
तेन निर्वेदितोदस्थादूचे **धनगिरिं** च सा ॥२५॥

इयन्तं कालमात्मेव बालकः पालितो मया ।
नटिताहं त्वनेनोच्चैरनिशं रुदता भृशम् ॥२६॥

यदि प्रव्रजितोऽसि त्वं तथाप्येनं स्वमङ्गजम् ।
गृहाण मामिव त्याक्षीर्मा स्मैनमपि सम्प्रति ॥२७॥ 20

श्रुत्वा **धनगिरि**स्त्वाह विन्यस्तमुखवस्त्रिकः ।
कल्याण्येवं करिष्यामि पश्चात्तापं तु यास्यसि ॥२८॥

मा कृथाः सर्वथेदृक्षं कुरुषे वा कुरुष्व तत् ।
समक्षं साक्षिणां भद्रे ! पुनर्नैनं हि लप्स्यसे ॥२९॥

ततश्च साक्षिणः कृत्वा सनिर्वेदं **सुनन्दया** ।
तस्मै स मुनये सूनुरर्पितस्तेन चाददे ॥३०॥

बालं **धनगिरिः** पात्रबन्धने तं न्यधत्त च ।
रोदनाद् दत्तसंकेत इवासौ विरराम च ॥३१॥

ततः **सुनन्दा**सदनाद् मुनि तावात्तबालकौ ।
गुर्वाज्ञपालकौ भूयोऽपीयतुर्गुरुसंनिधौ ॥३२॥

तद्भारेण नमद्बाहुं दृष्ट्वा **धनगिरिं** गुरुः ।
अभाषतामुना भिक्षाभारेणायासितो भवान् ॥३३॥

तदेनमर्पयास्माकं विश्राम्यतु भुजस्तव ।
इत्यार्पयद् **धनगिरिं**गुरोर्यत्नेन तं सुतम् ॥३४॥

बालार्कमिव तं बालं भासमानं समाददे ।
गुरुः करयुगेणादिसन्ध्या शोणनभोरुचा ॥३५॥

तद्भारभङ्गुरकरो गुरुराह सविस्मयः ।
अहो पुंरूपभृद्बज्रमिदं धर्तुं न शक्यते ॥३६॥

भावी प्रवचनाधारो महापुण्यः पुमानयम् ।
साध्वीनामिति तं बालं पालनायाऽऽर्पयद् गुरुः ॥३७॥

तं बालं गुरुणा गुप्त**वज्र**नामानमार्यिकाः ।
शय्यातरकुले भक्ते पालनायार्पयंस्ततः ॥३८॥

दक्षाः कुमारपोषाय शय्यातर्योऽपि तं शिशुम् ।
स्वस्वपुत्राधिकप्रीत्या पश्यन्त्यः पर्यपालयन् ॥३९॥

वयोवृद्धपरिणामो **वज्र**ः सज्ज्ञानवत्तया ।
बालोऽपि नाप चापल्यं किञ्चित्तासामसौख्यदम् ॥४०॥

ज्ञानोपकरणादानैर्बालकेलिं स कल्पयन् ।
वज्रः प्रमोदयामास प्रतिवासरमार्यिकाः ॥४१॥

वज्रं दृष्ट्वा **सुनन्दो**द्यन्मोहा शय्यातरानथ ।
अरुचिष्टतरां ते तु गुरुस्वमिति नार्पयन् ॥४२॥

महता तूपरोधेन सा तेषामेव वेश्मनि ।
धात्रीव लालयामास स्तन्यपानादिना सुतम् ॥४३॥

पाल्यमानोऽभवद् **वज्रः** क्रमेणाथ त्रिहायनः । 5
साधवो **धनगिर्या**द्यास्ते च तत्राययुस्तदा ॥४४॥

प्राप्ते **धनगिरा**वत्र ग्रहीष्यामि स्वमङ्गजम् ।
चितयन्ती **सुनन्दै**वमायातेऽस्मिन्नमोदत ॥४५॥

सुनन्दाथ महर्षिभ्यः स्वनन्दनमयाचत ।
ते पुनर्नार्पयामासुः प्रत्यभाषन्त चेदृशम् ॥४६॥ 10

अयाचितस्त्वया सुज्ञे ! दत्तोऽस्मभ्यमयं शिशुः ।
विक्रीतेष्विव दत्तेषु स्वामित्वमपराध्यति ॥४७॥

पक्षयोरुभयोरेवमुच्चैर्विवदमानयोः ।
लोकोऽवादीदमुं वादं राजा निर्धारयिष्यति ॥४८॥

ततः **सुनन्दा** लोकेन सहिता नृपसंसदि । 15
जगाम सङ्घसहिताः श्रमणा अपि ते ययुः ॥४९॥

राज्ञो न्यषीदद्वामेन **सुनन्दा** दक्षिणेन तु ।
श्रीमान् सङ्घः समस्तोऽपि यथास्थानमथापरे ॥५०॥

आत्त**वज्रो** जगौ श्रुत्वा द्वयोर्भाषोत्तरं नृपः ।
येनाहूतः समायाति बालस्तस्य भवत्वसौ ॥५१॥ 20

कृपयानुमता साथ जनेन जननी शिशोः ।
विविधैः क्रीडनैर्भोज्यैश्चाटुभिश्च तमाह्वयत् ॥५२॥

न मातुरुपकाराणां कोऽपि स्यादनृणः पुमान् ।
एवं विदन्नपि सुधी**र्वज्र** एवमचिन्तयत् ॥५३॥

"**यदि सङ्गमुपेक्षिष्ये कृत्वा मातुः कृपामहम् ।**
तदा स्याद् मम संसारोऽसारो दीर्घतरः खलु ॥५४॥
धन्येयं च सवित्री मेऽल्पकर्मा प्रव्रजिष्यति ।
आयतिदुःखमोक्षाय ततः स्यां भेषजादिवत्" ॥५५॥

दीर्घदर्शी विमृश्यैवं **वज्रो** वज्रदृढाशयः ।
प्रतिमास्थ इव स्थानाद् न चचाल मनागपि ॥५६॥

ततो राज्ञा **धनगिरिः** प्राप्तावसरमीरितः ।
रजोहरणमुत्क्षिप्य जगादैवं मिताक्षरम् ॥५७॥

व्रते चेद् व्यवसायस्ते तत्त्वज्ञोऽसि यदि स्वयम् ।
तद् रजोहरणं धर्मध्वजमादत्स्व मेऽनघ ! ॥५८॥

वज्रस्तमभि धावित्वा घर्धरायितुघुर्घुरः ।
रजोहरणमादत्त लीलाम्भोजं व्रतश्रियः ॥५९॥

सद्यो म्लानमुखाम्भोजा पद्मिनीव दिनात्यये ।
हस्तविन्यस्तचिबुका **सुनन्दै**वमचिन्तयत् ॥६०॥

भ्राता प्रव्रजितो भर्तापि च प्रव्रजितो मम ।
प्रव्रजिष्यति पुत्रोऽपि प्रव्रजाम्यहमप्यतः ॥६१॥

विनिश्चित्यात्मनैवेति **सुनन्दा** सदनं ययौ ।
वज्रमादाय वसतिं प्रययुर्मुनयोऽपि ते ॥६२॥

व्रतेच्छुर्न पपौ स्तन्यं **वज्र**स्तावद्वया अपि ।
इत्याचार्यैः परिव्राज्य साध्वीभ्यः पुनरर्पितः ॥६३॥

सुनन्दापि व्रतं भेजे **वज्र**स्त्वेकादशापि हि ।
पठदार्यामुखाच्छृण्वन्नध्यैष्टाङ्गानि सन्मतिः ॥६४॥

अष्टवर्षोऽभवद् **वज्रो** यावदार्याप्रतिश्रये ।
ततो वसत्यामानिन्ये हर्षितैस्तैर्महर्षिभिः ॥६५॥

अन्यदा **वज्र**गुरवः प्रत्यवर्न्ति प्रतस्थिरे ।
अन्तरा घनवृष्टौ च तस्थुर्यक्षमठे क्वचित् ॥६६॥

प्राग्जन्मसुहृदो **वज्र**स्यामरा **जृम्भका**स्तदा ।
सत्त्ववीक्षाकृते तत्र वणिजीभूय चावसन् ॥६७॥

वारिदे विरतप्राये गुरून्नत्वाथ ते सुराः । 5
भिक्षार्थमभणन् **वज्रं** गुरवस्त्वनुजज्ञिरे ॥६८॥

वज्रोऽप्यावश्यकीं कृत्वेर्यापरोऽपरसाधुयुक् ।
गच्छन्नप्कायकणिकास्पर्शभीतो न्यवर्तत ॥६९॥

तुषमात्रामपि ततो वृष्टिं देवा निरुध्य ताम् ।
विहर्तुमनयन् **वज्रं** तत्सार्थे सोऽपि यातवान् ॥७०॥ 10

ससंभ्रमेषु देवेषु तेषु भक्तादिदित्सया ।
द्रव्य-क्षेत्र-काल-भावैरुपयोगमदत्त सः ॥७१॥

कूष्माण्डकादिकं द्रव्यं कुतो राद्धमसंभवि ।
इदं **तूज्जयिनी**क्षेत्रं स्वभावादेव कर्कशम् ॥७२॥

प्रावृषि प्रथमायां च द्रव्यस्यास्य कथापि का ? । 15
दातारोऽप्यनिमेषाक्षाः साक्षात्पद्भ्यामभूस्पृशः ॥७३॥

तद् ध्रुवं देवपिण्डोऽयमकल्प्यो यतिनामिति ।
वलितोऽसौ प्रणम्योचे प्रत्यक्षीभूय तैः सुरैः ॥७४॥

वयं हि **जृम्भका** देवाः प्राग्जन्मसुहृदस्तव ।
त्वां द्रष्टुं चागमामेह कृष्टाः स्नेहगुणेन ते ॥७५॥ 20

अथ वैक्रियलब्ध्याख्यां विद्यां **वज्राय** तेऽमराः ।
समन्ततः क्लृप्तमाया इव दत्त्वा तिरोऽभवन् ॥७६॥

ज्येष्ठे मास्यन्यदा तद्वत् परीक्ष्य बहुरूपिणीम् ।
विद्यां **वज्राय** दत्त्वामी यथागतमगुः सुराः ॥७७॥

वज्रोऽथ सुस्थिरीभूतेकादशाङ्गो महामतिः ।
अधीयमानमादत्त श्रुत्वा पूर्वगताद्यपि ॥७८॥

स्थविराज्ञाभङ्गभीरुः शक्तिं स्वामप्रकाशयन् ।
पठन् स्वपाठमव्यक्तं सोऽश्रोषीत् पठतोऽपरान् ॥७९॥

अन्यस्मिन्नह्नि मध्याह्ने विहर्तुं व्रतिनो ययुः
बहिर्भूमौ च गुरवो **वज्रो**ऽस्थाद् वसतौ पुनः ॥८०॥

साधूनां मण्डलेष्वेष वेष्टिकाः स न्यवीविशत् ।
आचार्य इव साधूनां तासां चादत्त वाचनाः ॥८१॥

वसतिद्वारमायाता दूरादेवातिगर्जितम् ।
श्रुत्वा तद्वाचनाध्वानं गुरवोऽचिन्तयन्निति ॥८२॥

अस्मदागमनं त्वेते पालयन्तो महर्षयः ।
स्वाध्यायं कुर्वते भिक्षां समादाय समागताः ॥८३॥

इत्याचार्याः क्षणं स्थित्वा विदाञ्चक्रुर्विमृश्य च ।
यथेष **वज्र**बालर्षेर्वाचनां ददतो ध्वनिः ॥८४॥

असौ पूर्वगतस्तयैकादशाङ्ग्या अपि वाचनाम् ।
यद् दत्ते तत्किमध्यैष्ट गर्भस्थौ विस्मयामहे ॥८५॥

स्थविरैः पाठ्यमानोऽयमत एवालसायते ।
बाल्यात् पाठालस इति ज्ञात्वा तं प्रेरयामहे ॥८६॥

अस्मदाकर्णनाशङ्की लक्षितो मा स्म भूदयम् ।
रोमाञ्चिताः शिष्यगुणैरित्याचार्या अपासरन् ॥८७॥

शब्देन महताऽऽचार्याश्चक्रुर्नैषेधिकीमथ ।
गुरुणां शब्दमाकर्ण्योदस्थाद् **वज्रो**ऽपि विष्टरात् ॥८८॥

समुपेत्य मन्दगतिर्न यावत् प्राविशद् गुरुः ।
तावत्ता वेष्टिकाः सर्वाः स्थाने **वज्रो** मुमोच च ॥८९॥

§§ गुरोर्दण्डं समादाय तस्य चांह्री ममार्ज च ।
धौतवांश्चासनस्थस्य ववन्दे च पदोदकम् ॥९०॥

गुरवोऽचिन्तयन्नस्य व्रतिनः श्रुतसेवधेः ।
यथा जानन्ति माहात्म्यं प्रयतिष्यामहे तथा ॥९१॥

इत्याचार्या विभावर्या शिष्येभ्योऽकथयन्निति । 5
यास्यामो ग्राममुकं द्वित्राहं तत्र नः स्थितिः ॥९२॥

वज्रो वो वाचनाचार्यो भवितेति गुरोर्वचः ।
भक्तत्वादविचार्यैव प्रत्यपद्यन्त ते तथा ॥९३॥

प्रातःकृत्ये कृते **वज्रं** निषद्यायां न्यषादयन् ।
आचार्यस्येव विनयं तस्याकार्षुश्च साधवः ॥९४॥ 10

सर्वेषामपि साधूनामानुपूर्व्या परिस्फुटान् ।
संक्रान्त्या वज्रलेपाभान् **वज्रो**ऽप्यालापकान् ददौ ॥९५॥

अमोघवचनो **वज्रो** बभूवातिजडेष्वपि ।
तद् नव्यमद्भुतं दृष्ट्वा गच्छः सर्वो विसिष्मिये ॥९६॥

आलापान् साधवः पूर्वमधीतान् सुस्फुरानपि । 15
संवादार्थमपृच्छंश्च **वज्रो**ऽप्याख्यत्तथैव तान् ॥९७॥

एकवाचनया **वज्रा**त् तावत् पेठुर्महर्षयः ।
यावद् न गुरुतोऽमूभिरनेकाभिरपि श्रुतम् ॥९८॥

तेऽभ्यधुः साधवोऽन्योन्यं गुरुर्यदि विलम्बते ।
वज्रपार्श्वे तदा शीघ्रं श्रुतस्कन्धः समर्थ्यते ॥९९॥ 20

गुरुभ्योऽप्यधिकं **वज्रं** मेनिरे मुनयो गुणैः ।
तद्भुतमपि किं पुष्पं वृक्षेभ्यो नातिरिच्यते ? ॥१००॥

एतावता गणो भावी ज्ञात**वज्र**गुणाः खलु ।
इत्यायातान् गुरुन् **वज्र**सहिता मुनयोऽनमन् ॥१०१॥

पृष्टं स्वाध्यायनिर्वाहे गुरुणा मुनयोऽभ्यधुः ।
पूज्यप्रसादाद् **वज्रे**णाऽज्ञानशैलो व्यभेदि नः ॥१०२॥

वज्रोऽस्माभिरवज्ञातो ह्यज्ञाततद्गुणैश्चिरम् ।
इदानीमयस्माकं बालोऽपि भगवत्समः ॥१०३॥

बालोऽप्यस्त्येष गच्छस्य तदतुच्छगुणो गुरुः ।
ज्योतिश्चक्रस्य नेतास्ति ध्रुवोऽणुरपि किं न हि ? ॥१०४॥

गुरवोऽभ्यधुर्युष्माकमस्य ज्ञापयितुं गुणान् ।
अगमाम वयं ग्राममाचार्योऽयं च वोऽर्पितः ॥१०५॥

अन्यथा वाचनाचार्यपदवीं नायमर्हति ।
गुर्वदत्तं यतोऽनेन कर्णश्रुत्याददे श्रुतम् ॥१०६॥

संक्षेपविधिरूपोऽस्योत्सारकल्पो महाशयाः ! ।
कार्यः पूर्वमिहाचार्यपदयोग्यस्ततो भवेत् ॥१०७॥

ततश्च प्रागपठितं श्रुतमर्थसमन्वितम् ।
वज्रमध्यापयामासानायासादञ्जसा गुरुः ॥१०८॥

ह्यभूद् **दृष्टिवादो**ऽपि यावानेतस्य तावतः ।
साक्षिमात्रीभवन् पात्रीचक्रे **वज्र**मुनिं गुरुः ॥१०९॥

अन्यदा विहरन्तोऽमी पुरं **दशपुरं** ययुः ।
भद्रगुप्तस्तदावन्त्यां दशपूर्वधरोऽभवत् ॥११०॥

तदादिशन्नमी **वज्रं** त्वं वत्**सोज्जयिनीं** व्रज ।
दशपूर्वीमिहाधीष्व **भद्रगुप्त**गुरोर्मुखात् ॥१११॥

इत्यात्मना तृतीयोऽयं प्रेषितो गुरुणा क्षणात् ।
वज्रोऽगाद् **भद्रगुप्तां**ह्रिपूता**मुज्जयिनीं** पुरीम् ॥११२॥

तदैक्षिष्ट गुरुः स्वप्नं यदादाय करात् मम ।
पतदग्रहं पयः पूर्णं कश्चिदागन्तुकोऽपिबत् ॥११३॥

स्वप्नादिति स्वशिष्येभ्यो **भद्रगुप्तः** प्रगे जगौ ।
यदेष्यत्यतिथिः कोऽपि स ममाध्येष्यते श्रुतम् ॥११४॥

वज्रोऽपि नगरीद्वारे शर्वरीमतिवाह्य ताम् ।
प्रभाते **भद्रगुप्त**स्याचार्यस्य वसतिं ययौ ॥११५॥

प्रसिद्धिसदृशीं **वज्र**स्याकृतिं परिभाव्य च ।
वज्रोऽयमिति निश्चिक्ये **भद्रगुप्तौ** जहर्ष च ॥११६॥

वन्दनाभिमुखं **वज्रं भद्रगुप्तो**ऽथ सस्वजे ।
अङ्कमारोप्य चोवाच तन्मुखन्यस्तलोचनः ॥११७॥

कच्चित्सुखविहारस्ते कच्चित्तेऽङ्गमनामयम् ।
कच्चित्तपस्ते निर्विघ्नं कच्चित्ते कुशली गुरुः ॥११८॥

किं किञ्चित्कार्यमुद्दिश्य विहारक्रमतोऽथवा ।
इहागतोऽसि **वज्रर्षे** ! कथयास्मान् प्रमोदय ॥११९॥

वन्दित्वा **भद्रगुप्तर्षिं वज्रो** विरचिताञ्जलिः ।
उवाच वदनद्वारविन्यस्तमुखवस्त्रिकः ॥१२०॥

यद्यत् सुखविहारादि पूज्यपादैरपृच्छ्यत ।
तत्तत् तथैव देवानां गुरुणां च प्रसादतः ॥१२१॥

अध्येतुं दश पूर्वाणि त्वामागां गुर्वनुज्ञया ।
तद्वाचनाप्रदानेन प्रसीद भगवन् ! मयि ॥१२२॥

ततश्च दशपूर्वीं तं **भद्रगुप्तो**ऽध्यजीगपत् ।
गुरोरजनितक्लेशो **वज्र**श्च दशपूर्व्यभूत् ॥१२३॥

भद्रगुप्तमथापृच्छ्य **वज्रो दशपुरं** ययौ ।
पूर्वानुज्ञा कृता **सिंहगिरिणा** गुरुणाऽस्य तु ॥१२४॥

तदनुज्ञादिने तस्य विदधे **जृम्भका**मरैः ।
गन्धाम्बुवृष्टिकुसुमप्रकरैर्महिमाऽद्भुतैः ॥१२५॥

गणं **वज्र**मुनेः **सिंहगिर्या**चार्यं समर्प्य सः ।
प्रत्याख्यायान्नपानादि कालं कृत्वा ययौ दिवि ॥१२६॥
वज्रस्वामी व्यहार्षीच्च मुनिपञ्चशतीवृतः ।
महीमहीनसौभाग्यश्रुतशीलादिविश्रुतः ॥१२७॥

§§ इतश्च **पाटलीपुत्रे** धनिश्रेष्ठोऽभवद् **धनः** ।
तत्कन्या रूपधन्याऽभूदभिधानेन **रुक्मिणी** ॥१२८॥
सा च तद्यानशालास्थसाध्वीभ्यो गुणसंस्तवम् ।
श्री**वज्र**स्वामिनो नित्यमश्रृणोद् मसृणाशया ॥१२९॥
ततोऽसौ भाग्यसौभाग्यभासुरं तद्गुणश्रवात् ।
वज्रमेव पतीयन्तीं न्यषैत्सीदपरान् वरान् ॥१३०॥
व्रतिन्यो जगदुश्चैतामपि ! मुग्धाऽसि **रुक्मिणि** ! ।
वज्रं प्रव्रजितं वीतरागं यत् त्वं वुवूर्षसि ॥१३१॥
रुक्मिण्यभिदधे **वज्रो** यदि प्रव्रजितस्तदा ।
प्रव्रजिष्याम्यहमपि या गतिस्तस्य सैव मे ॥१३२॥
इतश्च विहरन् **वज्रः पाटलीपुत्र**पत्तने ।
आगत्योद्यान एकस्मिन् शमवान् समवासरत् ॥१३३॥
तदागमनसंभ्रान्तः **पाटलीपुत्र**पार्थिवः ।
एत्य श्री**वज्र**चरणानर्चयित्वा नमोऽकरोत् ॥१३४॥
वज्रोऽपि विदधे क्षीरास्रवलब्ध्याऽथ देशनाम् ।
निशम्य तामतिप्रीतो राजा स्वं सौधमाययौ ॥१३५॥
ततोऽन्तः पुरनारीभ्यो हर्षोद्गारं चकार सः ।
यथाऽद्य वन्दितो **वज्र**स्वामी चामीकरच्छविः ॥१३६॥
तं वन्दित्वा च दृष्ट्वा च तद्धर्मं निशम्य च ।
मम गात्रं च नेत्रे च श्रोत्रे चागुः कृतार्थताम् ॥१३७॥

तद् यूयमपि **वज्र**र्षि हे देव्यो ! द्रष्टुमर्हथ ।
त्वरितं यात, नैकत्रस्थायिनो यतयो यतः ॥१३८॥

इति वैद्योपदिष्टेष्टतुल्ययाऽथ नृपाज्ञया ।
नन्तुं विलोकितुं श्रोतुं राज्ञो **वज्र**मुपाययुः ॥१३९॥

भगवानपि **वज्र**स्ता मत्वाऽऽयाता नृपाङ्गनाः । 5
कुरूपीभूय विदधे देशनामतिपेशलाम् ॥१४०॥

राज्ञो राज्ञ्योऽपि गत्वाऽथ शशंसुरिति सस्मितम् ।
देव ! गीरेव रम्याऽस्य वृथा रूपकथा पुनः ॥१४१॥

राजा त्वघटमानं तत् श्रुत्वा द्रष्टुं स्वयं च तत् ।
विस्मयेन द्वितीयेऽह्नि **वज्रं** वन्दितुमागमत् ॥१४२॥ 10

अनेकलब्धिमान् **वज्रो** विकृत्य कनकाम्बुजम् ।
निषसादाभ्रमुक्तोऽर्क इव स्वं रूपमुद्वहन् ॥१४३॥

ऊचे च लोको **वज्र**स्य रूपं स्वाभाविकं हृदः ।
गुणानामाकृतेश्चाद्य सदृशोऽभूत् समागमः ॥१४४॥

राजापि व्याजहारैवं विस्मयस्मेरमानसः । 15
यथेष्टरूपनिर्माणलब्धि**र्वज्र**मुनिः खलु ॥१४५॥

मा भूवं प्रार्थनीयोऽहं योषितामिति शङ्कया ।
सामान्यं ह्यस्तनं रूपं व्यक्तं शक्त्यैष निर्ममे ॥१४६॥

§§ इतश्चात्रान्तरे **रुक्मिण्यु**वाच पितरं निजम् ।
वज्रस्वाम्यागतोऽस्तीह यं वुवूर्षाम्यहं सदा ॥१४७॥ 20

तन्मां **वज्र**कुमाराय संप्रदत्ताऽन्यथा तु मे ।
मरणं शरणं तात ! दृषल्लेखेव गीरियम् ॥१४८॥

आभिजातसखीं लज्जां विहायैवं ब्रवीमि यत् ।
तत्रेदं कारणं **वज्रो** मत्पुण्यैरयमागतः ॥१४९॥

एष प्रायेण न स्थास्नुर्यद्यद्येव हि गच्छति ।
किं ज्ञायते कदाप्येति भूयोऽप्युड्डीनपक्षिवत् ॥१५०॥

तस्मादलं विलम्बेन देहि **वज्राय** तात ! माम् ।
चिरकौमारदीनां मां कथं पश्यन् न दूयसे ? ॥१५१॥

नोद्वक्ष्यत्यनगारोऽयमिति शङ्कां च मा कृथाः ।
व्रतस्थोऽपि न किं गौरीमुपायंस्त महेश्वरः ? ॥१५२॥

एवं **धनो**ऽतिनिर्बन्धामुप**वज्रं** निनाय ताम् ।
सद्यः कृत्वा विवाहार्हसर्वालङ्कारभूषिताम् ॥१५३॥

पुत्र्या सममनैषीच्च **धन**कोटीरनेकशः ।
प्रलोभनं वरयितुर्यथा स्यादिति जातधीः ॥१५४॥

उप**वज्रं** गतः श्रेष्ठी रूपं तस्य निरूपयन् ।
प्राशंसदात्मनः पुत्रीं साग्रहां तत्स्वयंवरे ॥१५५॥

धनस्य हृदये स्वार्थप्रार्थना कर्तुमिच्छतः ।
वज्रदेशनार्थोऽस्थात् क्षौमे लाक्षानुरागवत् ॥१५६॥

देशनान्तेऽवदद् **वज्रं धन**श्रेष्ठी कृताञ्जलिः ।
कृत्वा प्रसादं मत्पुत्रीमिमामुद्वह मानद ! ॥१५७॥

क्व भवानिन्दुतुल्यः क्व चेयं लक्ष्मशिखोपमा ।
तथाप्येनां स इव तामाद्रियस्व कृपां कुरु ॥१५८॥

विवाहानन्तरं **वज्र** ! हस्तमोचनपर्वणि ।
द्रव्यकोटीरसङ्ख्यातास्तुभ्यं दास्ये भवत्वदः ॥१५९॥

"**वज्र**स्तमज्ञं विज्ञाय स्मित्वोचे करुणापरः ।
पर्याप्तं द्रव्यकोटीभिः कन्यया च तवानया ॥१६०॥

सन्ध्यारागसहाध्यायी शम्पासंपातसोदरः ।
स्वप्नाभिनयशैलूषस्त्याज्योऽर्थोऽनर्थभूरयम् ॥१६१॥

नितम्बिन्यस्त्याज्या दूरेण दृश्चरैः ।
यकाभ्यो योगिनां योगरसबन्धो विलीयते ॥१६२॥

शचीशचापचपला जन्तूनां यौवनश्रियः ।
किम्पाकफलपर्यन्तविषमा विषया अपि ॥१६३॥

एकैकशोऽपि विषयाः क्षयाय खलु देहिनाम् ।
पतङ्गभृङ्गपाठीनकुरङ्गकरिणामिव ॥१६४॥

न कामविषयादन्यः कोऽपि नीचपदप्रदः ।
द्विपदोपीह जायेत यस्मादङ्गी चतुष्पदः ॥१६५॥

अहत्वा विषयान् मोहयामिकान् न मुमुक्षुमिः ।
जरामरणजन्मादिशृङ्खला खलु मोट्यते ॥१६६॥

महानुभाव ! धन्यायाः कन्याया अपि ते **धन** ! ।
युज्यते विषयत्यागोऽस्मासु यद्येकतानता'' ॥१६७॥

इत्थं भगवतस्तस्य सुधासारकिरा गिरा ।
रुक्मिणी शान्तविषयविषवेगाऽऽदित व्रतम् ॥१६८॥

धर्मोऽयमेव हि श्रेयान् यत्र निर्लोभतेदृशी ।
एवं विमृश्य बहवः प्रतिबोधं जना ययुः ॥१६९॥

तेनोद्ध्रेऽन्यदा विद्या पदानुसृतिलब्धिना ।
महापरिज्ञाचाराङ्गान्तरस्थाकाशगमिनी ॥१७०॥

उचे च भगवानेवमनया विद्यया मम ।
जम्बूद्वीपाद् गतावस्ति शक्तिरा**मानुषोत्तरम्** ॥१७१॥

धार्यैवेयं महाविद्या हन्त ! देया न कस्यचित् ।
अल्पर्द्धयोऽल्पसत्त्वाश्च भाविनोऽन्ये ह्यतः परम् ॥१७२॥

§§ जगाम् विहरन् **वज्रः** पूर्वस्या दिशमुत्तराम् ।
रङ्कारालकरालोऽभूद् दुष्कालोऽग्रे तदा पुनः ॥१७३॥

ततस्तदर्चितः सङ्घं पटे कृत्वा विहायसा ।
पुरीं **नागपुरीं** निन्ये सुभिक्षसुभगामयम् ॥१७४॥
तस्यां जैनाश्च बौद्धाश्च स्पर्धमानाः परस्परम् ।
चक्रिरे देवपूजादि जैनैर्बौद्धाश्च जिग्यिरे ॥१७५॥
तेऽथ बौद्धैर्निषिद्धेभ्यो मालाकृद्भ्यो नृपाज्ञया ।
नालभन्तार्थतुलितान्यगस्तिकुसुमान्यपि ॥१७६॥
तदा पर्युषणापर्वण्यागतेऽर्हदुपासकाः ।
तत्तथाऽकथयन् **वज्र**स्वामिनेऽश्रुमुखास्ततः ॥१७७॥
समाश्वसित हे श्राद्धाः ! यतिष्ये वः सुतेजसे ।
इत्युक्त्वोत्पत्य भगवान् ययौ **माहेश्वरीं** पुरीम् ॥१७८॥
हुताशनाभिधानस्य देवस्योपवने स्थितः ।
योऽभूदारामिकस्तत्र मित्रं **धनगिरेः** स तु ॥१७९॥
अकस्मादागतं **वज्रं** दृष्ट्वैष तडिताभिधः ।
उवाच दिष्ट्याऽतिथये किमातिथ्यं करोमि ते ? ॥१८०॥
वज्रोऽभ्यधत्त कुसुमैः कार्यं मे प्रत्युवाच सः ।
इह संपादयिष्यामि पुष्पलक्षाणि विंशतिम् ॥१८१॥
तर्हि त्वं प्रगुणीकुर्या इत्युक्त्वा भगवानपि ।
उत्प्लुत्य तार्क्ष्यवद् व्योम्नाऽगात् **क्षुद्रहिमवद्**गिरिम् ॥१८२॥
श्रीदेव्या भक्तितस्तत्र दत्तमादाय पङ्कजम् ।
वैश्वानरवनं प्रत्याययौ **वज्रो**ऽतिरंहसा ॥१८३॥
विद्याशक्त्या विचक्रोऽथ विमानं भगवानिह ।
न्यधाच्च पुष्पलक्षांस्तान् विंशतिं पङ्कजं च तत् ॥१८४॥
छत्रस्येवाम्बुजस्याधो निषद्य भगवानथ ।
चिन्तितोपनतैः क्लृप्तप्रेक्षणो **जृम्भका**मरैः ॥१८५॥

पुरीं **नागपुरी**मेत्यार्हन्मतस्य प्रभावनाम् ।
चक्रेऽतिशायिनीं बौद्धशासनं न्यच्चकार च ॥१८६॥ युग्मम् ॥

श्री**वज्र**विहितां वीक्ष्यार्हन्मतस्य प्रभावनाम् ।
बौद्धभक्तिं विहायात्र भूपोऽभूत् परमार्हतः ॥१८७॥

§§ इत**श्शौद्रायणो** राजा जज्ञे **दशपुरे** पुरे । 5
सोमदेवश्च विप्रोऽस्य **रुद्रसोमा**र्हती प्रिया ॥१८८॥

तयोः सुतावभूतां द्वौ बुद्ध्या गुरुसुताविव ।
नाम्नाऽऽर्य**रक्षितो** ज्यायान् कनीयान् **फल्गुरक्षितः** ॥१८९॥

तत्रा**र्यरक्षितो** विद्यास्थानान्यासुं चतुर्दश ।
जगाम **पाटलीपुत्रं** कृतार्थः पुनराययौ ॥१९०॥ 10

प्रवेशितः पुरे राज्ञा गजमारोप्य गौरवात् ।
विविधोपायनैः पौरैरपि तेनैष पूजितः ॥१९१॥

स बन्धुसहितो विद्याश्रीहृद्याकृतिरानमन् ।
मात्राशीर्वादितः प्रातिवेश्मिक्येव निरादरम् ॥१९२॥

व्यजिज्ञपदथ स्वाम्बां सोऽपि मातर्विलोक्य माम् । 15
अधीतविद्यामायातमिह किं नाद्य माद्यसि ? ॥१९३॥

साह वत्स ! त्वया हिंसोपदेशकमधीयत ।
ततस्त्वां नरकाध्वन्यं दृष्ट्वा हृष्याम्यहं कथम् ? ॥१९४॥

यदि त्वं मयि भक्तोऽसि यदि मां मन्यसे हिताम् ।
अधीष्व **दृष्टिवादं** तद् हेतुं स्वर्गापवर्गयोः ॥१९५॥ 20

अथा**र्यरक्षितः** प्राह स्वाधीते विशदाशयः ।
दृष्टिवादं पठिष्यामि मातराख्याहि तद्गुरुम् ॥१९६॥

रुद्रसोमापि तनयविनयोच्छ्वसिता सती ।
भ्रमयन्त्यञ्चलं तस्मै निजगाद प्रसादभाक् ॥१९७॥

इदानीं न हि जिह्रेमि त्वयाऽहं तनुजन्मना ।
मदादेशमनुष्ठातुं यदकार्षीर्मनोरथम् ॥१९८॥

सन्ति **तोसलिपुत्र**ाख्या आचार्या **आर्यरक्षित** !
इक्षुवाटे ममैवेतः प्रतिपन्नप्रतिश्रयाः ॥१९९॥

तत्पादपङ्कजोपास्तिभृङ्गतामङ्ग ! तां भज ।
ते त्वामध्यापयिष्यन्ति **दृष्टिवादं** जिनागमम् ॥२००॥

एवं प्रातः करिष्यामीत्यभिधा**यार्यरक्षितः** ।
दृष्टिवादाभिधां ध्यायन् नाऽशेत रजनावपि ॥२०१॥

दृष्टिवादमथाध्येतुमापृच्छ्य जननीं प्रगे ।
दृष्टिवादार्णवागस्त्यमियाय **चार्यरक्षितः** ॥२०२॥

अथैकं द्विजमायान्तं सार्धेक्षुनवयष्टिकम् ।
कोऽसि त्वमिति सोऽपृच्छदालिङ्ग्यैष तमब्रवीत् ॥२०३॥

अहं ह्युपतट्ग्रामात् त्वा द्रष्टुं त्वत्पितुः सखा ।
प्रायं कल्ये, मया कार्यव्यग्रेणासि न वीक्षितः ॥२०४॥

गृह्यन्तामिक्षवश्चैते मयाऽऽनीताः कृते तव ।
गुरूणां दातुमुचिता लघुभ्यो हि सुखादिका ॥२०५॥

उवाच **सोमभू**रिक्षूंस्तात ! मन्मातुरर्पयेः ।
अहं शरीरचिन्तार्थ गच्छन्नस्मि बहिर्भुवि ॥२०६॥

इदं च कथयेस्तस्यै यद्गच्छन्**नार्यरक्षितः** ।
अधुनेक्षुलतापाणिमद्राक्षीदादितोऽपि माम् ॥२०७॥

तथेति तत्कृते दध्यौ **रुद्रसोमा** निमित्तवित् ।
पूर्वाणि नव खण्डं च पुत्रो मेऽध्येष्यते ह्यतः ॥२०८॥

नवाहं **दृष्टिवाद**स्य पूर्वाण्यध्यनानि वा ।
दशमं खण्डमध्येष्ये दध्यौ यानिति **सोमभू**ः ॥२०९॥

गत्वा चेक्षुगृहद्वारे चतुरोऽयमचिन्तयत् ।
कथमन्तर्विशाम्यर्हद्धर्माचारविशारदः ? ॥२१०॥

प्रातर्वन्दनकायातश्रमणोपासकैः सह ।
वसत्यन्तः प्रवेक्ष्यामि प्रतीक्षे क्षणमत्र तत् ॥२११॥

इत्यार्यरक्षितस्तस्थौ द्वारेऽपि द्वारपालवत् । 5
शृण्वन् सुधीरधीयानसाधूनां मधुरा गिरः ॥२१२॥

तत्रागाड्ढड्ढरो नाम श्रमणोपासकः प्रगे ।
वन्दनाय महर्षीणां हर्षेणोत्कर्षिताशयः ॥२१३॥

नैषेधिकीं विधायैष प्रविवेश प्रतिश्रयम् ।
अथेर्यापथिकीं प्रत्यक्रामदुच्चैस्तरस्वरः ॥२१४॥ 10

तदनन्तरमाचार्यान् साधूनपि यथाविधि ।
वन्दित्वा निषसादाग्रे विष्टरं प्रतिलिख्य सः ॥२१५॥

तदेतदवधार्यार्यरक्षितोऽपि यथाक्रमम् ।
अभिनीय गुरूपान्ते निषसाद कृताञ्जलिः ॥२१६॥

श्रावकं नूतनं मत्वा ढड्ढरावन्दनेन तम् । 15
अपृच्छन् गुरवो वत्स ! कुतो धर्मागमस्तव ? ॥२१७॥

तेनोक्ते श्रावकादस्मादूचिरे मुनयः प्रभो ! ।
रुद्रसोमासुतः सोऽयं विद्वान् मान्यो महीपतेः ॥२१८॥

अयमाद्यगुणस्थानस्थितानां धुरि गण्यते ।
आश्चर्यं श्रावकाचारं परिस्पृशति किं ह्यदः ? ॥२१९॥ 20

अथाह सोमभूः सम्प्रत्यस्ति श्रावकता मम ।
रत्नता सलिलस्येव लोहस्येव सुवर्णता ॥२२०॥

इति विज्ञपयामास चाचार्यानार्यरक्षितः ।
प्रसीद भगवन् ! दृष्टिवादस्याध्यापनेन मे ॥२२१॥

मया विवेकहीनेनोन्मत्तेनेव हतात्मना ।
हिंसोपदेशकं सर्वमधीतं नरकावहम् ॥२२२॥
आचार्य अपि तं शान्तं योग्यं मत्वैवमूचिरे ।
यदि त्वं **दृष्टिवादा**धिजिगांसुस्तत् परिव्रज ॥२२३॥
सोऽप्युवाच परिव्रज्यामिदानीमपि दत्त मे ।
किन्तु पूज्यैरतः स्थानादस्ति गन्तव्यमन्यतः ॥२२४॥
मामत्र स्थितवन्तं हि राजा पुरजनोऽपि च ।
अत्यन्तमनुरागेण प्रव्रज्यां त्याजयेदपि ॥२२५॥
आचार्या अपि तस्योपरोधेन सपरिच्छदाः ।
गत्वाऽन्यत्र तमुत्सन्नवृजिनं पर्यविव्रजन् ॥२२६॥
अधीतैकादशाङ्गेन क्रमेणाचार्यसंनिधौ ।
दृष्टिवादोऽभवद् यावांस्तावांस्तेन समाददे ॥२२७॥
अ**थार्यरक्षिता**याख्यन्गुरवो गौरवोचितम् ।
यद् भूयान् **दृष्टिवादो**ऽस्ति **वज्र**र्षेः सम्प्रति स्फुटः ॥२२८॥
§§ श्री**वज्र**स्वामिनमथ प्रति या**नार्यरक्षितः** ।
अवन्त्यां भद्रगुप्तस्य प्रभोः पादानवन्दत ॥२२९॥
गुणवन्तं तपोराशिं पूर्वावस्थाकुतीर्थिकम् ।
उपलक्ष्य तमाचार्याः परिषस्वजिरे मुदा ॥२३०॥
ऊचुश्च वत्स ! धन्योऽसि कृतार्थोऽसि सुधीरसि ।
ब्राह्मण्यं योऽधिगम्यापि श्रामण्यं प्रत्यपद्यथाः ॥२३१॥
अद्याहं क्षीणशेषायुष्कर्मा त्वामर्थयेऽनध ! ।
कर्तुकामोऽस्म्यनशनं मम निर्यामको भव ॥२३२॥
तथेति प्रतिपेदानं तमथो सूरिरन्वशात् ।
मा **वज्रे**ण समं वत्स ! वसेरेकप्रतिश्रये ॥२३३॥

पृथक्स्थितिरधीयेथा यदेकामपि यामिनीम् ।
यो वसेत् सह **वज्रेण** तमनु म्रियते हि सः ॥२३४॥

एवं करिष्येऽहमिति प्रतिपद्य**आर्यरक्षितः** ।
तेषां निर्यामणां कृत्वा पुरीं **वज्रा**श्रितां ययौ ॥२३५॥

नगर्या बहिरेवास्थात् तां निशा**मार्यरक्षितः** । 5
निशाशेषे स्वप्नममुं **वज्र**स्वामी ददर्श च ॥२३६॥

यदद्य पयसा पूर्णः केनाप्यस्मत्पतद्ग्रहः ।
अपाय्यागन्तुना भूरि किञ्चिदस्थाच्च तत्पयः ॥२३७॥

वज्रस्वामी महर्षीणां स्वप्नार्थं व्याकरोत् प्रगे ।
बहुपूर्वश्रुतग्राही कोऽप्येष्यत्यतिथिर्मम ॥२३८॥ 10

प्रातरेत्य कृतोपास्तिं स्वाम्युवा**चार्यरक्षित**म् ।
कुतः समागाः, सोऽप्याह गुरोस्**तोसलिपुत्र**तः ॥२३९॥

वज्रस्वाम्यब्रवी**दार्यरक्षित**स्त्वं किमाख्यया ? ।
सोऽप्याख्यदेवमिति च पुनर्वन्दनपूर्वकम् ॥२४०॥

वज्रस्वाम्यपि तं ज्ञात्वा सप्रसादमदोऽवदत् । 15
स्वागतं तव, कुत्र त्वं प्रतिश्रयमशिश्रयः ? ॥२४१॥

बहिरावासितोऽस्मीति तेनोक्ते स्वाम्यभाषत ।
महात्मन् ! किं न जानासि दूरस्थोऽध्येष्यसे कथम् ? ॥२४२॥

तेनोचेऽहं पृथग्वासी **भद्रगुप्त**गुरोर्गिरा ।
वज्रोऽप्याहोपयोगात् त्वां युक्तं पूज्या बभाषिरे ॥२४३॥ 20

वज्रोऽथ पृथगावासस्थितमप्य**आर्यरक्षित**म् ।
अपूर्वप्रतिभं पूर्वाण्यध्यापयदमुं नव ॥२४४॥

ततो दशमपूर्वस्य यमकानि गुरोर्गिरा ।
अध्येतुं विषमाण्य**आर्यरक्षित**र्षिः प्रचक्रमे ॥२४५॥

माता-पितृभ्यामाह्वातुमथैनं **फल्गुरक्षितः** ।
प्राणप्रियोऽनुजस्तस्य प्रैष्यागत्य स तं जगौ ॥२४६॥

"किमेवं कठिनोऽभूस्त्वमनुत्कण्ठः कुटुम्बके ।
भ्रातः ! पक्ष्यपि दिक्चक्रं भ्रान्त्वाऽभ्येति भुवं निजाम् ॥२४७॥
वैराग्यपर्शुना छिन्नं यद्यपि प्रेमबन्धनम् ।
तथापि तव कारुण्यमस्ति पुण्यनिबन्धनम् ॥२४८॥
शोकसङ्कटमग्नोऽस्ति बन्धुवर्गश्च साम्प्रतम् ।
तदागत्य तमुद्धर्तुं भगवंस्तव साम्प्रतम्" ॥२४९॥

इत्युक्तो बन्धुना **वज्रमाप**प्रच्छाऽऽर्य**रक्षितः** ।
पठेत्युक्तोऽमुना भूयः पठन्नूचे च बन्धुना ॥२५०॥
बान्धवास्ते परिव्रज्यामनोरथरथस्थिताः ।
न कुत्रापि प्रवर्तन्ते त्वया सारथिना विना ॥२५१॥
तदेहि देहि बन्धूनां व्रतं सुव्रत ! सत्वरम् ।
श्रेयस्यपि सकर्णोऽपि किमद्यापि प्रमाद्यसि ? ॥२५२॥

अ**थार्यरक्षितः** स्माह यदि सत्यमिदं वचः ।
ततस्त्वं तावदाददत्स्व सर्वविश्वहितं व्रतम् ॥२५३॥
श्रुत्वेत्यूचेऽमुना देहि तदानी**मार्यरक्षितः** ।
स्वयं तमनुजग्राह दीक्षया शिक्षयापि च ॥२५४॥

यातुमुत्कोऽन्यदा **फल्गुरक्षिते**नार्य**रक्षितः** ।
अधीतानेकयमको गन्तुमूचे पुनर्गुरुम् ॥२५५॥
तन्निषिद्धस्त्वधीयानो यमकेभ्यः पराजितः ।
सोऽपृच्छद् गुरुमद्यापि शिष्यतेऽदः श्रुतं कियत् ? ॥२५६॥
सस्मितं गुरुरप्याह पूर्वमेतद् तवाग्रिमम् ।
बिन्दुमात्रं त्वयाऽधीतमब्धितुल्यं तु शिष्यते ॥२५७॥

शेषमप्यचिरेणापि त्वमागमयसि श्रुतम् ।
धीमन्नधीष्व धीरोऽसि किमकाण्डे विषीदसि ? ॥२५८॥

एवमाश्वसितस्तेन गुरुणा करुणावता ।
पुनः प्रवृत्तः सोऽध्येतुं भग्नोत्साहोऽपि भक्तिभाक् ॥२५९॥

फल्गुरक्षितन्येद्युर्मूर्तिमद्बन्धुवाचिकम् । 5
दर्शयन्नुत्सको गन्तुं श्री**वज्रं** स पुनर्जगौ ॥२६०॥

अयमुत्साह्यमानोऽपि हन्त ! गन्तुमनाः कथम् ? ।
एवं विचिन्तयन् **वज्र**स्वाम्यभूदुपयोगभाक् ॥२६१॥

सोऽथामंस्तेत्यतो यातो नायमायास्यति ध्रुवम् ।
स्तोकमायुश्च मे पूर्वं मय्येव दशमं स्थितम् ॥२६२॥ 10

अनुज्ञातस्ततस्तेन गमना**यार्यरक्षितः** ।
स**फल्गुरक्षितः** शीघ्रं पुरं **दशपुरं** ययौ ॥२६३॥

तत्राभ्युपेत्य भूभर्त्रा मात्रा पित्रा च बन्धुभिः ।
पौरैश्च वन्दितश्चक्रे देश**नामार्यरक्षितः** ॥२६४॥

प्रबुध्य तद्गिरा राजा सम्यक्त्वमपरे पुनः । 15
पित्राद्या बन्धवश्चास्य प्रव्रज्यां प्रतिपेदिरे ॥२६५॥

§§ इतश्च विहरन् **वज्रः** प्रययौ **दक्षिणापथम्** ।
धनागमेऽत्र केकीव विवेकी मुमुदे जनः ॥२६६॥

श्लेष्मबाधोदयेऽन्येद्युः सुण्ठीमानाय्यसाधुना ।
भुक्त्वैतां भक्षयिष्यामीति स्वामी श्रवसि न्यधात् ॥२६७॥ 20

भक्षितुं विस्मृता सा च स्वामिनोऽध्ययनादिना ।
मुखवस्त्रिकया कार्यं प्रत्युपेक्षयतोऽपतत् ॥२६८॥

पतितां तां च खाट्कृत्यास्मरद् **वज्रो** मुनीश्वरः ।
हाहा धिग् धिक् प्रमादोऽयं ममेति स्वं निनिन्द च ॥२६९॥

प्रमादे संयमो न स्याद् निष्कलङ्कः कथञ्चन ।
तं विना मानुषं जन्म जीवितं च निरर्थकम् ॥२७०॥

कुर्मस्ततो वपुस्त्यागं **वज्र**स्वामीत्यचिन्तयत् ।
अजायत समन्ताच्च दुर्भिक्षं द्वादशाब्दिकम् ॥२७१॥

वज्रासेनाभिधं शिष्यं स्वाम्यथ श्रुतपारगम् ।
इत्यादिदेश त्वं वत्स ! साम्प्रतं विहरान्यतः ॥२७२॥

लक्षमूल्यौदनाद् भिक्षां यत्राह्नि त्वमवाप्नुयाः ।
सुभिक्षमवबुध्येथास्तदुत्तरदिनोषसि ॥२७३॥

सोपारकपुरे श्रेष्ठी **जिनदत्तो** महाधनः ।
भार्यया सममीश्वर्या चतुर्भिश्च सहाङ्गजैः ॥२७४॥

त्वत्सुभिक्षोपदेशेन निवृत्त्यापमृतेः कृती ।
आदास्यते व्रतं त्वत्तो मर्त्यजन्मतरोः फलम् ॥२७५॥ युग्मम् ॥

चत्वारो भवितारस्तत्सुता गच्छादिकन्दलाः ।
नागेन्द्रचन्द्रौ विद्याभृन्निर्वृती नामतश्च ते ॥२७६॥

एवमादि समादिश्य स्वामिना प्रेषितस्ततः ।
विहर्तुं **वज्रसेनो**ऽपि प्रावृतद् नीवृतोऽभितः ॥२७७॥

भिक्षामलभमानास्तु दुर्भिक्षे **वज्र**साधवः ।
अन्वहं गुरुभिर्दत्तं विद्यापिण्डमभुञ्जत ॥२७८॥

द्वादशाब्दानि भोक्तव्यः पिण्डोऽयं वस्ततो यदि ।
संयमस्य न बाधास्ति तमाहृत्य ददाम्यहम् ॥२७९॥

नो वा तदा सहान्नेन तनोस्त्यागं विदध्महे ।
इत्युक्तागुरुभिर्धर्ममतयो यतयोऽभ्यधुः ॥२८०॥ युग्मम् ॥

धिक् पाषाणमिमं पिण्डं पिण्डपोष्यमिदं च धिक् ।
प्रभो ! प्रसीद येनैतत् त्यजामो द्वितयं वयम् ॥२८१॥

अथादाय मुनीन् **वज्रो** वालिखिल्यानिवार्यमा ।
गिरिं प्रत्यचलल्लोकान्तरं द्योतयितुं जवात् ॥२८२॥

तत्रैकः **क्षुल्लको** नास्थाद् वार्यमाणो यदा तता ।
क्वापि प्रतार्य तं ग्रामे समारोहद् गिरिं गुरुः ॥२८३॥

क्षुल्लकश्चानुपदिकीभूयाऽऽगात् तद्गिरेरधः ।
मा भूद् गुरुणामप्रीतिरिति तत्रैव चास्थित ॥२८४॥

मध्याह्नक्रूरसूरांशुतापाद् मक्षणपिण्डवत् ।
विलीय विमलात्माऽसौ तत्क्षणाद् दिवमीयिवान् ॥२८५॥

तदीयसत्त्वसंभारचमत्कारवशंवदाः ।
त्रिदशाः पूजयामासुराशु तस्य क्लेवरम् ॥२८६॥

श्री**वज्रं** यतयोऽप्यूचुः प्रेक्ष्यावतरतः सुरान् ।
किमत्रावतरन्त्येते देवाः सर्वर्द्धयः प्रभो ! ? ॥२८७॥

सोऽप्यूचे **क्षुल्लक**ः कार्यमिदानीं स्वमसाधयत् ।
महिमानं ततस्तस्य सुपर्वाणाः प्रकुर्वते ॥२८८॥

श्रुत्वैवं मुनयो दध्युः शिशुनाप्यमुना यदि ।
स्वकार्यं साधितं वृद्धाः साधयामो न किं वयम् ?॥२८९॥

इति संवेगिनः साधूंश्चारित्रज्ञानयोगिनः ।
श्रावकीभूय तत्रैवं मिथ्यादृग् देवताऽवदत् ॥२९०॥

पारणं भवतामद्य भगवन्तः ! प्रसीदत ।
गृह्णीत शर्कराक्षोदमोदकान् पानकं च नः ॥२९१॥

अवग्रहोऽयं नैतस्याः प्रीतिहेतुस्ततोऽन्यतः ।
यामो ध्यात्वेति जग्मुस्ते तदासन्नं नगान्तरम् ॥२९२॥

कृत्वा मनसि तत्रत्यदेवतां साधवो व्यधुः ।
कायोत्सर्गमथागत्य नत्वा तानित्युवाच सा ॥२९३॥

अनुग्रहोऽयमस्माकमिह यूयं यदागताः ।
असंभवो हि मलयतरूणां मरुमण्डले ॥२९४॥

त एवं तद्गिरा प्रीताः श्रीवज्रस्वामिना समम् ।
कृतानशनकर्माणः सत्कर्माणो दिवं ययुः ॥२९५॥

मत्वैतद् गोत्रभिद् गोत्रं तमागत्य रथस्थितः ।
प्रमोदात् पूजयामास वज्रादीनां वपूंष्यथ ॥२९६॥

शक्रः प्रदक्षिणीचक्रे तं गिरिं सरथस्तदा ।
शाखिनो नमयन्नुच्चैः स्वदेहमिव भक्तितः ॥२९७॥

विनम्रा एव तेऽद्यापि विद्यन्ते तत्र पर्वते ।
ततस्तस्याभिधा जज्ञे **रथावर्त** इति क्षितौ ॥२९८॥

याते दिवं मुनिपताविह **वज्र**नाम्नि दुष्कर्मपर्वतघटादलनैकवज्रे ।
विच्छेदमाप दशमं किल पूर्वमूर्व्यां दुःखादिवास्य बत संहननं च तुर्यम्
॥२९९॥४२॥

॥ इति वज्रस्वामिकथा ॥

● ● ●

अथ सविस्मयं मुनिजनार्य**मेतार्य**गुणचर्यामाह –

दिढसिरवेढनिपीडणनिग्गयनयणो वि जं न परिकुविओ ।
मेअज्जखमासमणो मे अज्ज वि तं चमक्केइ ॥४३॥

[दृढशिरोवेष्टनिपीडननिर्गतनयनोऽपि यद् न परिकुपितः ।
मेतार्यक्षमाश्रमणो मेऽद्यापि तच्चमत्करोति ॥]

व्याख्या – 'मेअज्जखमासमणो' **मेतार्य**नामा **क्षमाश्रमणो** महामुनिः 'दिढ त्ति' दृढश्चासौ शिरसो वेष्ट आर्द्रवध्रबन्धनं **दृढशिरोवेष्टः**, तेन निपीडनं **तन्निपीडनं** तेन **निर्गते** निःसृते नयने नेत्रे **यस्य स** तथा, **अपी**त्यतिशये, इत्थम्भूतोऽप्यसौ 'जं न परिकुविओ' **यन्न परिकुपितः**, 'मे अज्ज वि तं चमक्केइ' **ममाद्यपि तच्चमत्क-रोती**ति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ अस्ति **राजगृहं** नाम पुरं तिलकवद्भुवः ।
यत्र मुक्तापरीवेषः शालवेषः प्रकाशते ॥१॥
तत्र वित्रासितारातिश्रेणिः **श्रेणिक** इत्यभूत् ।
राजा सुकृतसन्दर्भराजितः परमार्हतः ॥२॥
त्रिसन्ध्यमर्चयित्वार्हदर्चां तस्याः पुरोऽन्वहम् ।
स्वस्तिकं कुरुते स्वर्णयवैरष्टशतेन सः ॥३॥
पुरेऽस्मिन्नेकदैकाकिविहारप्रतिमास्थितः ।
मेतार्यो दशपूर्व्यागाद्रर्यमेव तमोऽपहः ॥४॥
वैभारभूधरे कृत्वा स मासक्षपणं प्रभुः ।
सैंही वृत्तिं प्रपेदानः पारणायाऽविशत् पुरीम् ॥५॥
स्वामीर्संमितो भ्राम्यन्नेषणावीक्षणापरः ।
राज्ञः सुवर्णकारस्य गृहाङ्गणमयं गतः ॥६॥
दरिद्रस्येव कल्पद्रुरन्धस्येव सुधाकरः ।
मेतार्यपादास्तिष्ठन्तो रेजिरेऽस्य गृहाङ्गणे ॥७॥

देवतावसरायोर्वीपतेः स्वर्णयवान् कृतान् ।
विमुच्य स्वर्णकारोऽयं गृहान्तरविशत्तदा ॥८॥

भ्राम्यन्नभ्येत्य तत्क्रीडाक्रौञ्चः पक्षी कृमिभ्रमात् ।
जवादेव यवानेतानपक्षूणमचूनयत् ॥९॥

यावत्सुवर्णकारोऽपि गृहमध्यादुपाययौ ।
नानुलोके यांस्तावद् दध्यौ चेति चमत्कृतः ॥१०॥

एतावन्मात्रकाले हा ! ययुः क्व नु यवा मम ? ।
देवाचार्यसमयश्चायं नान्यान् घटयितुं सहे ॥११॥

इहापराधे हा हन्त राजान्तक इव क्रुधा ।
मां विमुच्यापरं दण्डं नवखण्डं विधास्यति ॥१२॥

तदेनं सत्यवचनं मुनिं पृच्छामि तत्कथाम् ।
असौ तन्नाशसाक्षी यत् कर्मसाक्षीव भूचरः ॥१३॥

ध्यात्वेति दीनवदनोऽभिसृत्य मुनिमब्रवीत् ।
यवाः केन गृहीता मे प्रसीद कथय प्रभो ! ॥१४॥

शृण्वन्नपि मुनिश्रेयानशृण्वन्निव तद्गिरम् ।
स क्रौञ्चकृपया भेजे मौनं सर्वार्थसाधनम् ॥१५॥

क्रियासमभिहारेण पृच्छ्यमानोऽपि नावदत् ।
यदा तदामुनाऽशङ्कि खल्वयं यवतस्करः ॥१६॥

गृहान्तरा दुरात्मासौ ततः सौवर्णिको मुनिम् ।
नीत्वा रूक्षाक्षराक्षेपपूर्वं पप्रच्छ तत्कथाम् ॥१७॥

यावत्तथापि नाशंसद् महात्मासौ कृपापरः ।
तावत् कुट्टयितुं तेन प्रारेभे यष्टिमुष्टिभिः ॥१८॥

घटी हरति तोयानि ताड्यते झल्लरी यथा ।
दीपालिकाऽत्ति पिबति सूर्पो वा कुट्यते यथा ॥१९॥

तथा क्रौञ्चो यवानश्नाद् दुर्जनः सद्गुणानिव ।
विषेहे स तु **मेतार्यः** कलादस्य कदर्थनम् ॥२०॥
स यावज्जात्यहेमेव ताड्यमानोऽपि नास्फुटत् ।
कलादेनामुना तावत् माराङ्कमुपचक्रमे ॥२१॥
वेष्टयित्वाभितो वध्रं नीरन्ध्रं मूर्ध्नि स क्रुधा । 5
कीलौ मुनिवृषस्यास्य निचखान विषाणवत् ॥२२॥

"यथा यथा व्यथा जज्ञे मुनिरेष तथा तथा ।
प्रमोदमैत्रीकारुण्योपेक्षापुण्योऽभवद् भृशम् ॥२३॥
कर्मकीलानपाकर्तुमाहत्य प्रतिकीलिकाः ।
वरं कार्या हटीतोऽस्मि कृष्यमाणो मुधाऽमुना ॥२४॥ 10
निर्निमित्तोपकार्येष निःशेषदुरितापहम् ।
कथञ्चनापि कल्याणीबोधिरत्नमवाप्नुयात् ॥२५॥
मेतार्यः सकलो लोको वराकोऽयं तु मज्जति ।
वृथा मेतार्यनामाहमेतस्मिन्नभवं हहा ! ॥२६॥
देहोऽयं याति तद् यातु यद्यस्त्येष तदस्तु वा । 15
किमस्य चिन्ता ह्यस्माकं स्थित्वाऽद्यः श्वोऽपि यास्यति ॥२७॥
इत्यस्य ध्यायतः पक्षपुटतो निःसृते दृशौ ।
एतत्समोऽस्ति कोऽप्यन्य इतीव बहिरीक्षितुम् ॥२८॥
क्षपकश्रेणिनिःश्रेणिमथारोहन्नयं मुनिः ।
केवलं गुणमासाद्य सद्यो लोकाग्रमीयिवान्" ॥२९॥ 20
तदानीं स्वर्णकृद्गेहप्राङ्गणे कश्चिदक्षिपत् ।
इन्धनं तद्भटत्कृत्या भीतः क्रौञ्चौऽवमद् यवान् ॥३०॥
तान् विलोक्य जनः क्रोशन् निनिन्द मुनिघातकम् ।
निजेन कर्मणा सोऽपि मषीलिप्त इवाभवत् ॥३१॥

राज्ञा विज्ञाय तत्तूर्णं स्वर्णकारं निशुम्भितुम् ।
प्रेषिताः पुरुषाः प्रापुरुत्क्रोशन्त इवारयः ॥३२॥
संसारस्य नृपस्य च प्रतिभयादुत्पन्नधीः स्वर्णकृत्,
श्रामण्यं सकुटुम्बकोऽपि स निजावासे समासेदिवान् ।
मुक्तः क्षोणिभुजा तदैव यतिरित्येतद् वयं मन्महे,
संसारेण तु मोक्ष्यते क्वचिदसौ जानाति तत्केवली ॥३३॥४३॥

॥ इति मेतार्यमुनिकथा ॥

● ● ●

अथ तदसीमशीलगुणध्यानप्रधानमानसः संजातपुरोदर्शनमिव **सुदर्शन**मभिनन्दयन्नाह–

भवभमणनिब्भयाए अभयाए पाडिओ वि तह विसमे ।
निव्वूढो सि सुदंसण ! तुह कित्ती तेण महमहइ ॥४४॥

[भवभ्रमणनिर्भययाऽभयया पातितोऽपि तथा विषमे । 5
निर्व्यूढोऽसि सुदर्शन ! तव कीर्त्तिस्तेन मामहीति ॥]

व्याख्या – **हे सुदर्शन !** भवभ्रमणनिर्भयया **अभयया** 'तह विसमे' **तथा** तेन निर-पायचतुरुपायसारेण प्रकारेण **विषमे** सङ्कटे वह्नाविव कनकपिण्डः 'पडिओ वि' **पातितोऽपि,** यत्तदोर्नित्यसम्बन्धत्वात्, येन 'निव्वूढो सि' **निर्व्यूढोऽसि** तस्माद् विषमादिति भावः, विशेषमहिमानमादाय निःसृतोऽसि । 'तुह कित्ती तेण महमहइ' 10 **तव कीर्तिस्तेन** हेतुना बहुलपरिमला **प्रसरती**ति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ अस्त्यङ्गदेशे दत्तारिकम्पा **चम्पा**भिधा पुरी ।
दुग्धोदधियशास्तस्यां नृपोऽभूद् **दधिवाहनः** ॥१॥
अभया विभया स्वास्यदासितेन्दुः प्रियास्य तु । 15
रूपलावण्यकलिता कैटभारेरिवेन्दिरा ॥२॥
इतस्तस्यां पुरि श्रेष्ठि गरिष्ठो धर्मशालिनाम् ।
अभूद् **वृषभदासो**ऽस्यार्हद्दासीति प्रिया सती ॥३॥
श्रेष्ठिनस्तस्य महिषीपालः **सुभग** इत्यभूत् ।
निनाय महिषीर्नित्यं स तु चारयितुं वने ॥४॥ 20
माघमासे वनादेष निवृत्तः सायमन्यदा ।
अप्रावरणमद्राक्षीत् कायोत्सर्गास्थितं मुनिम् ॥५॥
अस्यां हेमन्तरात्रौ यः स्थाता स्थाणुरिव स्थिरः ।
असौ धन्यो महात्मेति चिन्तयन् स गृहं ययौ ॥६॥
महर्षिं हर्षितमहाहिमानीवर्षवेदनम् । 25
तमेवार्द्रमना ध्यायन् यामिनीं तामनीनयत् ॥७॥

निशायामविभातायामादाय महिषीस्ततः ।
स ययौ तत्र यत्रास्ति स मुनिः प्रतिमास्थितः ॥८॥

नतिमानतिमात्रं तमुपासाभासिवानसौ ।
तदास्यस्पर्धयेवार्क उद्ययौ तदुपास्तये ॥९॥

स **'नमो अरिहंताणं'** इत्युक्त्वोदपतद् मुनिः ।
तत्पदं खेचरीविद्याधियान्तः सुभगस्त्वधात् ॥१०॥

स्वपञ्जाग्रन्नदंस्तिष्ठन्नक्तमह्नि गृहे बहिः ।
तदेवापठदुच्छिष्टोऽप्येकग्राहा हि तादृशः ॥११॥

पप्रच्छ विस्मितः श्रेष्ठी तत्प्रवृत्तिमयं ततः ।
शशंस तत्तथोद्भूतां श्रेष्ठी पुनरुवाच तम् ॥१२॥

आकाशगमने हेतुरसौ विद्या न केवलम् ।
किन्तु हेतुरसावेव गतौ स्वर्गापवर्गयोः ॥१३॥

किमेकमुच्यते पञ्चपरमेष्ठिनमस्कृतेः ।
अस्या यस्याः प्रभावेण किङ्करीक्रियते जगत् ॥१४॥

विद्येयं साधु यत्प्राप्ता पठ किन्त्वखिलामिमाम् ।
उच्छिष्टो मा जपेः श्रेयः परत्रेह च ते यथा ॥१५॥

सोऽथ शेषनमस्कारमधीत्य श्रेष्ठिनो मुखात् ।
परावर्तयताजस्रं धनं प्राप्येव निर्धनः ॥१६॥

एवं तस्य नमस्कारजापव्यापारिमः **सतः** ।
कियत्यपि गते काले वर्षाकालः **समाययौ** ॥१७॥

नीचैस्तराण्यथो नीचैरुच्चैरुच्चैस्तराण्यथ ।
तदा**नीमेकदानीव** धनः स्वीयश्रियाऽधिनोत् ॥१८॥

गृहाद् गृहीत्वा महिषीर्जगाम सुभगो वनम् ।
नदीं तीर्त्वा महिष्यस्तु परक्षेत्रे तदाविशन् ॥१९॥

---

१. **क.** स्वर्णश्रि° ।

दृष्ट्वा ताः **सुभगः** शीघ्रं नमस्कारपरायणः ।
दत्तझम्पो नदीपूरे विद्धः कीलेन केनचित् ॥२०॥

तथैवावर्तयन् पञ्चपरमेष्ठिं विपद्य सः ।
श्रेष्ठिपत्न्यास्ततः कुक्षौ तत्प्रभावादवातरत् ॥२१॥

तस्मिन् गर्भगते श्रेष्ठी देवसङ्घार्चनादिकान् । 5
पत्न्या **ऋषभदासो**ऽथ पूरयामास दोहदान् ॥२२॥

सार्हद्दासी ततः पुत्रमसूत शुभलक्षणम् ।
पुत्रजन्मोत्सवं श्रेष्ठी यथावैभवमातनोत् ॥२३॥

पितृभ्यां सोत्सवं क्लृप्तनामा सैष **सुदर्शनः** ।
वर्धमानः क्रमेणेन्दुरिवाप सकलाः कलाः ॥२४॥ 10

कन्यां **मनोरमां** नाम्ना मनोरमकुलोद्भवाम् ।
रतिं स्मरमिव श्रेष्ठी तमथो पर्यणाययत् ॥२५॥

पित्रोर्न केवलं नेत्रे कुमुदानन्दमिन्दुवत् ।
चक्रे राज्ञोऽपि लोकस्य सर्वस्यापि **सुदर्शनः** ॥२६॥

इतो नगर्यां तत्राभूद् **दधिवाहन**भूपतेः । 15
पुरोधाः **कपिलः** सोऽधात् सौहृदं श्रेष्ठिसूनुना ॥२७॥

अर्जुनस्य विधुः पञ्चशरस्य च विधुर्यथा ।
सुदर्शनस्य स प्रायः परिपार्श्वमवर्तत ॥२८॥

कपिलं कपिलानामा भार्याऽपृच्छत् तमन्यदा ।
विस्मरन् नित्यकृत्यानि क्वेयत्कालं विलम्बसे ? ॥२९॥ 20

पार्श्वे **सुदर्शन**स्याहं तिष्ठामीति तदीरिते ।
कोऽसौ **सुदर्शन** इति तथोक्तः प्रत्युवाच सः ॥३०॥

मम मित्रं सतां धुर्यं विश्वैकप्रियदर्शनम् ।
सुदर्शनं न चेद् वेत्सि तत् त्वं वेत्सि न किञ्चन ॥३१॥

तं ज्ञापयाधुनापीति तयोक्तः **कपिलो**ऽवदत् ।
असा**वृषभदत्त**स्य श्रेष्ठिनस्तनयो नयी सुतोपमाः ॥३२॥
सैष रूपेण पञ्चेषुस्तेजसा तेजसां पतिः ।
सौन्दर्येण शरच्चन्द्रो गाम्भीर्येण तु वारिधिः ॥३३॥
दानिनोऽस्य करेऽङ्गुल्यः कामधेनुः सुतोपमाः ।
नखाश्चिन्तामणिसखास्त्वक् कल्पद्रुप्रवालरुक् ॥३४॥
अस्मिन् गुणमये प्राप्तलीलः शीलगुणो महान् ।
मुक्तास्थालं यथा रत्नमिन्दुकान्तममूल्यकम् ॥३५॥
श्रुत्वेति **कपिला** कामविह्वला तद्गुणश्रवात् ।
सुदर्शनेऽभिसर्तुं सा चक्रे चिन्तामहर्निशम् ॥३६॥
अन्यदा नृपतेर्गूढादेशाद् ग्रामान्तरं गते ।
कपिले कपिलेयाय **सुदर्शन**मुवाच च ॥३७॥
अद्य ते सुहृदो देहापाटवं तेन ते गृहम् ।
नाययौ त्वां समाह्वातुमातुरो मां न्ययोजयत् ॥३८॥
हा ! न वेद्मीदमित्युक्त्वा तं गृहं द्रुतमागतम् ।
नीत्वैकान्ते वृषस्यन्ती **कपिला** प्रार्थयत् किल ॥३९॥
पतितः सङ्कटे तस्यां स्मित्वोवाच **सुदर्शनः** ।
भद्रे ! युक्तमिदं यूनां भवस्यापि फलं ह्यदः ॥४०॥
षण्ढः परमहं मूढे ! पुंरूपेण ममामुना ।
फलेन शाल्मलितरोः शुकस्त्रीवाऽसि वञ्चिता ॥४१॥
ततो विरक्ता सा सद्यो याहि याहीति भाषिणी ।
द्वारमुद्घाटयामास निर्ययौ च **सुदर्शनः** ॥४२॥
स्तोकेन दुर्गतेर्द्वाराच्छुटितोऽस्मीति चिन्तयन् ।
कल्याणीशीलवृत्तिः स्वं धाम धीमानयं गतः ॥४३॥

नार्योऽनार्यौचितीशीलाः कीला इव हविर्भुजः ।
भस्मतां मेलयन्त्यात्मपराश्रयमसंस्तुताः ॥४४॥

एताभ्यो भीरुरस्मीति विमृश्याथ **सुदर्शनः** ।
प्रत्यज्ञासीत् परगृहे नैको यास्याम्यतः परम् ॥४५॥

देहबद्ध इव न्यायो विवेक इव मूर्तिमान् । 5
प्रत्यक्ष इव धर्मोऽसौ नावद्यं किञ्चिदाचरत् ॥४६॥

यथाकालमथायाते तत्र चेन्द्रमहोत्सवे ।
सुदर्शन-पुरोधाभ्यां सहोद्यानं ययौ नृपः ॥४७॥

इतो नरविमानस्थाऽभया **कपिलया**न्विता ।
शरल्लक्ष्मीरिवोत्फुल्लनयना नृपमन्वगात् ॥४८॥ 10

सुदर्शनप्रिया षड्भिः समं पुत्रै**र्मनोरमा** ।
तत्रागाद् यानमारुह्य धर्मसम्पद् गुणैरिव ॥४९॥

अभयां कपिलाऽपृच्छत् षट्पुत्रा केयमङ्गना ? ।
महादेवीव देहैक्यात् किमत्र षण्मुखान्विता ? ॥५०॥

राज्यलक्ष्मीरिव गुणैः सुत्तै षड्भिरियं युता । 15
सुदर्शनप्रियाऽज्ञायि न त्वयेत्य**भया**ऽवदत् ॥५१॥

श्रुत्वेति विस्मिता स्माह **कपिला** देवि ! यद्यसौ ।
सुदर्शनस्य गृहिणी तदस्यास्तनयाः कुतः ? ॥५२॥

अथ स्मित्वाऽभयाऽवोचत पुमान् किं न **सुदर्शनः** ? ।
साऽवादीद् नैव राज्यूचे चतुरे ! वेत्स्यदः कथम् ? ॥५३॥ 20

इत्युक्ता स्वानुभूतं साऽभयायै **कपिला** ततः ।
सुदर्शनस्य षण्ढत्ववृत्तान्तं तत्तथा जगौ ॥५४॥

अभयाप्यब्रवीदेवं यद्येवं वञ्चिताऽसि तत् ।
मूढे ! षण्ढोऽयमन्यस्त्रीजने नात्ममृगीदृशि ॥५५॥

अतो विलक्षा **कपिला**ऽप्यब्रवीदित्यसूयया ।
वञ्चिता चेदहं मूढा प्रौढायाः किं तवाधिकम् ? ॥५६॥

अभयोचे मया चन्द्रकलयेव कराञ्चितः ।
असञ्ज्ञोऽपि द्रवेद् ग्रावा ससञ्ज्ञः किं पुनः पुमान् ? ॥५७॥

सेर्ष्यमूचेऽथ **कपिला**ऽप्येवं मा गर्वमुद्वह ।
गर्वं वहसि चेद् देवि ! रम्यतां तत्**सुदर्शनः** ॥५८॥

व्याजहा**राभया** देवी साहङ्कारमिदं ततः ।
हले ! रमितमेवैनं मया विद्धि **सुदर्शन**म् ॥५९॥

योषाभिः पशुवेषाभिरपि ते मुनयो वने ।
नीरसा अप्यरम्यन्त क्वासौ स्मरवशो गृही ? ॥६०॥

विलसामि न यद्येनं तद् विशामि हुताशनम् ।
इत्यालपन्त्यावुद्यानं प्रपेदाते क्षणेन ते ॥६१॥

चिरं चिक्रीडतुस्तत्रोद्याने वानेयसम्पदा ।
अभया-कपिले श्रान्ते निशान्ते जग्मतुस्ततः ॥६२॥

अभयात्मप्रतिज्ञातमथ मन्मथजीवितम् ।
उपायपण्डितायै तत्**पण्डिता**यै न्यवेदयत् ॥६३॥

अथैतां **पण्डिता** प्राह खण्डिताननदीधितिः ।
पात्रापात्रमनालोच्य धिक् प्रतिज्ञामिमां तव ॥६४॥

अन्योऽपि परनारीषु सोदरः श्रावको भवेत् ।
असौ किं नु महासत्त्वशिरोरत्नं **सुदर्शनः** ? ॥६५॥

सदा गुरुकुलासेवी ध्यानमौनरतः सदा ।
आनेतुमभिसर्तुं वा स कथं नाम युज्यते ? ॥६६॥

वरं सिंहसटासर्पफणारत्नग्रहाग्रहः ।
न तु शीलविलोपाय प्रतिज्ञातः **सुदर्शनः** ॥६७॥

जिनाधिवासितोऽप्यन्तर्गभीरोऽपि सरित्पतिः ।
क्षये त्यजति मर्यादां न तथापि **सुदर्शनः** ॥६८॥

सदैन्य**मभया**ऽवादीदेकवेलं कथञ्चन ।
आनयैनं ततः सर्वं भलिष्यामि न ते च्छलम् ॥६९॥

अथो तथोदयत्प्रज्ञामण्डिता प्राह **पण्डिता** । 5
निश्चयश्चेत्तवायं तदस्त्युपायो मया स्मृतः ॥७०॥

पर्वाहे शून्यगेहादौ कायोत्सर्गं करोति सः ।
आनेतव्यो यदि परं तथास्थो नान्यथा पुनः ॥७१॥

उपायः साधु साध्वस्मिन् यतितव्यं त्वयानिशम् ।
इत्युक्तवत्यां तात्पर्याद् देव्यामामेत्युवाच सा ॥७२॥ 10

सुदर्शनसमां कामप्रतिमां तत्र कामपि ।
पूजायै **पण्डिता** पर्वशर्वरीषु समानयत् ॥७३॥

तस्यामानीयमानायं प्रतिपर्वनिशं भृशम् ।
तया विश्वासमानीताः सर्वेऽन्तःपुरयामिकाः ॥७४॥

एवङ्कारं व्यतीतेषु दिवसेषु कियत्स्वपि । 15
विश्वानन्दी समागच्छत् कौमुदीयो महोत्सवः ॥७५॥

तदुत्सवाय राजाथ पटहोद्घोषपूर्वकम् ।
सर्वद्धर्योद्यानमाह्वास्त समस्तमपि पूर्जनम् ॥७६॥

प्रातरेष्यच्चतुर्मासधर्मकर्मकृते कृती ।
सोपायनो नृपं गत्वा पृच्छति स्म **सुदर्शनः** ॥७७॥ 20

अनुज्ञातो नृपेणाह्नि द्वितीये श्रीमदर्हताम् ।
अर्चां विरचयंश्चैत्यपरिपाटीं चकार सः ॥७८॥

ततो रात्रौ गृहीत्वैष पौषधं दुरितौषधम् ।
कायोत्सर्गेण कुत्रापि स्थितः शून्यगृहान्तरे ॥७९॥

इतोऽभयापि विहितशिरोऽर्त्तिच्छद्मना तदा ।
तस्थौ नृपतिमापृच्छ्य यदुत्पन्नधियः स्त्रियः ॥८०॥

अथो **सुदर्शनं** याने न्यस्याच्छाद्य च वाससा ।
द्वाःस्थैरस्खलिता नीत्वाऽभयायै **पण्डिता**ऽऽर्पयत् ॥८१॥

तमस्पष्टाक्षरोल्लापा सा पाणिप्रणयीकृतम् ।
स्विद्यन्ती कम्पमानाथ प्रार्थयत्पार्थिवप्रिया ॥८२॥

मामकीनमनोमीनं वसन्तं रागसागरे ।
अग्रहीद् गुणजालेन धृतस्तेनासि धीवर ! ॥८३॥

क्षिप्तो हृच्चत्वरे बाढं बाहुपाशेन बन्धनम् ।
मत्तो नवनवस्फारं मारकर्म च लप्स्यसे ॥८४॥

पुंनागस्यास्य सुमनःकृष्टिमाधातुमुच्चकैः ।
गिरं व्यापारन्तीति कुटिलामङ्कुटीमिव ॥८५॥

स्कन्धे ललम्बे बाहुभ्यां मृदुलाभ्यां मृणालवत् ।
रम्भास्तम्भाभिरामाभ्यामुरुभ्यां मध्यमग्रहीत् ॥८६॥ चतुर्भिः कलापकम् ॥

ततः **सुदर्शनो**ऽत्यर्थं समाधिस्तिमितोऽभवत् ।
वर्षासरित्परीरब्धः किमब्धिस्तरलायते ? ॥८७॥

पुनरप्यभयाऽवादीदनादीनत्वभावयुक् ।
प्रसीद नाथ ! सीदन्तीमिति मां किमुपेक्षसे ? ॥८८॥

मन्मथो हन्ति मां हन्त दुर्वारप्रसरैः शरैः ।
सनाभिरसि तस्यातः पाहि मां शरणागताम् ॥८९॥

आनीतश्छद्मनासीति कोपं मा स्म वृथा कृथाः ।
बद्ध्वाऽऽनीतो नदीपूरः प्रजाशाः किं न पूरयेत् ? ॥९०॥

व्रतकष्टमिदं मुञ्च मत्प्राप्त्या फलितं ह्यदः ।
स्वर्गापवर्गयोर्वार्ता स्मार्तानां गल्लझल्लरी ॥९१॥

ताम्यन्तीं याचमानां मां नम्रां मानय मानद ! ।
दैवात् करमुपायातां सुधां पिबसि किं न हि ? ॥९२॥
कियदद्यापि सौभाग्यगर्वमुन्नायिष्यसि ? ।
इत्यालपन्ती सा पीनस्तनाभ्यां तमताडयत् ॥९३॥
इत्थं यथा यथा चक्रे सोपसर्गमनर्गला । 5
सुदर्शनः शुभध्यानमारुरोह तथा तथा ॥९४॥
स दध्यौ चेति चेद् मुच्ये कथञ्चिदहमेतया ।
पारयामि तदुत्सर्गमन्यथानशनं मम ॥९५॥
अमानिताथ घटितभ्रुकुटिः कुटिलाशया ।
तं भापयितुमारेभे भषन्ती निर्भयाऽ**भया** ॥९६॥ 10
त्वयीदमूषरे सर्वं मूर्ख ! रे वर्षितं मया ।
न वेत्सि मानिनी तुष्टाऽमृतं रुष्टा विषं पुनः ॥९७॥
चापस्येवाधुना जीवाधानं ते नमतो मयि ।
अन्यथा त्वध्वरे जात एवासीध्मं हविर्भुजः ॥९८॥
इत्थं यथा यथाऽभैषी**दभया** पातकाभया । 15
तथा तथासौ सद्ध्यानमानशे निजमानसे ॥९९॥
विचक्रा**माभया** कामं विकला सकलां निशाम् ।
न चुक्षोभ लयादात्मदर्शनस्तु **सुदर्शनः** ॥१००॥
ततः प्राभातिकीं वीक्ष्य रजनीं राजवल्लभा ।
विलक्षा स्वं विलिख्याशु नखैः पूत्कारमातनोत् ॥१०१॥ 20
आयान्ति स्म ततो यावद् यामिकास्तत्र सम्भ्रमात् ।
कायोत्सर्गस्थितं तावद् ददृशुस्ते **सुदर्शन**म् ॥१०२॥
अस्मिन्न सम्भवत्येतदिति द्रुतमुपेत्य तैः ।
विज्ञप्तो भूपतिस्तत्राययौ पप्रच्छ **चाभया**म् ॥१०३॥

सोचेऽनुज्ञाप्य देव ! त्वामहं यावदिह स्थिता ।
आविर्भूतः पुरो भूत इवायं तावदीक्षितः ॥१०४॥

ततः पटूनि चाटूनि कुर्वाणः स्मरघस्मरः ।
असौ पशुरिवोन्मत्तो मां रिरंसुरयाचत ॥१०५॥

अनिच्छन्त्यां मयि ततो बलात्कारमयं व्यधात् ।
मया च पूत्कृतं नान्यदबलानां बलं यतः ॥१०६॥

अस्मिन्निदमसम्भाव्यमिति मत्वा महीपतिः ।
किमेतदिति पप्रच्छ **सुदर्शन**मनेकधा ॥१०७॥

पृष्टोऽपि राज्ञीकृपया किञ्चिद् नोचे **सुदर्शनः** ।
येनापकारिकाभ्योऽपि सन्तो हन्तोपकारिणः ॥१०८॥

ततः सम्भावयामास दोषं तस्यैव भूपतिः ।
पारदारिकदस्यूनां तूष्णीकत्वं हि लक्षणम् ॥१०९॥

इति क्रुद्धः समादिक्षदखिलेऽप्यत्र पत्तने ।
दोषप्रख्यापनां कृत्वा दुष्ट एष निगृह्यताम् ॥११०॥

अथारक्षैस्ततो धृत्वा केशेष्वयमकृष्यत ।
यथा तथापि जायन्ते यौवने हि विगोपकाः ॥१११॥

स मुखे चर्चितो मष्या देहे चूर्णेन चित्रितः ।
बिल्वैवरलङ्कृतो मूर्ध्नि कण्ठे निम्बदलस्रजा ॥११२॥

रासभारोपितः सूर्पातपत्रस्तत्र पत्तने ।
वाद्यमानेन वाद्येनारेभे भ्रमयितुं भटैः ॥११३॥

कृतापराधः शुद्धान्ते बध्यतेऽसौ **सुदर्शनः** ।
नात्र दोषो नृपस्येति चक्रुराघोषणां च ते ॥११४॥

न युक्तं कृतवानेष नेह संभवतीदृशम् ।
अस्मिन् राजापि नेदृक्षः कुपितोऽत्र विधिः खलु ॥११५॥

धर्मो धिगस्य किं शेते पुराकर्म किमप्यदः ।
अयं मुच्येत नः सर्वद्रव्यैर्नो जीवितैरपि ॥११६॥
मिथो विचारयत्येवं हाहाकारं च कुर्वति ।
पूर्जने रोदिति भ्राम्यन्नगादग्रे स्ववेश्मनः ॥११७॥ विशेषकम् ॥
अदृश्यत महासत्या स **मनोरमया** ततः ।
अचिन्ति च सदाचारो मत्पतिः किमिदं हहा ! ॥११८॥
इत्यन्तर्विवशा वेश्ममध्यमध्यास्य सत्वरम् ।
अर्चयित्वा जिनं कायोत्सर्गस्थेदमचिन्तयत् ॥११९॥
"श्रृण्वन्तु भगवत्यः श्रीजिनशासनदेवताः ! ।
चन्द्रे लाञ्छनमस्तीदं सर्वथा मत्पतौ तु न ॥१२०॥
परमश्रावकस्यास्य सान्निध्यं चेत् करिष्यथ ।
तदाहं पारयिष्यामि कायोत्सर्गमिमं खलु ॥१२१॥
अन्यथैवं स्थितिजुषोऽनशनं ध्रुवमेव मे ।
धर्मध्वंसे पतिध्वंसे किं जीवन्ति कुलस्त्रियः ?" ॥१२२॥
मा कृथाः पुत्रि ! निर्वेदं भलिष्यामोऽखिलं वयम् ।
सा समाधिस्थिताऽश्रौषीद् गिरं दिव्यां कुतोऽप्यथ ॥१२३॥
ततश्च न्यधुरारक्षाः शूलिकायां **सुदर्शनम्** ।
स्वर्णाम्भोजासनमभूदियं तस्य महात्मनः ॥१२४॥
अथारक्षैर्वधायास्य दृढं व्यापारिता अपि ।
कण्ठपीठेऽसिदण्डानां प्रहारा हारतामगुः ॥१२५॥
मौलौ मुकुटतां भेजुः कुण्डलत्वं च कर्णयोः ।
बाह्वोः केयूरतां भेजुः पादे कटकतां च ते ॥१२६॥
तद् दृष्ट्वा चकितैरेतैर्विज्ञप्तो वसुधापतिः ।
आरुह्य करिणीं सोऽगाद् वेगादधि**सुदर्शनम्** ॥१२७॥

"व्रीडामुकुलितास्येन्दुस्तमालिङ्ग्य नृपोऽवदत् ।
दिष्ट्या न हि विनष्टोऽसि श्रेष्ठिन्! आत्मप्रभावतः ॥१२८॥

भवान् विनाश्यते क्वापि मादृशैरविवेकिभिः ।
धर्मो यस्याङ्गरक्षोऽस्ति जागरूकः सनातनः ?॥१२९॥

स्त्रीणां विवेकशस्त्रीणां वचनात्त्वां निहन्ति यः ।
अविमृश्यकरः पापी नापरो **दधिवाहनात्** ॥१३०॥

सुवंशजोऽप्यकृत्यानि कुरुते प्रेरितः स्त्रिया ।
स्नेहलं दधि मथ्नाति पश्य मन्थानको न किम् ? ॥१३१॥

मया मायाप्रधानायाः स्त्रियो वाक्येन यत्त्वयि ।
अपराद्धमशेषं तत् क्षन्तासि त्वं **सुदर्शन** !" ॥१३२॥

एवमालपता राज्ञा करिण्यामधिरोप्य सः ।
नीत्वा स्वहर्म्ये स्नपितश्चन्दनैश्च विलेपितः ॥१३३॥

वस्त्रालङ्कारजातं च परिधाप्य **सुदर्शनः** ।
राज्ञा पृष्टो निशावृत्तं यथातथमचीकथम् ॥१३४॥

राजोचे भवतैवाहमकृत्यं कारितोऽस्मि हा ! ।
तदा यत्त्वं महासाधो! मया पृष्टोऽपि नावदः ॥१३५॥

अ**थाभयां** प्रति क्रुद्धो भूपतिर्निग्रहोन्मुखः ।
न्यषेधि श्रेष्ठिना तेन शिरः प्रक्षिप्य पादयोः ॥१३६॥

श्रेष्ठी करिणमारोप्य महीतरणिना ततः ।
नायितो न्यायिना गेहं गौरवेण गरीयसा ॥१३७॥

अभयापि तदाकर्ण्योद्बध्यात्मानं व्यपद्यत ।
पण्डिता पाटलीपुत्रे देवदत्तान्तिके ययौ ॥१३८॥

सुदर्शनोऽपि संसारविरक्तो व्रतमग्रहीत् ।
तपःकृशाङ्गो विहरन् **पाटलीपुत्र**मागमत् ॥१३९॥

भजन्माधुकरीं वृत्तिं दृष्टः **पण्डितयात्र** सः ।
कथितो **देवदत्ता**यां सोऽपि तस्या गृहं ययौ ॥१४०॥

गृहस्य कुमुदस्येव बद्ध्वास्यं **देवदत्तया** ।
धृतो लक्ष्म्येव दिवसं यावच्चुक्षोभ नैष तु ॥१४१॥

ततो मुक्तस्तया सायमुद्यानं गतवानयम् । 5
तत्रापि दृष्टोऽभयया व्यन्तरीभूतया तया ॥१४२॥

स्मरन्त्या प्राक्तनं कर्म तस्य मर्माविधोऽनया ।
स्वामिनः **सङ्गमेने**वोपसर्गास्तेनिरे निशि ॥१४३॥

क्लिश्यमानो बहु तया महासत्त्वः **सुदर्शनः** ।
क्षपकश्रेणिमारोहदपूर्वकरणक्रमात् ॥१४४॥ 10

तस्यापि केवलज्ञानमुन्मिमील समुज्ज्वलम् ।
समेत्य महितश्चायं देवदानवमानवैः ॥१४५॥

देवनिर्मितहेमाब्जमासितो भगवानयम् ।
दिदेश कर्मणां मर्माविधं धर्मे चतुर्विधम् ॥१४६॥

तस्य देशनया तत्रान्येऽबुध्यन्त न केवलम् । 15
पण्डिता देवदत्ता चाभया चापि व्यबुध्यत ॥१४७॥

इत्थं स भास्वानिव कान्तिशाली नालीकबोधं विरचय्य गोभिः ।
सुदर्शनः केवलभूर्तिरायुर्दिनावसानेऽजनि निर्वृतात्मा ॥१४८॥४४॥

॥ इति सुदर्शनकथा ॥

● ● ●

अथ **दशार्णभद्र**श्लाघामुल्लाघयन्नाह –

वंदे दसन्नभद्दं समसीसीए अहो सुरिंदस्स ।
घित्तूण तहा विरइं जेण पइन्ना सुनिव्वूढा ॥४५॥

[वन्दे दशार्णभद्रं स्पर्धया अहो ! सुरेन्द्रस्य ।
गृहीत्वा तथा विरतिं येन प्रतिज्ञा सुनिर्व्यूढा ॥]

व्याख्या – 'दसन्नभद्दं' **दशार्णभद्र**नामानं मुनिं 'वंदे' **नमस्करोमि**, 'जेण' **येन** 'पइन्ना' **प्रतिज्ञा** 'तथा श्रीवीरस्वामिनं वन्दिष्ये, यथासौ न केनापि वन्दितः' इति सन्धा, 'सुनिव्वूढा' **सुष्ठु** अतिशयेन **निर्व्यूढा** निर्वाहमनीयत । कया ? 'समसीसीए' **समशीर्षिकया** स्पर्धया । '**अहो**' इति विस्मये कस्य ? 'सुरिंदस्स' **सुरेन्द्रस्य** शक्रस्य । किं कृत्वा ? 'घित्तूण' **गृहीत्वा** । काम् ? 'विरइं' **विरतिं** प्रव्रज्याम् । कथम् ? 'तहा' **तथा** तेन प्रकारेण सेन्द्रैरपि सुरैरसाध्येनेत्यर्थः । अविरता हि देवा देशविरतिमप्याप्तुमनलम्भूष्णवः, क्व पुनः सर्वविरतिमिति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ **दशार्ण**देशभूसुभ्रूकिरीटप्रतिमं पुरम् ।
दशार्णपुरमित्यस्ति नैकरत्नविराजितम् ॥१॥

दशार्णभद्र इत्यासीत् तत्रासीमयशा नृपः ।
सम्पदामेकवरिता सरितामिव सागरः ॥२॥

एकदा तं सभासीनं सायमित्यूचिरे चराः ।
देव ! देवाधिदेवः श्रीवीरः प्रातरिहैष्यति ॥३॥

पयोदगर्जयेवाभूत् तद्गिरा भूविभू रयात् ।
धाराकदम्बवत्फुल्लपुलकाङ्कुरदन्तुरः ॥४॥

सभासमक्षमूचे च प्रगे ऋद्ध्या तया प्रभुम् ।
वन्दिष्ये न यया कश्चिद् ववन्दे त्रिजगत्यपि ॥५॥

इत्यमात्यादिकान् सर्वान् समुदीर्य विसृज्य च ।
प्रीतचेता जगामान्तः पुरं पृथ्वीपुरन्दरः ॥६॥

वन्दिष्ये भक्तिभागेवं स्तोष्ये चैवं प्रगे प्रभुम् ।
कथञ्चिदिति चिन्तावान् यामिनीं तामनीनयत् ॥७॥

स्वावनुदितेऽप्येष समाहूय च भूयसः ।
अदिशन्नगराध्यक्षप्रभृतीनिति भूपतिः ॥८॥

मदीयसदनस्वामिसदसोरन्तरा चिरात् ।
कार्यं यानाय मे मुक्तदूषणं मार्गभूषणम् ॥९॥

इतश्च तत्र भगवानाययौ नगराद् बहिः ।
त्रयेऽपि च सुराश्चक्रुर्विशालं देशनासदः ॥१०॥

शासनं नृपतेस्तेऽपि तेनिरे तन्नियोगिनः ।
राज्ञां हि वचसा सिद्धिर्मनसा मरुतामिव ॥११॥

कलिता कुङ्कुमाभ्भोभिः सुमनोभिश्च तत्र भूः ।
सन्ध्यारागवती ज्योतिष्मतीव द्यौरराजत ॥१२॥

मुक्तावचूलैरुल्लोचाः स्वर्णस्तम्भैर्विरेजिरे ।
सबलाकाः सगाङ्गेयधारा धाराधरा इव ॥१३॥

सुप्रपञ्चा विरेजुश्च मञ्चास्तोरणदामभिः ।
शत्रुभङ्गा इवोत्तुङ्गाहङ्कारभरतो मिथः ॥१४॥

पदे पदे स्वर्णकुम्भैरशोभन्त च मण्डपाः ।
स्थिरभानूनि सानूनि लोकालोकगिरेरिव ॥१५॥

घण्टापथेषु हट्टानि चञ्चलैः केतनाञ्चलैः ।
मञ्चस्थशालभञ्जीनां न्युञ्छनानीव तेनिरे ॥१६॥

शुभ्रेषु ताडितोल्लोचपटेषु प्रतिमण्डपम् ।
दधुर्धूपघटीधूमावर्ताः पञ्चमपत्रताम् ॥१७॥

परितः कदलीस्तम्भा दलैरुल्लासिभिर्बभुः ।
अङ्गरक्षा इव श्रीणामुल्लासितरवारयः ॥१८॥

वस्त्रं वन्दनमालाश्च पुटापुटिकया बभुः ।
सफेना गगनाम्भोधेः कुटिला इव वीचयः ॥१९॥

क्वचित् क्वचिच्च भान्ति स्म तोरणे चित्रकत्वचः ।
मणिस्तम्भप्रभाम्भोधाववतीर्णा घना इव ॥२०॥

एवं मार्गमतिस्वर्गं विरचय्य नियोगिनः ।
राज्ञे व्यजिज्ञपन् स्वामिदर्शनौत्सुक्यधारिणे ॥२१॥

स्नात्वा राजापि दिव्याङ्गरागः सर्वाङ्गभूषणः ।
चारुचीरधरं स्रग्वी गजमारोहदुत्तमम् ॥२२॥

स रराजातपत्रेण पूर्वाचल इवेन्दुना ।
चलाभ्यां चामराभ्यां च रवीन्दुभ्यामिवोदधिः ॥२३॥

चामरैर्वीज्यमानाश्च वर्यपर्यङ्किकासनाः ।
साचीकृतशचीरूपा अन्तःपुर्यस्तमन्वगुः ॥२४॥

नरेन्द्रः प्राचलत्प्राज्यमणिभूषणभासुरैः ।
असावनुगतो भूपै रूपैः स्वैरिव वैक्रियैः ॥२५॥

हरिसेराहखुङ्गाहनीलपाटलरोचिषाम् ।
राजा राजिभिरश्वानां यथावर्णं पृथक् पृथक् ॥२६॥

बन्दिभिः स्तूयमानश्च गीयमानश्च गायनैः ।
दर्श्यमानात्मविज्ञानो मार्गालङ्कारकारिभिः ॥२७॥

उपर्युपरि नीरन्ध्रमिलितस्त्रीमुखाम्बुजैः ।
पश्यन् मञ्चेषु मञ्चेषु शतचन्द्रं नभस्तलम् ॥२८॥

भेरीताम्रानकभ्रेरीझल्लरीकम्बुकूजिते ।
विज्ञप्त्यर्थं विदन् सेवाकारिणां हस्तसञ्ज्ञया ॥२९॥

जङ्गमोद्यानलेखावत्सामन्तश्रीकरीभरैः ।
क्रमेण प्राप समवसरणं स महीपतिः ॥३०॥ पञ्चभिः कुलकम् ॥

स त्रिः प्रदक्षिणीकृत्य ववन्दे परमेश्वरम् ।
आसाञ्चक्रे यथास्थानमास्थाने ऋद्धिगर्वितः ॥३१॥

तमृद्धिगर्वितं बोधपाकं शासितुमात्मना । 5
अम्भोमयं विकृतवान् विमानं पाकशासनः ॥३२॥

"स्फटिकाच्छपयोभित्तिप्रान्तकान्तमृणालिकम् ।
तदरालविचालस्थमरालमिथुनाद्भुतम् ॥३३॥

शिरस्थानीभवत्पद्मतन्नालस्तम्भशोभितम् ।
नीलवल्लीतुलं पद्मपरागोल्लोचरोचितम् ॥३४॥ 10

उन्नीरशिखरप्रान्तकुम्भीभूताब्जकुड्मलम् ।
वीचिदण्डोपरिप्रेङ्खत्फेनकेतुपटोत्तरम् ॥३५॥

उपात्तोदारमन्दारपतत्कुसुमपूजितम् ।
सत्त्वैराम्भसिकैरुह्यमानं धुर्यैरिवोद्धतैः ॥३६॥

जलकान्तविमानं तत् शक्रोऽध्यास्त सहामरैः । 15
चामरैरमरस्त्रीभिर्वीज्यमानः सहस्रशः" ॥३७॥ पञ्चभिः कुलकम् ॥

गन्धर्वारब्धसङ्गीतदत्तकर्णो मनाग् मनाक् ।
मर्त्यलोकमवातारीदमर्त्याधिपतिस्ततः ॥३८॥

जाम्बूनदाम्बुजन्यस्तपादमष्टापदोन्नतम् ।
बिभ्राणं पार्श्वयोर्घण्टे सूर्याचन्द्रमसाविव ॥३९॥ 20

देवदूष्यकुथच्छन्नपृष्ठं प्रष्ठं द्युकुम्भिनम् ।
मर्त्यलोकावतीर्णोऽथाध्यारुरोह पुरन्दरः ॥४०॥ युग्मम् ॥

गजाष्टदन्तीमाणिक्यवाप्यम्भोजेषु भूरिशः ।
द्वात्रिंशत्पात्रबन्धेन सङ्गीतमवधारयन् ॥४१॥

आगादथोपसमवसरणं भक्तिभावितः ।
जिनेन्द्रपादान् वन्दारुर्वृन्दारकशिरोमणिः ॥४२॥ युग्मम् ॥

गजस्थ एव सूत्रामा विमानेनानुगामिना ।
प्रत्यम्बुजं सुरस्त्रैणसंगीताद्वैतशालिना ॥४३॥

स त्रिः प्रदक्षिणीकृत्य स्वामिनो देशनासदः ।
उत्तीर्य च गजात् तत्र प्राविशत् सपरिच्छदः ॥४४॥

तत्र स्थितैः सुरनरैर्विस्मितैर्वीक्षितो हरिः ।
प्रभुं ननाम हारेण स्वस्तिकं रचयन् भुवि ॥४५॥

दशार्णभद्र इन्द्रस्य तया ऋद्ध्याथ दृष्टया ।
पुरऋद्ध्या ग्राम्य इव स्तम्भिताङ्गोऽभवत् क्षणम् ॥४६॥

"दध्यौ चेति **दशार्णेशो** विस्मयस्मेरलोचनः ।
अहो ! शक्रविमानस्य शोभेयं भुवनाद्भुता ॥४७॥

अहो ! रुचिरगात्रत्वं सुरेन्द्रकरिणोऽस्य तु ।
अहो ! समृद्धिविस्तारः कोऽपि वास्तोष्पतेरयम् ॥४८॥

स्वसम्पदभिमानोऽयं व्यधापि धिगहो ! मया ।
गोष्पदाब्ध्योरिवैतद्धि मम शक्रस्य चान्तरम् ॥४९॥

ऋद्धिगर्वादथ स्वात्मा हहा ! तुच्छीकृतो मया ।
कूपकच्छपकेनेव प्रागदृष्टेदृशर्द्धिना" ॥५०॥

एवं भावयतस्तस्य वैराग्यं गच्छतः शनैः ।
परिणामः शुभतरो बभूवेत्यल्पकर्मणः ॥५१॥

ऋद्ध्या यद्यप्यनेनाहं विजितोऽस्मि बिडौजसा ।
प्रव्रज्याग्रहणेनाद्य पराजेष्ये तथाप्यमुम् ॥५२॥

न केवलं विजेष्येऽमुं व्रतादानेन सम्प्रति ।
कर्मारीनपि जेष्यामि भवभ्रमणकारिणः ॥५३॥

विवेकी चिन्तयन्नेवं **दशार्णपुर**पार्थिवः ।
तत्रस्थ एव व्यमुचत् किरीटकटकादिकम् ॥५४॥
दशार्णेन्द्रोऽथ कर्मद्रोर्मूलानीव समन्ततः ।
पञ्चभिर्मुष्टिभिः केशानुच्चखानोत्तमाङ्गतः ॥५५॥
शक्रे निरीक्षमाणेऽथ विस्मयस्मेरचक्षुषि । 5
स गत्वा गणभृत्पार्श्वे यतिलिङ्गमुपाददे ॥५६॥
गत्वा प्रदक्षिणापूर्वमपूर्वोत्साहसाहसः ।
दशार्णभद्रः श्रमणो जगन्नाथमवन्दत ॥५७॥
तमिन्द्रः प्राह धन्यात्मन् ! अहो ! पौरुषमद्भुतम् ।
तवेदममुनाऽजैषीर्मामन्यस्य कथैव का ? ॥५८॥ 10
स्तुत्वेति नत्वा च सुरेश्वरस्तं जगाम धाम स्वमनश्वरश्रीः ।
दशार्णभद्रोऽपि तपोऽभितप्य निर्धूय कर्माणि च मोक्षमाप ॥५९॥४५॥

॥ इति दशार्णभद्रकथा ॥

● ● ●

अथ **प्रसन्नचन्द्र**मुनिचन्द्रचरित्रं चित्रीयमाण आह –

तह सत्तमीए बद्धं कम्ममसेसं पि जेण तह खवियं ।
कह न कुणइ अच्छरिअं पसन्नचंदस्य सच्चरियं ? ॥४६॥

[तथा सप्तम्यां बद्धं कर्माशेषमपि येन तथा क्षपितम् ।
कथं न करोत्याश्चर्यं प्रसन्नचन्द्रस्य सच्चरितम् ? ॥]

व्याख्या – **तथा** तेन **दुर्मुख**वचनश्रवणोपजातरौद्रध्यानावेशवशमनोवृत्तिसमृद्धेन कवेरनुभवैकसाध्येन वा निखिलजनप्रसिद्धिसारेण प्रकारेण **सप्तम्यां** नरकभुवि **बद्धं** दृढीकृतं **कर्म अशेषमपि, तथा** तेन शिरस्कस्वीकारप्रगुणीकृतकरस्पृष्ट-लुञ्चितशिरःस्मृतात्मानुशयनिवर्तमानकषायपरिणामातिशयजागरूकवैराग्यपर-भागतारेण प्रकारेण **येन क्षपितमुन्मूलितं**, कैश्चिच्चिरकालबद्धमचिरेण, कैश्चिच्चा-चिरकालबद्धं चिरेण कर्म क्षपितम्, अनेन तु महात्मना तत्कालं बद्धं क्षपितं चेति-रूपं **सच्चरितं प्रसन्नचन्द्रस्य** राजर्षेः **कथमाश्चर्यं न करोति ?** अपि तु करोतीति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ इहास्ति **पोतनपुरं** पुरं तत्र महीपतिः ।
प्रसन्नचन्द्र इत्यासीत् प्रसन्नश्चन्द्रवद् गुणैः ॥१॥
तत्रैकदा पुरग्रामाकरद्रोणमुखादिषु ।
विहरन्नाजगाम श्री**वीरो** देवासुरैर्वृतः ॥२॥
नगराद् बहिरीशान्यां दिशि देवा वितेनिरे ।
देशनासदनं स्वामी तदन्तर्निषसाद च ॥३॥
श्रुत्वा स्वामिनमायातं **पोतनाधिपतिर्नृपः** ।
प्रणान्तुमाययौ पौरसामन्तामात्यसंयुतः ॥४॥
प्रणम्योचितभूपीठप्रतिष्ठेषु नृपादिषु ।
स्वामी चकार वैराग्यदेशिनीं देशनामिति ॥५॥

"जन्तुभिः पतितैरस्मिन्नगाधे भवनीरधौ ।
कथञ्चिद् मानुषं जन्म प्राप्यते यानपात्रवत् ॥६॥
प्राप्यापि तरकाण्डं तद् गुरुं निर्यामकं विना ।
विना चारित्रमीहन्ते नानुकूलं किमप्यमी ॥७॥
इदं वारितदन्तादिभारमप्यङ्गवाहनम् ।
मृत्युभ्रष्टिं समारोप्य जरावात्या विनाशयेत् ॥८॥
तद् यावद् न जरावात्या मृत्युभ्रष्टिश्च न क्वचित् ।
तावच्चारित्रमादाय परं पारं प्रयात भोः !" ॥९॥
श्रुत्वेति देशनां सद्यो जातवैराग्यवैभवः ।
राजा व्रतमयाचिष्ट **वीरं** विरचिताञ्जलिः ॥१०॥
प्रतिबन्धं कृथा मेति नाथादेशादसावथ ।
गत्वा पुरे सुतं बालमपि राज्ये न्यवेशयत् ॥११॥
सुतेन सह साम्राज्यधुरामारोप्य मन्त्रिषु ।
स्वयं व्रतधुरां धीरो **वीरो**पज्ञां बभार सः ॥१२॥
तस्मादथ **महावीर**स्तेन राजर्षिणा सह ।
विहरन्नन्यदा प्राप पुरं **राजगृह**ाभिधम् ॥१३॥
वैभारोदयशैले श्रीजिनेश्वरदिनेश्वरः ।
जगतां जनितश्रेयोवासरः समवासरत् ॥१४॥
शैलपालात् तदाकर्ण्य राजा राजगृहेश्वरः ।
प्रचचाल प्रभुं नन्तुं सर्वर्द्ध्या सपरिच्छदः ॥१५॥
रङ्गदुत्तुङ्गमातङ्गमदामोदेन मेदिनीम् ।
वासयन् वासवः क्षोणेर्नगराद् निरगादयम् ॥१६॥
राज्ञोऽग्रसैनिकौ तस्य नाम्ना **सुमुख-दुर्मुखौ** ।
एकांह्रिणा तस्थिवांसं मुक्तौ गन्तुमिवोत्सुकम् ॥१७॥

लम्बितैकभुजं जन्तूनुद्धर्तुमिव दुर्गतेः ।
उदञ्चितैकपाणिं चोत्क्षेप्तुं तानेव सद्गतौ ॥१८॥

दिवाकरेऽपि मुकुर इव न्यस्तविलोचनम् ।
तन्मण्डलभिदा मार्गं मार्गन्तमिव मुक्तये ॥१९॥

धर्माम्भोबिन्दुभिश्छन्नं स्वर्णाचलमिवोडुभिः ।
सद्ध्यानमुद्रया कान्तं शान्तं ददृशतुर्मुनिम् ॥२०॥ कलापकम् ॥

तयोरेकतमोऽवादीदहो ! मुनिमतल्लजः ।
वन्दनीयो महात्मायं य एवं तप्यते तपः ॥२१॥

एकपादेन कस्तिष्ठेत् कः पश्येच्च खरत्विषम् ।
एवं मुहूर्तमप्येकमहो ! दुष्करकारिता ॥२२॥

स्वर्गो वाप्यपवर्गो वा नास्य दूरे महात्मनः ।
तपोभिर्दुस्तपैः किं किं नासाध्यमपि साध्यते ? ॥२३॥

द्वितीयोऽपि जगादैवं वयस्य ! न हि वेत्सि किम् ? ।
राजा **प्रसन्नचन्द्रो**ऽयं न धर्मऽस्य मुधा तपः ॥२४॥

चक्रेऽसौ हि सुतं बालं राज्ये तस्मात् स मन्त्रिभिः ।
प्रच्यावयिष्यते दुग्धात् तत्पिधानमिवौतुभिः ॥२५॥

तस्मिन्नुच्छेदिते बाले वंशो नास्त्यस्य सर्वथा ।
स्वपूर्वजन्मिनां नामनाशनादेष पातकी ॥२६॥

दुर्लभाः सुतपोभ्योऽपि लब्धा ह्येतेन याः स्त्रियाः ।
ता वियुज्य प्रव्रजितस्यास्य किं न तपो वृथा ? ॥२७॥

समाधिपादपे तद्वाग्वात्ययोन्मूलिते तदा ।
विच्छायश्चिन्तयामास राजर्षिरिति चेतसि ॥२८॥

"अहो ! तेषां मयाऽकारि सन्मानो यः कुमन्त्रिणाम् ।
स भस्मनि हुतं नूनमूषरे च प्रवर्षितम् ॥२९॥

मत्सूनोः क्षीरकण्ठस्य तैः सर्वैः पापकर्मभिः ।
राज्यमाच्छेत्तुमारेभे धिक् तान् विश्वस्तघातकान् ॥३०॥

जीवितेनामुना किं मे तपसा भूयसा च किम् ।
कर्णातिथिरभूदात्माङ्गभुवो यत्पराभवः ? ॥३१॥

तत्राहमभविष्यं चेत् तदा तेषां दुरात्मनाम् ।
अकरिष्यं नवनवैर्निग्रहैरनुशासनम् ॥३२॥

चरणस्खलनादेवमन्तःसंसारचत्वरम् ।
राजर्षिश्चलितः क्रोधभूतेनाभूदनीदृशः'' ॥३३॥

इहान्तरे नरेन्द्रोऽपि समायातः शमीश्वरम् ।
दृष्ट्वा तं सहसोत्तीर्य गजाद् भक्त्या नमोऽकरोत् ॥३४॥

उद्बाहुमेकपादस्थं तं दृष्ट्वाऽऽतापनापरम् ।
अन्वमोदिष्ट शुद्धात्मा राजा राजगृहेश्वरः ॥३५॥

राजर्षेस्तस्य तपसामुत्कर्षं तमनुस्मरन् ।
पर्षदि स्वामिनः प्राप पञ्चाभिगमनेन सः ॥३६॥

प्रभुं प्रणम्य पञ्चाङ्गं यथास्थानं निषद्य च ।
प्राप्य चावसरं राजा पप्रच्छेति कृताञ्जलिः ॥३७॥

ध्यानस्थः समये यत्र **प्रसन्नर्षि**र्मयैक्ष्यत ।
तत्रैव चेद् विपद्येत तत्कामासादयेद् गतिम् ? ॥३८॥

स्वाम्यूचे समये तत्र**ाप्रतिष्ठानं** व्रजेदयम् ।
राजा दध्यौ गतिः केयमस्योग्रतपसोऽपि हा ! ? ॥३९॥

नृपो भूयोऽपि पप्रच्छ समयेऽस्मिन्महामुनिः ।
स कालं यदि कुर्वीत कां लभेत ततो गतिम् ? ॥४०॥

प्रभुरूचेऽस्ति योग्योऽय**मनुत्तर**गतेर्नृप ! ।
राजापीति जगौ नाथ ! किमियं व्याकृतिर्द्विधा ? ॥४१॥

स्वाम्याचख्यौ यदा राजन् ! राजर्षिर्वन्दितस्त्वया ।
रौद्रध्यानी तदा सोऽभूत् शुक्लध्यानी तु सम्प्रति ॥४२॥
राजा प्राह पुनः स्वामिन् ! ममाज्ञस्य निवेदय ।
रौद्रध्यानी कथमभूत् शुक्लध्यानी कथं च सः ? ॥४३॥
"प्रभुरूचे च राजंस्त्वदग्रसैनिकवार्तया ।
शुश्रावाभिभवं सूनोर्मन्त्रिभ्यः स्वेभ्य एव सः ॥४४॥
स्पृष्टः सुतममत्वेन **प्रसन्नो** विस्मृतव्रतः ।
मनसा योद्धुमारेभे तैः समं क्रूरकर्मभिः ॥४५॥
प्रत्यक्षैरिव तैः साक्षाद् युद्धमानोऽधिकाधिकम् ।
निष्ठितास्त्रः **प्रसन्नो**ऽभूदप्रसन्नमनाः क्रुधा ॥४६॥
स संनद्धं स्वमज्ञासीदिति चाचिन्तयत् क्रुधा ।
शिरष्केणापि हन्म्येतान् सर्वं शस्त्रं हि दोष्मताम् ॥४७॥
ततश्च शिरसि न्यास्थच्छिरस्कादित्सया करम् ।
तल्लुञ्चितं स्पृशन्नात्तव्रतमात्मानमस्मरत् ॥४८॥
अचिन्तयच्च धिग् धिग्मां रौद्रध्याानुबन्धिनम् ।
किं तेन सूनुना किं तैरमात्यैर्निर्ममस्य मे ? ॥४९॥
इति चिन्तयतस्तस्य विलीने मोहदुर्दिने ।
विवेकभास्करः प्रादुरभूद् भूयोऽपि भासुरः ॥५०॥
भक्त्या तत्रैव वन्दित्वा सोऽस्मानग्रे स्थितानिव ।
आलोच्याथ प्रतिक्रम्य प्रशस्तं ध्यानमास्थित" ॥५१॥
प्रसन्नचन्द्रश्चिच्छेद शुक्लध्यानेन दुष्कृतम् ।
प्रदोषसंभवं ध्वान्तमुदयाद्रिरिवेन्दुना ॥५२॥
पप्रच्छ **श्रेणिको** भूयः प्रणम्य परमेश्वरम् ।
किमेष देवसंपातो दृश्यते द्योतिताम्बरः ? ॥५३॥

स्वाम्यप्याख्यत् **प्रसन्नर्षे**रुत्पन्नमिह केवलम् ।
कर्तुं च तन्महिमानममराः संपतन्त्यमी ॥५४॥

व्यापारेषु ध्रुवं चित्तव्यापारो बलवत्तरः ।
प्राप्य सप्तमीं यावज्जीवं नयति यः शिवम् ॥५५॥

श्रुत्वैवं **मगधपतिः** प्रमोदशाली व्याख्यान्ते स्वपुरमगाज्जिनं प्रणम्य । 5
राजर्षिः स तु भगवान् **प्रसन्नचन्द्रो** निर्निद्रोदयमपुनर्भवं जगाम ॥५६॥४६॥

॥ इति प्रसन्नचन्द्रराजर्षिकथा ॥

● ● ●

अथ **कूरगडुक**महर्षिगुणोत्कर्षमुद्घोषयन्नाह –

सा कावि खमा तं किं पि मद्दवं अज्जवं च तं किं पि ।
जह कूरगडुयमहेसिणो समत्ताइं कज्जाइं ॥४७॥

[सा कापि क्षमा तत् किमपि मार्दवमार्जवं च तत्किमपि ।
यथा कूरगडुकमहर्षेः समाप्तानि कार्याणि ॥]

व्याख्या – इह हि वचनगोचरातीता अपि **कूरगडुक**मुनेः क्षमामार्दवार्जवादयो गुणस्तदीयतात्कालिकलोकोत्तरफलसंपत्तिस्मृतिपात्रस्य कवेरनुभवैकसाध्यसदर्थेन प्रसिद्धार्थेन तच्छब्देनैवोक्ताः । अतः पदार्थः स्पष्टः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ **क्षितिप्रतिष्ठितं** नाम्ना क्षतानीतिप्रतिष्ठितम् ।
पुरमेत्य पुरा प्रावृष्याचार्याः केऽपि तस्थिरे ॥१॥
तदीयः **क्षपकः** कश्चित् **क्षुल्लके**नानुगामिना ।
बहिर्भूमौ व्रजन् भेकीं प्रमादेनांह्रिणाऽशृणात् ॥२॥
इयं भेकी विवेकीश ! त्वया हन्त ! हता मुने ! ।
इत्युक्तः **क्षुल्लके**नायं दर्शयन् गणशोऽपराः ॥३॥
जनलज्जावशादूचे दुष्ट रे शिष्यपांशन ! ।
किमेषापि किमेषापि किमेषापि मया हता ? ॥४॥ युग्मम् ॥
प्रतिक्रमणवेलायामयमालोचयिष्यति ।
विमृश्येति स्थितस्तूष्णीं **क्षुल्लो**ऽपि विनयी नयी ॥५॥
स तमावश्यकेऽप्याह तदनालोचनाकृतम् ।
महर्षे ! धर्षितां भेकीमालोचयसि किं न हि ? ॥६॥
अहो ! विगोपयत्यन्तः साधूनामपि मामयम् ।
तदेनमात्मना हन्मि यथा बूत्कुरुतेऽपि न ॥७॥

ध्यात्वेति **क्षुल्लकं** हन्तुं धावन्नुद्यम्य विष्टरम् ।
सोऽन्तरा मर्मणि स्तम्भास्फालितो न्यपतद् भुवि ॥८॥

हा ! जीवेहैव कोपद्रुफलं भुङ्क्ष्वाधमाधम ! ।
इति स्वं गर्हयन् सोऽथ मृत्वा **ज्योतिष्क**देव्यभूत् ॥९॥

इतश्च पुरमस्त्येकं **वसन्तपुर**सञ्ज्ञितम् । 5
तत्रा**रिदमनो**ऽन्वर्थाभिधानः पार्थिवोऽभवत् ॥१०॥

पुत्रस्तस्यैकपुत्रस्य स्वगृह्योपवनेऽन्यदा ।
पुष्पाणि पाणिना चिन्वन् दष्टो दुष्टेन भोगिना ॥११॥

तन्मत्वा दुःखितो राजा पटहेनेत्यघोषयत् ।
संजीवयति यः पुत्रं स मे राज्यार्धमर्हति ॥१२॥

ततो गारुडिकः कश्चिद् नृपमेत्याशु मण्डलम् । 10
सर्पाकृष्टिकृतेऽलेखीद् गन्ध**नागन्धनाभिधम्**[1] ॥१३॥

पर्यङ्कासनबन्धेन कृतनिर्दम्भकुम्भकः ।
स सर्पाकर्षिणीं विद्यां सभृकुटिकमस्मरत् ॥१४॥

तया सुस्फुरयाकृष्टाः फणिनः पुरवासिनः ।
गन्ध**नागन्धन**कुलाः स्वं स्वं मण्डलमापतन् ॥१५॥ 15

अथाह मान्त्रिकः सर्पानाक्षिप्याक्षतमुष्टिना ।
मुक्त्वापराधिनमरे ! परे यान्तु निरागसः ॥१६॥

यथागतमगुः सर्पास्ततस्ते ये निरागसः ।
स एवैकः स्थितो येन राजसूनुरदश्यत ॥१७॥

मान्त्रिकोऽग्निचितां कृत्वा तत्र चाहिं तमब्रवीत् । 20
स्वमादत्स्व विषं दंशादहे ! वा दहने विश ॥१८॥

अगन्धनकुलीनत्वाद् न वान्तमपिबद् विषम् ।
सर्पोऽयं त्वविशद्वह्निमेकरूपा हि मानिनः ॥१९॥

---

१. ख. °नाहिकम् ।

मृते पुत्रेऽथ राजापि सर्पजातौ समत्सरः ।
ददौ दीनारमेकैकं सर्पतुण्डच्छिदं प्रति ॥२०॥

जामदग्न्य इव क्षत्त्रानहीनुत्खातुमुद्यतः ।
असर्पीं कर्तुमारेभे स एवमवनीं नृपः ॥२१॥

इतश्च क्षपकात्मा स **ज्योतिष्के**भ्यश्च्युतस्तदा ।
दृग्विषाहिकुले सर्पो देवताधिष्ठितोऽभवत् ॥२२॥

सैष जातिस्मृतिज्ञानो मद्दृष्ट्या मा स्म भस्मसात् ।
अवन्तु जन्तव इति भ्राम्यति स्म दिवा न हि ॥२३॥

दयालुर्न त्रसानश्नाद् निशायां निःसृतोऽपि सः ।
पायं पायं तु पवनान् प्रातः प्रातर्बिलेऽविशत् ॥२४॥

अन्यदा राजदीनारलुब्धः पन्नगलुब्धकः ।
विलोक्य घर्षणं तस्य विवेद विपिने बिलम् ॥२५॥

तेनौषधी बिलद्वारे मुक्ता द्रागहिकर्षिणी ।
तयाकृष्यत सर्पोऽयमयस्कान्तेन लोहवत् ॥२६॥

मद्दृष्ट्या मा स्म दह्यन्तां जीवा इति कृपावशात् ।
निस्ससार महात्माऽसौ पुच्छपक्षेण पन्नगः ॥२७॥

यावान् यावान् निरायिष्ट तावांस्तावानयं जवात् ।
खण्डशः क्रियते स्माहितुण्डिकेन दुरात्मना ॥२८॥

खण्ड्यमानमिदं नाङ्गमस्ति किन्तु विकर्म ते ।
शुभोदर्कामिमां पीडां रे ! जीवाधिसहस्व तत् ॥२९॥

इति ध्यायन्नमस्कारपरः पञ्चत्वमाप्य सः ।
तस्यैव भूपतेः पत्न्यां पुत्रत्वेनोदपद्यत ॥३०॥

तदा च तदधिष्ठात्री स्वप्ने धात्रीशमब्रवीत् ।
राजन् ! मा स्म वधीः सर्पान् पुत्रस्ते भविताऽचिरात् ॥३१॥

पुत्रस्य नाम दातव्यं **नागदत्त** इति त्वया ।
इत्याख्याय महीशाय देवता सा तिरोदधे ॥३२॥

राजापि द्वैधमप्याप प्रबोधं तमसोऽत्यये ।
राज्ञी तु पूर्यमाणेष्टदोहदा गर्भमावहत् ॥३३॥
असूत च क्रमात् पुत्रमसौ प्राचीव भास्करम् ।
नागदत्तं च तं राजाऽभ्यधत्तोत्सवपूर्वकम् ॥३४॥
धात्रीभिर्गुणपात्रीभिः पाल्यमानोऽयमर्भकः । 5
पञ्चभिर्विषयेच्छाभिरिव कामो व्यवर्धत ॥३५॥
स पञ्चवार्षिकः पित्रा पण्डितेभ्यः समर्पितः ।
बालेन्दुरिव वर्धिष्णुरग्रहीदुज्ज्वलाः कलाः ॥३६॥
एकदा बहिरुद्याने गतेन शिशुनामुना ।
वन्दिताः सूरयस्तेभ्यः शुश्रुवे धर्मदेशनाम् ॥३७॥ 10
प्रकृत्योपशमी सोऽयं श्रुत्वोपशमदेशनाम् ।
संविग्नमानसो दीक्षामयाचिष्ट गुरूनथ ॥३८॥
गुरुरूचेऽस्ति चेद् वत्स ! व्रतेच्छा पृच्छ तन्निजौ ।
पितरौ तन्मतायाशु तुभ्यं दास्यामहे व्रतम् ॥३९॥
ततो नत्वा गुरून् गत्वा सोऽपृच्छत् पितराविति । 15
तात ! मातरहं किञ्चिद् याचे वां पुत्रवत्सलौ ॥४०॥
तावूचतुरिदं सर्वे तवैव किमु याचसे ? ।
राज्यादपि परं किञ्चिदस्ति चेद् ब्रूहि वत्स ! ॥४१॥
सोऽभ्यधत्त प्रणम्यैतौ दीक्षां दापयताऽद्य मे ।
तौ तु वाक्छलमात्मीयं निन्दन्ताविदमूचतुः ॥४२॥ 20
क्व तात ! व्रतकष्टं तत् क्व च ते कोमलं वपुः ? ।
रम्भास्तम्भो गृहस्तम्भः क्रियते क्वापि पुत्रक ! ? ॥४३॥
स्मित्वाऽवादीदयं केयं दयाऽङ्गस्य प्रयास्यतः ।
दयां कुरुत मे मुक्तिफलं दापयत व्रतम् ॥४४॥

अथैतौ निग्रहस्थानपतिताविव वादिनौ ।
तं व्रतायान्वमन्येतां तत्र प्रत्युत्तरासहौ ॥४५॥

नागदत्तस्ततः पित्रा कृतनिष्क्रमणोत्सवः ।
मुदाऽऽदत्त परिव्रज्यां सुसाधुगुरुसंनिधौ ॥४६॥

सिंहत्वेन विनिष्क्रम्य विस्मापितजगत्त्रयः ।
सिंहत्वेनैव गुरुभिः सहोर्व्यां विजहार सः ॥४७॥

स तु प्राक्तनतिर्यक्त्वानुभावेन क्षुधालुकः ।
कूरगडुक इत्यन्यनामा जेमन्नभूद् मुहुः ॥४८॥

ज्ञानदर्शनचारित्राण्यस्योदीयुः क्षुधा समम् ।
इन्दोरिव सहाङ्केन स्कन्धदेशप्रदेशकाः ॥४९॥

चत्वारो देवतावन्द्या गच्छेऽत्र क्षपकोत्तमाः ।
एकद्वित्रिचतुर्मासान् क्षपन्ति स्म क्रमेण ते ॥५०॥

यावज्जीवं च तद्वैयावृत्त्याभिग्रहमग्रहीत् ।
मत्वा तत्पुण्यमक्षय्यं बालर्षिः **कूरगडुकः** ॥५१॥

बुभुक्षत्यैकदा तेषां मुनीनां खेलमल्लकाः ।
परिष्ठापयितुं तस्य व्यस्मर्यन्त महात्मनः ॥५२॥

विहृत्य शीतले भानूदये चायमुपागतः ।
मुनीन्निमन्त्रयामास मासक्षपणिनस्तदा ॥५३॥

ते तु खुङ्कृत्य जगदुः कोपिनस्तं प्रमद्वरम् ।
भोजनैकस्मृते ! खेलं क्षिपामः क्वेति शंसिनः ॥५४॥

ततो निमन्त्रणायाविष्कृते तत्पात्र एव ते ।
क्षपकाः खेलममुचन् गरलं पन्नगा इव ॥५५॥

तन्मुखाब्जच्युतं खेलं मन्वानो मकरन्दवत् ।
स क्षमापक्ष्मलस्वान्तश्चिन्तयामासिवानिति ॥५६॥

''परिष्ठापयितुं खेलमल्लकान् व्यस्मरं हहा ! ।
निष्ठेवितुं न कल्पेतां वासिते खेलमल्लके ॥५७॥
मया प्रमद्वरेणैषामन्यभक्तिरपि क्षता ।
यददातुः प्रियालापोऽन्यत्र लाभान्तरायिकम् ॥५८॥
अशनव्यसनं धिग्मां पशुवद् ग्रासलालसम् ।
क्षुत्परीषहसोढारस्त्वमी धन्यास्तपोधनाः ॥५९॥
सिच्यमानो रसैरात्मा सार्द्रतुम्बमिव ब्रुडेत ।
तेनैते शोषयन्ति स्वं तितारयिषवो भवात् ॥६०॥
क्षान्त्या तितउनेवैवं चालयन् प्राक्तनं रजः ।
स लेभे केवलं रत्नं लोकालोकप्रकाशकम्'' ॥६१॥
तदा शासनदेव्यागाद् नमश्चक्रे च तं मुनिम् ।
क्षपकास्तद् विलोक्यैतामभाषन्तोन्मिषत्क्रुधः ॥६२॥
हित्वा तपोधनानस्मानद्य त्वं कटपूतने ! ।
अमुं कथमवन्दिष्ठा रे क्रूरे ! **कूरगडुकम्** ? ॥६३॥
सोचे पवित्रमस्याभूज्ज्ञानमप्रतिपातिकम् ।
अवन्दिषमहं तेन वन्दध्वं यूयमप्यमुम् ॥६४॥
ततस्ते विस्मयानन्दविषादभरभाविताः ।
तस्य केवलिनः पादाम्बुजेऽभूवन्मधुव्रताः ॥६५॥
तेषामपि तदात्मानं निन्दतामभिगर्हताम् ।
विलिल्यिरे विकर्माणि प्रादुरासीच्च केवलम् ॥६६॥
देवा दुन्दुभिनादपूर्वमवनीं गन्धोदकोपस्कृतां
कुर्वन्तः समुपेत्य केवलमहं कृत्वा च जग्मुर्दिवम् ।
कालात् केवलिनः प्रपञ्चितरुचो धर्मस्य पञ्चापि ते
साम्राज्याय शुभग्रहा इव जगत्युच्चैः स्थिता जज्ञिरे ॥६७॥४७॥

॥ इति कूरगडुकमुनिकथा ॥

● ● ●

प्रणतिपूर्वमभयकुमारानगारगुणभारमथ विस्तारयन्नाह —

खंडियमोहपगारं अभयकुमारं नमामि अणगारं ।
अज्ज वि जस्स मईओ जणस्स चित्ते चमक्कंति ॥४८॥

[खण्डितमोहप्राकारमभयकुमारं नमाम्यनगारम् ।
अद्यापि यस्य मतयो जनस्य चित्तं चमत्कुर्वन्ति ॥]

व्याख्या — **अभयकुमार**नामान**मनगारं** महर्षि **नमामि** नमस्करोमि । किंविशिष्टम् ? 'खंडियमोहपगारं' **खण्डित**श्चूर्णीकृतो **मोहो** मूढतैव मुक्तिपुरीप्रवेशे प्रत्यूहकारः **प्राकारः** शालो येन, यद्वा, **खण्डितो**ऽवगणितो **मोहस्य प्रकृष्टो** महतामप्यलङ्घ्य **आकारो** घाटः साम्राज्यलोभमयो येन स तथा **तम्** । यस्य किम् ? **मतय** औत्पातिकी-वैनयिकी-कर्मजा-पारिणामिकीतिसंज्ञाश्चतस्रो बुद्धयः तथाहि सिद्धान्तः—

"[१]**उप्पत्तिया वेणइया कम्मया परिणामिया ।**
बुद्धी चउव्विहा वुत्ता पंचमा णोवलब्भइ ॥१॥ [उ.प./३८]
पुव्वमदिट्ठमसुयमवेइअतक्खणविसुद्धगहियट्ठा ।
अव्वाहयफलजोगा बुद्धी उप्पत्तिया नाम ॥२॥ [उ.प./३९]
भरनित्थरणसमत्था तिवग्गसुत्तत्थगहियपेयाला ।
उभउलोगफलवई विणयसमुत्था हवइ बुद्धी ॥३॥ [उ.प./४३]
उवओगदिट्ठसारा कम्मपसंगपरिघोलणविसाला ।
साहुक्कारफलवई कम्मसमुत्था हवइ बुद्धी ॥४॥ [उ.प./४६]
अणुमाणहेउदिट्ठंतसाहिया वयविवागपरिणामा ।
हियनिस्सेयसफलवई बुद्धी परिणामिया नाम" ॥५॥ [उ.प./४८]

---

१. औत्पातिकी वैनयिकी कर्मजा पारिणामिकी । बुद्धिश्चतुर्विधोक्ता पञ्चमी नोपलभ्यते ॥१॥
पूर्वादृष्टाश्रुताविदिततत्क्षणविशुद्धगृहीतार्था । अव्याहतफलयोगा बुद्धिरौत्पातिकी नाम ॥२॥
भरनिस्तरणसमर्था त्रिवर्गसूत्रार्थगृहीतप्रमाणा । उभयलोकफलवती विनयसमुत्था भवति बुद्धिः ॥३॥
उपयोगदृष्टसाराः कर्मप्रसङ्गपरिघोलनविशाला । साधुकारफलवती कर्मसमुत्था भवति बुद्धिः ॥४॥
अनुमानहेतुदृष्टान्तसाधिका वयोविपाकपरिणामा । हितनिःश्रेयसफलवती बुद्धिः पारिणामिकी नाम ॥५॥

इत्येताः 'अज्ज वि' **अद्यापि** बहुधा श्रुता अपीति भावः, **जनस्य** लोकस्य '**चित्ते**' मनसि 'चमक्कंति' **चमत्कुर्वन्त्या**श्चर्यं जनयन्तीति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चैतत् –

§§ अस्ति **राजगृहं** नाम पुरं तत्राभवद् नृपः ।
प्रसेनजिदिति ख्यातः प्रतापी भानुमानिव ॥१॥

तस्यासन् सूनवो नैके **श्रेणिका**द्या महौजसः ।
पयोधेरिव भास्वन्तो मणयः कौस्तुभादयः ॥२॥

अन्यदा तु स्वपुत्राणां राज्यार्हत्वं परीक्षितुम् ।
भोज्याय पायसस्थालानेकत्रादीदपद् नृपः ॥३॥

प्रवृत्तेषु ततो भोक्तुं कुमारेषु कुशाग्रधीः ।
सारमेयानयं सिंहसारमेयानमूमुचत् ॥४॥

कुमारा द्रुतमुत्तस्थुः कुक्कुरेष्वापतत्स्वथ ।
तथैव **श्रेणिक**स्त्वस्थाच्चलितोऽडुष्विव ध्रुवः ॥५॥

स्तोकं स्तोकं ददौ सोऽन्यस्थालेभ्यः पायसं शुनाम् ।
यावल्लिलिहिरे ते तत् तावच्च बुभुजे स्वयम् ॥६॥

येन केनाप्युपायेन परानेष निरोत्स्यति ।
भोक्ष्यते च स्वयं राज्यं राजा तेनेति रञ्जितः ॥७॥

राज्यार्हमानिनो मैनं महान्तं ज्ञासिषुः परे ।
इत्यवज्ञाय तं देशान् कुमारेभ्यो ददौ नृपः ॥८॥

ततोऽभिमानी स्वपुराद् निःसृत्य **श्रेणिको** गतः ।
बेन्नातटपुरे **भद्र**श्रेष्ठिनोऽट्टमुपाविशत् ॥९॥

प्रभूतक्रायकैः श्रेष्ठी सोऽभवद् व्याकुलस्तदा ।
कुमारोऽप्यार्पयद् बद्ध्वा तत्पुटपुटिकादिकम् ॥१०॥

द्रव्यं माहात्म्यतस्तस्य श्रेष्ठी भूयिष्ठमार्जयत् ।
भानोः प्रभावतः किं न लभते मुकुरः प्रभाम् ॥११॥

अद्यावितथपुण्यस्य कस्यातिथिरसीत्ययम् ।
श्रेणिकः श्रेष्ठिना पृष्टो भवतामित्यभाषत ॥१२॥
नन्दायोग्यो वरो दृष्टः स्वप्ने योऽयं स एव सः ।
इति श्रेष्ठी हृदि ध्यायन् धन्योऽहमिति चाब्रवीत् ॥१३॥
संवृत्याट्टमथ श्रेष्ठी तं नीत्वा च स्ववेश्मनि ।
स्नपयित्वा परिधाप्य सगौरवमभोजयत् ॥१४॥
पाणिग्रहं च **नन्दा**याः स्वनन्दिन्याः परेद्यवि ।
श्रेष्ठिना कारितो भोगानभुङ्क्त स तया सह ॥१५॥
इतश्चाकस्मिकं रोगं प्राप्य राजा **प्रसेनजित्** ।
तज्ज्ञः **श्रेणिक**माह्वातुं शीघ्रमादिक्षदौष्ट्रिकान् ॥१६॥
औष्ट्रिकेभ्यः परिज्ञाय पितुरत्यर्तिमुत्सुकः ।
नन्दां संबोध्य सस्नेहं प्रतस्थे **श्रेणिक**स्ततः ॥१७॥
वयं पाण्डुरकुट्यां गोपाला **राजगृहे** पुरे ।
आह्वानमन्त्रप्रतिभान्यक्षराणीति चार्पयत् ॥१८॥
गत्वा च **श्रेणिको** राजगृहे राजानमानमत् ।
साम्राज्यदीक्षितं कृत्वा तं राजापि ययौ दिवि ॥१९॥
विश्वं विश्वंभराभारं बभार **श्रेणिक**स्ततः ।
तेन गर्भवती मुक्ता गर्भं **नन्दा** च दुर्वहम् ॥२०॥
तस्या दोहद इत्यासीद् गजारूढा शरीरिणाम् ।
महाभूत्योपकुर्वाणा भवाम्यभयदा यदि ॥२१॥
विज्ञपय्याथ राजानं तत्पित्राऽपूरिदोहदः ।
पूर्णे काले च सासूत सुतं चन्द्रमिवेन्द्रदिक् ॥२२॥
दोहदार्थानुसारेण तस्याथ दिवसे शुभे ।
चकार**ाभयकुमार** इति मातामहोऽभिधाम् ॥२३॥

क्रमादधीतविद्योऽष्टवर्षोऽमर्षेण केनचित् ।
अतर्ज्यतैष कोऽसि त्वं पिता यस्य न विद्यते ॥२४॥

ऊचेऽ**भयकुमार**स्तं ननु **भद्रः** पिता मम ।
त्वन्मातुः स पिता तेनोदिते **नन्दां** जगाद सः ॥२५॥

भद्रस्तव जनको मातर्मदीयं जनकं वद ।
पुत्रेणेत्युदिते **नन्दा** निरानन्देदमब्रवीत् ॥२६॥

देशान्तरादुपेतेन परिणीतास्मि केनचित् ।
मम च त्वयि गर्भस्थे तमीयुः केचिदौष्ट्रिकाः ॥२७॥

रहः स किञ्चिदुक्त्वा तैः सहैव क्वचिदप्यगात् ।
अद्यापि तं न जानामि कुतस्त्यः कश्चिदित्यहम् ॥२८॥

स यानुवाच किञ्चित्त्वामिति पृ**ष्टाभयेन** सा ।
अक्षराण्यर्पितान्येतानीति पत्रमदर्शयत् ॥२९॥

तद्विभाव्य**ाभयः** प्रीतोऽब्रवीद् मम पिता नृपः ।
पुरे **राजगृहे** तत्र गच्छावो ननु सम्प्रति ॥३०॥

आपृच्छ्य श्रेष्ठिनं **भद्रं** सामग्रीसंयुतस्ततः ।
नान्देयो नन्दया सार्धं ययौ **राजगृहं** पुरम् ॥३१॥

मातरं बहिरुद्याने विमुच्य सपरिच्छदाम् ।
आत्मनात्मपरीवारः प्रविवे**शाभयः** पुरे ॥३२॥

इतश्च मन्त्रिणां क्लृप्तमेकोनशतपञ्चकम् ।
तत्पूर्तौ **श्रेणिकः** कञ्चिदुत्कृष्टमगवेषयत् ॥३३॥

ततश्च तत्परीक्षार्थं शुष्ककूपे निजोर्मिकाम् ।
नृपश्चिक्षेप लोकांश्च पटहेनेदमादिशत् ॥३४॥

आदास्यते करेणैतामूर्मिकां यस्तटस्थितः ।
तस्य धीकौशलक्रीता मदीया मन्त्रिधुर्यता ॥३५॥

तदाकर्ण्यजनाः प्रोचुः कूपकण्ठगता इति ।
पाणिनेन्दुं य आदत्ते स इमामूर्मिकामपि ॥३६॥

ततोऽ**भयकुमारो**ऽपि संप्राप्तस्तत्र सस्मितम् ।
ऊचे किं गृह्यते नैषा किमेतदतिदुष्करम् ? ॥३७॥

तं दृष्ट्वा च जना दध्युः कोऽप्यसावतिशायिधीः ।
समये मुखरागो हि नृणामाख्याति पौरुषम् ॥३८॥

ऊचुस्ते तं गृहाणेमामूर्मिकां तत्पणीकृताम् ।
यदीच्छसि श्रियं राज्ञो धुर्यतां चास्य मन्त्रिषु ॥३९॥

ततोऽ**भयकुमारो**ऽपि मुद्रिकां कूपमध्यगाम् ।
आर्द्रगोमयपिण्डेन निजघानोपरिस्थितः ॥४०॥

स निजौत्पातिकीबुद्धेर्न्युञ्छनीभूतमुच्चकैः ।
तोयचक्रभ्रमायातं गोमयं पाणिनाऽऽददे ॥४१॥

तत्परिज्ञाय चारक्षैराजुहा**वाभयं** नृपः ।
आलिलिङ्ग च तं पुत्रप्रतिपत्त्या प्रमोदभाक् ॥४२॥

कुतस्त्वमागतोऽसीति पृष्टः **श्रेणिक**भूभुजा ।
अभयः प्राह सम्प्राप्तो **बेन्नातट**पुरादहम् ॥४३॥

राजाऽभ्यधत्त भद्रास्य ! तत्र **भद्र** इति श्रुतः ।
श्रेष्ठी किमस्ति किं चास्य **नन्दा**नाम्नी च नन्दिनी ? ॥४४॥

अस्तीत्युक्तोऽमुना राजा प्राह **नन्दो**दरिण्यभूत् ।
किं जातं, सोऽभ्यधात् पुत्रं सासू**ताभय**सञ्ज्ञितम् ॥४५॥

किंरूपः किंगुणः सोऽस्तीत्युदिते सति भूभुजा ।
ऊचे ह्यसौ स एवाहं स्वामिन्नस्मीति चिन्त्यताम् ॥४६॥

राजा तमङ्कमारोप्यालिङ्ग्याघ्राय शिरस्यथ ।
प्राहानन्दाश्रुमान् वत्स ! माता कुशलिनी तव ? ॥४७॥

अभयोऽप्याह भृङ्गीव त्वत्पादाम्भोजकाङ्क्षिणी ।
स्वामिन्नायुष्मती मेऽम्बा बाह्योद्यानेऽस्ति सम्प्रति ॥४८॥

ततो **नन्दां** समानेतुमानन्दा**दभयं** पुरः ।
प्रस्थाप्य स्वयमुत्कण्ठोत्सुकोऽथागाद् महीपतिः ॥४९॥

अनञ्जनाक्षीं शिथिलवलयां लुलितालकाम् ।
ददर्श राजा सानन्दो **नन्दा**मुद्यानवासिनीम् ॥५०॥

नन्दामानन्द्य नगरं प्रविश्य च महीपतिः ।
पट्टराज्ञीपदे चक्रे **जानकी**मिव **राघवः** ॥५१॥

पुत्रीं स्वसुः **सुसेना**या मुख्यतां चापि मन्त्रिषु ।
राज्यार्धसंपदा साक**मभया**य ददौ नृपः ॥५२॥

भर्तृभक्त्या**ऽभयः** स्वस्मिन् पदातिपरमाणुताम् ।
मन्वानः साधयामास दुःसाध्यानपि भूभुजः ॥५३॥

॥ इत्यभयकुमारकथायामौत्पातिकीबुद्धिनिबन्धनं नाम प्रथमः प्रकाशः ॥

● ● ●

§§ इतश्च श्रीविशालास्ति **वैशाली**ति पुरी वरा ।
तत्र चेटीकृतारातिनृपोऽभुच्**चेटको** नृपः ॥१॥

पृथग्राज्ञीभवास्तस्य बभूवुः सप्त कन्यकाः ।
तत्प्रतापोच्छलत्सप्तार्चिषो ज्वाला इवोज्ज्वलाः ॥२॥

प्रभावती पद्मावती मृगावती शिवापि च ।
तथैव **ज्येष्ठा सुज्येष्ठा चिल्लणा** चेति ताः क्रमात् ॥३॥

प्रभावती वीतभयेश्वरोदायनभूपतेः ।
पद्मावती तु **चम्पेश**दधिवाहनभूभुजः ॥४॥

कौशाम्बीशशतानीकनृपस्य तु **मृगावती** ।
शिवा तूज्जयिनीशस्य **प्रद्योत**पृथिवीपतेः ॥५॥

कुण्डग्रामाधिनाथस्य **नन्दिवर्धन**भूभुजः ।
श्री**वीर**नाथज्येष्ठस्य**ज्येष्ठा** दत्ता यथाक्रमम् ॥६॥

सुज्येष्ठा चिल्लणा चापि कुमार्यावेव तस्थतुः ।
रूपश्रियोपमाभूते ते मिथो बिम्बिते इव ॥७॥

कलाकलापकुशले श्रुतार्थोपनिषद्विदौ ।
मूर्ती इव **सरस्वत्या**स्ते रेमाते परस्परम् ॥८॥

अपरेद्युश्च **सुज्येष्ठा-चिल्लणा**भ्यामलङ्कृतम् ।
कन्यान्तःपुरमभ्यागादेका स्थविरतापसी ॥९॥

सा च व्याचष्ट धर्मं स्वं मिथ्यात्वद्रुमसारणिः ।
उत्फुल्लगल्लमज्ञानपर्षदीव तयोः पुरः ॥१०॥

सुज्येष्ठा तु गुणश्रेष्ठा तस्या धर्मं निराकरोत् ।
श्रुतकूपनिपानाभैर्वचोभिर्युक्तिवर्मितैः ॥११॥

स्वस्वामिनीजयोन्मत्तास्तामन्तःपुरचेटिकाः ।
उत्तालतुमुलाः कण्ठे गृहीत्वा निरवासयन् ॥१२॥

उपादातुं गता दातुं पतितेवाथ तापसी ।
पूजार्थिन्यागता सैवं प्रत्युतानर्थमासदत् ॥१३॥

यान्ती च तापसी दध्याविमां वैदुष्यगर्विताम् ।
भूयसीषु सपत्नीषु दुःखपात्रीकरोम्यहम् ॥१४॥

सुज्येष्ठारूपमित्येषा लिखित्वा चित्रपट्टके ।
श्रेणिकायोपनिन्येऽथ गत्वा **राजगृहे** पुरे ॥१५॥

तां दृष्ट्वा लिखितां रूपमुषितामरनायिकाम् ।
राजा **राजगृहा**धीशः प्राशंसद् धूनयन् शिरः ॥१६॥

अपृच्छच्च शुभे ! केयं किंकुला कस्य नन्दिनी ।
कुमारी परिणीता वा कां पुरीमधितिष्ठति ? ॥१७॥

तापसी कथयामास **सुज्येष्ठेयं** कलानिधिः ।
विशालेशसुता कन्योद्वोढुमेतां त्वमर्हसि ॥१८॥
विसृज्य तापसी तस्थौ कथञ्चिदथ पार्थिवः ।
पक्षौ विधाय **वैशाल्यां** यियासुरिव तां स्मरन् ॥१९॥
दूतेन प्रार्थयामास **सुज्येष्ठां चेटका**दयम् ।
न दास्ये **श्रेणिका**येमां **चेटको**ऽपीति चावदत् ॥२०॥
दूतेनाथ तथाख्याते **श्रेणिकं** खिन्नमभ्यधात् ।
अभयस्तात ! मा शोचीः करिष्ये वः समीहितम् ॥२१॥
इति वैनयिकीबुद्ध्याऽभिधायैत्यगृहेऽभयः ।
चित्रूपो रुपमलिखत् फलके **मगधेशितुः** ॥२२॥
ततो गुटिकया वर्णस्वरभेदं विधाय सः ।
वणिग्वेषं गृहीत्वा च **वैशाली**ं नगरीं ययौ ॥२३॥
उप**चेटक**राजान्तःपुरं चापणमग्रहीत् ।
तत्रान्तःपुरचेटीनां क्रेतव्यमधिकं ददौ ॥२४॥
अभयश्चार्ययन्नित्यं **श्रेणिकं** लिखिते पटे ।
दासीपृष्टोऽयमाचख्यौ देवो मे **श्रेणिको** नृपः ॥२५॥
दास्यश्च कथयामासुः **सुज्येष्ठा**यै सविस्मयाः ।
रूपं तादृग्यथादृष्टं **श्रेणिक**स्यातिदैवतम् ॥२६॥
ज्येष्ठदास्या समानाय्य पटकं कौतुकेन तत् ।
ध्यायन्त्यासीच्च निश्चेष्टा **सुज्येष्ठा** योगिनीव सा ॥२७॥
जगाद् च क्षणं स्थित्वा गत्वा रहसि सत्वरम् ।
गूढाभिप्रायसर्वस्वनिधानवसुधां सखीम् ॥२८॥
यस्येदं फलके रूपं धीमतीच्छामि तं पतिम् ।
तत्संघट्टयितुं त्वेनं विधिभट्टारकोऽस्तु कः ? ॥२९॥

यद्ययं मे पतिर्न स्यात् तदानीं हृदयं सखि ! ।
द्विधा[१] भविष्यति नूनं दाडिमं व पचेलिमम् ॥३०॥

तद्भद्रे ! क इहोपाय उपायो यदि वाऽस्त्ययम् ।
शरणं वणिगेवैष य एतद्रूपमर्चति ॥३१॥

सुज्येष्ठादास्यथावादी**दभयं** सोऽपि तां जगौ ।
अचिरात् पूरयिष्यामि स्वामिन्यास्ते मनोरथम् ॥३२॥

सुरङ्गां खानयिष्यामि तमानेष्ये यथा रयात् ।
अधिष्ठेयश्च तत्कालं त्वत्सामिन्यापि तद्रथः ॥३३॥

स्थानेऽमुष्मिन् दिनेऽमुष्मिन् क्षणेऽमुष्मिन् सुरङ्गया ।
राजैष्यतीति संकेतं तन्मुखे**नाभयो** ददौ ॥३४॥

दासी तस्य तदाख्यायागत्य **चाभय**मब्रवीत् ।
प्रमाणं त्वद्वच इति पुनश्चान्तःपुरं ययौ ॥३५॥

अभयोऽपि हि सङ्केतकथाख्यापनपूर्वकम् ।
पितृप्रयोजनप्रह्व आह्वत् पितरमाश्वपि ॥३६॥

सुज्येष्ठा तत्प्रभृत्येव स्मरन्ती **श्रेणिकं** नृपम् ।
प्रभूतां प्रापदरतिं रतिनाथवशंवदा ॥३७॥

अन्यदा त्वह्नि निर्णीते **श्रेणिकः सुलसा**सुतैः ।
सब्रह्मचारिभिर्दिव्यानुभावादेकनालजैः ॥३८॥

प्रसेनजित्सुह्नागरथिकस्य सुतैः श्रुतैः ।
द्वात्रिंशता समं प्राप सुरङ्गात्मा सुरङ्गया ॥३९॥ युग्मम् ॥

सुरङ्गानिर्गतं प्रेक्ष्य **सुज्येष्ठा मगधेश्वर**म् ।
चित्रदृष्टानुसारेणोपलक्ष्य मुमुदेतराम् ॥४०॥

साख्याय सर्ववृत्तान्तमापप्रच्छाथ **चिल्लणा**म् ।
प्रत्यज्ञासीच्चिल्लणापि स्थास्यामि त्वदृते न हि ॥४१॥

---

१. ग. ध. पचेलिममिवैर्वारु द्विधा नूनं भविष्यति ।

रथमारोपयदथ **सुज्येष्ठा चेल्लणां** पुरः ।
स्वयं चागात् समानेतुं द्रुतं रत्नकरण्डिकाम् ॥४२॥

न स्थातुमुचितं वैरिगृहे चिरमितीरिभिः ।
प्रेरितोऽनुचरैर्लात्वा **चेल्लणां** ववले नृपः ॥४३॥

सुज्येष्ठाऽऽगादितो यावत् तावत् तं **मगधेश्वरम्** । 5
न ददर्श घनच्छन्नमिव चन्द्रचकोरिका ॥४४॥

तदा चाऽपूर्णकामत्वाद् भगिनीहरणादपि ।
साऽरटद् मुष्टमुष्टाऽस्मि ह्रियते हन्त ! **चेल्लणा** ॥४५॥

तत**श्चेटक**मुद्यान्तं रथी **वैरङ्गिको** रयात् ।
उवाच कोऽयमाक्षेपो मयि सत्यपि नाथ ! ते ? ॥४६॥ 10

कन्याप्रत्याहृतावन्वागतो यातः सुरङ्गया ।
सौलसेयानयं सर्वानेकेनैवेषुणाऽवधीत् ॥४७॥

तद्रथै रुद्धमार्गोऽस्थादथ **वैरङ्गिको** रथी ।
सुरङ्गान्तमगात् तूर्णं **श्रेणिक**स्तु स**चेल्लणः** ॥४८॥

सुज्येष्ठा विषयाकाङ्क्षाविरक्ताऽऽपृच्छ्य **चेटकम्** । 15
समीपे **चन्दना**र्यायाः परिव्रज्यामुपाददे ॥४९॥

सुज्येष्ठे ! इति जल्पन्तं **श्रेणिकं** त्वाह **चेल्लणा** ।
सुज्येष्ठा नागता देव ! तत्कनिष्ठाऽस्मि **चेल्लणा** ॥५०॥

श्रेणिको व्याजहारैतां नायासोऽभूद् मुधा मम ।
सुभ्रु ! त्वमसि **सुज्येष्ठा** तस्या न खलु हीयसे ॥५१॥ 20

चेल्लणा पतिलाभेन भगिनीवञ्चनेन च ।
श्रेणिकस्तु तदवाप्त्या **सौलसेय**व्ययेन च ॥५२॥

कलितौ हर्ष-शोकाभ्यां तौ रथप्रजवादथ ।
ईयतुर्नगरं पश्चात् कृतकार्यो**ऽभयो**ऽपि हि ॥५३॥ युग्मम् ॥

गान्धर्वेण विवाहेन परिणीयाथ **चेल्लणाम्** ।
सुलसा-नागयोर्गत्वा राजाऽऽख्यत् तत्सुतान् मृतान् ॥५४॥
नृपात् तौ दम्पती श्रुत्वा सुतोदन्तममङ्गलम् ।
मुक्तकण्ठमकुण्ठार्त्तिदीनौ रुरुदतुश्चिरम् ॥५५॥
अथानित्यकथाभिस्तावाचार्य इव तत्त्ववित् ।
अभयो बोधयामास **श्रेणिके**न सहागतः ॥५६॥
ततश्च **चेल्लण**देव्या समं **मगधभूपतिः** ।
निर्विघ्नं बुभुजे भोगान् पौलोम्येव पुरन्दरः ॥५७॥
त्रयोऽस्यास्तनवो**ऽशोकचन्द्रा**ख्यस्तेषु **कूणिकः** ।
ज्यायान् **हल्लो** द्वितीयस्तु **विहल्लो**ऽभूत् कनिष्ठकः ॥५८॥
§§ इतश्च नगरे तत्र सार्थवाहो **धनावहः** ।
आसीदसीमविभवो द्वितीय इव यक्षराट् ॥५९॥
भद्रेति दयिता तस्य ततो गर्भमधारयत् ।
कृतपुण्य इति प्रीत्या व्याख्यातमखिलैर्जनैः ॥६०॥
असूत सा सुतं काले कालेयच्छविभासुरम् ।
सार्थवाहो महोत्साहस्तदा चक्रे महोत्सवम् ॥६१॥
पुरस्कृत्य जनस्योक्तिं पूज्यपूजापुरस्सरम् ।
कृतपुण्यक इत्यस्य पित्तृभ्यां नाम निर्ममे ॥६२॥
क्रमेण वर्धमानोऽसौ स्पर्धमानो नवेन्दुना ।
कलाकलापं जग्राह चित्रं दोषाकरस्तु न ॥६३॥
धन्यम्मन्यां तदीयाप्त्या कन्यां सुकुलसंभवाम् ।
पितृभ्यामुत्सवेनैष तरुणः परिणयितः ॥६४॥
तमथो साधुसंसर्गाद् विषयेषु पराङ्मुखम् ।
न्ययुङ्क्त शठगोष्ठीषु श्रेष्ठी तद्भोगकौतुकी ॥६५॥

अथ तादृक्सुहृद्वर्गसंसर्गेण निरर्गलः ।
स पण्यकामिनीदर्शं यथाकाममकामयत् ॥६६॥
स क्षणात् तैरुपाध्यायैः किञ्चिदध्यापितस्तथा ।
यथा यातुं पितुर्मातुर्न सस्मार स्मरातुरः ॥६७॥
अन्यदाऽनङ्गसेनाख्यां विख्यातां पण्ययोषितम् ।
सरसां कामयामास पीयूषसरसीमिव ॥६८॥
आनन्दमकरन्दैः स दूरमन्यातिशायिभिः ।
तृष्यति स्म न तां प्राप्य रोलम्ब इव मालतीम् ॥६९॥
कोटिशः कुट्टिनीकूटपादावर्तैरवर्तत ।
रसातलतलस्थानां तद्धनानामुदञ्चनम् ॥७०॥
तस्य द्वादश वर्षाणि दिनानीवातिचक्रमुः ।
कालः स्यादतिजङ्घालस्तन्वङ्गीसङ्गिरङ्गिणाम् ॥७१॥
अक्षीयत ततो लक्ष्म्या चिरसञ्चितयापि च ।
दुःखिताभ्यां पितृभ्यां च देवभूयमभूयत ॥७२॥
कुट्टिनी तदपि क्रूरा पुनरेव धनाशया ।
प्रेषयामास सा चेटीं चतुरोक्तिपटीयसीम् ॥७३॥
निकेतं **कृतपुण्य**स्य सातिवेगादुपाययौ ।
भित्तिगोपुरसोपानभ्रंशाख्यातधनक्षयम् ॥७४॥
प्राणेशमङ्गलाशंसिस्थौलकौसुम्भवाससम् ।
नव्यावतीर्णतारुण्यां साऽपश्यत् तत्र योषितम् ॥७५॥
कृतपुण्यस्य पत्नीति तां निश्चित्य कुतश्चन ।
अवोचत नता चेटी वाचं शिक्षाक्रमोचिताम् ॥७६॥
कल्याणि ! तव कान्तेन प्रहिता स्मि त्वदन्तिकम् ।
विज्ञातुं कुशलोदन्तं धनं चानेतुमञ्जसा ॥७७॥

अतिप्रसन्नवक्त्राब्जा सा चकोरविलोचना ।
जगाद दयितादेशविलसत्पुलकाङ्कुरा ॥७८॥
सखि ! कान्तस्य तस्याज्ञा मम सीमन्तखेलिनी ।
किमाचक्षे पुनः क्षेमं दैवे प्रातीपिके सति ? ॥७९॥
तथातिवत्सलस्तातस्तादृक् श्वश्रूः प्रियंवदा ।
जन्मतुर्द्वावपि दिवं धिग् धिग् मे मन्दभाग्यताम् ॥८०॥
श्वशुराभ्यां श्रियोऽप्येताः प्रेषं प्रेषमशेषिताः ।
प्रियस्य तनयस्यार्थे धनं को हि धनायति ? ॥८१॥
अस्ति पित्रा वितीर्णं मे किञ्चिदङ्गविभूषणम् ।
तत् त्वं गृहाण भूयाद् मे शीलमेवाङ्गभूषणम् ॥८२॥
इत्युदीर्य समुत्तार्य तनोराभरणानि सा ।
अर्पयामास तान्येतत् प्रीत्यै कुलमृगीदृशाम् ॥८३॥
भुजिष्या तान्युपादाय स्मियस्मेरमानसा ।
चिन्तयन्ती तदौचित्यं निजमन्दिरमाययौ ॥८४॥
अनङ्गसेनया सार्धं **कृतपुण्य**स्य पश्यतः ।
उपनिन्ये च कुट्टिन्या यथादृष्टं जगाद च ॥८५॥
अङ्गस्य यदलङ्कारः प्रेषितः कुलयोषिता ।
उदक्तस्योदपानस्य तदेषा तलमृत्तिका ॥८६॥
अलमेतेन कौसुम्भरसनिर्यासरूपिणा ।
चिन्तयित्वेति तत्पत्न्यां कृपालुरथ कुट्टिनी ॥८७॥
तदलङ्कारसर्वस्वमेकावल्यादिसंयुतम् ।
दीनाराणां सहस्रेण सह प्रीत्याऽऽर्पयत् पुनः ॥८८॥ विशेषकम् ॥
कुट्टिन्या कामिनां मान्या दुहिताऽभिहिता रहः ।
पुत्रि ! पण्यपुरन्ध्रीणां निर्धनेन जनेन किम् ? ॥८९॥

गण्यतां **कृतपुण्यो**ऽपि निर्धनैकशिरोमणिः ।
इत्युक्ताऽनङ्गसेनापि प्रत्युवाच वचस्विनी ॥९०॥
मातर्नातः परं माता मदीया नितरामसि ।
अप्रगल्भं प्रगल्भापि यदेवं खलु जल्पसि ॥९१॥
ऊढप्रौढिभिरेतस्य बताढ्यङ्करणैर्धनैः ।
परःकोटिभिरायातैः सौहित्यं किं न तेऽभवत् ? ॥९२॥
गुणैरेतस्य मे चेतः केतकोदरसोदरैः ।
वासितं यत् तदन्यत्र गन्तुमुत्सहते न हि ॥९३॥
इति निर्बन्धमेतस्याः सम्यग् मनसि कुर्वती ।
जज्ञेऽसौ जरती जाग्रत्तृष्णा कृष्णानना ततः ॥९४॥
सावज्ञां कारयामास तत्र दासीभिरन्वहम् ।
नार्घं ददाति यत्कोऽपि निःश्रीके सवितर्यपि ॥९५॥
तदा तासामवज्ञानां निदानमथ चिन्तयन् ।
अक्काकर्तृकमेवेति बुबुधे स बुधः स्वयम् ॥९६॥
अनुक्तहुताशनेन हृदि दंदह्यते स्म च ।
स्मरोन्मादपरीणामं जनो जानाति पृष्ठतः ॥९७॥
अथ मानी विनिःसृत्य जगाम निजधामनि ।
स प्रियां च परिम्लानां वीक्षते स्म तदन्तरे ॥९८॥
स्वं तस्य पश्यतो धाम श्यामायितमुखत्विषः ।
धीरस्यापि पदं प्रापुर्नेत्रयोर्बाष्पबिन्दवः ॥९९॥
सापि दूरात् तमायान्तमवलोक्य विकस्वरा ।
विकल्पान् कल्पयामास सरोमाञ्चं सुलोचना ॥१००॥
दिष्ट्याऽयं किं ममाभ्येति पाणिपीडनपण्डितः ।
यद्वा भाग्यपरीपाको मादृशामीदृशः कुतः ? ॥१०१॥

अथ निश्चित्य प्रथमं मनसा परतो दृशा ।
उत्सेकेन ततोऽङ्गेन प्रत्युद्यातः पतिस्तया ॥१०२॥

तस्य तेनोपचारेण विहितेन तया समम् ।
अमृतेनेव निर्वाणः पूर्वः परिभवानलः ॥१०३॥

विनीता तेन सा रात्रौ पाठिता भोगमात्रिकाम् ।
गर्भरत्नं बभारान्तः प्रबोधमिव देहिनाम् ॥१०४॥

स कदाचित् प्रियामूचे मदन्यो नास्ति मूढधीः ।
निष्फला मयि शास्त्रार्थदृष्टिर्वृष्टिरिवोषरे ॥१०५॥

पितरौ यद् मयाऽगाधे क्षिप्तौ दुःखमहार्णवे ।
धनं निधनमानीतं पितृपर्यायसञ्चितम् ॥१०६॥

अलमालप्य लोलाक्षि ! यत्तवोपकृतं पुनः ।
किमन्यत् त्वं सुधासिन्धुः कालकूटार्णवस्त्वहम् ॥१०७॥

अधुना तु धुनात्येष दुष्टदौर्गत्यकुञ्जरः ।
च्युतो हस्तात् प्रशस्तास्ये ! यतो मे विभवाङ्कुशः ॥१०८॥

कुर्वे सुवाणि ! वाणिज्यं धनं यद्यस्ति किञ्चन ।
इति पृष्टा प्रिया हृष्टा जगाद दयितं ततः ॥१०९॥

अनल्पोऽयं समाकल्पः सुस्वाधीनं धनं हि वः ।
दीनाराणां सहस्रञ्च गृह्यतामनुगृह्यताम् ॥११०॥

तदादाय स लाभाय क्रीत्वा वस्तु यथोचितम् ।
प्राचीप्रस्थितमन्विष्य स्फीतार्थं सार्थमाययौ ॥१११॥

तत्रानुयायिनीं पत्नीं निवर्त्य प्रीतमानसः ।
असौ विनिद्र एवास्ते सुप्तो देवकुले क्वचित् ॥११२॥

§§ इतोऽस्ति तत्र वास्तव्या काचिदिभ्यकुटुम्बिनी ।
स्थविरा स्थेयसी तस्याः सूनुः सूनुविवर्जितः ॥११३॥

उदन्वति विपन्नोऽभूदुत्पातैः पोतभङ्गतः
मा गाद् राजकुले लक्ष्मीरतो वार्तां निगोप्य ताम् ॥११४॥
सार्थं तमेत्य सा किञ्चिच्चिन्तयित्वा स्वचेतसि ।
कृतपुण्यकमुत्थाप्यानिनाय निजमन्दिरम् ॥११५॥ विशेषकम् ॥
स्नुषाचतुष्टयस्यापि पश्यतस्तत्र निस्त्रपा ।
तदीयं कण्ठमालम्ब्य रुदत्येवमवोचत ॥११६॥
हा वत्स ! बहुवात्सल्य ! विहाय निजमातरम् ।
एतावन्ति दिनानि त्वं क्व यातोऽसि क्व च स्थितः ? ॥११७॥
निरालम्बा धरालम्ब ! तवाम्बाऽस्मि न संशयः ।
त्वं पुत्र ! जातमात्रोऽपि हृतः केनापि पाप्मना ॥११८॥
नामतः श्रीनिवासोऽसि त्वद्वियोगदवानले ।
पतिता प्राप यं तापमसौ कस्यापि मा स्म भूत् ॥११९॥
सङ्गमोऽद्यैव दैवज्ञैः सदैव फलशालिना ।
रात्रौ कल्पां ह्रियालोकस्वप्नेन च तवोदितः ॥१२०॥
अहमासेदुषी सार्थं लेभे त्वामतिदुर्लभम् ।
भाग्यैरुज्जागरैर्जन्तूनभ्यागच्छति वाञ्छितम् ॥१२१॥
इदानीं तावकीनस्य ज्येष्ठबन्धोर्विपत्तितः ।
तव संपत्तितश्चास्मि शोकहर्षसमाकुला ॥१२२॥
बन्धुवध्वश्चतस्रोऽमूरमूश्च विपुलाः श्रियः ।
एता नद्य इवाम्भोधिमगाधं त्वामुपस्थिताः ॥१२३॥
तदेतासामसामान्यतारुण्यमहिमाजुषाम् ।
श्रीणां स्त्रीणां च भोगेन सुभगङ्करणो भव ॥१२४॥
इति श्रुत्वोक्तिवैचित्र्यमेतस्याः **कृतपुण्यकः** ।
विस्फुरद्विस्मयस्मेरचेतोवृत्तिरचिन्तयत् ॥१२५॥

श्रीयोगः सुदृशां योगः स्वयंवरमिदं द्वयम् ।
उपस्थितमतो व्योमप्रसूनैः किं विकल्पनैः ? ॥१२६॥

ततस्तामवदद् मातर्न स्मरामि किमप्यदः ।
स्थविराऽसि त्वमेवेत्थमितिहासे प्रगल्भसे ॥१२७॥

मया तु मातुरादेशश्चक्रे सैष शिखामणिः ।
सर्वङ्कषा हि गुर्वाज्ञा दृश्यते चेदवज्ञया ॥१२८॥

यथैव ताश्चतस्रोऽपि परिणेतरि भर्तरि ।
अवर्तन्त तथा तस्मिन् प्रेमस्थेमवशंवदाः ॥१२९॥

पुत्रा गोत्रजनक्रोडक्रीडावनकुरङ्गाः ।
उदपद्यन्त चत्वारस्तासां चतसृणामपि ॥१३०॥

भोगैः क्षणमिव क्षीणा तस्य द्वादशवत्सरी ।
कालो हि सुखनिर्मग्नैर्गच्छन्नपि न लक्ष्यते ॥१३१॥

स्थविराः स्वार्थसंपत्तिकृतार्थम्मन्यमानसा ।
एकान्तवस्त्यमेकान्ते वधूवर्गमभाषत ॥१३२॥

संजाता सुतसम्पत्तिरिदानीं मुच्यतामयम् ।
नादरः सहकारेऽपि पुंसामात्तफलोत्करे ॥१३३॥

अभ्यधुस्तास्त्वया दत्तः कान्तः कान्तगुणैकभूः ।
भुक्तश्चस्माभिरप्येष मातर्न त्यागमर्हति ॥१३४॥

बभाषे स्थविरा रोषभ्रकुटिस्थपुटानना ।
ममादेशविपर्यासो हलाः ! कोऽप्येष वो नवः ॥१३५॥

माऽऽदत्तां वित्तमस्माकं भूपाल इति भीतया ।
कश्चिदप्ययमानीतो मया सन्तानहेतवे ॥१३६॥

इदानीं सूनवोऽभूवल्ँल्लक्ष्मीरक्षणयामिकाः ।
तत् किमेतेन निष्पीतरससारेक्षुबन्धुना ? ॥१३७॥

ज्ञात्वा तदाग्रहं ताभिर्बद्धा वाससि मोदकाः ।
क्षिप्त्वाऽन्तर्मणयो मुक्तास्तदीयोच्छीर्षके तदा ॥१३८॥

सुखसुप्तः सशय्योऽपि तत्र देवकुले निशि ।
अमोच्यत स चेटीभिर्दुष्टस्थविरया रयात् ॥१३९॥

स एव तत्क्षणात् तत्र प्राच्याः सार्थः समाययौ ।
अनेदीयोऽपि नेदीयः कुरुते भवितव्यता ॥१४०॥

निद्राविरामे स ज्ञात्वा वृद्धाव्यापारमीदृशम् ।
अनुपार्जनमात्मानं यावज्जुगुप्सते मुहुः ॥१४१॥

प्राच्याः सार्थः समायात इत्युपश्रुत्य तुष्टया ।
शुद्धये प्रहितः पत्न्या पदातिस्तावदागमत् ॥१४२॥

भो भद्र ! कुशलं तस्याः किं च गर्भेऽभवत् तदा ।
पृष्टोऽनेनेति हृष्टोऽस्मै पत्तिः पुत्रमचीकथत् ॥१४३॥

मोदकांस्तानुपादाय द्रव्यानर्जनदुर्मनाः ।
स पश्चात्पातिभिः पादैराययौ निजमन्दिरम् ॥१४४॥

अभ्युत्थानादि सा तस्मै चकारोचितमञ्जसा ।
संपद्यापदि वा पत्यौ समाः खलु कुलस्त्रियः ॥१४५॥

सा भक्ता भर्तुरभ्यङ्गं मज्जनाय चकार च ।
सुतोऽध्ययनशालाया भोजनायाजगाम च ॥१४६॥

एकमाकृष्य सा तस्मै ददौ शम्बलमोदकम् ।
स तं कवलयन्नेव जगाम च्छात्रमण्डलीम् ॥१४७॥

आदत्त दन्तसम्पर्काद् मणिं पाणौ स भास्वरम् ।
चित्रीयमाणश्छात्रेभ्यो दर्शयामास चोत्सुकः ॥१४८॥

प्रत्येकं स मणिर्वस्तु किमेतदिति जल्पताम् ।
तेषां पाषाणसंचारं संचचार करात् करे ॥१४९॥

बालः कन्दलितानन्दः पाणिनाऽऽन्दोलयन् मणिम् ।
रममाणः क्रमेणागादेकं कान्दविकापणम् ॥१५०॥

तत्र तस्य मणिः पाणेरन्तुपात्रे पपात च ।
तदन्तुकं तु धवलं द्वेधाभावमवाप च ॥१५१॥

कन्दुवित्तस्तमालोक्य जलकान्तोऽयमित्यमुम् ।
निश्चित्य चेतसा धूर्तस्तमेवं बालमब्रवीत् ॥१५२॥

नित्यं दास्यामि ते पूपानेतस्मादश्मनः प्रति ।
इति विप्लाव्य तं बालं कन्दुवित्तस्तमाददे ॥१५३॥

हस्तिरत्नमथो नद्यां सिञ्चन्**सेचनको** वपुः ।
तदानीं पादयोर्नद्धस्तन्तुना जलजन्तुना ॥१५४॥

गजवर्गोऽथ संभ्रातः समाचख्यौ क्षितीशितुः ।
निशातबुद्धिवर्धिष्णोरयं **चाभय**मन्त्रिणः ॥१५५॥

ततोऽ**भयकुमारे**ण भाण्डागारे गवेषितः ।
जलकान्तः परं नाप्तो नानारत्नौघनिह्नुतः ॥१५६॥

मा भूदन्याहितं हस्तिरत्नस्येति कृतत्वरः ।
पटहेन महीनाथः सर्वत्रैवमघोषयत् ॥१५७॥

जलकान्तमणिं वेगाद् यः कश्चिदुपढौकयेत् ।
परिणेता सुतामर्धराज्योपेतां स भूपतेः ॥१५८॥

स्फुटत्प्रमोदकन्देन कन्दुवित्तेन डिण्डिमः ।
स्पृष्टः सत्वरमागत्यजलकान्तश्च ढौकितः ॥१५९॥

मणिर्विघटयाञ्चक्रं जलमूर्जस्वलप्रभः ।
ज्ञातमन्तुरिवानेशत् तन्तुः स्थलभयातुरः ॥१६०॥

रेमे स्तम्बेरमः स्वैरं कुशली नृपवेश्मनि ।
कन्दुवित्तस्य चित्तेऽथ स्फारः फलमनोरथः ॥१६१॥

आपूपिकाय दातव्या कथं कन्या मनोरमा ।
इति चिन्ता महीभर्तुर्जागर्त्ति स्म पदे पदे ॥१६२॥

ज्ञात्वा भूभर्तुराकूत**मभयेन** भयङ्करैः ।
वचोभिस्ताडितस्तथ्यं कथयामास पौपिकः ॥१६३॥

अभ्यधा**दभयः** सत्यं स एवास्पदमीदृशाम् ।
कल्पद्रूणां सुवर्णाद्रौ दृश्यते संभवः परम् ॥१६४॥

परिणिन्ये ततः कन्यां सुपुण्यः **कृतपुण्यकः** ।
प्राज्यं राज्यं च तल्लेभे '**भाग्यैः किं नाम दुर्घटम् ?**' ॥१६५॥

सुमनःशालिनस्तस्य सुरभेः सुरसैर्गुणैः ।
स**हाभय**कुमारस्य प्रीतिरासीत् कलावतः ॥१६६॥

सोऽभ्यधा**दभयं** जातु सखे ! पत्नीचतुष्टयम् ।
ममास्ति[1] पुत्रमत्रास्ति परं वेद्मि न मन्दिरम् ॥१६७॥

अभयः प्राह चित्रं भोः ! गृहिणीर्वेत्सि नो गृहम् ।
ततः सर्वोऽपि वृत्तान्तस्तेन पूर्वो निवेदितः ॥१६८॥

प्रासादं कारयामास द्विद्वार**मभय**स्ततः ।
द्वारमेकं प्रवेशाय निर्गमाय तथाऽपरम् ॥१६९॥

यक्षस्य लेप्यप्रतिमा **कृतपुण्य**समाकृतिः ।
तदन्तः स्थापिता को हि प्रज्ञापारङ्गमः सताम् ? ॥१७०॥

यो यक्षस्य नमस्यायै न मनुष्यो यतिष्यते ।
सकुटुम्बस्य तस्यार्धिं सव्यार्धिं स निधास्यति ॥१७१॥

इत्युक्ति**मभयो**पज्ञां परिज्ञाय पुरीजनः ।
तमुपास्ते समस्तोऽपि निष्पर्यायसपर्यया ॥१७२॥

द्वारेणायान्तामेकेन निर्यान्तमपरेण च ।
कृतपुण्याभयौ दक्षौ जनं वीक्षाम्बभूवतुः ॥१७३॥

---

१. विभक्त्यन्तप्रतिरूपकाव्ययत्वेन अस्ति=विद्यन्ते पुत्रा यस्य पत्नीचतुष्टयस्येत्यस्तिपुत्रमिति

लीलावचालभूतालवालालम्बितपाणयः ।
पूर्वपत्न्यः समाजग्मुः **कृतपुण्य**स्य ता अपि ॥१७४॥

पत्युः सदृक्षं तं यक्षं दृष्ट्वा स्मृत्वा च सास्रवः ।
सवेपथु सरोमाञ्चमवोचन्त स्मरातुराः ॥१७५॥

भर्तकर्तृकमस्माकं तच्चेत् स्यात् किलकिञ्चितम् ।
मोदकांस्तत्परोलक्षान् दास्यामो यक्ष ! ते मुदा ॥१७६॥

दिक्षुः चक्षुः क्षिपन्तीभिस्ताभिर्दृष्टश्च वल्लभः ।
समधत्त च पञ्चापि समं पञ्चशरः शरान् ॥१७७॥

तात तातेति जल्पन्तः प्रमोदात् फुल्ललोचनाः ।
यक्षाङ्कपालीपल्यङ्कमध्यूषुस्तनयास्तदा ॥१७८॥

कृतपुण्यस्ततः प्राह दिष्ट्यैता मम वल्लभाः ।
इमे रम्याः कुलव्योमभानवः सूनवश्च मे ॥१७९॥

देशत्यागे समादिश्य स्थविरां स्थविराशयः ।
अभयस्तास्तदायत्ता रमा रामाश्च निर्ममे ॥१८०॥

आगा**दनङ्गसेना**पि प्रियसब्रह्मचारिणम् ।
यक्षं वीक्ष्य स्मरोन्मादगद्गदं निजगाद च ॥१८१॥

शुभानां शकुनस्वप्नप्रभृतीनामिदं प्रभो !
त्वदीक्षणमभूत् पुष्पं फलमस्तु तदीक्षणम् ॥१८२॥

इष्टस्तयाऽष्टमीचन्द्रभालयाऽथ निभालितः ।
अतिप्रगल्भमभ्येत्य प्रीत्या चैवमभाषत ॥१८३॥

जीवितेश ! बहुक्लेशं देशे देशे पुरे पुरे ।
मया गवेषितः किन्तु नाप्तोऽसि स्वल्पभाग्यया ॥१८४॥

परं पुरुषमाश्रित्य योऽभवद् न कदाचन ।
वेणीदण्डस्य बद्धस्य मोक्षः सोऽस्तु त्वयाऽधुना ॥१८५॥

अभयानुज्ञया सोऽथ प्रेयसीः प्रेमभूयसीः ।
ताः समादाय पञ्चापि निजं मन्दिरमाययौ ॥१८६॥

सप्तार्चिरिव रोचिष्णुर्लघु प्राञ्चद्वियोगतः ।
प्रियाः कुर्वन् प्रियाः सप्त दीप्यते स्म स तेजसा ॥१८७॥

मोहान्धतमसध्वंसी **वैभारगिरि**मूर्धनि । 5
उदेति स्म तदा **वीर**जिनेश्वरदिनेश्वरः ॥१८८॥

आगाद् गुणमणिश्रेणिक्षोणिः **श्रेणिक**भूपतिः ।
अभयः **कृतपुण्य**श्च तत्र वन्दारवः सुराः ॥१८९॥

सर्वोपलम्भसिद्धार्थः **सिद्धार्थ**कुलकौस्तुभः ।
स दम्भशैलदम्भोलिर्देशनां तत्र निर्ममे ॥१९०॥ 10

अथावसरमासाद्य विध्वस्तवृजिनं जिनम् ।
विज्ञो विज्ञपयामास **कृतपुण्य**ः कृताञ्जलिः ॥१९१॥

जगन्नाथ ! कथङ्कारमुपकारपरोऽपि सन् ।
निर्मन्तुरपि संप्रापं संपदो विपदन्तराः ? ॥१९२॥

'जगाद दशनज्योत्स्नापूरपूर्णसभं प्रभुः । 15
पूर्वे जन्मन्यभूर्वत्स ! **वत्सपालक**बालकः ॥१९३॥

नित्यदौर्गत्यनिर्वित्तः परमान्नमयं महम् ।
पुरे निरीक्ष्य क्षैरेयीमयाचस्तव मातरम् ॥१९४॥

अम्बा तव निरालम्बा सर्वसम्पत्तिदुःखिता ।
रुरोद, प्रतिवेशिन्यः क्षीरादि कृपया ददुः ॥१९५॥ 20

संस्कृत्य पायसं पात्रे परिवेश्य तवाम्बिका ।
बहिर्ययौ मुनिश्चागाद् मासक्षपणपारणो ॥१९९॥

स्थानादुत्थाय हर्षाश्रुरोमाञ्चकवचाञ्चितः ।
भाजनात् पायसस्यास्मै भागमेकमदात्तदा ॥१९७॥

अल्पं मासोषितस्यैतदित्यंशं व्यतरः परम् ।
घृतादिश्लाघ्यमघ्र्याय तस्मै पाञ्चात्यमप्यदाः'' ॥१९८॥
आकर्ण्यैवं शुभाकर्णिसकर्णः प्रभुदेशनाम् ।
उन्मीलद्विषयोद्वेगः स संवेगमुपागमत् ॥२००॥
गृहभारं सुते ज्येष्ठे निवेश्य **कृतपुण्यकः** ।
श्री**वीरा**द् व्रतमादाय तप्त्वा सद्गतिभागभूत् ॥२०१॥

॥ इत्यभयकुमारकथायां वैनयिकीबुद्धिनिबन्धनं द्वितीयः प्रकाशः ॥

● ● ●

§§ इत**श्चार्द्रक**नामास्ति देशो मध्येपयोनिधि ।
त**त्रार्द्रकपुर**स्वामी भूमा**नार्द्रक** इत्यभूत् ॥१॥
अजनि**ष्टार्द्रका**देवीकुक्षिकासारकैरवम् ।
तस्**यार्द्रककुमारा**ख्यः कुमारो मारसंनिभः ॥२॥
तस्य **चार्द्रकराज**स्य बभूव **श्रेणिक**स्य च ।
पारम्पर्यगता प्रीतिश्चन्दकैरवयोरिव ॥३॥
अन्यदाः **श्रेणिकः** प्रैषीद् निजामात्य**मुपार्द्रक**म् ।
समर्घ्य प्राभृतं प्राज्यं सौहृदद्रुमदौर्हृदम् ॥४॥
स्वप्रभुप्राभृतं निम्बकम्बलप्रभृति द्रुतम् ।
मन्त्री गत्वोपनिन्ये तदाददे **चार्द्रको** नृपः ॥५॥
महत्या प्रतिपत्त्या तं संभाव्**यार्द्रक**भूविभुः ।
पप्रच्छ **कै**च्चित् कुशलं मद्बन्धो**र्मगधेशितुः** ? ॥६॥
स्वस्वामिकुशलोदन्तैर्मन्त्री पीयूषपेशलैः।
तद्गात्रयष्टिमतनोज्जातरोमाञ्चपल्लवाम् ॥७॥
अपृच्छ**दार्द्रकि**स्तात ! को नाम **मगधाधिपः** ? ।
तव येनेदृशी प्रीतिर्मधोरिव मनोभुवा ? ॥८॥

राजोचे **श्रेणिको** नाम राजास्ति **मगधेश्वरः** ।
पारम्पर्यागता मैत्री मत्कुले मतकुलेऽपि च ॥९॥

द्रागुन्मीलितमुत् प्राह**ार्द्रकि**र्मन्त्रिणमस्ति ते ।
प्रभोः कोऽपि सुतप्रष्ठस्तेन मैत्रीचिकीरहम् ॥१०॥

मन्त्र्यूचेऽस्ति धियां पात्रं पञ्चमन्त्रिशताधिपः । 5
अभयो नाम तनयः **श्रेणिक**स्य महीपतेः ॥११॥

दाक्ष्यदाक्षिण्यनैपुण्यपुण्यपण्यकलामयम् ।
नाभयं निर्भयं विश्ववित्तं वेत्सि कुमार ! किम् ? ॥१२॥

आर्द्रकेन्द्रोऽपि पुत्रं **स्वमभये** सौहृदार्थिनम् ।
ऊचे सन्मार्गसंलग्नः कुलीनोऽसि ममाङ्गज ! ॥१३॥ 10

अवाप्य पितुरादेशं स्वमनोरथसंनिभम् ।
जनान्तिकेन सचिवं तमुवा**चार्द्रकासुतः** ॥१४॥

मामनापृछ्य मा यासीः श्रोतव्यं गच्छता त्वया ।
अभयं प्रति मे स्नेहसोमसूत्रसमं वचः ॥१५॥

मन्त्र्यप्येवमिति प्रोचे कुमारं सुकुमारगीः । 15
ययौ राज्ञा विसृष्टश्च वेत्रिदर्शितमाश्रयम् ॥१६॥

परेद्युर्मणिमाणिक्यप्रभृति प्राभृतं नृपः ।
अर्पयित्वा स्वपुरुषं व्यस्रक्षीद् मन्त्रिणं च तम् ॥१७॥

अ**थार्द्रकि**ः कुमारोऽपि हस्ते तस्यैव मन्त्रिणः ।
प्रैषीद् विद्रुममुक्तादिवस्तून्यभयहेतवे ॥१८॥ 20

स पुमान् मन्त्रिणा सत्रा गत्वा **राजगृहे** पुरे ।
प्राभृतान्यर्पयामास **श्रेणिकायाभयाय** च ॥१९॥

किञ्चा**भयकुमारा**य मन्त्रिणेऽवाचि वाचिकम् ।
यदार्द्रककुमारस्ते सख्यसौभ्रात्रमिच्छति ॥२०॥

अथ कर्मजया बुद्ध्याऽभयश्चिन्तितवानिति ।
विराधितव्रतत्वेन जातोऽनार्येषु स ध्रुवम् ॥२१॥
नूनमासन्नभव्यः स महात्मा राजपुत्रकः ।
अभव्यदूरभव्यानां न मया सख्यकामना ॥२२॥
तदुपायेन केनापि कृत्वा तं परमार्हतम् ।
आप्तो भवामि स ह्याप्तो योऽग्रिमो धर्मवर्त्मनि ॥२३॥
तस्यार्द्रककुमारस्य तीर्थकृद्बिम्बदर्शनात् ।
उत्पद्यते यदि पुनर्जातिस्मरणमुत्तमम् ॥२४॥
तत् प्राभृतच्छलेनार्हत्प्रतिमां प्रेषयाम्यहम् ।
चिरं तद्गत्नघटितां महाचार्यप्रतिष्ठिताम् ॥२५॥
इत्यादिनाथदेवस्याप्रतिमां प्रतिमां व्यधात् ।
पेटामध्ये समुद्गस्थां श्रेयःकामगवीमयम् ॥२६॥
ततश्च धूपदहनघण्टिकादीनि तत्पुरः ।
मुमोच देवपूजोपकरणान्यखिलान्यपि ॥२७॥
ददौ च तालकं द्वारे मुद्रयित्वाऽभयः स्वयम् ।
श्रेणिकोऽथार्द्रकेन्द्रस्य मन्त्रिणं तं व्यसर्जयत् ॥२८॥
अभयोऽपि हि तां पेटां तस्य हस्ते समार्पयत् ।
तं चोवाचेति सत्कृत्य वाचा स्वादुसुधामुचा ॥२९॥
एषाऽऽर्द्रककुमारस्य पुरः पेटोपढौक्यताम् ।
मदीयं तस्य मद्बन्धोर्वाच्यमेतच्च वाचिकम् ॥३०॥
रहस्येकाकिना भूत्वोन्मुद्र्य पेटामिमां स्वयम् ।
तदन्तर्वस्तु संप्रेक्ष्यं दर्शनीयं न कस्यचित् ॥३१॥
इति कर्तव्यमित्युक्त्वा स पुमान् स्वपुरं गयौ ।
उपायनान्यार्पयच्च स्वस्वामिस्वामिपुत्रयोः ॥३२॥

तच्चार्द्रककुमारायाचख्यावभयवाचिकम् ।
ततो रहसि स स्थित्वा तां पेटामुदघाटयत् ॥३३॥
ददर्श च तदन्तस्थं तमस्युद्द्योतकारकम् ।
बिम्बं तदादिनाथस्य योगीव ज्योतिरान्तरम् ॥३४॥
दध्यौ च किमिदं किञ्चिदङ्गाभरणमुत्तमम् ।
मूर्ध्नि कण्ठे किमारोप्यं हृदयेऽन्यत्र वा क्वचित् ? ॥३५॥
दृष्टपूर्वमिवेदं मे क्वापीति प्रतिभासते ।
न तु स्मृतिपथं याति मन्दाभ्यासस्य शास्त्रवत् ॥३६॥
इत्यार्द्रकुमारस्य चिरं चिन्तयतः सतः ।
मूर्च्छा जातिस्मृतिज्ञानजनन्यजनि भूयसी ॥३७॥
उत्पन्नजातिस्मरणः स्वयमेवाप्तचेतनः ।
स एवं चिन्तयामास पूर्वजन्मकथां निजाम् ॥३८॥
"इतो भवात् तृतीयस्मिन् भवे मगधनीवृति ।
कुटुम्ब्यासं वसन्ताख्ये पुरे सामायिकाभिधः ॥३९॥
भार्या बन्धुमती मेऽभूदश्रौषं च तया सह ।
यथावदार्हतं धर्मं सुस्थिताचार्यसंनिधौ ॥४०॥
आदिषि च व्रतं वृद्धः कदाचन विलोक्य ताम् ।
अन्वराङ्क्षमिदं मत्वा सा कृत्वाऽनशनं मृता ॥४१॥
तथामृतां च तां श्रुत्वा मयाप्येतद् विचिन्तितम् ।
महानुभावा मृता सा व्रतभङ्गभयात् खलु ॥४२॥
भग्नव्रतः पुनरहं तदलं जीवितेन मे ।
कृत्वेत्यनशनमहं विपद्य त्रिदशोऽभवम् ॥४३॥
ततश्च्युत्वाऽहमुत्पन्नोऽस्म्यनार्यो धर्मवर्जितः ।
प्रतिबोधयिता यो मां स बन्धुः स गुरुश्च मे ॥४४॥

तदनुज्ञाप्य पितरमननुज्ञाप्य वाप्यहम् ।
आर्यदेशं गमिष्यामि यत्र मेऽस्त्यभयो गुरुः'' ॥४५॥

इत्थं मनोरथं कुर्वन्नादिनाथार्चनापरः ।
आपृच्छदन्यदा तातं स यातुमभयान्तिकम् ॥४६॥

अवादीदार्द्रकेशस्तं न गन्तव्यं खलु त्वया ।
वत्स ! स्थानस्थितानां हि सौहृदं श्रेणिकेन नः ॥४७॥

पित्राज्ञया निषिद्धश्चोत्कण्ठितश्चाभयं प्रति ।
श्रवदश्रुः कुमारोऽस्थाद् वारीबद्ध इव द्विपः ॥४८॥

आसने शयने याने भोजनेऽन्यक्रियास्वपि ।
अभयालङ्कृतामाशां दृशामग्रे चकार सः ॥४९॥

कीदृग् मगधदेशोऽस्ति कीदृग् राजगृहं पुरम् ।
कस्कोऽध्वा तत्र गमनेऽपृच्छदेवं च पार्श्वगान् ॥५०॥

दध्यावार्द्रकराजोऽपि कुमारो मम निश्चितम् ।
यास्यत्यकथयित्वैव कदाप्यभयसन्निधौ ॥५१॥

ततश्च पञ्च सामन्तशतान्यादिशदार्द्रकः ।
युष्माभिर्यत्कुमारोऽयं रक्ष्यो देशान्तरं व्रजन् ॥५२॥

देहच्छायेव तत्पार्श्वं सामन्तास्तेऽत्यजन् न हि ।
बन्धे धृतमिवात्मानमार्द्रकेयोऽप्यमन्यत ॥५३॥

अथैष हृदये कृत्वाऽभयोपगमनं सुधीः ।
प्रत्यहं कर्तुमारेभे वाह्याल्यां वाहवाहनम् ॥५४॥

अश्वारूढाश्च पार्श्वेऽस्थुः सामन्तास्तेऽङ्गरक्षकाः ।
कुमारो वाहयन्नश्वं किञ्चिद् गत्वा न्यवर्तत ॥५५॥

एवं च वाहयन् वाहं स ययावधिकाधिकम् ।
पुनः पुनश्च व्याघुट्यायया ते च विशश्वसुः ॥५६॥

आर्द्रकसूनुरन्येद्युः पुंभिः प्रत्यायितैर्निजैः ।
याने सज्जीकृते रत्नपूर्णे तां प्रतिमां न्यधात् ॥५७॥

तदैवं वाहयन्नश्वमदृश्यीभूय पूर्ववत् ।
तच्च यानं समारुह्य स ययावार्यनीवृत्तम् ॥५८॥

यानादुत्तीर्य संप्रेष्य प्रतिमा**मभयाय** ताम् । 5
सप्तक्षेत्र्यां धनान्युप्त्वा यतिलिङ्गमुपाददे ॥५९॥

उच्चारयितुमारेभे यावत् सामायिक च सः ।
आकाशस्थितया तावदूचे देवतयोच्चकैः ॥६०॥

यद्यपि त्वं महासत्त्वोऽग्रहीर्दीक्षां तथापि मा ।
कर्मभोगफलं तेऽद्याप्यास्ते गमय तेन तत् ॥६१॥ 10

भुक्त्वा भोगफलं कर्मादीथाः समये व्रतम् ।
अवश्यमेव हि भोक्तव्यं भोग्यं तीर्थकृतामपि ॥६२॥

महात्मंस्तद् व्रतेनालं यदात्तमपि हास्यते ।
स्नानेन तेन किं हस्तिस्नानायेत पुरैव यत् ? ॥६३॥

अ**थार्द्रककुमारो**ऽपि स्वमूरीकृत्य पौरुषम् । 15
दैवीं वाचमनादृत्य प्रव्रज्यां स्वयमाददे ॥६४॥

प्रत्येकबुद्धः स मुनिः पालयन् निशितं व्रतम् ।
विहरन्नेकदा प्राप **वसन्तपुर**पत्तनम् ॥६५॥

बाह्यदेवकुले क्वापि तस्थौ प्रतिमया च सः ।
सर्वाधिपरिहारेण समाधिमधिजग्मिवान् ॥६६॥ 20

इतोऽत्र **धनदत्त**स्य सुता धनपतीभवा ।
श्रीमतीत्यभवद् **बन्धुमती**जीवो दिवश्च्युतः ॥६७॥

तत्र देवकुलेऽन्येद्युः पौरबालाभिरन्विता ।
श्रीमती पतिरमणक्रीडया रन्तुमाययौ ॥६८॥

भर्तारं वृणुतेत्यूचुस्तत्र सर्वाश्च बालिकाः ।
कयापि कोऽपि सर्वाभिर्वराः स्वरुचिवव्रिरे ॥६९॥

श्रीमत्युवाच सख्योऽसौ वृतो भट्टारको मया ।
तत साधु वृतं साधु वृतमित्याह देवता ॥७०॥

रत्नवृष्टिं च तन्वाना देवता गर्जितं व्यधात् ।
तद्भीताऽलीयत मुनेः **श्रीमती** तस्य पादयोः ॥७१॥

उपसर्गोऽनुकूलोऽयं मद्व्रतापथ्यमत्र धिक् ।
इति ध्यात्वाऽन्यतः सोऽगादनगारशिरोमणिः ॥७२॥

आदित्सू रत्नवृष्टिं तां राजा देव्या न्यवार्यत ।
अस्यै वरणके दत्तं द्रव्यमेतद् ब्रुवाणया ॥७३॥

ततश्च तद् धनं सर्वमाददे **श्रीमती**पिता ।
सर्वे स्वं स्वं ययुः स्थानं तदा सायमिवाण्डजाः ॥७४॥

अथोद्वोढुमढौकन्त **श्रीमतीं** बहबो वराः ।
श्रीमती त्वाह पितरं महर्षिः स वृतो मया ॥७५॥

मम तद्वरणेऽदाच्च द्रव्यं तद्गृह्यदेवता ।
तद् द्रव्यमाददानेन त्वयाऽप्यनुमतं हि तत् ॥७६॥

तत् तस्मै कल्पयित्वा मां नान्यस्मै दातुमर्हसि ।
सकृत् कन्याः प्रदीयन्ते इति तात ! न किं श्रुतम् ? ॥७७॥

श्रेष्ठ्यूचे स कथं प्राप्यो न ह्येकत्रावतिष्ठते ।
अलिः पुष्पमिव स्थानमातिष्ठति नवं धवः ॥७८॥

स किमायास्यति न वा प्राप्तोऽपि ज्ञायते कथम् ? ।
किं नाम तस्याभिज्ञानं कति नायान्ति भिक्षवः ? ॥७९॥

श्रीमत्यूचे मया तात ! तदा गर्जितभीतया ।
दृष्टं लक्ष्मास्ति तत्पादे वानर्येव विलग्नया ॥८०॥

तस्मादतः परं तात ! तथा कुरु यथाऽखिलान् ।
यातायातपरान् साधून् पश्यामि प्रतिवासरम् ॥८१॥

तातादिष्टा स्वयं तेभ्यः सैषा भिक्षां ददत्यथ ।
दिदृक्षमाणा तल्लक्ष्मांह्री मुनीनामवन्दत ॥८२॥

द्वादशाब्दे च दिङ्मूढः स महामुनिरन्यदा । 5
उपालक्षि तया तत्रागतस्तल्लक्ष्मवीक्षणात् ॥८३॥

तमृषिं **श्रीमती** प्राह तत्र देवकुले तदा ।
त्वं वृतोऽसि मया नाथ ! त्वमेव हि वरो मम ॥८४॥

तदा गतोऽसि मां मुग्धां निर्झर्य स्वेदबिन्दुवत् ।
क्व यास्यसि मया प्राप्तस्त्वमृणं धारयन्निव ॥८५॥ 10

दृष्टनष्टो यदाऽभूस्त्वं तदाद्यपि हि नाथ ! मे ।
परासोरिव कालोऽगात् तत् प्रसीद भजस्व माम् ॥८६॥

एवं स्थितेऽपि नैष्ठुर्याद् यदि मामवमन्यसे ।
भूत्वा तदग्निसाद् दास्ये तव स्त्रीघातपातकम् ॥८७॥

राज्ञा महाजनेनान्यैरथोद्वाहाय सोऽर्थितः । 15
तां स्मरन् दैवतीं वाचं **श्रीमतीं** परिणीतवान् ॥८८॥

भुञ्जानस्यानिशं भोगान् **श्रीमत्या** सह तस्य तु ।
गार्हस्थ्याकीर्तनं सूनुरुत्पेदे क्रमयोगतः ॥८९॥

वर्धमानः क्रमेणाथ क्षीरकण्ठत्वमुत्सृजन् ।
स वक्तुमुल्लसज्जिह्वो राजकीर इवाभवत् ॥९०॥ 20

पुत्रे तावति स प्रोचे **श्रीमतीं** मतिमद्वरः ।
अतः परं सहायस्ते पुत्रोऽस्तु प्रव्रजाम्यहम् ॥९१॥

श्रीमती धीमती तत्रान्तरे ज्ञापयितुं सुतम् ।
सतूलपूलिकां तर्कुमादाय समुपाविशत् ॥९२॥

प्रारेभे कर्तनमियं पप्रच्छ च स बालकः ।
मातः ! किमेतदारब्धं कर्म कारुजनोचितम् ? ॥९३॥
साऽब्रवीज्जात ! ते तातः प्रव्रज्यार्थं गमिष्यति ।
गतेऽस्मिन् पतिमुक्तायाः शरणं तर्कुरेव मे ॥९४॥
बालकोऽपि जगादेवमक्षरैर्लल्लमन्मनैः ।
बद्ध्वाऽहं धारयिष्यामि कथं यास्यति मे पिता ? ॥९५॥
इत्युक्त्वा तर्कुसूत्रेण लालयेवोर्णनाभकः ।
अवेष्टयत् पितुः पादौ स मुग्धमधुराननः ॥९६॥
जगादाम्बां च मा भैषीः स्वस्था भव भया यतः ।
बद्धपादः करीवासौ प्रयातु कथमातुरः ? ॥९७॥
श्रीमतिपरितप्येवमचिन्तयदहो शिशोः ।
कोऽपि स्नेहानुबन्धोऽयं मन्मनःपक्षिपाश्यभूत् ॥९८॥
मत्पदोस्तत्कृताः सन्ति यावन्तः सूत्रवेष्टकाः ।
तावन्त्यब्दानि धास्यामि पुत्रप्रेम्णा गृहस्थताम् ॥९९॥
पादयोस्तन्तुबन्धाश्च गणिता द्वादशाभवन् ।
गार्हस्थ्ये द्वादशाब्दानि ततः सोऽप्यत्यवाहयत् ॥१००॥
सन्धावधौ च सम्पूर्णे वैराग्येणोररीकृतः ।
यामिन्याः पश्चिमे यामे स धीमानित्यचिन्तयत् ॥१०१॥
"भवकूपाद् विनिर्गन्तुं व्रतमालम्बरज्जुवत् ।
मया प्राप्तं च मुक्तं च मग्नस्तत्रास्म्यहं पुनः ॥१०२॥
मनसैव व्रतं भग्नं प्राग्जन्मनि तथाप्यहम् ।
अनार्यत्वं प्रपन्नोऽस्मि का गतिः स्यादतः परम् ? ॥१०३॥
भवत्विदानीमप्याप्तपरिव्रज्यस्तपोऽग्निना ।
साक्षात् प्रक्षालयामि स्वं मलिनीभूतहेमवत् ॥१०४॥

प्रातश्च **श्रीमतीं** पत्नीं स संभाष्यानुमान्य च ।
यतिलिङ्गमुपादाय निर्ममो निर्ययौ गृहात् ॥१०५॥

सोऽभि राजगृहं गच्छन्नन्तराले ददर्श तत् ।
चौर्यवृत्तिपरं स्वस्य सामन्तशतपञ्चकम् ॥१०६॥

उपलक्ष्य स तैर्भक्त्या ववन्दे सोऽवदच्च तान् ।
किमेषा जीविका पापहेतुर्युष्माभिराद्दता ? ॥१०७॥

तेऽवोचन् वञ्चयित्वाऽस्मान् पलायिष्ठा यदा प्रभो ! ।
न तदा दर्शयामः स्मात्मानं भूमिभुजो ह्रिया ॥१०८॥

तवैवान्वेषणो लग्ना भ्रमन्तः सागराम्बराम् ।
चौर्यवृत्त्यैव जीवामः किमन्यद् निःस्वशस्त्रिणाम् ? ॥१०९॥

"मुनिरप्यभ्यधाद् भद्राः ! कष्टमापतितं यदि ।
धर्मानुबन्धि तत्कार्यं सफलं लोकयोर्द्वयोः ॥११०॥

केनापि पुण्ययोगेन मानुष्यकमवाप्यते ।
प्राप्तस्य तस्य च फलं धर्मः स्वर्गापवर्गदः ॥१११॥

दया जीवेषु सत्योक्तिरस्तेयं ब्रह्मचारिता ।
आकिञ्चन्यं च धर्मोऽयमार्हतोऽभिमतोऽस्तु वः ॥११२॥

स्वामिभक्ताः स्थ हे भद्राः ! राजेव स्वाम्यहं च वः ।
तन्ममैवैनमध्वां प्रपद्यध्वं समाहिताः ॥११३॥

तेऽप्यूचुस्त्वं पुरः स्वामी साम्प्रतं गुरुरप्यसि ।
त्वया ज्ञापितधर्माः स्मो दीक्षयाऽनुगृहाण नः" ॥११४॥

इत्य**ार्द्रककुमार**स्तान् प्रव्राज्य सहितश्च तैः ।
वन्दितुं श्री**महावीर**मथ **राजगृहं** ययौ ॥११५॥

तद्बाह्योपवने हस्तितापसाः सन्ति भूरिशः ।
ते हस्तिमांसमश्नन्तो दिवसानत्यवाहयन् ॥११६॥

ऊचुस्ते चेति हन्तव्यो वरमेको मतङ्गजः ।
यस्यैकस्यापि मांसेन भूयान् कालोऽतिवाह्यते ॥११७॥

एकेन्द्रियस्य धान्यस्य जायन्ते पञ्चभिः कणैः ।
पञ्चेन्द्रियत्वं तत्तृप्तिर्भूरिपञ्चेन्द्रियव्ययात् ॥११८॥

एवं च ते दयाभासधर्मनिष्ठास्तपस्विनः ।
करिणं मारणायैकं बबन्धुस्तरुणा सह ॥११९॥

सभारशृङ्खलाबद्धो यत्र चासीद् मतङ्गजः ।
ते**नार्द्रकि**ः पथा प्राप महर्षिः करुणार्द्रधीः ॥१२०॥

महर्षिदर्शनात् तस्य वन्दनोत्सुकचेतसः ।
अयस्पाशा व्यशीर्यन्त कर्मपाशा इवाभितः ॥१२१॥

निरर्गलः करी सोऽथ वन्दितुं तं महामुनिम् ।
अभ्यसार्षीज्जनस्तूचे मुनिरेष हतो हतः ॥१२२॥

पलायाञ्चक्रिरे लोका मुनिस्तस्थौ तथैव सः ।
इतोऽप्यवनमत् कुम्भस्थलः प्रणमति स्म तम् ॥१२३॥

स हस्ती पुनरुत्थाय भक्तिमन्थरया दृशा ।
पश्यन् महर्षिं प्राविक्षदरण्यानीमनाकुलः ॥१२४॥

तत्प्रभावाद्भुतं वीक्ष्य प्रणतास्तापसाश्च ते ।
मुनिना प्रत्यबोध्यन्त जीवतत्त्वोपदेशतः ॥१२५॥

तत्र **श्रेणिक**राजोऽपि तत्तथा गजमोक्षणम् ।
तापसप्रतिबोधं च श्रुत्वाऽऽगा**दभया**न्वितः ॥१२६॥

भक्त्या वन्दितवन्तं चानन्दयामास पार्थिवम् ।
सर्वकल्याणकारिण्या धर्मलाभाशिषा मुनिः ॥१२७॥

राजापि मुनिमुत्फुल्लनेत्रो विरचिताञ्जलिः ।
भक्त्याऽपृच्छद् ममाश्चर्यं भगवन् ! हस्तिमोक्षणात् ॥१२८॥

''मुनिरूचे न भूपाल ! दुष्करं करिमोक्षणम् ।
आमतर्कुलतातन्तुपाशमोक्षस्तु दुष्करः ॥१२९॥
राज्ञा पृष्टश्च स मुनिस्तर्कुतन्तुकथां तथा ।
कथयामास राजापि सलोकोऽपि विसिष्मिये'' ॥१३०॥

''मुनीन्दु**रार्द्रकेयो**ऽ**थाभय**मेवमभाषत । 5
निष्कारणोपकारी त्वं ममान्तर्धर्मबान्धवः ॥१३१॥
त्वया हि प्रेषिता राजपुत्रार्हत्प्रतिमा मम ।
तद्दर्शनादहं जातिस्मरीभूयार्हतोऽभवम् ॥१३२॥
अनार्यत्वमहापङ्के निमग्नोऽहं त्वयोद्धृतः ।
त्वद्बुद्ध्या बोधवानार्यदेशायातोऽभवं व्रती ॥१३३॥ 10
किं किं त्वया न दत्तं मे बोधिरत्नं प्रयच्छता ?
ततोऽ**भय**कुमारं ! त्वं लभस्वानुत्तरां श्रियम्'' ॥१३४॥
श्रेणिकश्चभयश्चैतं नत्वाऽयातां स्वमाश्रयम् ।
आर्द्रकिः श्रीमहावीरं दृष्ट्वा शिवपदं ययौ ॥१३५॥

॥ इत्यभयकुमारकथायां कर्मजबुद्धिनिबन्धनं तृतीयः प्रकाशः ॥ 15

● ● ●

§§ अथैकदा संसदि **वीर**भर्तुर्दृष्ट्वाऽ**भयो** मङ्क्षु महर्षिमेकम् ।
पप्रच्छ नाथं भगवान् ! क एष मुनीश्वरो योग इवाङ्गयुक्तः ? ॥१॥
अथाह नाथः श्रृणु वत्स ! **वीतभया**ख्यमास्ते नगरं प्रतीच्याम् ।
राजा तदीयोऽय**मुदायनो**ऽस्मद्गिरा भवोद्विग्नमना बभूव ॥२॥
प्रभावतीकुक्षिभवं च राज्ये निवेश्य **केशा**ख्यमयं स्वपुत्रम् । 20
अस्मत्करेण व्रतमाप मोक्षमिहैव गन्ताऽखिलकर्महन्ता ॥३॥
सत्पारिणामिक्यभिधानबुद्धिरथाभयः प्राञ्जलिरित्युवाच ।
राजर्षिरन्त्यो भविता प्रभो ! कः स्वामी जगावत्र युगेऽयमेव ॥४॥

नत्वाऽथ नाथं नगरे च गत्वाऽभयो भवार्तभयोपगूढः ।
आपृच्छते स्म प्रयतो व्रताय गुणैरगाधो **मगधा**धिनाथम् ॥५॥

न **श्रेणिकः** प्राह विहस्य वत्स ! त्वं युक्तमेवाभिदधासि किन्तु ।
साम्राज्यदीक्षां पुरतो गृहाण दीक्षां ग्रहीतुं समयो ममायम् ॥६॥

अथाभयः **श्रेणिक**मित्युवाच देव ! त्वदाज्ञां शिरसा वहानि ।
राजर्षिमन्त्यं परमादिश मे **वीरो** विभु**र्वीतभया**धिनाथम् ॥७॥

त्वत्पुत्रतां प्राप्य पुराणपुण्याज्जगद्गुरुं **वीर**जिनं च देवम् ।
न चेद् भवध्वंसिविधिं विधास्ये मत्तोऽधमस्तत् क इवापरोऽस्तु ? ॥८॥

नाम्नैव नामाऽस्म्यभयो भवात्तु भूम्नो भुवो भर्तरहं बिभेमि ।
प्रसीद तद् मां प्रहिणु प्रयामि श्री**वीर**मद्याभयदं त्रिलोक्याः ॥९॥

अथोपगृह्यैनमुवाच पृथ्वीपतिः सुतस्नेहविमोहितात्मा ।
यदा ध्रुवे त्वां परतो व्रजेति व्रतं तदा वत्स ! समाददीथाः ॥१०॥

वज्रेण वज्रं तु यथा तथास्ति वेध्या स्वबुद्ध्या नृपबुद्धिरेषा ।
ध्यात्वेति धीमा**नभयो**ऽथ भूपं व्यजिज्ञपद् देव ! तदेवमस्तु ॥११॥

अथान्यदा हन्त हिमर्तुरासीदूष्मा खरांशोरपि यद्भयेन ।
निलीयते स्मावटकोटरेषु नारीस्तनाद्रिष्वधिरोहति स्म ॥१२॥

कथैव का देहवतां बतास्मिन्नभोऽपि संकोचमियाय शीतात् ।
इत्थं न चेत् तत् कथमस्य पारमह्नाय याति प्रभवोऽयमह्नाम् ? ॥१३॥

यत्रानुगोसर्गमनर्गलेन शीतेन दूयेत दिवाकरोऽपि ।
तेनैष पूर्वामपहाय तप्तुं दिशं कृशानोर्भृशमभ्युपैति ॥१४॥

प्रियानुरागैर्घुसृणाङ्गरागैर्माञ्जिष्ठरागैर्मसृणांशुकैश्च ।
ध्यानैरिवास्मि ध्वनिनः कडारैः शीतार्त्तिकाले वशयन् सुखानि ॥१५॥

निशासु सन्ध्यासु दिनेषु यस्मिन्नुरःपुरःपृष्ठनिवेशितेन ।
रोरैर्न रैर्जानुकृशानुभानुत्रयेण शीतं क्रमतो विनीतम् ॥१६॥

श्रीवीरनाथो भगवांस्तदानीं नानामुनिश्रेष्ठनिषेव्यमाणः ।
वन्दारुवृन्दारकबन्दिवृन्दसंस्तूयमानः समुपाजगाम ॥१७॥
श्रीश्रेणिक-श्चेल्लणया समेतस्तदाऽपराह्णे परमेश्वरं तम् ।
नन्तुं विनीतोऽभिजगाम धर्मं शुश्राव च श्रावकपुङ्गवोऽस्मात् ॥१८॥
ततो नमस्कृत्य विभुं निवृत्तौ तौ दम्पती क्वापि नदोपकण्ठे । 5
अपश्यतामेकमनुत्तरीयं शीतेऽपि क्लृप्तप्रतिमं महर्षिम् ॥१९॥
अथो रथात् तावावतीर्य जायापती यतीन्द्रं तमवन्दिषाताम् ।
शताङ्गमारुह्य च पुण्यवार्ताः प्रवर्तयन्तौ पुरमीयतुश्च ॥२०॥
इतस्तदानीं हिमसंनिपाते सन्ध्याभ्रकन्थापिहितोऽपि सद्यः ।
और्वाग्नितापे विधृतोऽपि धात्रा दिनायुषोऽन्तेऽस्तमियाय भानुः ॥२१॥ 10
अस्तं गते भास्वति भर्तरीव दिक् पश्चिमेयं विधवेव नारी ।
विलापिनी वार्धिजलेषु सन्ध्यारागं तदा घट्टमिवास्यति स्म ॥२२॥
तारामयोदारशिखामणीकैस्तमोमयैः श्यामलदन्दशूकैः ।
दष्टं जगज्जीवयति स्म वेगादगादुपेत्य स्वयमोषधीशः ॥२३॥
दिग्योषितामाननकालिमा यः स स्वैरिणीनामगमद् मुखेषु । 15
तदाननौज्जवल्यमगादमूषां मुखेषु शीतत्विषि जृम्भमाणे ॥२४॥
रोदःपुटीयं कलशी तदन्तर्ज्योत्स्ना समन्तादपि तक्रपूरः ।
तत्राश्रयन् बुद्बुदतामुडूनि चन्द्रोऽप्यधान्मक्षणपिण्डशोभाम् ॥२५॥
अत्रान्तरे निर्मितसर्वरागकृत्यः कृती श्रेणिकभूमिपालः ।
देव्या समं चेल्लणयाऽध्युवास विलासवेश्मागरुधूपधूम्रम् ॥२६॥ 20
एकैकबाहौ विहितोपधानावन्योन्यदोःश्लिष्टतनू रतान्ते ।
चूलीतले पट्टदुकूलक्लृप्तावगुण्ठनावस्वपितामुभौ तौ ॥२७॥
निद्राश्लथाश्लेषतयाथ देव्या बभूव हस्तो बहिरुत्तरीयात् ।
दूनश्च शीतेन स कोमलाङ्गोऽलिः कण्टकेनेव सदुःसहेन ॥२८॥

ततः प्रबुद्धा सहसैव देवी शीतार्त्तितः सीत्कृतिमादधाना ।
करेण तेनाम्बुजसंनिभेन नरेन्द्रवक्षःश्रियमर्चति स्म ॥२९॥

निरुत्तरीयं तमृषिं तदानीं स्मृत्वा च सोवाच कृपालुरेतत् ।
शीतेऽतिघोरे पततीदृशे हा महानुभावो भविता कथं सः ? ॥३०॥

उक्त्वेति सेयं सरलस्वभावा निद्रामथावाप तथैव देवी ।
प्रायेण निद्रा सुलभैव तेषां येषां विकल्पा हृदये न केऽपि ॥३१॥

सीत्कारमात्रेण तदा च तस्या नृपोऽल्पनिद्रः सहसा प्रबुद्धः ।
तद्वाक्यमाकर्ण्य तथास्वरूपं प्ररूपयामास विकल्पमेवम् ॥३२॥

रिरंसितो निश्चितमस्ति कश्चिदन्यः प्रियोऽस्या हृदि भावलग्नः ।
शीतार्त्तिसम्भावनयाऽयमित्थं सङ्केतभूभावनुशोचतीयम् ॥३३॥

ताम्यत्तितिक्षावशगो निशां तां स गोपतिजाग्रदथो निनाय ।
सचेतनो हि प्रियजामिरुच्चैरनीर्ष्यकः स्याद् न कदाचिदेव ॥३४॥

अत्रान्तरे मङ्गलतूर्यनादादनन्तरं मङ्गलपाठकास्तम् ।
प्राबोधयन् पञ्चमरागमुच्चैः प्रपञ्चयन्तः श्रुतिशुक्तिपेयम् ॥३५॥

विभावरीयं नृपते ! विभाता विभावरीशोऽस्तमयं प्रयाति ।
विभावरीणप्रणयश्च सैष विभावरीयानरुणेऽभ्युदेति ॥३६॥

हतान्धकारेभघटास्त्रशोणमायान्तमालोक्य हरिं पुरस्तात् ।
तारामृगीभिः सममिन्दुकृष्णासारः प्रतीचीं विधुरः प्रयाति ॥३७॥

ध्वान्तादिदं सम्प्रति गर्भवासादिवाविरासाऽखिलमेव विश्वम् ।
तेनार्कतेजोऽरुणवर्ष्मणोऽस्य कर्णातिथिः कांस्यरवः क्रियेत ॥३८॥

दिशोऽन्धकारेण मिलन्ति नीलीरागा मृगाङ्केण समं हसन्ति ।
ततोऽनुरज्यन्ति दिवाकरेण धिक् चञ्चलत्वं चपलेक्षणानाम् ॥३९॥

श्रुत्वेति राजा रमणीविरक्तो विसृज्य देवीं स्वनिकेतनाय ।
आहूय चामात्यम**थाभया**ख्यमित्यादिदेशाभिनिवेशभीमः ॥४०॥

ज्ञातं मयाऽन्तःपुरमद्य साक्षादरे दुराचारमशेषमेतत् ।
प्रज्वाल्यतां तद् द्रुतमेव मा भूरनीदृशस्त्वं किल मातृमोहात् ॥४१॥
आदिश्य तत्राभयमित्यभीक्ष्णमभीस्तदा क्रोधवशाद् भवस्य ।
नन्तुं जिनेन्द्राय जगाम राजा विराजमानोद्भुतराजलक्ष्म्या ॥४२॥
अथ स्वभावादभयो विमृश्यकारीति दध्यौ सभयः स्वताते । 5
सतीषु धुर्या मम मातरोऽमू रक्ष्यास्तदा स्यामहमेकतातः ॥४३॥
इदं त्वसंभाव्यतमं विकल्प्य तातेन दिष्टं किमहं करोमि ?
कोपो हि कोऽपीह महीपतीनां पुरो नदीपूर इवाविषह्यः ॥४४॥
तथाप्युपायं परिकल्प्य कालक्षेपो मया क्षेमविधौ विधेयः ।
प्रभोरविद्याऽन्तमुपैति कालक्षेपाद् यदि क्रोधभरः प्रशान्तिम् ॥४५॥ 10
ध्यात्वेति धीमानभयस्तदीयाभ्यर्णे सुजीर्णेभकुटीमधाक्षीत् ।
चकार चोच्चैर्नृपतेर्निदेशाद् ददाह शुद्धान्त इति प्रघोषम् ॥४६॥
§§ इतश्च वीरं नृपतिस्तदानीं मानी समानीय करावपृच्छत् ।
किमेकपत्नी किमनेकपत्नी स्वामिन् ! ममावेदय चेल्लणेति ? ॥४७॥
स्वामी जगौ श्रेणिक ! तावकीनाः सत्य समस्ता अपि धर्मपत्न्यः । 15
जगाद शीते निशि चेल्लणा तु स्मृत्वा मुनिं तं 'भविता कथं सः ?' ॥४८॥
श्रुत्वेति सद्यः प्रसृतानुतापदाहज्वरो डामरितान्तरात्मा ।
श्रीवीरनाथं प्रणिपत्य राजधानीं प्रतिक्षोणीपतिर्दधावे ॥४९॥
प्रदीपनं तत्र विधाय वेगादभ्यागतं देशनसद्मनोऽग्रे ।
जगाद् राजाऽभयमादरेण त्वया निदेशः किमनुष्ठितो मे ? ॥५०॥ 20
भयात्तकम्पस्त्वभयः प्रणम्य कृताञ्जलिः क्ष्मापतिमित्युवाच ।
आज्ञा परेषामपि तावकीना तात ! प्रमाणं बत किं पुनर्मे ? ॥५१॥
राजापि कोपारुणलोचनस्तं जगाद पापिन् ! परतो व्रजाशु ।
रे दर्शयस्यात्ममुखं स्वमातृर्दग्ध्वा त्वमग्नौ पतितोऽसि किं न ? ॥५२॥

अथाभयः प्राह पतङ्गमृत्युर्युक्तः श्रुतार्हद्वचनस्य मे न ।
तात ! प्रसादाद् भवतो ग्रहीष्ये व्रतं तु दिष्ट्या भगवत्पदान्ते ॥५३॥

नृपोऽप्यनाकर्णितकेन तूर्णं पुरं गतोऽन्तःपुरमक्षतं तत् ।
जीर्णेभशालां ज्वलितां च दृष्ट्वा विमृश्यकारिण्यभये जहर्ष ॥५४॥

ततोऽभये यत् 'परतो व्रजे'ति कोपात् तदाभाष्यत तद् विमृश्य ।
तैरेव पादैः प्रभुपर्षदि क्ष्मापतिः सुतं सान्त्वयितुं जगाम ॥५५॥

तत्रैष तं दीक्षितमालुलोके श्रीवीरनाथस्य पुरो निषण्णम् ।
विषण्णमेनं त्वभयो मुनीन्दुः प्राबोधयद् बोधयितव्यमेवम् ॥५६॥

तदात्मसन्धावचनं विचिन्त्य राजन्! विषादं हृदि मा दधीथाः ।
मया गृहीतं भगवत्पदान्ते व्रतं भवानप्यनुमोदतां तत् ॥५७॥

श्रुत्वेति राजा प्रणिपत्य नाथं मुनीनथान्यानभयं च भक्त्या ।
तं क्षामयित्वाऽश्रुमुखः स्वनिन्दापरः कथञ्चित् पुरमाजगाम ॥५८॥

श्रीवीरपादमूले तप्त्वा चिरमायुषोऽन्तमधिगम्य ।
अभयकुमारमुनीन्दुर्गतिमूहेऽनुत्तरां क्रमतः ॥५९॥

॥ इत्यभयकुमारकथायां पारिणामिकीबुद्धिनिबन्धनं चतुर्थः प्रकाशः ॥

● ● ●

अथ **जम्बूस्वामि**सत्त्वमहिमानमनुमोदयन्नाह –

नवनवइकणयकोडी चइऊणं तह य अट्ठ रमणीउ ।
गहिऊण संजमं जंबूसामिणा साहिअं कज्जं ॥४९॥

[नवनवतिकनककोटीस्त्यक्त्वा तथा चाष्ट रमणीः ।
गृहीत्वा संयमं जम्बूस्वामिना साधितं कार्यम् ॥]

व्यख्या – सुगमैवेयम्, परं 'साहिअं कज्जं' **साधितं** सिद्धिमानीतं **कार्यं** कृत्यं केवलज्ञानावाप्तिमुक्तिप्राप्तिरूपमिति संक्षेपार्थः । व्यासार्थस्तु कथानकादवसेयः । तच्चेदम्–

§§ श्रीराजिराजितं **राजगृह**मित्यस्ति पत्तनम् ।
यत्पौराणां वणिक्पुत्र इव सोऽपि धनेश्वरः ॥१॥

नृपस्तत्र क्षतारिस्त्रीश्रेणिः **श्रेणिक** इत्यभूत् ।
धर्मी यो मार्गणक्षेपं विदन्नपि विवेद न ॥२॥

श्रीमान् **वीरः** शुनासीरप्रमुखामरसेवितः ।
तत्रैत्य समवासार्षीद् विभु**र्वैभार**पर्वते ॥३॥

निशम्य स्वामिनं प्राप्तं राजा **राजगृहेश्वरः** ।
सपौरान्तःपुरामात्यः प्रीतो नन्तुं समाययौ ॥४॥

प्रणम्योचितभूपीठे निविष्टेषु नृपादिषु ।
स्वामी संसारधिक्कारदायिनीं देशनां व्यधात् ॥५॥

अत्रान्तरे समायासीद् दासीकृतरविस्त्विषा ।
चतुर्भार्यः प्रभुं नन्तुं कश्चिदिन्द्र इवामरः ॥६॥

प्रदक्षिणात्रयीपूर्वं प्रणम्य परमेश्वरम् ।
निषसाद यथास्थानं सोऽपि रोपितविस्मयः ॥७॥

शक्रादिसुरचक्रेषु ज्वलन् रविरिवोडुषु ।
अकरोद् दुष्करं किं किं देवोऽयं पूर्वजन्मनि ? ॥८॥

श्रेणिकक्षोणिकान्तेन पृष्टः स्पष्टमिति प्रभुः ।
देवस्य तस्य वृत्तान्तं कथयामासिवानिति ॥९॥ युग्मम् ॥

राजन् ! **मगध**देशेऽत्र ग्रामे **सुग्राम**नामनि ।
राष्ट्रकूटान्वयी श्रीमानार्यावानार्यवागभूत् ॥१०॥

रेवतीकुक्षिजौ तस्य सुतौ भुवनविश्रुतौ ।
अभूतां **भवदत्त**श्च **भवदेव**श्च नामतः ॥११॥

भवदत्तोऽग्रहीद् दीक्षां **सुस्थिता**चार्यसन्निधौ ।
भवदेवमपि क्रष्टुं भवाद् ग्राहयति स्म तम् ॥१२॥

भवदेवः प्रियां दध्यौ दामितोऽपि तपस्यया ।
लज्जया धारितः क्षुद्रः स्मरत्येव मरुस्थलीम् ॥१३॥

द्युगते **भवदत्ते**ऽथ **भवदेवः** प्रियामगात् ।
भग्नालानः करी विन्ध्याटवीमेवाभिधावति ॥१४॥

अथ श्लथगुणग्रामः **सुग्राम**ग्रामसीमनि ।
चैत्यसमेतयेत्युक्तः स शमी कान्तया तया ॥१५॥

"मूढाशय ! नवामूढामिव मां मनुषे हृदि ।
जरारजर्जरितां पश्य संसारस्य कुसारताम् ॥१६॥

अस्मिन् पवित्रवस्तूनामपावित्र्यनिबन्धने ।
देहे जरापरायत्ते विमुह्यास्यधुना मुधा ॥१७॥

विषं माममृतं दीक्षामन्यथा मा स्म मन्यथाः ।
तद् व्याघुट्य झटित्येव गुरुं व्रज कुरु व्रतम्" ॥१८॥

इति प्रबोधितः प्रीतो **नागिला**या गिरा चिरात् ।
साधु साध्विति तां स्तुत्वा साधुः सूरिं रयादयात् ॥१९॥

आलोच्य तद् गुरोरग्रे तदुक्तं स व्रतं व्यघात् ।
येनाजनिष्ट **सौधर्मे** प्रभातिभासुरः सुरः ॥२०॥

क्षेत्रे **महाविदेहे**ऽथ विजये **पुष्कला**ऽभिधे ।
नगर्यां **वीतशोका**यां **भवदेवो** दिवश्च्युतः ॥२१॥

पुत्रः **पद्मरथ**स्यासीद् **वनमाला**ङ्गसंभवः ।
नाम्ना **शिवकुमारो**ऽयं पितृभ्यां परिणायितः ॥२२॥ युग्मम् ॥

अन्यदाऽसौ गवाक्षस्थः सार्थवाहस्य कस्यचित् । 5
वेश्मन्युपात्तसद्भिक्षं मुनिमेकमलोकत ॥२३॥

अथास्थानगतं पापवारणं कृतपारणम् ।
गत्वा नत्वा मुनिं राजाङ्गजोऽन्ते समुपाविशत् ॥२४॥

ततोऽसौ ज्ञानवानूचे **भवदत्तो**ऽस्म्यहं पुरा ।
भवांश्च **भवदेवो**ऽभूदावामात्तव्रतौ तथा ॥२५॥ 10

दिवश्च्युत्वाहमभवं **विजये**ऽत्रैव विश्रुते ।
नगर्यां **पुण्डरीकिण्यां वज्रदत्त**स्य चक्रिणः ॥२६॥

पत्न्यां **यशोधरा**ख्यायां सुतः **सागर**सञ्ज्ञितः ।
पिता धात्रीशपुत्रीभिस्तरुणः परिणायितः ॥२७॥ युग्मम् ॥

एकदाऽनेकदारान्तर्वर्ती मन्दिरमूर्द्धनि । 15
दृष्टनष्टघनालोकात् प्रबुद्धौ व्रतमादिषि ॥२८॥

गृहीततीर्थकृद्दीक्षो गुरोर**मृतसाग**रात् ।
तप्यमानोऽवधिज्ञानी चाभवं प्रधिषन् भवम् ॥२९॥

श्रुत्वा **शिवकुमारो**ऽदः प्रबुद्धः शुद्धमानसः ।
नत्वा यतिं गतः प्रष्टुं पितरौ निश्चितव्रतः ॥३०॥ 20

पितृभ्यामननुज्ञातस्ततश्चाकृतभोजनः ।
गत्वा पौषधशालायां तस्थावस्थानमंहसाम् ॥३१॥

अथैष जगतीभर्तुरादेशाद् दृढधर्मणा ।
श्राद्धेन बोधितो भुङ्क्ते षष्ठादाचाम्लपारणः ॥३२॥

ईदृक्तपःप्रकाशी च प्राशुकाशी व्रतीव सः ।
तत्र शुश्रूषितत्रुट्यत्कर्मणा दृढधर्मणा ॥३३॥
अथ द्वादशवर्षोन्ते भावनिर्व्यूढसंयमः ।
विद्युन्मालीति देवोऽभूद् **ब्रह्म**लोकेऽद्भुतद्युतिः ॥३४॥
राजन् सोऽयमिति श्रुत्वा **श्रेणिकः** पुनरब्रवीत् ।
भविष्यति भुवि स्वामिन् कीदृशोऽयमतश्च्युतः ? ॥३५॥
विभुराह पुरेऽत्रैव **ऋषभ**श्रेष्ठिसूरसौ ।
जम्बूनामावसर्पिण्यां भावी चरमकेवली ॥३६॥
तद् **विद्युन्मालिनः** कान्ताश्चतस्रो विनयाऽऽनताः ।
तीर्थेशमिति पप्रच्छुः कास्माकं भाविनी गतिः ? ॥३७॥
श्रेष्ठिनां तनुजीभूय यूयमप्यस्य योषितः ।
भविष्यथ पुरेऽत्रैव तदिदं विभुरभ्यधात् ॥३८॥
अथ तद्दिवसादेव स देवः सप्तमेऽहनि ।
धारिण्या ऋषभश्रेष्ठिपत्न्याः कुक्षाववातरत् ॥३९॥
पूर्णैरथ दिनैः श्रेष्ठिप्रिया सा सुषुवे सुतम् ।
आनन्दामृतरोचिष्णुं सरसीव सरोरुहम् ॥४०॥
इतश्च श्रेष्ठिनो भ्राता **जिनदास** इति श्रुतः ।
मृत्वा शाश्वत**जम्बूद्वौ** जातवानस्ति दैवतम् ॥४१॥
तस्योपयाचितादेष प्रसूतः सूनुरित्यथ ।
पितृभ्यां विहितो **जम्बूकुमार** इति नामतः ॥४२॥
समुद्रश्रीरिति तथा **पद्मश्री**रिति च श्रुता ।
पद्मसेनेति **कनकसेने**ति च समाख्यया ॥४३॥
विद्युन्मालिसुरस्यैताश्चतस्रश्चित्तवल्लभाः ।
गृहेषु श्रेष्ठिमुख्यानामवतेरुर्दिवश्च्युताः ॥४४॥ युग्मम् ॥

नभसेना च **कनकश्रीश्च कनकवत्यथ** ।
जयश्रीरिति चाभूवंश्चतस्रोऽन्याः कुमारिकाः ॥४५॥
अष्टौ मूर्त्यन्तराणीव महिषीणां बिडौजसः ।
ताः पुरेऽत्र बभुर्बालाः सिद्धयोऽष्टाविवाथवा ॥४६॥
दातुं ताः पितृभिः **जम्बूस्वामिने ऋषभो**ऽर्थितः । 5
सर्वं मेने न कस्तुल्यगुणसङ्गाय कौतुकी ? ॥४७॥
तदानीं च महामोहतमोहतिदिवाकरः ।
श्री**सुधर्मा** समायासीद् **वैभारगिरि**काननम् ॥४८॥
श्रुते तस्मिन् समायाते निर्यातं नगरादथ ।
जनैर्भृङ्गैरिवाम्भोजादोजायितविराजितैः ॥४९॥ 10
श्री**सुधर्म**गणाधीशं नमस्कर्त्तुं समागमत् ।
तदा **जम्बूकुमारो**ऽपि समारोपितसंमदः ॥५०॥
संसारसागरोत्तारतरीविरमरीणयां ।
गिरा गुरुश्चकारास्य पुरस्ताद् धर्मदेशनाम् ॥५१॥
जम्बूरम्बूज्ज्वलां वाचं गुरोः संवरदात्तदा । 15
पीत्वा रोमाञ्चरूपेणाभितः पल्लवितोऽभवत् ॥५२॥
नत्वा मुनीन्द्रमुन्निद्रव्रतग्रहमहोद्यमः ।
जगामाऽयममायः सन् सदनं मदनं द्विषन् ॥५३॥
सत्वरः पितरौ नत्वा **जम्बू**ः कम्बूज्ज्वलस्मितः ।
निजगादाऽयमादाय व्रतं प्रीतो भवाम्यहम् ॥५४॥ 20
इत्याकर्ण्य ततः कर्णकालकूटोत्कटं वचः ।
सुतं व्रतनिषेधाय पितरावूचतुस्तराम् ॥५५॥
"एकस्त्वमावयोर्दीपो भानुर्भूनभसोरिव ।
त्वां विना वत्स ! नितमां तमांस्यभिभवन्ति नौ ॥५६॥

मनोरथशताहूतप्रसूतव्रतकर्मभिः ।
दुर्लभस्तात लब्धोऽसि त्वमुदुम्बरपुष्पवत् ॥५७॥
तन्नश्चिरेण संपूर्णमनोरथमहारथम् ।
किमीदृग्वाग्घनाघातैर्युक्तं भङ्क्तुं तवानघ ! ? ॥५८॥
ययाचिरे चिरेणैता रूपाद्वैताङ्गयष्टयः ।
अष्ट याः कन्यकास्तुभ्यं त्यजस्येताः कुतः सुत ! ? ॥५९॥
स्वसङ्गसुभगम्मन्याः कन्याः परिणयन्निमाः ।
कुतूहलं श्रुतोलूलुरावयोः पूरयाऽऽवयोः ॥६०॥
आशानामिव चैतासामन्तश्चन्द्र इव स्फुरन् ।
कलावन्नावयोर्नेत्रकुमुदानां मुदं कुरु'' ॥६१॥
श्रुत्वा पित्रोरिमां वाचमचलव्रतनिश्चयः ।
उचितज्ञः कुमारोऽयमभ्यधाद् मधुरं वचः ॥६२॥
''तावदाचर्यत ब्रह्मव्रताय नियमो मया ।
कुतूहलाय वां कार्यं पाणिग्रहणमप्यदः ॥६३॥
विवाहस्य द्वितीयेऽह्नि ग्रहीष्यामि पुनर्व्रतम् ।
क्षेपं मूर्धन्यवात्सल्याद् नाहं भवदवानले ॥६४॥
आसां मृगीदृशां प्रेमस्थेमसंबन्धबन्धने ।
पतित्वेन पतित्वाऽसौ क्व मोक्षाय यतिष्यते ?'' ॥६५॥
इत्यालोच्य मिथस्ताभ्यां पितृभ्यां तन्मतं वचः ।
अकारि च मुदा पाणिपीडनोपक्रमक्रमः ॥६६॥ युग्मम् ॥
अथ **जम्बूकुमारेण** ज्ञापिते स्वव्रतोद्यमे ।
पितॄन् किङ्कार्यतामूढानाहुस्तानिति कन्यकाः ॥६७॥
इहापि परलोकेऽपि **जम्बू**स्वामी गतिः स नः ।
पद्मश्रियामिवोष्णांशुर्विद्युतामिव वाम्बुदः ॥६८॥

स्वमनोऽभिमते मार्गे सोऽस्माभिस्तेन वा वयम् ।
नेतव्याः सत्यमित्यस्तु स्पर्धाबन्धः परस्परम् ॥६९॥

महासतीषु धन्यानां कन्यानां वचनैरिति ।
तेऽप्युद्दिश्य विवाहस्य दिनमानन्दिनः स्थितः ॥७०॥

अथाननेन्दुनिर्गच्छदतुलसुधया तया । 5
स्त्रीषु संजीवयन्तीषु भवदग्धं मनोभवम् ॥७१॥

बन्धूनामुपरोधेन विरोधेन तु चेतसः ।
लग्ने **जम्बूकुमारो**ऽयमुपयेमे कुमारिकाः ॥७२॥ युग्मम् ॥

सह ताभिः स्मरशरैः सहिताभिस्तदा वदन् ।
गतस्पृहो गृहावासे वासवेश्मन्यवास्थित ॥७३॥ 10

इतश्च **विन्ध्यो विन्ध्या**द्रौ व्यधाज्**जयपुरे**श्वरम् ।
पुत्रं प्रभुमथ ज्येष्ठः **प्रभवो** निरगात् क्रुधा ॥७४॥

चौरपञ्चशतीयुक्तः कुर्वन्नुर्व्यां स चोरिकाम् ।
जज्ञेऽवस्वापिनीतालोद्घाटिनीविद्ययोः पदम् ॥७५॥

गृहं तदा तदागत्य **जम्बू**स्वामिनिषेवितम् । 15
विद्ये प्रयुज्य तन्वानश्चौर्यं स्तम्भमवाप सः ॥७६॥

केनाहं स्तम्भितो भृत्यैः सहितोऽपीति चिन्तयन् ।
दृशं प्रतिदिशं चौरग्रामणीरक्षिपत्तृ ततः ॥७७॥

अथ सुप्तेऽखिले लोके कुमारं स्त्रीभिरावृतम् ।
अपश्यज्जाग्रतं सोऽब्जखण्डकैरवखण्डवत् ॥७८॥ 20

प्रभवस्तमुवाचाथ **जम्बू**नामानमानतः ।
स्तम्भनीं देहि मे विद्यां गृह्णन् विद्याद्वयं मम ॥७९॥

जम्बूस्वामी ततो वाचमाचष्टे स्म शमैकभूः ।
नास्ति मे स्तम्भनी विद्या त्वद्विद्याभ्यां च किं मम ? ॥८०॥

काङ्क्षामि यदहं गेहविरहं निरहङ्कृतिः ।
व्रतं प्रातर्ग्रहीष्यामि **सुधर्म**स्वामिसन्निधौ ॥८१॥

अथाह **प्रभवः** श्रीमन्निति प्राभवभाग्भवान् ।
भुनक्ति नैव किं भोगान् व्रताय यतसे कुतः ? ॥८२॥

वरेणेदमथावादि तथावादिनि तस्करे ।
सकर्ण ! त्वमुभाकर्णि समाकर्णय मद्गिरम् ॥८३॥

"रसवीर्यविपाकेन किम्पाकेभ्योऽपि दारुणात् ।
अभिज्ञः कोऽनुभुञ्जीत विषयान् मुखपेशलान् ? ॥८४॥

विरसा अपि रोचन्ते विषया विकृतात्मसु ।
कषायिणि मुखे क्षारमपि क्षीरायते जलम् ॥८५॥

विषयेच्छावशः प्राणी परिभूयेत कर्मभिः ।
आशाबद्धो रसः किं न क्रियते भस्म वार्त्तिकैः ? ॥८६॥

तदलं विषयैर्ज्ञातासारैः सुगुरुसङ्गमात् ।
तिष्ठामहे महानन्दसौख्यायानन्तसम्पदे" ॥८७॥

"अथाह **प्रभवः** स्वास्मिंस्त्वं बन्धुषु पराङ्मुखः ।
पितरौ दुष्प्रतीकारौ कथङ्कारं विमुञ्चसि ?" ॥८८॥

"अथ जम्बूरुवाचैनमहो मोहः शरीरिणाम् ।
बान्धवो बन्धवः केऽत्र पितरौ पितरश्च के ?" ॥८९॥

पितृमातृसहस्राणि भ्रातृपुत्रायुतानि च ।
जातौ जातैर्व्यतीतानि कस्याहं कस्य ते पुनः ? ॥९०॥

अहमेको न मे कोऽपि नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं दृश्यते न स यो मम ॥९१॥

मातृभूय पितृभूय पुत्रादीभूय भूरिशः ।
प्राणिनोऽत्र विवर्तन्ते ज्ञातेयं क्वोपयुज्यताम् ? ॥९२॥

बन्धूनां प्रतिबन्धस्य खलूक्त्वा वार्त्तयापि तत् ।
धर्म एवाङ्गिनां शर्म दत्ते माता पिता सुहृत्'' ॥९३॥

''अथाह **प्रभवः** पुत्रमुत्पाद्य प्रव्रजेस्ततः ।
अपुत्रस्यास्ति न स्वर्गो न च तृप्तिरमुत्र यत्'' ॥९४॥

''विहस्याथ जगौ जम्बूर्गिरा शम्बूकगौरया ।
स्वर्गः पुत्रेण चेत् पुंसां वृथा धर्मक्रिया ततः ॥९५॥
श्वानशूकरसर्पाद्या दृश्यन्ते बहुसूनवः ।
तत् ते दिवं प्रयास्यन्ति न बालब्रह्मचारिणः ? ॥९६॥
पुत्रैरावर्जितं पिण्डं लभन्ते पितरौ यदि ।
तृप्तास्तत् किमु भुक्तेन कस्यापि पितरो वयम् ॥९७॥
विषयप्रोतयालं तत्पुत्रोत्पादनवार्त्तया ।
इत्युक्ते जम्बुना जज्ञे प्रभवः पिहितोत्तरः'' ॥९८॥

''अथोवाच **समुद्रश्री**र्नाथेयं श्रीरनर्गला ।
प्राप्ता त्वया कथमिमां हित्वा भिक्षुत्वमीहसे ?'' ॥९९॥

''जम्बूरुवाच है कम्बूपमकम्बि ! निशम्यताम् ।
को विश्वासः श्रियोऽमुष्याश्चञ्चला चपलेव या ? ॥१००॥
यात्मनो जनकं धर्मं हन्ति नित्योपकारिणम् ।
निस्त्रपायाः श्रियस्तस्याः पतिद्रोहेऽपि का त्रपा ॥१०१॥
तदेनां स्वयमुत्सृज्य प्रव्रजिष्यामि भामिनि ! ।
त्यज्यमानं प्रतीक्षिष्ये नात्मानमनया पुनः'' ॥१०२॥

''**पद्मश्री**रित्यथावादीदनादीनव ! नाथ ! ते ।
गार्हस्थ्यादपरो धर्मः शर्मदो नोपयुज्यते ॥१०३॥
गृहस्थाधारतो धर्मे यतन्ते यतयोऽपि हि ।
पक्षपाताद् विना मातुर्जीवन्ति क्व तु जन्तवः ? ॥१०४॥

यथा सरोऽभिगच्छन्ति क्ष्माचराः खेचरा अपि ।
तृष्णाच्छिदे तथा यान्ति गृहस्थं धार्मिकाः परे ॥१०५॥
गृहिधर्मं दुराधेयं सुरैरप्यसुरैरपि ।
पालयन्ति नराः शूरा दुरादुज्झन्ति चापरे'' ॥१०६॥

''**अथ जम्बूरुवाचेशमुपकुर्वन्ति सेवकाः ।**
प्रधानत्वं तदीशस्य सेवकेषूपयुज्यते ॥१०७॥
मानुषत्वच्युतेः पान्ति दिशन्ति च परं पदम् ।
क्षेमयोगकृता नाथा लिङ्गिनस्तेन गेहिनीम् ॥१०८॥
न ध्यायन्ति न जल्पन्ति न चलन्ति न भुञ्जते ।
सावद्यं यतयो ये ते गृहिभ्यो नोत्तमाः कथम् ? ॥१०९॥
मेरु-सर्षपयोर्यद्वदन्तरं रवि-कीटयोः ।
वार्धि-गोष्पदयोर्यद्वत्तद्वद् यति-गृहस्थयोः ॥११०॥
खण्डनी पीषणी चुल्ली पयःकुम्भी प्रमार्जनी ।
पञ्चशूना गृहे तेन दूना गृह्णीमहि व्रतम्'' ॥१११॥

''जगाद **पद्मसेनाथ** नाथ ! ते सुन्दरं वपुः ।
व्रतकष्टोचितं नैव कदलीगर्भकोमलम्'' ॥११२॥

''**अथ जम्बूरुवाचेदमशुचेः कृतघातिनः ।**
कापेक्षा वपुषः प्रेक्षावतां शश्वद्विनाशिनः? ॥११३॥
स्वतन्त्रः परतन्त्रेण निर्मलः समलेन च ।
देहेन चेदुपार्ज्येत धर्मस्तत्क्षूणमत्र किम् ?'' ॥११४॥

''जगाद **जयसेनाथ** नाथ ! तीर्थकरैरपि ।
कृत्वा राज्यं परिव्रज्याददे तत्त्वं किमुत्सुकः ?'' ॥११५॥

''**जम्बूरथाह ते ज्ञानादविदन् कालमात्मानः**
स्पर्धा तैर्नोऽस्तु काऽऽतङ्के प्रजानामिव राजभिः ? ॥११६॥

कृतान्तस्य करोऽकस्मादेत्यकस्मादलक्षितः ।
कहिं चालयिता सार्थं सम्बलेन वदाङ्गिनाम् ॥११७॥
दुष्कर्मचौरहन्तारः सहायाः साधवोऽद्य मे ।
कुर्वन् पथ्यदनं धर्मं यामि तन्मुक्तिपत्तनम्'' ॥११८॥

''**नभःसेना** विहस्याथ जगौ नाथ तव भ्रमः । 5
मानसे वासितः केन वद स्वर्गापवर्गयोः ? ॥११९॥
भवोऽयमेव दौर्गत्यवतां दुर्गतिरिष्यते ।
स एव श्रीमतां स्वर्गोऽपवर्गो रतिशालिनाम्'' ॥१२०॥

''**अथ जम्बूर्जगादेति वदन्ती नापराध्यसि ।**
तैलमेवामृतं तस्य येनाज्यं नैक्षि कर्हिचित् ॥१२१॥ 10
स्वर्गापवर्गयोः सौख्यप्रमाऽणुनभसोरिव ।
यत्र तत्र प्रिये ! मर्त्यसुखाभासस्य का कथा ? ॥१२२॥
सुषुप्तिक्षुत्तृषामर्त्तिरर्तिर्मूत्रपुरीषयोः ।
अर्तिर्भोगे वियोगे च क्व नार्त्तिर्मर्त्यजन्मनि ? ॥१२३॥
तद् विमुच्यासुखमयान् भोगान् रोगानिवैहिकान् । 15
मोक्षसौख्यलताबीजं ग्रहीष्ये गृहिणि ! व्रतम्'' ॥१२४॥

''**कनकश्री**रथोवाच न कः प्रार्थयते सुखम् ? ।
परं प्रत्यक्षमेवैतत्परोक्षस्य कथा वृथा ॥१२५॥
तपः क्रियते भोगेभ्यस्तेषु लब्धेषु तद् वृथा ।
प्रज्वालयति को वह्निमन्ते पाकमुपेयुषि ?'' ॥१२६॥ 20

''**अथ जम्बूर्जगौ प्रत्युत्पन्नदृष्टिस्त्वमीदृशी ।**
प्रत्युत्पन्नदृशां दीर्घदृश्वरास्त्ववनीश्वराः ॥१२७॥
स्वर्गापवर्गदं प्राप्य मानुष्यं तत्सुखस्पृशः ।
विनश्यन्त्यायतौ मूढा बीजभोजिकुटुम्बिवत् ॥१२८॥

तदिदं राज्यवल्लब्ध्वा मानुष्यं दिनपञ्चकम् ।
तत् करिष्याम्यहं यद् न कृतं जन्मशतैरपि ॥१२९॥

''अथो कनकवत्यूचे त्वमपूर्वं करिष्यसि ।
हित्वा हस्तगतं भोज्यं कूर्परान्तं विलेक्ष्यसि ॥१३०॥

''कुमारोऽथ जगौ गौरि ! क्रान्त्वा लोकैः शुकैरिव ।
त्रुट्यमाना भ्रमं भोगाः स्यन्ति शाल्मलिकोशवत् ॥१३१॥
भवशैलेऽत्र पुंयोनिविवराद् विषयान्धलाः ।
क्षिप्यन्ते दुर्गतौ प्राप्ता अपि सिद्धरसाप्तये ॥१३२॥
तदहं युवतीलोभं व्यतीत्य सुगुरोर्गिरा ।
कल्याणसिद्धये सिद्धरसायैवास्मि सादरः'' ॥१३३॥

''**जयश्री**रित्यथावादीद् नाथ ! साधूदितं त्वया ।
परं परोपकारो यः स पुण्यखनिरिष्यते ॥१३४॥
त्वं द्विषन्नपि तद् भोगान् भजास्मत्कृतये कियत् ।
धनो जनोपकाराय क्षाराम्भोऽपि न किं पिबेत् ? ॥१३५॥
विषं तदपि तत्प्रत्तं सुधायेत यथाऽङ्गिनाम् ।
तथा नः श्रेयसे भोगास्तेऽपि योगात्तव प्रभो ! ॥१३६॥
तत् कृपालो ! कृपां कृत्वा स्वसङ्गमसुखामृतैः ।
सञ्जीवयाऽस्मान्कामार्त्ता वल्लरीरिव नीरदः'' ॥१३७॥

''जम्बूरथाह तां कामहतां स महतां वरः ।
असन्निर्बन्धमाधातुमलं कमललोचने ! ॥१३८॥
भोगो युष्माकमस्माकमुभयेषाममी विषम् ।
यच्चतुर्गतिकस्तेभ्यो भवो भवति भीषणः ॥१३९॥
तिर्यग्नारकदुर्देवनृतादुःखस्य का कथा ? ।
एकशोऽपि विपद् घोरा गर्भवासे निशम्यताम् ॥१४०॥

सूचीभिरग्निवर्णाभिर्भिद्यमानस्य लोमसु ।
यथा दुःखं भवेज्जन्तोर्गर्भेऽष्टगुणितं तथा ॥१४१॥

हन्तनाल इवामेध्ये कीट इव वसन् भवी ।
नवमासोऽहानि चत्वारि नयत्यसमदुःखभाक् ॥१४२॥

तत्रस्थश्चिन्तयत्येष निसृतोऽतः कथञ्चन ।
तत्करिष्ये यथा नात्र भूयोऽपि निपताम्यहम् ॥१४३॥

ततोऽपि जायमानस्य यद् दुःखं योनिसङ्कटे ।
मूर्च्छितस्येव जाल्मोऽयं न स्मरेद् घातमात्मनः ॥१४४॥

स्मारितोऽहं तु तत्पूज्यैरपुनर्भवनायकैः ।
स्मृत्वा तच्च भवत्योऽपि भवताऽध्वनि मामके" ॥१४५॥

अथोत्तरङ्गवैराग्यरसाङ्गीकृतचेतसः ।
अष्टावपि समं **जम्बूकुमार**मिदमभ्यधुः ॥१४६॥

आश्रितो यस्त्वया पन्थाः सोऽस्माभिरपि संश्रितः ।
ततः सहैव नेतासि तेनास्मान् शिवपत्तनम् ॥१४७॥

उवाच **प्रभवो**ऽप्युच्चैर्महासत्त्व ! भवद्गुणैः ।
कृष्टस्त्वामनुयास्यामि पुत्राद्यापृच्छ्य सत्वरम् ॥१४८॥

मा प्रमादीर्महाभाग ! विवेकोचितमाचरेः ।
इत्युक्तो **जम्बु**ना यातः **प्रभवो** भवनं निजम् ॥१४९॥

ज्ञात्वा **जम्बूकुमार**स्य सदारस्यापि निश्चयम् ।
श्वशुराः पितरौ वाऽऽसंस्तमेवानुयियासवः ॥१५०॥

"अथ **जम्बूकुमारो**ऽपि विधाय जिनपूजनम् ।
सङ्घं विधिवदभ्यर्च्य संमान्य स्वजनादिकान् ॥१५१॥

स्नानीयगन्धपानीयकृतमज्जनमङ्गलः ।
चन्दनेन सितध्याननेनेव सर्वाङ्गभासुरः ॥१५२॥

रत्नाभरणसंभारैः सत्त्वसारैरिवाञ्चितः ।
असमैः कुसुमैः स्वस्य यशोभिरिव शोभितः ॥१५३॥
संवीतः सितवासोभिः पुण्येन्दुकिरणैरिव ।
बाह्यान्तरसहस्रेण शिबिकामधिरूढवान् ॥१५४॥ कलापकम् ॥

"ततो जन्मान्तरस्नेहरसेन सहचारिणा ।
अनाहतेन देवेन कृतनिष्क्रामणोत्सवः ॥१५५॥
प्रवेशिताभिराकम्य सैन्यवारित्रभूभृतः ।
सेनाभिरिव पञ्चेषोः प्रियाभिस्ताभिरावृतः ॥१५६॥
दानैरावर्जयन् दीनांस्तूर्यैर्मुखरयन् नभः ।
मायूरच्छत्रदण्डेन मण्डलं तिरयन् रवेः ॥१५७॥
आलोक्यमानो लोकेन विस्मयालोलमौलिना ।
पौरीभिर्दीयमानाशीरक्षतक्षेपपूर्वकम् ॥१५८॥
वन्दिवृन्दजयध्वानमुखरीकृतदिङ्मुखः ।
सुधर्मस्वामिपादाब्जपावनं वनमीयिवान्" ॥१५९॥ पञ्चभिः कुलकम् ॥
याप्ययानादथोत्तीर्य प्रतीष्टाचारमङ्गलः ।
मध्ये प्रविश्य नत्वा च गुरुपादान् व्यजिज्ञपत् ॥१६०॥
संसारसागरोत्तारकर्णधारमुनीश्वर ! ।
मां सकुटुम्बं चारित्रयानपात्रेण तारय ॥१६१॥
ततः स्वपाणिपद्मेन गणधारिधुरन्धरः ।
स्वजनैरन्वितं **जम्बूकुमारं** तमदीक्षयत् ॥१६२॥
प्रभवोऽप्यन्यदाऽभ्येत्य **सुधर्म**स्वामिसन्निधौ ।
भावशत्रुप्रतिक्षेपदक्षो दीक्षामुपाददौ ॥१६३॥
गणधारिधुरीणेन तदानीं **प्रभवो** मुनिः ।
कृतः सुकृतवान् **जम्बू**पादाम्बुजमधुव्रतः ॥१६४॥

ततः श्रीवीरनिर्वाणाद् व्यतीत्य दशहायनीम् ।
सुधर्मस्वामिना जम्बूस्वामी स्वामी गणे कृतः ॥१६५॥
श्रीसुधर्मगणाधीशे श्रिते निःश्रेयसश्रियम् ।
जम्बूः प्राबोधयद् विश्वं सरोजमिव भास्करः ॥१६६॥
अथ वर्षचतुःषष्टै गतायां वीरनिर्वृतेः । 5
श्रीजम्बूस्वामिना चक्रे गच्छेशः प्रभवः प्रभुः ॥१६७॥
आजन्मशीलकलनादिह जम्बुनाम्नि
सौभाग्यमद्भुतमिहैव विभौ बभूव ।
यस्मादमुं समधिगम्य गतेऽपि तस्मिन्
अद्यापि नान्यमधिगच्छति केवलश्रीः ॥१६८॥ 10

॥ इति जम्बूस्वामिकथा ॥४९॥

● ● ●

अथ चतसृभिर्गाथाभिर्मुनिमतल्लिकानिकायं नामतः प्रस्तुवन्नाह –

धन्नो तह कयपुन्नो विण्हुकुमारो य अन्नियाउत्तो ।
जसभद्द-भद्दबाहू अइमुत्तो नागदत्तो य ॥५०॥

सिज्जंभवो अ पभवो सिरिओ उदायणो[1] अ मासतुसो ।
केसी इलाइपुत्तो मेहकुमारो अ पुंडरीओ ॥५१॥

अद्दयकुमारसाहू कित्तिधरो नंदिसेण-करकंडू ।
हल्ल-विहल्लमुणिंदा साल-महासाल-सीहगिरी ॥५२॥

अज्जमहागिरि-अज्जसुहत्थी तह अज्जरक्खिओ संबो ।
पज्जुन्नमुणी कुम्मापुत्तो तह भद्दगुत्तो य ॥५३॥

[धन्यस्तथा कृतपुण्यो विष्णुकुमाराश्चान्निकापुत्रः ।
यशोभद्रो भद्रबाहुरतिमुक्तो नागदत्तश्च ॥
शय्यंभवश्च प्रभवः श्रीयक उदायनश्च माषतुषः ।
केशीलातिपुत्रो मेघकुमारश्च पुण्डरीकः ॥
आर्द्रकुमारसाधुः कीर्तिधरो नन्दिषेणकरकण्डू ।
हल्लविहल्लमुनीन्द्रौ शालमहाशालसिंहगिरयः ॥
आर्यमहागिर्यार्यसुहस्ती तथाऽऽर्यरक्षितः शाम्बः ।
प्रद्युम्नमुनिः कूर्मापुत्रस्तथा भद्रगुप्तश्च ॥]

व्याख्या – आसां पदार्थः स्पष्टः । व्यासार्थस्तु कथानकेभ्योऽवसेयः ॥ तत्र **धन्यः शालिभद्र**कथायाम्, **कृतपुण्यः** पुनरभय**कुमार**कथायामुद्दिष्टः । सम्प्रति **विष्णुकुमार**कथा यथा –

§§ **कुरु**षु स्वस्तिभागस्ति **हस्तिनागपुरं** पुरम् ।
तत्रेक्ष्वा**कु**रभूत् क्षोणीपतिः **पद्मोत्तरा**भिधः ॥१॥

---

१. ग. घ. उद्दाय° ।

ज्वालादेवी च **लक्ष्मी**श्चाभूतां द्वे तस्य वल्लभे ।
सम्यग्दृष्टिस्तयोराद्या मिथ्यादृष्टिः परा पुनः ॥२॥

प्रासूत द्वौ सुतौ **ज्वाला** सिंहस्वप्नेन सूचितः ।
तयोराद्योऽभवद् **विष्णुकुमार** इति विश्रुतः ॥३॥

चतुर्दशमहास्वप्नसूचितः क्ष्मावसूचितः ।
द्वितीयस्तु **महापद्म** इत्यभूत् पद्मलोचनः ॥४॥

उभावपि शुभाकारौ तौ नरेन्द्रकुमारकौ ।
अवर्धेतामर्भकत्वं चन्द्रादित्याविवाश्रितौ ॥५॥

कलाकलापकलितौ तौ क्रमेण कुमारकौ ।
युवतीदृक्पिकीचूतवनं यौवनमीयतुः ॥६॥

प्रकृत्याऽगृध्नुना **विष्णुकुमारे**ण निराकृते ।
राज्ञाथ युवराजत्वे **महापद्मो** न्यवेश्यत ॥७॥

इत**श्चोज्जयिनी**पुर्यां **श्रीवर्मा** पार्थिवोऽभवत् ।
मिथ्यात्वरुचिरासीच्च मन्त्री **नमुचि**सञ्ज्ञितः ॥८॥

तत्पुरोपवनेऽन्येद्युः शिष्यः श्री**सुव्रत**प्रभोः ।
समेत्य **सुव्रता**चार्यः शमवान् समवासरत् ॥९॥

तद्वन्दनाय निर्यान्तं वीक्ष्य राजा पुरीजनम् ।
पप्रच्छ **नमुचिं** लोकोऽस्तोकोऽयं क्व नु गच्छति ? ॥१०॥

नमुचिः प्राह देवात्रोपवने केऽपि सूरयः ।
सन्त्यायाताः प्रणन्तुं तांस्तद्भक्त्या यान्त्यमूः प्रजाः ॥११॥

राजोचे यावस्तर्ह्यावामपि मन्त्र्याह तत्र च ।
मध्यस्थेन त्वया भाव्यं तान् करिष्ये निरुत्तरान् ॥१२॥

ओमित्युक्त्वा नृपस्तेन सह सूरीनुपाययौ ।
धर्मतत्त्वं च **नमुचिः** पप्रच्छाक्षिप्य तानथ ॥१३॥

मत्वा क्षुद्रममुं **क्षुल्लके**न केनापि सूरयः ।
तदा पराजयन्ते स्म वादिना प्रतिवादिनम् ॥१४॥

सोऽथ यातः समं राज्ञा रजन्यां तु समत्सरः ।
छन्नं प्राप्तो मुनीन् हन्तुं वनदेव्या न्यबध्यत ॥१५॥

प्रातर्लोकेन राज्ञा च ज्ञातो मुनिषु मत्सरी ।
असामान्यं विमान्याथ **नमुचि**र्निरवास्यत ॥१६॥

हस्तिनापुरमायातः स विलक्षो द्विजाधमः ।
महापद्मस्य तत्रापि युवराजस्य मन्त्र्यभूत् ॥१७॥

इतः **सिंहबलो**ऽन्वर्थनामा **सीमाल**भूपतिः ।
भञ्जं भञ्जं **महापद्म**वेशं दुर्गे विशत्यसौ ॥१८॥

महापद्मेन रुष्टेन ततो **नमुचि**रौच्यत ।
मन्त्रिन् ! **सिंहबल**ध्वंसोपायं कमपि विन्दसि ? ॥१९॥

वेद्म्येवेति प्रतिज्ञाय सोऽपि **सिंहबलं** गतः ।
भङ्क्त्वा तद्दुर्गमचिरात्तं बद्ध्वा च समानयत् ॥२०॥

वरं वृण्वित्यभाषिष्ट **महापद्मः** प्रसद्य तम् ।
यदा याचे तदा देय इत्यूचे **नमुचि**श्च तम् ॥२१॥

यौवराज्यं **महापद्मे** पालयत्येतदम्बया ।
ज्वालयाविष्कृतो जैनरथेनात्ममनोरथः ॥२२॥

लक्ष्मीरपि सपत्न्यस्याः स्पर्धया ब्रह्मणो रथः ।
कारयित्वा भ्रमयितुं तत्पूर्वमुपचक्रमे ॥२३॥

तन्मत्वाऽभ्यग्रहीज्**ज्वाला** समक्षं भूपतेरिति ।
नाग्रेऽर्हद्रथयात्रा चेत् तत्परत्र ममाशनम् ॥२४॥

रथयात्रे नृपेणाथ न्यषेत्सातामुभे अपि ।
द्वयोः का दृगनिमील्येतोन्मील्येतापि च का यतः ? ॥२५॥

इति प्रेक्ष्य **महापद्मः** स्वाम्बापरिभवं क्रुधा ।
अनापृच्छ्यैव पितरं ययौ देशान्तरं निशि ॥२६॥

स्त्रीभिः श्रीभिश्च गणशोऽव्रियतैष पदे पदे ।
को विदेशः स्वदेशो वा पूर्वेपात्तसुकर्मणाम् ? ॥२७॥

ततो नवमचक्रित्वपदलक्ष्मीमुपार्ज्य सः ।
स्वपुरं पुनरागच्छदनेकनृपसेवितः ॥२८॥

पित्रा सहर्षमभ्येत्य तत्र तेनादरादसौ ।
प्रावेश्यत पुरं पौरबद्धवन्दनमालिकम् ॥२९॥

गत्वा सौधमसौ धन्यगुणां स्वजननीं नमन् ।
तयाऽशस्यत सानन्दमञ्चयन्त्या कराञ्चलम् ॥३०॥

सुव्रतः **सुव्रता**चार्यः पुराद् बहिरिहान्तरे ।
आययावर्यमेवान्यो हतमोहतमोभरः ॥३१॥

पद्मोत्तरनृपः सान्तःपुरपौरपरिच्छदः ।
एत्यावन्दिष्ट तत्पादान् निकषा निषसाद च ॥३२॥

सूरिः संसारवैराग्यकन्दकादम्बिनीं तदा ।
चकार देशनामुग्रक्लेशनाशपटीयसीम् ॥३३॥

देशनान्तेऽथ भूपालौ भववैराग्यमुद्वहन् ।
गत्वा पुरं जगौ **विष्णुकुमारं** राज्यहेतवे ॥३४॥

स त्वाह तात ! राज्येऽस्मिन् **महापद्मो** निवेश्यताम् ।
युष्माभिरेव सत्राहं प्रविव्रजिषुरस्मि तु ॥३५॥

ततो राज्ये **महापद्मं** कृत्वा **पद्मोत्तरो** नृपः ।
व्रतं **विष्णुकुमारेण** सहाऽऽदत्त महामतिः ॥३६॥

चक्रवर्तिपदे किञ्चाभिषेको द्वादशाब्दिकः ।
अभ्येत्याभ्येत्य भूपालै**र्महापद्मस्य** निर्ममे ॥३७॥

तावन्तं कालमस्थातां रथौ वादे तथैव तौ ।
मिथोऽप्याज्ञाग्रहाधीने रणे सैन्ये इवेशयोः ॥३८॥

लक्ष्मीरथं निराकृत्य मिथ्यात्वमिति मूर्तिमान् ।
महापद्मः स्वजननीरथयात्रामसूत्रयत् ॥३९॥

किञ्च कुक्कुटसंपातप्रमाणान्तरभूमिकाः ।
अकार्यन्त जिनेन्द्राणां विहारास्तेन कोटिशः ॥४०॥

जिनशासनभक्तेस्मिन् जनोऽपि जिनभक्तिमान् ।
सर्वोऽप्यभवदुक्तं हि **'यथा राजा तथा प्रजाः'** ॥४१॥

§§ इतः **पद्मोत्तर**स्तीव्रततरमहासिना ।
हतकर्मरिपुः सिद्धिं जयश्रियमिवाश्रयत् ॥४२॥

मुने**र्विष्णुकुमार**स्य तपतो दुस्तपं तपः ।
लब्धयो वैक्रियाकाशगामिन्याद्या जजृम्भिरे ॥४३॥

इतश्च **सुव्रता**चार्या वर्षास्था **हस्तिनापुरे** ।
ज्ञाता **नमुचिना** पूर्वविरुद्धेन दुरात्मना ॥४४॥

ततोऽनेन **महापद्म**श्चक्री पूर्वप्रतिश्रुतम् ।
वरं यज्ञक्रियाहेतो राज्यं देहीत्ययाच्यत ॥४५॥

अस्मै राज्यं प्रदायान्तःपुरान्तरविशद् नृपः ।
स चाभूत् कैतवाद् यज्ञदीक्षितो राज्यदीक्षितः ॥४६॥

मुक्त्वा जैनमुनीनेनं वर्धापयितुमाययुः ।
अन्यदर्शनिनो विप्राः प्रकृतयोऽपि च ॥४७॥

न श्वेतभिक्षवोऽभ्येयुरिति संप्राप्य सच्छलम् ।
आहूय **सुव्रता**चार्यानित्यूचे **नमुची** रुषा ॥४८॥

यदा यः कुरुते राज्यं यथावर्ण स लिङ्गिभिः ।
द्रष्टव्यो नियतं राजरक्षिता हि तपोधनाः ॥४९॥

यूयं तु गर्वकठिनाः सर्वपाखण्डदूषिणः ।
विप्रनिन्दापराः क्षिप्रमिदं राज्यं तदुज्झत ॥५०॥

तमूचुः सूरयो नास्मत्कल्पोऽयं तेन नागताः ।
न निन्दामश्च कमपि समभावा हि साधवः ॥५१॥

वचसा शीतलेनापि तप्ततैलमिवाम्बुना । 5
प्रज्ज्वलन् **नमुचिः** प्राह सूरीनूरीकृतः क्रुधा ॥५२॥

दत्ता सप्ताह्निकाऽह्नाय यात यूयं यथारुचि ।
तदूर्ध्वं तु यथादृष्टं हंस्यामि जिनलिङ्गिनम् ॥५३॥

श्रुत्वेति वसतावेत्य जगदुः सूरयो यतीन् ।
किं विधेयं महासत्त्वाः ! सङ्कटेऽस्मिन्नुपस्थिते ? ॥५४॥ 10

अथैकः प्राह भगवन् ! **महापद्म**स्य सोदरः ।
अनेकलब्धिमान् **विष्णुकुमारो**ऽस्ति महातपाः ॥५५॥

तद्वाक्यान्**नमुचि**र्नूनमसावुपशमिष्यति ।
विना भानुप्रभां नैशं तमो नश्यति कर्हिचित् ? ॥५६॥

परं **मन्दर**शैलेऽस्ति तप्यमानः स साम्प्रतम् । 15
यो विद्यालब्धिमान् साधुस्तमाह्वातुं प्रयातु सः ॥५७॥

अथान्यः प्राह गमने शक्तिर्नागमने तु मे ।
गुरुस्त्वाह भवान् **विष्णुकुमारे**णागमिष्यते ? ॥५८॥

गुर्वाज्ञातः समुत्पत्य गरुत्मानिव स क्षणात् ।
ययौ **विष्णुकुमारे**ण शालमानं शिलोच्चयम् ॥५९॥ 20

दृष्ट्वा **विष्णुकुमार**स्तं निश्चिकायेति चेतसि ।
सङ्घकार्यं ध्रुवं किञ्चित् प्रावृष्येव यदागतः ॥६०॥

ततो नतोऽमुना **विष्णुकुमार**स्तत्तथा कथाम् ।
श्रुत्वाऽस्मात् सह तेनैवोत्पत्यागाद् गुरुसन्निधौ ॥६१॥

गुरून् नत्वा तदाज्ञातो गतश्च **नमुचेः** सदः ।
तं विनाऽन्यैर्नृपैर्नत्वोपावेश्यत महासने ॥६२॥
तत्र **विष्णुकुमारो**ऽधर्माख्यानपुरस्सरम् ।
नमुचिं प्राह सन्त्वेते यावद्वर्षा महर्षयः ॥६३॥
नमुचिस्तूचिवान् राज्यं हित्वा मेऽथ वसन्त्वमी ।
मुनिरूचे पुरे चेन्न सन्तूद्याने पुराद् बहिः ॥६४॥
कोपाद् **नमुचि**रूचेऽथ पुरोद्यानस्य का कथा ?
राज्येऽपि मम न स्थेयं कार्यं चेज्जीवितेन वः ॥६५॥
सप्रहासं मुनिः प्राह राज्यमम्भोधिसीम ते ।
तत्त्याज्यं कथमेतेषां देहि स्थानं पदत्रयम् ॥६६॥
नमुचिः प्राहः दत्त चेत् प्रेक्षिष्येऽहमतो बहिः ।
तं करिष्ये शिरश्छित्त्वा धकाराक्षरसोदरम् ॥६७॥
तन्तो **विष्णुं** शरीरान्तःकोपेनव प्रसर्पता ।
ववृधे **हिमव**न्मुख्यान् पर्वतानपि खर्वयन् ॥६८॥
नमुचिः[१] पार्ष्णिघातेन पातितस्तेन चासनात् ।
परासुः प्रययौ शीघ्रं सप्तमीं नरकावनिम् ॥६९॥
त्रस्तं चीत्कृत्य दिग्नागैस्तं वीक्ष्याथ भयङ्करम् ।
धिष्ण्यैस्तुषवदुड्डीनं तद्घ्राणाकोणमारुतैः ॥७०॥
ताटङ्कितेन्दुमार्तण्डं ललामितसुरापगम् ।
तं वीक्ष्याद्रिदरीमिन्द्रोऽविशद् मुक्त्वा कृशोदरीम् ॥७१॥
विज्ञायावधिनेन्द्रस्तं मुनीन्द्रं कुपितं ततः ।
प्रैषीदस्य प्रबोधाय गान्धर्वानीकगायनीः ॥७२॥
कर्णाभ्यर्णं समेत्यैतास्तस्य गीतानि तेनिरे ।
उत्फणस्य महामन्त्रवादिन्य इव भोगिनः ॥७३॥

---

१. क. ग. घ. पाददर्दरिकाघातैश्चकम्पे तस्य मेदिनी । तदात्वग्रस्त**नमुचि**विषभ्रमिभराादिव ॥६९॥

क्रोधं प्रभो संहर यन्निमित्तमयं कृतोऽसौ **नमुचिर्निरस्तः** ।
कृतेऽन्नपाके स्वयमात्मनीनैः किं स्वाश्रयाग्निः प्रशमं न नेयः ? ॥७४॥

क्रोधः प्रसूतत्रिजगद्विरोधः क्रोधः कृतापत्प्रकरप्रबोधः ।
क्रोधः शिवाद्वन्यजनैकरोधः क्रोधः प्रणेयः कृतिभिस्ततोऽधः ॥७५॥

इत्यम्बरे शम्बधराङ्गनाभिः पृथ्व्यां च सङ्घेन महीभुजा च । 5
कथङ्कथञ्चित् प्रतिबोध्यमानः सस्मार स स्वं कुपितः कुमारः ॥७६॥

संहृत्य[1] चाशु स्वतनोः प्रवृद्धिं रुषः प्रवृद्धिं च विधूय मूलात् ।
प्राप्तः स्वभावं क्षमितो लगित्वा पादे **महापद्म**नरेश्वरेण ॥७७॥

श्रीसंघदौःस्थ्यमिति **विष्णुकुमार** एष,
भित्त्वा क्रमेण निजकर्मबलं च जित्वा । 10
उत्पन्नकेवलकलाकलितः प्रबोध्य
विश्वम्भरां शिवगतिं बिभराम्बभूव ॥७८॥

॥ इति श्रीविष्णुकुमारकथा ॥

● ● ●

१. क. कीर्त्यै समर्प्य स्वं ।

अथ **आन्निकापुत्र**कथा यथा –

उभे स्तो **मथुरा**नाम्नी नगर्यौ दक्षिणोत्तरे ।
मुख्याञ्जनेन बिभ्राणो श्रियं क्षोणीदृशोरिव[1] ॥१॥

मथुरायामुदीच्यां च **देवदत्तो**ऽभवद् वणिक् ।
दक्षिणस्यां धनावाप्त्यै **मथुरा**यामियाय सः ॥२॥

वणिजा **जयसिंहे**न तत्रासीत्तस्य सौहृदम् ।
स्वसाऽऽसीज्**जयसिंहस्य चान्निका** नाम कन्यका ॥६॥

जयसिंहोऽन्यदा जामि**मन्निका**मादिशद् निजाम् ।
समित्रोऽप्यद्य भोक्ष्येऽहं रम्यां रसवतीं कुरु ॥४॥

इत्युक्त्वा **जयसिंहेन देवदत्तो** निमन्त्रितः ।
आगच्च तद्गृहे भोक्तुं तौ द्वावपि निषेदतुः ॥५॥

भक्ष्यभेदानथो मिष्टानष्टादश महारसान् ।
द्वयोरप्य**न्निका** सा तु सुवेषा पर्यवेषयत् ॥६॥

तयोर्वातात्प्रियाकर्तुं निराकर्तुं च मक्षिकाः ।
धुन्वती व्यजनं चक्रे कर्मैकं द्व्यर्थकारि सा ॥७॥

वीजनालोलदोःसिञ्जत्कङ्कणां तां मृगेक्षणाम् ।
देवदत्तो भृशं पश्यन्नभूत् कामवशंवदः ॥८॥

तद्रूपरसनिस्यन्दपाननिस्पन्दलोचनः ।
सोऽविदन् भोजस्वादं बुभुजे गजलीलया ॥९॥

देवदत्तो द्वितीयेऽह्नि **जयसिंहा**दथान्निकाम् ।
स्वमित्रैर्याचयामास सोऽपि तानेवमूचिवान् ॥१०॥

कुलीनोऽयं कलाज्ञोऽयं सश्रीकोऽयं सुधीरयम् ।
युवाऽयं किं बहु ब्रूमः सर्वे वरगुणा इह ॥११॥

किन्तु यामिं प्रदास्यामि तस्मै यो मे गृहात् क्वचित् ।
न याता वीक्ष्यते प्रातरुत्थितैः स हि सज्जनः ॥१२॥

---

१. ग. घ. दृशाविव ।

एष संभाव्यते यास्यन्नद्य श्वो वापि सुन्दरः ।
किं न श्रुतं हि यद् ग्रामा वसन्ति प्राघुणैः किमु ? ॥१३॥
प्राणप्रिया स्वसेयं मे जङ्गमा श्रीरिवौकसि ।
तदिमां सम्प्रहेष्यामि न भर्तुरपि वेश्मनि ॥१४॥
असौ कर्तुं क्षमोऽपत्यजन्मावधि यदीदृशम् ।
तदुद्वहतु मे जामिं **देवदत्तोऽन्निका**मिमाम् ॥१५॥
देवदत्तानुमत्यैते ओमिति प्रतिपेदिरे ।
देवदत्तोऽपि तां कन्यां परिणिन्ये शुभेऽहनि ॥१६॥
तत्र तस्**यान्निका**प्रेमपाशबद्धस्य तस्थुषः ।
प्रैष्युदग्मथुरास्थाभ्यां पितृभ्यां लेख ईदृशः ॥१७॥
"आवामन्धौ जराजीर्णौ जीवन्तौ यदि वीक्षसे ।
तदुद्वापय नौ नेत्रे रुदतोरिह पुत्रक ! ॥१८॥
पितृवात्सल्यवद् मूर्तं स तं लेखमवाचयत् ।
पथिश्रान्तोऽयमित्यश्रुसलिलैः स्नपयन्निव ॥१९॥
अचिन्तयच्च धिग् धिग्मां पितरौ विस्मृतौ हि मे ।
अहं विषयलग्नोऽस्मि पित्रोः पुनरियं दशा ॥२०॥
किं करोमि कथं यामि पतितोऽहं महापदि ? ।
स्वजिह्वयाथ बद्धस्य गतिः का मे भविष्यति ?" ॥२१॥
अन्निका तत्कराल्लेखमादाय तमवाचयत् ।
तद्दुःखकारणं सद्यो विवेद जगाद च ॥२२॥
सर्वथा मा कृथाः खेदमार्यपुत्राचिरादहम् ।
भ्रातरं बोधयिष्यामि करिष्यामि त्वदीप्सितम् ॥२३॥
गत्वा भ्रातरमूचे च नितरां कुपितेव सा ।
विवेकिन् ! किमिदं भ्रातर्भवतानुष्ठितं वद ॥२४॥

स्वकुटुम्बवियोगेन क्लिश्यते तव भावुकः ।
श्वश्रू-श्वशुरपादानामहमुत्कण्ठिताऽस्मि च ॥२५॥
अनुमन्यस्व मे नातं स्वस्थानगमनं प्रति ।
तमन्वेष्याम्यहमपि तस्याऽऽयत्ता न ते यतः ॥२६॥
स्थास्यत्येवैष वाग्बद्धः प्रणन्तुं श्वशुरौ त्वहम् ।
एकाकिन्यपि यास्यामि किं कार्यं तदनेन ते ? ॥२७॥
इति साग्रहमुक्तस्तु **जयसिंहो** व्यसर्जयत् ।
ताव**ुदग्मथुरां** प्रत्यागन्तुं लग्नौ च तौ द्रुतम् ॥२८॥
अन्निकाऽभूत्तदा गुर्वी नेदीयःप्रसवापि च ।
इति मार्गेऽपि साऽसूत सुतं लक्षणविश्रुतम् ॥२९॥
नादत्तामस्य तौ नाम पितरौ तत्करिष्यतः ।
अन्निकापुत्र इत्येनं तज्जनस्तूदलापयत् ॥३०॥
उत्तरा**मन्निकानाथो** जगाम **मथुरा**मथ ।
तौ ववन्दे च पितरौ ताभ्यां मूर्धन्यचुम्बि च ॥३१॥
देशान्तरोपार्जनेयं ममोपादीयतामिति ।
ब्रुवाणः सोऽर्भकं पित्रोरर्पयामास हृष्टयोः ॥३२॥
इयं वधूर्वः पुत्रोऽयं ममैतत्कुक्षिसंभवः ।
इत्याचख्यौ च सम्बन्धं भक्तिबन्धुरया गिरा ॥३३॥
स्थविरौ चक्रतुस्तस्य शिशोः सन्धीरणभिधाम् ।
अन्निकापुत्र इति तु लोकनाम्ना स पप्रथे ॥३४॥
वर्धमानोऽ**न्निकासूनुः** स्पर्धमानो नवेन्दुना ।
चतुर्वर्गार्जनोर्जस्वि प्रपेदे मध्यमं वयः ॥३५॥
भोगान् रोगानिवापास्य यौवनेऽपि स धीधनः ।
जयसिंहगुरोः पार्श्वे परिव्रज्यामुपाददे ॥३६॥

स क्रमेण परिक्रान्तचारित्रज्ञानदर्शनः ।
बभूव गणभृद् गच्छकमलाकरभास्करः ॥३७॥
स सूरिः सपरीवारो वृद्धत्वे विहरन् ययौ ।
नगरं **पुष्पभद्राख्यं गङ्गा**तटविभूषणम् ॥३८॥
तत्राभूद् भूपतिः **पुष्पकेतु**स्तस्य तु वल्लभा । 5
बकुलस्येव वासन्ती **पुष्पवत्य**भिधानतः ॥३९॥
अभूतां युग्मजौ तस्याः पुत्रः पुत्री च सुन्दरौ ।
अभूत्तयोः **पुष्पचूलः पुष्पचूले**ति चाभिधा ॥४०॥
वर्धमानौ सहैवैतौ रममाणौ सहैव तौ ।
प्रीतिमन्तौ मिथोऽभूतां मरालपृथुकाविव ॥४१॥ 10
"राजा दध्यौ च यद्येतौ दारकौ स्नेहलौ मिथः ।
वियुज्येते तदा नूनं मनागपि न जीवतः ॥४२॥
वियोगं सोढुमहमप्यनलम्भूष्णुरेतयोः ।
मिथस्तदेतयोरेव युक्तमुद्वाहमङ्गलम् ॥४३॥
मित्राणि मन्त्रिणः पौरानथ पप्रच्छ पार्थिवः । 15
अन्तःपुरे यदुत्पन्नं रत्नं तस्य क ईश्वरः ?" ॥४४॥
"ते प्रोचुर्देशमध्येऽपि रत्नं किमपि यद्भवेत् ।
तस्यापीशो महीनाथः का कथाऽन्तःपुरे पुनः ? ॥४५॥
यद् यदुत्पद्यते रत्नं स्वदेशे तद्विशाम्पतिः ।
यथाकामं नियुञ्जीत बाधकस्तस्य कोऽपि न" ॥४६॥ 20
तेषां भावानभिज्ञानामालम्ब्याथ वचो नृपः ।
युक्ते फले इवापत्ये ते मिथः पर्यणाययत् ॥४७॥
राज्ञी **पुष्पवती** तस्य श्राविकाऽभूत्तया नृपः ।
अवार्यत तथा कुर्वंस्तामवाजीगणत् पुनः ॥४८॥

क्रमेण **पुष्पकेतौ** तु कथाशेषत्वमीयुषि ।
पुष्पचूलोऽभवद् भूपः **पुष्पचूला** महिष्यभूत् ॥४९॥
अकृत्यं वारयन्ती तत्तदापत्यापमनिता ।
राज्ञी **पुष्पवती** लात्वा व्रतं तप्त्वा ययौ दिवि ॥५०॥
स देवोऽवधिनाऽपश्यत्तामकृत्यनियोजिताम् ।
निजां दुहितरं स्नेहात् पुनरेवमचिन्तयत् ॥५१॥
मम प्राच्यभवे प्राणप्रियेयं दुहिताऽभवत् ।
करोमि तत्तथा घोरे नरके न पतेद्यथा ॥५२॥
इति स्वप्नान्तरे तस्या नरकानतिदारुणान् ।
दर्शयामास निर्दीर्यमाणसांराविनारकान् ॥५३॥
वर्तिका श्येनमुक्तेव मृगीव दवनिर्गता ।
सा दृष्टनारका भीत्या प्रबुद्धापि व्यकम्पत ॥५४॥
तत्तथाऽकथयद्भीतभीता सा पत्युरेष तु ।
शिवेच्छुः **पुष्पचूलाया**ः कारयामास शान्तिकम् ॥५५॥
स तु **पुष्पवती**जीवदेवस्तद्धितकाम्यया ।
तादृशानेव नरकाननुरात्रमदर्शयत् ॥५६॥
अथाख्यन् नरकान् राज्ञे पृष्टाः पाखण्डिनो यथा ।
तथामन्यत राज्ञी न स्वप्नदृष्टविलक्षणान् ॥५७॥
आह्वयच्चान्निकापुत्रं राजाऽपृच्छत्तदेव हि ।
नरकान् स तथैवाख्यद् दृष्टाः स्वप्ने यथा तया ॥५८॥
राज्ञप्युवाच भगवन् ! किं भवद्भिरपीदृशः ।
मयेव वीक्षितः स्वप्नो वित्थेथं कथमन्यथा ? ॥५९॥
सूरिः प्रोवाच हे वत्से ! विनापि स्वप्नदर्शनम् ।
संसारे नास्ति तद् यद् न विज्ञायेत जिनागमात् ॥६०॥

पुष्पचूलाथ पप्रच्छ भगवन् ! केन कर्मणा ।
ईदृशान् नरकान् घोरान् प्राप्नुवन्ति शरीरिणः ? ॥६१॥

आख्याति स्मान्निकापुत्रो महारम्भपरिग्रहैः ।
मांसाशनैर्गुरुप्रत्यनीकत्वेनाङ्गिनां वधैः ॥६२॥

ततश्च जननीजीवदेवस्तस्यास्तदादि तु ।
स्वप्ने पूर्वमिव प्राज्यसुखान् स्वर्गानदर्शयत् ॥६३॥

प्रबुद्धा कथयामास सा पत्ये स्वर्गदर्शनम् ।
सोऽथ पाखण्डिनोऽपृच्छत् ब्रूथ किं स्वर्गलक्षणम् ? ॥६४॥

तेष्वेके प्रोचिरे स्वर्गस्वरूपं प्रियसङ्गमः ।
पुष्पचूला न तत् स्वप्नदृष्टस्वर्गाऽन्वमन्यत ॥६५॥

राज्ञा पृष्टोऽ**न्निकापुत्रः** स्वर्गान् द्वादश तत्तथा ।
नव **ग्रैवेयकां**श्चाप्यनुत्तरानाख्यदुत्तरान् ॥६६॥

प्रमाणवचनं जैनमिति निश्चित्य राज्ञथ ।
गुरुं पप्रच्छ भगवन् ! स्वर्गाप्तिः केन कर्मणा ? ॥६७॥

सूरिराह जिने देवे सुसाधौ च गुरौ मतिः ।
यस्य तस्याङ्गिनः स्वर्गपदवी न दवीयसी ॥६८॥

पुनश्चारित्रधर्मे च गुरुणा कथिते सति ।
सा राज्ञी लघुकर्मत्वाद्भवोद्विग्नैवमभ्यधात् ॥६९॥

भगवन् ! पतिमापृच्छ्य पादमूले तवैव हि ।
उपादास्ये परिव्रज्यां मर्त्यजन्मतरोः फलम् ॥७०॥

इत्युक्त्वा **पुष्पचूलाथ** गुरुन्नत्वा विसृज्य च ।
आपप्रच्छ महीनाथं सोऽपि तामिदमूचिवान् ॥७१॥

तदा त्वामनुमन्येऽहं व्रताय वरवर्णिनि ! ।
ममैवौकसि चेद्भिक्षामादत्से व्रतिनी सती ॥७२॥

तथेति प्रतिपेदाना दत्तदानार्तिषु व्रतम् ।
पुष्पचूलाददे भूपकृतनिष्क्रमणोत्सवा ॥७३॥
सा शिक्षामाददे सर्वां गुर्वादेशपथानुगा ।
तपश्चचार चातीव तीव्रकर्मारिकृन्तनम् ॥७४॥
विज्ञाय भाविदुर्भिक्षं प्रैषि देशान्तरे गणः ।
जङ्घाबलपरिक्षीणैस्तस्थे चात्रैव सूरिभिः ॥७५॥
आनीयान्तःपुराद्भक्तपानादि प्रतिवासरम् ।
गुरवे **पुष्पचूला**ऽदात् पित्रे पुत्रीव भक्तिभाक् ॥७६॥
अनन्यमनसस्तस्या गुरूणां पर्युपासनात् ।
भावयन्त्याः स्वमुत्पेदे केवलज्ञानमन्यदा ॥७७॥
पुरा ह्यभूत् प्रयुञ्जानः कृत्यं यो यस्य तस्य सः ।
केवल्यपि च कुर्वीत स यावद् वेत्ति तं न हि ॥७८॥
पुष्पचूलाऽथ विज्ञाय केवलज्ञानचक्षुषा ।
सर्वं संपादयाञ्चक्रे सूरिर्यद् यदचिन्तयत् ॥७८॥
सूरिः पप्रच्छ तां साध्वीं वत्से ! वेत्सि कथं ननु ।
ममाभिप्रायमेवं यत् संपादयसि चिन्तितम् ? ॥८०॥
उवाच **पुष्पचूला**पि प्रकृतिं वेद्मि वः खलु ।
यो यस्य शश्वदासन्नः प्रकृतिज्ञो हि तस्य सः ॥८१॥
सार्यिका पिण्डमानिन्येऽन्यदा वर्षति वारिदे ।
सूरिणोचे श्रुतज्ञाऽसि वृष्टौ किमिदमर्हति ? ॥८२॥
साऽब्रवीद् यत्र मार्गेऽभूदप्कायोऽचित्त एव हि ।
आयासिषमहं तेन प्रायश्चित्तागमोऽत्र न ॥८३॥
अचित्ताप्कायमध्वानं कथं वेत्सीति सूरिणा ।
उदिते **पुष्पचूला**ऽऽख्यदुत्पन्नं मेऽस्ति केवलम् ॥८४॥

मिथ्या मे दुष्कृतं केवल्याशातित इति ब्रुवन् ।
आचार्यः प्रवया दध्यौ सेत्स्यामि किमहं न वा ? ॥८५॥

केवल्यूचे मुनिश्रेष्ठाः ! मा कृषीध्वमनिर्वृतिम् ।
गङ्गामुत्तरतां वोऽपि भविष्यत्येव केवलम् ॥८६॥

उत्तरीतुं ततो **गङ्गां** लोकेन सह सूरयः । 5
तदैवारुरुहुर्नावं को हि स्वार्थमुपेक्षते ? ॥८७॥

स सूरिः पुण्यसारत्वाद् निषसाद यतो यतः ।
ततस्ततोऽनमद् बेडा तद्भारेणाऽधरीकृता ॥८८॥

ततो नौस्थितलोकेन सूरिः सोऽक्षेपि वारिणि ।
शूले न्यधात् प्रवचनप्रत्यनीकामरी च तम् ॥८९॥ 10

अप्कायादिदयासारं स सूरिर्भावयंस्तदा ।
क्षपकश्रेणिमारूढोऽन्तकृत्केवल्यजायत ॥९०॥

तुरीयशुक्लध्यानस्थः सद्यो निर्वाणमाप सः ।
निर्वाणमहिमानं च तदासन्ना व्यधुः सुराः ॥९१॥

यस्मिन् शिवगतिमहिमा चक्रे सुमनोभि**रन्निकासूनोः** । 15
तीर्थं **प्रयाग** इति तद्भवति स्म भुवीह विख्यातम् ॥९२॥

॥ इत्यन्निकापुत्रकथा ॥

यशोभद्रः शय्यम्भवकथायां वक्ष्यते । **भद्रबाहुर्वज्रस्वामि**कथायामुक्तः । अ**थातिमुक्तक**को यथा --

§§ **पोलासपुर**मित्यस्ति पुरं पुष्कलवैभवम् ।
तत्रासीद् विजयोर्जस्वी **विजयो** नाम पार्थिवः ॥१॥
श्रीदेवीति प्रिया तस्य सिंहस्वप्नेन सूचितम् ।
असूत सुतमुद्युक्त**मतिमुक्तक**सञ्ज्ञितम् ॥२॥
तत्रान्यदा पुरेऽभ्येत्य श्री**वीरः** समवासरत् ।
गौतमस्तु विवेशान्तर्विहर्तुं गणभृद्वरः ॥३॥
क्रीडन्नासीत्तदा दासीदासैरनुगतः पथि ।
क्रमाष्टवर्षदेशीयो राजपुत्रो**ऽतिमुक्तकः** ॥४॥
स **गौतमं** समायान्तं वीक्ष्य चन्द्रं चकोरवत् ।
हृष्टोऽभिसृत्य नत्वा च जगादेति कृताञ्जलिः ॥५॥
के यूयं भगवन्नत्र कथं विचरथोच्यताम् ।
अथ स्वामी जगौ स्मित्वा कुमारं सुकुमारगीः ॥६॥
देवानुप्रिय ! निर्ग्रन्था वयं श्रमणलिङ्गिनः ।
भिक्षार्थं विचरामोऽत्र पुरे **पोलास**नामनि ॥७॥
ततो**ऽतिमुक्तकः** प्राह भिक्षां वो दापयाम्यहम् ।
इति स्वाम्यङ्गुलीलग्नः स्वमगारमगाच्च सः ॥८॥
श्रीदेवी गौतमं वीक्ष्य**अतिमुक्त**कसमन्वितम् ।
हृष्टाऽभ्येत्य प्रणम्यान्नपानीयैः प्रत्यलाभयत् ॥९॥
निर्यान्तमथ साकूतं कुमारः प्राह **गौतम**म् ।
भगवन् । वसतौ कस्यां यूयं वसत कथ्यताम् ॥१०॥
स्वामी जगाद् देवानुप्रिय ! धर्मगुरुर्मम ।
श्री**वीरो** यत्र समवसृतोऽस्ति नगराद् बहिः ॥११॥

ततो विसृष्टस्तेन श्रीगौतमोऽभ्येत्य भक्तिभाक् ।
उपासामासिवान् वीरस्वामिनं भवनामिनम् ॥१२॥

अथातिमुक्तकः प्रीत्या मातापितृसमन्वितः ।
अभ्येत्य भगवत्पादानवन्दत समाहितः ॥१३॥

भगवानपि संसारसुखधिक्कारदायिनीम् ।
चक्रे पीयूषदेशीयां देशनां वशिनां वरः ॥१४॥

अथ प्रभुं प्रणम्योचे राजपुत्रोऽतिमुक्तकः ।
आदित्सामि प्रभो ! दीक्षां वीक्ष्यातिविरसं भवम् ॥१५॥

मा कृथाः प्रतिबन्धत्वमित्यूचे भगवानपि ।
सोऽपि गत्वा स्वमावासमुवाच पितराविति ॥१६॥

पितरौ ! दुस्तरादस्माद् बिभेमि भवसागरात् ।
तन्मे दापयितुं दीक्षामङ्गिनीं यूयमर्हथ ॥१७॥

ततस्तौ सास्रमूचाते पुत्र ! त्वमसि कोमलः ।
व्रतभारं कथं वोढा सोढासि च परीषहान् ? ॥१८॥

राजपुत्रोऽभ्यधादात्मवशो धर्मालसो जनः ।
सङ्कटेऽन्यवशः सर्वं सोढा वामत्वमस्य धिक् ॥१९॥

तद् मातृहृदयं कृत्वा नापथ्यं भावरोगिणः ।
मम वाच्यं किमप्युच्चैः पितरौ ! वां वल्लभोऽस्मि चेत् ॥२०॥

इत्युक्तियुक्तिभिः कृत्वा पितरौ स निरुत्तरौ ।
जग्राह साग्रहो दीक्षां श्रीवीरचरणान्तिके ॥२१॥

स्वामिना दीक्षयित्वाऽसौ स्थविरेभ्यः समर्पितः ।
क्रमेणाधीयमानश्चैकादशाङ्गधरोऽभवत् ॥२२॥

वर्षाकालेऽन्यदा वृष्टौ जातायां बाल्यकौतुकात् ।
पतद्ग्रहं समादाय ययावेष बहिर्भुवि ॥२३॥

स्फारीकृत्य पयःकुल्यां मृत्पालीबन्धतोऽभितः ।
चिक्रीड स चिरं तत्र बेडीकृत्य पतद्ग्रहम् ॥२४॥

दृष्ट्वेति संयमाऽऽबाधां कुर्वाण**मतिमुक्तक**म् ।
पप्रच्छुरुत्सुका **वीर**मृषयोऽस्मिन् कृपालवः ॥२५॥

प्रसीद सुकृतश्रीद ! निवेदय महोदय ! ।
कुत्र याता भवे मुक्तिं बालर्षि**रतिमुक्तकः** ? ॥२६॥

स्वाम्युवाच भवेऽत्रैव सेत्स्यत्येष महामनाः ।
कुर्वीध्वं बालमित्येनं गर्हितं मा स्म कर्हिचित् ॥२७॥

स्वाम्याज्ञातमिति श्रुत्वा स्थविरा यावता स्थिताः ।
आकारसंवृतिं कृत्वा तावत्प्रा**पातिमुक्तकः** ॥२८॥

प्रतिश्रयान्तरविशत् कृत्वा नैषेधिकीमयम् ।
गुर्वनुज्ञामयाचिष्ट नत्वेर्यापथिकीविधौ ॥२९॥

तत्प्रमादानधिक्षेपतयैव गुरवोऽपि तम् ।
तदाऽनुज्ञापयामासुरीर्यापथप्रतिक्रमम् ॥३०॥

ततोऽयमिच्छामीत्युक्त्वा प्रतिक्रामन् समाहितः ।
'दगमट्टी' पदस्यार्थं स्मरन् संवेगमित्यगात् ॥३१॥

अहो **'दग'** इहाप्कायो ये तल्लेशेऽपि जन्तवः ।
चेत्ते सर्षपमानाः स्यु**र्जम्बूद्वीपे** न मान्ति तत् ॥३२॥

'मट्टी' च मृत्तिका ज्ञेया ये तल्लेशेऽपि जन्तवः ।
चेत्ते पारापताङ्गाः स्यु**र्जम्बूद्वीपे** न मान्ति तत् ॥३३॥

तद् मया चिन्मयालोकविकलेन दुरात्मना ।
विराद्धास्तच्चये जीवाः सामायिकविरोधिना ॥३४॥

अनालोच्यात्मनो वीक्षामनालोच्य जिनागमम् ।
अनालोच्य गुरोः शिक्षामनालोच्य तु दुर्गतिम् ॥३५॥

हहा ! मयातिमूढेन तत्कृतं किल दुष्कृतम् ।
स्मरतोऽपि न यद् माति हृदि मे निर्दयादिमे ॥३६॥

एवं जातलयः क्षिप्रं क्षपकश्रेणिमाश्रयन् ।
घातिकर्म विघात्यैष लेभे केवलमुत्तमम् ॥३७॥

दुन्दुभीस्ताडयन्तोऽथ वर्षन्तः कुसुमोदकम् । 5
स्तुवन्तोऽभ्येत्य ते देवाः सेवामस्य वितेनिरे ॥३८॥

इत्**यतिमुक्तक**नामा बालर्षिः सपदि धर्षितविकर्मा ।
भव्यान् विबोध्य भुवने चिरमथ मुक्तिश्रियं भेजे ॥३९॥

॥ इत्यतिमुक्तकमुनिकथा ॥

● ● ●

अथ **नागदत्तो** यथा —

§§ अस्ति **वाराणसी** नाम नगरी श्रीगरीयसी ।
जितशत्रुनृपस्तत्र क्षत्रधर्मधनोऽभवत् ॥१॥
राजप्रसादपात्रं च श्रेष्ठी तत्र महाधनः ।
धनदत्तोऽभवत् तस्य **धनश्री**रिति गेहिनी ॥२॥
साऽपश्यदन्यदा स्वप्ने **नागदेव्या** स्वकण्ठतः ।
उत्तार्य सादरं हारं निजकण्ठे निवेशितम् ॥३॥
तदैत्य पत्युराचख्यौ प्रातः प्रीतिभरेण सा ।
सोऽभ्यधाद् **नागदेवी** नः सा प्रिये ! कुलदेवता ॥४॥
तस्याः प्रसादतः पुत्रोऽचिरेण भविता तव ।
इत्युक्ता तेन सा गर्भं बभार क्रमयोगतः ॥५॥
दोहदेषु ततः सङ्घपूजादेवार्चनादिषु ।
श्रेष्ठिना पूर्यमाणेषु पूर्णेषु च दिनेषु सा ॥६॥
असूत किरणस्यूतदेहद्योतितदिङ्मुखम् ।
सुतं रुपयुतं देवी पद्मवासेव मन्मथम् ॥७॥
जन्मोत्सवं विधायास्य श्रेष्ठी स्वप्नानुसारतः ।
नागदत्त इति ख्यातनामानं तनयं व्यधात् ॥८॥
धात्रीभिः पाल्यमानोऽयं ववृधे प्रतिवासरम् ।
भानोरमृतनाडीभिरिव बालः सुधाकरः ॥९॥
स पञ्चवर्षदेशीयो जगृहे सकलाः कलाः ।
आरुरोह च सौन्दर्यभवनं यौवनं क्रमात् ॥१०॥
पित्रा सार्धं व्रजन् देवगुरूणामाश्रये सदा ।
शृण्वन् धर्ममभूच्चैष विषयेषु पराङ्मुखः ॥११॥
तद्रूपमोहिताः कन्या समाजग्मुरनेकशः ।
चिद्रूपचन्द्रमाः किन्तु स नोद्वोढुममन्यत ॥१२॥

इत्थं विषयवैमुख्यं ज्ञात्वाऽस्य पितरावथ ।
दुर्दान्तमित्रगोष्ठीषु निरतं कुरुतः स्म तम् ॥१३॥
अनिच्छन्नप्यसौ चित्ते मित्रणामुपरोधतः ।
कूपारामविहारेषु विजहार दिवानिशम् ॥१४॥
सहस्राम्रवणोद्यानं वयस्यैरयमन्यदा । 5
नीतः कन्दर्पशिबिरमिवाम्रस्तबकाञ्चितम्[1] ॥१५॥
क्रीडावाप्यां कृतस्नानोऽवचित्य कुसुमान्यथ ।
विवश तत्र तीर्थेशभवनं सह तैरथ ॥१६॥
कयाचित् कन्यया तत्र कृतां पूर्वप्रविष्टया ।
जिनपूजामथालोक्य **नागदत्तो** विसिष्यमिये ॥१७॥ 10
नागदत्तं च सा **नागकुमार**मिव रूपतः ।
स्वभावं स्वसखीभ्योऽपि गोपयन्ती निरैक्षत ॥१८॥
तस्य रूपसुधाम्मोधेर्नीरङ्गीवसनान्तरम् ।
लावण्याम्भः पपौ नेत्राञ्जलिभिः सा विवेकिनी ॥१९॥
अथ तत्रानुरक्ता सा लज्जमाना सखीवृता । 15
निर्ययौ जिनगेहात् तं निध्यायन्ती मुहुर्मुहुः ॥२०॥
नागदत्तस्तु तीर्थेशं पूजयित्वाऽभिवन्द्य च ।
वयस्यानाह केयं भोः ! कन्या कस्या च नन्दनी ? ॥२१॥
तैरूचे **प्रियमित्र**स्य सार्थवाहस्य नन्दनी ।
जाता नागश्रिया **नागवसु**नाम्नी कुमारिका ॥२२॥ 20
इयं विश्ववधूसृष्टिशलाका विश्वकर्मणः ।
षष्ठमस्त्रं च पञ्चेषोर्जेतुं कमपि दुर्जयम् ॥२३॥
अनुरूपवराप्राप्तिर्दोषोऽस्यामेक एव हि ।
त्वया विलोकितायां तु सोऽपि सम्प्रति मार्जितः ॥२४॥

---

१. ग. घ. वाग्रस्थलमालितम् ।

अथाह **नागदत्त**स्तान् वृथायं विस्तरो गिराम् ।
प्रास्तूयत भवद्भिर्मे मनोभावबहिर्मुखैः ॥२५॥

मनागपि न रागोऽस्यां कारणं प्रच्छने त्वदः ।
अस्या जिनेशपूजायां कौशले कौतुकं मम ॥२६॥

सवयोभिः समं त्वेतैरालापानिति कल्पयन् ।
चैत्याद् निर्गत्य गतवान् **नागदत्तो** निजं गृहम् ॥२७॥

इतश्च सापि सहिता सखीभिः स्वनिकेतनम् ।
तं ध्यायन्ती यथौ **नागवसु**र्वसुमिव श्रियाः ॥२८॥

तत्र नाशेत नाभुङ्क्त नापिबद् नालपच्च सा ।
भाषितापि सखीभिर्नादत्त हुक्कारमप्यहो ! ॥२९॥

मात्रा मत्वेति सातङ्कं सा सबाष्पमथोदिता ।
प्रियेऽहं शंस हा वत्से ! देहे किं तव बाधते ? ॥३०॥

अथ **नागवसुः** प्राह मातः ! किमपि वेद्मि न ।
परं विजृम्भते बाढं देहे दाहज्वरो मम ॥३१॥

ततोऽसो परिहासेन सखीभिरिति भाषिता ।
किं न दाहज्वरः प्रातः पीत्वा सलवणं सखि ! ॥३२॥

स्मित्वा मन्दाक्षमन्दाक्षा दध्यौ **नागवसु**स्ततः ।
हन्त दक्षाभिरेताभिर्ज्ञाताहं किं करोमि तत् ? ॥३३॥

ततो रहसि पृष्ठाभ्यस्तत्सखीभ्यस्तदाशयम् ।
मत्वा **नागश्रिया**ऽशंसि **प्रियमित्राय** तत्तथा ॥३४॥

प्रियमित्रस्ततोऽवादीत् तामथ प्रीतिमानिति ।
स्थाने तु रागमाधत्त प्रिये ! पुत्रीयमावयोः ॥३५॥

नागश्रीस्त्वरयामास तं हर्षेण वदन्त्यदः ।
त्वरस्व प्रिय ! मत्पुत्र्या **नागदत्तं** पतीकुरु ॥३६॥

तथेति **प्रियमित्रो**ऽपि गतवांस्तन्निकेतनम् ।
धनदत्तेन पृष्टश्च स्मितपूर्वमिदं जगौ ॥३७॥
श्रेष्ठिन् ! यानीह रत्नानि स्थलेषु ज जलेषु च ।
उत्पद्यन्ते पदं तेषां भवतो भवनं किल ॥३८॥
तन्**नागवसु**नामास्ति सुतारत्नं गृहे मम । 5
तद् दातुं **नागदत्ता**य प्राप्तोऽहं तव सूनवे ॥३९॥
अथाह **धनदत्तो**ऽपि युक्तमुक्तं त्वया सखे ! ।
परं मे विषयोद्विग्नः स्वभावादेव नन्दनः ॥४०॥
प्रियमित्रस्ततोऽवादीद् यद्यप्येवं तथापि मे ।
सा सुता **नागदत्तै**कमानसा नान्यमिच्छति ॥४१॥ 10
धनदेवोऽभ्यधाद् भद्र ! यद्येवं तन्निजं सुतम् ।
बोधयित्वा तदुक्तं ते कथयिष्यामि निर्णयम् ॥४२॥
इत्युदीर्य विसृष्टेऽस्मिंस्तदर्थं प्रार्थितः स्वयम् ।
श्रेष्ठिना **नागदत्तो** न पाणिग्रहममन्यत ॥४३॥
इतश्चासीत् तलारक्ताधिकारी तत्र पत्तने । 15
वसुदत्त इति ख्यातो **जितशत्रु**नृपप्रियः ॥४४॥
दृष्ट्वा **नागवसु**स्तेन वातायनतले तदा ।
आगत्य गृहमुद्वोढुं **प्रियमित्रा**दयाचत ॥४५॥
तेनोच **नागदत्ता**य **धनदत्ता**त्मजन्मने ।
दत्तेयं किं प्रदीयन्ते क्वापि कन्याः पुनः पुनः ? ॥४६॥ 20
वसुदत्तः पुनः प्राह मोहात् कन्यां प्रयच्छ मे ।
द्रव्यं समीहसे यावत् तावद् दास्यामि ते ध्रुवम् ॥४७॥
प्रियमित्रो हसन्नाह कथं कन्याट्टमस्ति मे ।
द्रव्यैर्विक्रीयमाणां ते येन यच्छामि कन्यकाम् ॥४८॥

इत्युक्तः **प्रियमित्रेण** विलक्षवदनस्ततः ।
वसुदत्तो निजं धाम स गत्वेदमचिन्तयत् ॥४९॥

हतको **नागदत्तो**ऽयं यावत्तावदियं न मे ।
तच्छले पातयित्वैनं मारयामि नृपाज्ञया ॥५०॥

चिन्तयित्वेत्यसौ दुष्टो **नागदत्तं** निशुम्भितुम् ।
छलानि मृगयामास स्वयमेव दिवानिशम् ॥५१॥

बाह्यालीतो निवृत्तस्यान्येद्युरुद्यानवर्त्मनि ।
पपात नृपतेः कर्णात् कुण्डलं वाजिवल्गनात् ॥५२॥

तद् विवेद न भूपालस्तदाश्वकीडयाकुलः ।
सेनारजोऽन्धितैरन्यैरपि तन्न विलोकितम् ॥५३॥

प्रासादमागतो भाण्डागारिकाय समर्पयन् ।
भूषणानि नृपोऽज्ञासीत् पतितं क्वापि कुण्डलम् ॥५४॥

वसुदत्तमथादिक्षत् कुण्डलं येन केन मे ।
गृहीतं तत्परिज्ञाय मत्पुत्रमपि शिक्षयेः ॥५५॥

देव ! प्रमाणमादेश इत्युदीर्य निरीय च ।
असौ गवेषयामास स्वयमन्यैश्च कुण्डलम् ॥५६॥

इतश्च **नागदत्तो**ऽपि कायोत्सर्गविधित्सया ।
नगर्या निर्ययौ सायं सहस्राम्रवणं प्रति ॥५७॥

अग्रेऽगाद् **नागदत्त**श्च **वसुदत्त**श्च पृष्ठतः ।
खिल्लि-बिल्वसमायोगः सोऽयं विधिकृतो हहा ! ॥५८॥

दृष्ट्वैवाशकुनं मार्गाद् **नागदत्तो** न्यवर्तत ।
दृष्टोऽयं **वसुदत्ते**न वृक्षान्तरितवर्त्मणा ॥५९॥

नागदत्तः पथान्येन **सहस्राम्र**वणं गतः ।
तस्थौ प्रतिमया चित्ते धर्मध्यानपरायणः ॥६०॥

वसुदत्तश्च दध्यौ किं **नागदत्तो**ऽयमध्वनः ।
एतस्माद् ववले शीघं तत्र पश्यामि कारणम् ॥६१॥
ध्यात्वेति दुष्टधीः सोऽयमगमद् यावदग्रतः ।
तावत्पतितमद्राक्षीत् कुण्डलं रविबिम्बवत् ॥६२॥
दृष्ट्वा तञ्चिन्तयामास हर्षलोत्कर्षमानसः । 5
छलमेतदहो ! लब्धं **नागदत्तं** निशुम्भितुम् ॥६३॥
ववले कुण्डलं दृष्ट्वा पुरः कुण्डलिनं यथा ।
तथापि पातयाम्यद्य साधुतामस्य मूर्धनि ॥६४॥
चिन्तयित्वेदमादाय कुण्डलं त्वरितक्रमः ।
सहस्राम्रवणं सोऽपि गत्वा चैत्यान्तराविशत् ॥६५॥ 10
कायोत्सर्गस्थितं तत्र **नागदत्तं** चलानके ।
स ददर्श कुधीर्दर्श इव राहुर्दिवाकरम् ॥६६॥
गुणेन प्रोतयित्वाथ कुण्डलं कण्ठलम्बितम् ।
विधाय **नागदत्तस्य** पार्श्वे पत्तीन् न्ययुङ्क्त सः ॥६७॥
सरावेणेव शुशुभे तेनासौ कण्ठलम्बिना । 15
मार्गान्निव जगन्नाथात् कल्याणं निजमुक्तये ॥६८॥
गत्वाथ मायिकः पृथ्वीनायकाय शशंस सः ।
देव ! किं क्रियते तत्र यत्र स्यादमृतं विषम् ? ॥६९॥
य एव नगरस्तम्भो **धनदत्तो** महाधनः ।
तस्यैव सूनुना **नागदत्तेना**ऽहारि कुण्डलम् ॥७०॥ 20
सबाह्याभ्यन्तरं देवादेशतः पश्यता पुरम् ।
स्थगयन् कुण्डलं दृष्टः स माकन्दवने मया ॥७१॥
ततोऽसौ धारितस्तत्र चैत्य एवास्ति पत्तिभिः ।
यदादिशति देवोऽतः परं तत्क्रियते द्रुतम् ॥७२॥

अथाह नृपतिः क्रुद्धो **धनदत्तस्य** मन्दिरे ।
मुच्यन्तां पत्तयः शीघ्रं कारायां क्रियतामयम् ॥७३॥
स च कुण्डलचौरस्तु तत्र देवकुले धृतः ।
प्रातः पौरसमक्षं तं महादण्डेन दण्डयेः ॥७४॥
स्वामिन् ! प्रमाणमादेश इत्युक्त्वा तत्क्षणादयम् ।
पत्तीन् गृहे विमुच्यास्य **धनदत्तम**धारयत् ॥७५॥
तद्वृत्तान्तमजानाना प्रात**र्नागवसुः** पुनः ।
सहस्राम्रवणे चैत्ये ययौ नन्तुं जिनाधिपम् ॥७६॥
पूजयन्ती जिनं यावत्तत्रास्ते सा सखीवृता ।
राजतन्त्रयुतस्ताव**द्वसुदत्तः** समाययौ ॥७७॥
अरे ! गृह्णीत बध्नीत राज्ञः कुण्डलतस्करम् ।
मण्डपस्थो जगर्जेति **वसुदत्तो** मृगेन्द्रवत् ॥७८॥
नागदत्तः पुनस्तस्मिन्नपि कारुण्यपुण्यधीः ।
दध्यौ प्रकटितो हा ! धिग्वराकोऽयं मरिष्यति ॥७९॥
तदिदं प्राक्कृतं किञ्चिद् दुष्कृतं सहतां वपुः ।
उपेक्षैवास्य युज्येत कृतघ्नस्य विनाशिनः ॥८०॥
वसुदत्तगिरा दण्डपाशिकैर्यष्टिमुष्टिभिः ।
ताडयित्वा दृढं **नागदत्तो**ऽबध्यत् धिग् विधिम् ॥८१॥
ततो **नागवसुर्**दृष्ट्वा **नागदत्तं** तथापदि ।
हा ! हतास्मीति जल्पन्ती मूर्च्छिता न्यपतद् भुवि ॥८२॥
सपूत्कारं सखीभिस्तु चन्दनव्यजनादिभिः ।
हृतमूर्छा व्यलापीत् सा रुदती सुदती भृशम् ॥८३॥
हा सर्वज्ञ ! मदीयं किं दुष्कर्मोदयमागतम् ।
येनायं साधुमूर्धन्योऽभीष्टो मे कष्टभागभूत् ? ॥८४॥

जिनशासनदेव्यः ! स्थ क्वापि हा ! यदि मातरः ! ।
तदागच्छतः शीघ्रं मे पतिभिक्षां प्रयच्छत ॥८५॥
दैव ! रे केव रेखा ते निष्ठुरेषु निवेदय ।
यदस्य मृदुलाङ्गेषु बन्धवैशसमाहितम् ॥८६॥
यदि मे कुपितो दैव ! तदा मामेव मारय ।
कल्याणपात्रमेनं तु रक्ष रक्ष मम प्रियम् ॥८७॥
तस्या निष्कारणप्रेमग्रहिलाया इतीरितम् ।
निशम्य **नागदत्तो**ऽथ चिन्तयामास चेतसि ॥८८॥
यदि शासनदेवीनां पभावेण छुटिष्यते ।
तदा निरुपमप्रेमवतीयं परिणेष्यते ॥८९॥
नो चेदाहारदेहादि व्युत्सृष्टं सिद्धसाक्षिकम् ।
नाहं कस्यापि मे कोऽपि न च मुक्त्वा जिनेश्वरम् ॥९०॥
हठात् कण्ठेऽथ धृत्वा ते चकर्षुर्दण्डपाशिकाः ।
हन्यमानाश्च नानास्त्रैर्जिनशासनदैवतैः ॥९१॥
अथ ते परितः पेतुर्वमन्तो रुधिरं मुखैः ।
नागदत्तयशोवृक्षं सिञ्चन्तः कलशैरिव ॥९२॥
बन्धाश्च **नागदत्त**स्य तुत्रुटुस्तत्क्षणादपि ।
हर्षाद् **नागवसो**श्चापि कञ्चुकान्तरसेवकाः ॥९३॥
किमेतदिति साकूते **नागदत्ते** पुरोऽभवन् ।
जिनशासनदेव्योऽस्य वर्षन्त्यः कुसुमोत्करम् ॥९४॥
जय जीवाभिनन्देति ददत्योऽस्मै महाशिषः ।
तास्तदाऽप्रतिचक्राद्या **नागदत्तं** बभाषिरे ॥९५॥
विस्मयं वत्स ! मा कार्षीर्वयं शासनदेवताः ।
पुण्यात् तव कुमार्याश्च कारुण्यादित्यकार्ष्महि ॥९६॥

अथोचे **नागदत्त**स्ता भगवत्यो वरं कृतम् ।
एतान् लम्भितशिक्षांस्तु सज्जीकुरुत बालिशान् ॥९७॥
अथो तदुपरोधेन प्रगुणीकृत्य तानमूः ।
सत्त्वं च **नागदत्त**स्य सर्वाः स्तुत्वा तिरोऽभवन् ॥९८॥
अथेति ज्ञातवृत्तान्तः पौरामात्यान्वितो नृपः ।
तत्रागत्य समालिङ्ग्य **नागदत्त**मभाषत ॥९९॥
श्रेष्ठिपुत्र ! तव ब्रूमः किं वयं महिमाद्भुतम् ।
धन्योऽहमपि यत्पुर्यां पुण्यपात्रं भवादृशाः ॥१००॥
यत्र त्वं तत्कुलं पुण्यं त्वं स पिताऽद्भुतः ।
यस्याः कुक्षाववात्सीस्त्वं सा श्लाघ्या जननी खलु ॥१०१॥
अज्ञानादपराद्धं यद् मया त्वयि महात्मनि ।
सर्वथा मर्षणीयं तदेष बद्धोऽञ्जलिस्तव ॥१०२॥
संभाष्येति महीपालस्तमारोप्य करीश्वरम् ।
पुर्यां प्रवेशयामास गौरवेण गरीयसा ॥१०३॥
सहैतं **धनदत्त**ेन नीत्वावासं निजं नृपः ।
भोजयित्वा नवीनानि चीनानि परिधाप्य च ॥१०४॥
भूषणैर्भूषयित्वा च स्वासनार्धे निवेश्य च ।
पप्रच्छ कुण्डलकथां दत्त्वा शपथमात्मनः ॥१०५॥ युग्मम् ॥
असूनां **वसुदत्त**स्य मार्गायित्वाभयं ततः ।
नृपाय **नागदत्तो**ऽपि यथावृत्तमशंसत ॥१०६॥
अतिप्रीतस्ततो राजाऽऽरोप्य भूयोऽपि तं गजम् ।
सौधाय व्यसृजद् वीक्ष्यमाणं पौरवधूजनैः ॥१०७॥
वसुदत्तं च नृपतिस्तत्क्षणाच्चूर्णचित्रितम् ।
धृतसूर्पं शिखाबद्धबिल्वमारोप्य रासभम् ॥१०८॥

नागदत्तापकार्येष इति घुष्टागसं भृशम् ।
पुर्यन्तं भ्रामयित्वा तं विदधे देशतो बहिः ॥१०९॥ युग्मम् ॥
इतश्च **प्रियमित्रेण** पुनरागत्य मन्दिरे ।
पुत्र्या **नागवसो**रर्थे **धनदत्तो**ऽभ्यधीयत ॥११०॥
ततस्तातगिरा **नागदत्तो**ऽपि तदमन्यत । 5
मनसा प्रतिपन्नं हि नान्यथा जायते सताम् ॥१११॥
अथ **नागवसु-र्नागदत्तेना**त्मानुरागिणी ।
द्रव्यानुरूपसामग्र्या तेन सा पर्यणीयत ॥११२॥
असंक्तो विषयानेष ततोऽभुङ्क्त तया सह ।
पयसीवाम्बुजं प्रेम्णि निमग्नोऽप्यलिप्तोऽमुना ॥११३॥ 10
अथैकदा समं पत्या सूक्तिगोष्ठीं वितन्वती ।
गवाक्षस्थाऽश्रृणोद् **नागवसु**राक्रन्दितं क्वचित् ॥११४॥
पप्रच्छ **नागदत्तं** सा किमिदं श्रूयते प्रिय ! ।
नागदत्तोऽब्रवीत् कान्ते ! भवनाटकमीदृशम् ॥११५॥
विद्वद्गोष्ठी क्वचित् क्वापि कलहः क्वापि गीतयः । 15
क्वचिदाक्रन्दितं यत्र तत्र रज्येत कः सुधीः ? ॥११६॥
ततो **नागवसुः** प्राह धिग्भवं त्यज्यतामयम् ।
नागदत्तोऽभ्यधादीदृग् मनो मेऽपि त्वरस्व तत् ॥११७॥
परस्परमथापृच्छ्य पितरौ तौ व्रतार्थिनौ ।
सङ्घपूजार्थिसत्काराभयदानादि तेनतुः ॥११८॥ 20
तौ सुस्थितौ **सुस्थित**सूरिपार्श्वे व्रतं गृहीत्वा महतोत्सवेन ।
तप्त्वा तपो दुस्तपमायुषोऽन्ते **सौधर्म**कल्पे त्रिदशानभूताम् ॥११९॥

॥ इति श्रीनागदत्तकथा ॥

● ● ●

अथ **शय्यम्भवो** यथा –

§§ अस्ति श्रीमोचितस्वर्गस्पृहं **राजगृहं** पुरम् ।
तत्र **शय्यम्भवो** नाम याज्ञिकोऽभूद् द्विजोत्तमः ॥१॥
पुरोपान्तसरःपालौ विलसद्यज्ञमण्डपः ।
आहूतानेकवेदान्ती स यष्टुमुपचक्रमे ॥२॥
इतश्च **प्रभव**स्वामी तदाऽऽगात्तत्र पत्तने ।
मत्वा श्रुतोपयोगेन तं योग्यं बोधसम्पदः ॥३॥
आदिशच्च द्वयोर्मुन्योर्यज्ञौकसि युवां जवात् ।
गत्वा भिक्षार्थिनौ ब्रूतं धर्मलाभाशिषं सुखम् ॥४॥
अदातुमिच्छुभिस्तत्र यज्ञवाटद्विजातिभिः ।
अपि प्रस्थाप्यमानाभ्यां युवाभ्यां वाच्यमीदृशम् ॥५॥
अहो ! कष्टमहो ! कष्टं तत्त्वं विज्ञायते न हि ।
अहो ! कष्टमहो ! कष्टं तत्त्वं विज्ञायते न हि ॥६॥
अथ वन्दनमालाङ्कद्वारमुत्तम्भितध्वजम् ।
द्वार्मुक्ताचामनाहावं समिद्व्यापृतमाणवम् ॥७॥
स्तूपावबद्धछगलं वेदिमध्येद्धपावकम् ।
होमद्रव्यभूतानेकपात्रमृत्विग्भिरञ्चितम् ॥८॥
समिदाद्यर्पणव्यग्राध्वर्यमध्वरवाटकम् ।
तौ मुनी जग्मतुर्भिक्षासमये गुर्वनुज्ञया ॥९॥ विशेषकम् ॥
भिक्षामदित्सुभिर्विप्रैर्विसृष्टावथ तौ मुनी ।
गुर्वादिष्टमहो ! कष्टमित्याद्यूचतुरुच्चकैः ॥१०॥
अध्वरे दीक्षितस्तस्मिन् सैष **शय्यम्भवो** द्विजः ।
यज्ञवाटान्तरद्वारस्थितोऽश्रौषीद् वचस्तयोः ॥११॥
दध्यौ चोपशमस्फातिप्रधानाः साधवो ह्यमी ।
न मृषावादिनस्तेन तत्त्वे सन्देग्धि मे मनः ॥१२॥

इत्यपृच्छदुपाध्यायं किं तत्त्वं मङ्क्षु कथ्यताम् !
उपाध्यायोऽवदत् तत्त्वं वेदाः स्वर्गापवर्गदाः ॥१३॥

शय्यम्भवोऽभ्यधाद् नूनं प्रतारयसि मादृशान् ।
यज्ञादिदक्षिणालोभाद्वेदास्तत्त्वमिति ब्रुवन् ॥१४॥

मुनयो निर्ममा वीतरागद्वेषपरिग्रहाः । 5
सर्वज्ञपुत्रका नैते वदन्ति वितथं क्वचित् ॥१५॥

न गुरुस्त्वं त्वया यस्माद्विश्वमाजन्म वञ्चितम् ।
नितान्तं शिक्षणीयोऽसि प्रत्युताद्य दुराशयः ॥१६॥

यथावस्थितमाख्याहि तत्त्वमेवमपि स्थिते ।
न चेच्छेत्स्यामि ते मौलिमित्यसिं कोशतोऽकृषत् ॥१७॥ 10

उपाध्यायऽप्यदो दध्यौ मिमारयिषुरेष माम् ।
यथार्थतत्त्वकथने समयोऽयमुपस्थितः ॥१८॥

इदं च पठ्यते वेदेष्वाम्नायोऽप्येष नः सदा ।
कथ्यं यथास्थितं तत्त्वं शिरश्छेदे हि नान्यथा ॥१९॥

तस्मात् प्रकाशयाम्याशु तत्त्वमस्मै यथातथम् । 15
यथा जीवामि **'जीवन् हि नरो भद्राणि पश्यति'** ॥२०॥

इत्याचख्यावुपाध्यायो ध्यायन् कुशलमात्मनः ।
अधस्तादस्य यूपस्य न्यस्तास्ति प्रतिमार्हतः ॥२१॥

पूज्यतेऽत्र स्थितैवैषा **सिद्धपुत्रो**ऽन्यथाऽध्वरम् ।
हन्ति प्रौढतपा हन्त ! **नारदः** परमार्हतः ॥२२॥ 20

इति यूपमुपाध्यायस्तमुत्पाठ्य यथास्थिताम् ।
तामर्हत्प्रतिमां पुण्यां दर्शययित्वैवमब्रवीत् ॥२३॥

इयं हि प्रतिमा यस्य देवस्य श्रीमदर्हतः ।
तत्त्वं तदुदितो धर्मोऽध्वरादि तु विडम्बनम् ॥२४॥

चिरं प्रतारितोऽसि त्वं मया स्वोदरपूर्तये ।
नातः परमुपाध्यायस्तवास्मि स्वस्ति तेऽनघ ! ॥२५॥

शय्यम्भवोऽपि तं नत्वा यज्ञोपाध्यायमब्रवीत् ।
त्वमुपाध्याय एवासि सत्यतत्त्वप्रकाशनात् ॥२६॥

इति दत्त्वाऽस्य यज्ञोपकरणं सर्वमप्यसौ ।
ययौ मुनिपदैरेव **प्रभव**स्वामिसन्निधौ ॥२७॥

वन्दित्वा सपरीवारं गुरुमग्रे निविष्टवान् ।
पप्रच्छ धर्मतत्त्वं स मुक्तिमार्गमनर्गलम् ॥२८॥

अहिंसा सत्यमस्तेयं ब्रह्माकिञ्चन्यमित्यथ ।
धर्मतत्त्वं दिदेशास्मै प्रभवोऽपि भवोज्झनम् ।२९॥

श्रुत्वेति विलसद्बोधः **प्रभव**स्वामिनोऽन्तिके ।
शय्यम्भवो भवोद्विग्नः परिव्रज्यामुपाददे ॥३०॥

तप्यमानस्तपस्तीव्रमधीयानो महामतिः ।
गुरुपादप्रसादेन स चतुर्दशपूर्व्यभूत् ॥३१॥

श्रुतज्ञानादिना तुल्यं मूर्त्यन्तरमिवात्मनः ।
प्रभवस्तं पदे न्यस्य परलोकमसाधयत् ॥३२॥

शय्यम्भवो यदा पर्यव्राजील्लोकस्तदाखिलः ।
तद्भार्यां रुदतीं दृष्ट्वा शोचयन्निदमभ्यधात् ॥३३॥

भट्टः **शय्यम्भवः** कष्टं निष्ठुरेभ्योऽपि निष्ठुरः ।
स्वप्रियां तरुणीमेतां सुशीलामपि योऽत्यजत् ॥३४॥

पुत्राशयैव जीवन्ति योषितो हि पतिं विना ।
अभूत् पुत्रोऽपि नैतस्याः कथमेषा भविष्यति ॥३५॥

पृच्छन्ति स्म च लोकास्तामयि ! **शय्यम्भव**प्रिये !
गर्भसम्भावना कापि किं नामास्ति तवोदरे ? ॥३६॥

मनागित्यभिधातव्ये सापि प्राकृतभाषया ।
ऊचे मणयमित्यल्पमात्रगर्भा ह्यभूत् तदा ॥३७॥
तस्याश्च ववृधे गर्भः प्रत्याशेव शनैः शनैः ।
समयेऽपि सुतो जज्ञे तन्मनोऽम्भोधिचन्द्रमाः ॥३८॥
तदा मणयमित्यासीद् ब्राह्मण्या कृतमुत्तरम् ।
अतस्तस्यापि बालस्याभिधा **मणक** इत्यभूत् ॥३९॥
पाल्यमानोऽर्भकः सोऽष्टवर्षीभूतो जगाद ताम् ।
क्व नाम तातो मे मातर्वेषेणाविधवासि यत् ? ॥४०॥
सोचे यज्ञरतस्तातस्तव **शय्यम्भो**ऽभवत् ।
प्रतार्य व्रतिभिर्धूर्तैर्नीतो गर्भगते त्वयि ॥४१॥
पितुः **शय्यम्भव**स्यर्षेर्मिलनायोत्सुकः स तु ।
निरियाय गृहाद्बालो वञ्चयित्वा मातरम् ॥४२॥
तदा **शय्यम्भवा**चार्य**श्चम्पा**यां विहरन्नभूत् ।
ययौ बालोऽपि तत्रैव स्वर्णा पातालमध्विव ॥४३॥
कायचिन्तादिना सूरिः पुरिपरिसरे व्रजन् ।
बालमिन्दुमिवायान्तं दृष्ट्वाऽमोदत वार्धिवत् ॥४४॥
दृष्ट्वा बालोऽपि तं सूरिं सूरं कमलकोशवत् ।
विकसद्वदनो जज्ञे स्फुटरोमाञ्चकण्टकः ॥४५॥
अथापृच्छत् तमाचार्या बालमुत्फालहर्षभाक् ।
कस्त्वं कृतस्तथाऽयासीर्वत्स ! पुत्रोऽसि कस्य च ? ॥४६॥
सोऽर्भकोऽभिदधे **राजगृहा**दत्राहमागमम् ।
सूनुः **शय्यम्भव**स्यास्मि वत्सगोत्रद्विजन्मनः ॥४७॥
मम गर्भगतस्यापि प्रवज्यामाददे पिता ।
पुरात् पुरं तमन्वेष्टुं सम्भ्रमीव भ्रमाम्यहम् ॥४८॥

जानते यदि ते तातं बत **शय्यम्भवं** ततः ।
पूज्यपादाः प्रसीदन्तु क्व सोऽस्तीति वदन्तु च ॥४९॥
पितरं यदि पश्यामि तदा तत्पादसन्निधौ ।
प्रव्रजाम्यहमप्यङ्ग या गतिस्तस्य सैव मे ॥५०॥
सूरिरप्याह तातं ते जानामि स सुहृन्मम ।
शरीरेणाप्यभिन्नश्चायुष्मंस्तमिव विद्धि माम् ॥५१॥
तन्ममैव सकाशे त्वं परिव्रज स ते पिता ।
ज्ञेयो मिलित एवात्रास्माकमेवातिथिर्भव ॥५२॥
सूरिस्तं बालमादायादीक्षयद्वसतौ गतः ।
सर्वसावद्यविरतिप्रतिपादनपूर्वकम् ॥५३॥
उपयोगं ददौ योगी कियदस्यायुरित्यथ ।
षण्मासान् यावदस्तीति तच्च सद्यो विवेद सः ॥५४॥
अत्यल्पायुरयं बालो भावी श्रुतधरः कथम् ।
इत्युद्दधार सिद्धान्तसारं सूरिवरस्ततः ॥५५॥
कृतं विकालवेलायां दशाध्ययनगर्भितम् ।
दशवैकालिकं तेन नाम्ना शास्त्रं बभूव तत् ॥५६॥
गुरूपदेशात्तं ग्रन्थं पठित्वा विधिना सुधीः ।
षण्मासान्ते तु **मणकः** कालं कृत्वा गयौ दिवि ॥५७॥
मणकेऽत्र विपेदाने सूरीनश्रूणि मुञ्चतः ।
यशोभद्रादयो नत्वाऽभ्यधुः किमिदमर्हति ? ॥५८॥
ततो **मणक**वृत्तान्तं सुतसम्बन्धबन्धुरम् ।
सूरयः कथयामासुस्तज्जन्ममरणावधि ॥५९॥
ऊचुः शिष्या नमद्ग्रीवा **यशोभद्रा**दयस्ततः ।
पूज्यैरपत्यसम्बन्धः किमादौ ज्ञापितो न नः ? ॥६०॥

गुरुवद् गुरुपुत्रेऽपि वर्तेतेति वचो वयम् ।
अकरिष्यामहि तदा सत्यं तत्पर्युपासनात् ॥६१॥

सूरिरूचे तदा नास्याभविष्यत् सुगतिप्रदम् ।
वयोवृद्धेषु युष्मासु वैयावृत्त्योत्तमं तपः ॥६२॥

ज्ञातास्मत्पुत्रसम्बन्धा यूयं हि **मणकाद्** मुनेः ।
नाकारयिष्यतोपार्स्ति स्वार्थं सोऽथ व्यमोक्ष्यत ॥६३॥

अमुमल्पायुषं मत्वा कर्तुं श्रुतधरं मया ।
सिद्धान्तसारमुद्धृत्य **दशवैकालिकं** कृतम् ॥६४॥

यथास्थानं नयाम्येतदिति जल्पन् गुरुस्ततः ।
शिष्यसङ्घोपरोधेन शास्त्रं समवृणोद् न हि ॥६५॥

अथ **शय्यम्भवः** सूरि**र्यशोभद्रं** महामुनिम् ।
श्रुतसागरपारीणं पदे स्वस्मिन् न्यवेशयत् ॥६६॥

अनङ्गहार्यप्ययमङ्गहारी गुणैरपूर्वोऽपि सपूर्व एव ।
शय्यम्भवो जृम्भितकीर्तिपूरः पूर्णायुरुच्चैः पदमाससाद ॥६७॥

॥ इति श्रीशय्यम्भवकथा ॥

● ● ●

प्रभवो जम्बूस्वामिकथायाम्, **श्रीयकः स्थूलभद्र**कथायाम्, **उदायनस्त्वभय-कुमार**कथायामुपदिष्टः ॥ साम्प्रतं तु **माषतुषो** यथा –

§§ पुरे **रत्नपुरे** सूरिरासीद् गुणनिधिः पुरा ।
सङ्घमुख्यः श्रुतनिधिर्धर्मव्याख्याविशारदः ॥१॥
वैयावृत्त्यकरस्तस्य भवज्ञातेयबान्धवः ।
मुनिः **प्रसन्न**नामऽऽसीद् मूर्खतैकनिकेतनम् ॥२॥
स सूरिरेकदा श्रान्तो भूरिशो धर्मकर्मभिः ।
आगत्य भोजनादूर्ध्वं श्राद्धैर्व्याख्यामकार्यत ॥३॥
ततो विश्रान्तमालोक्य प्रसुप्तं पार्श्व एव सः ।
अप्रसन्नमनाः सूरिश्चिन्तयामासिवानिति ॥४॥
धन्योऽयं पुण्यवानस्मद्भ्राता मौर्ख्यबलेन यः ।
निश्चिन्तः सुखमेवास्ते स्वैरशायी दिवानिशम् ॥५॥
वयं तु पाठवैगुण्यात् क्रीडाशुकवदन्वहम् ।
आबाधस्थास्त एवैके लापयामो नवैर्नवैः ॥६॥
दुर्ध्यानेनामुना कर्म ज्ञानावरणमर्जितम् ।
अनालोच्याप्रतिक्रम्य मृत्वा सूरिः सुरोऽभवत् ॥७॥
धन्योऽयं पुण्यवान् सूरिः प्रकाशयति यः श्रुतम् ।
इति ध्यानक्षतज्ञानावरणोऽस्य तु बान्धवः ॥८॥
मृत्वा स्वर्गमगाद् भोगान् भुक्त्वा तस्मादपि च्युतः ।
नगरे **श्रीपुरे** जज्ञे **श्रीपते**र्वणिजः सुतः ॥९॥ युग्मम् ॥
धन्य इत्याख्या सैष व्रतेच्छुः शैशवादपि ।
क्रमेण संयमं प्राप्य सूरिः श्रुतधरोऽभवत् ॥१०॥
सूरिदेवोऽपि स च्युत्वा **सज्जना**ख्यो वणिक्सुतः ।
भूत्वा भेजे प्रबुद्धः सन् **धन्या**चार्यान्तिके व्रतम् ॥११॥

तस्य पूर्वकृतं कर्म ज्ञानावरणमुद्ययौ ।
तत्प्रभावाच्च नागच्छत् पठतोऽप्येकमक्षरम् ॥१२॥
प्रज्ञापात्रं परे शिष्या खेदयन्तस्तमूचिरे ।
कुरु गाढं स्वरं येनायाति पाठोऽतिदूरगः ॥१३॥
इत्यस्य खिद्यतः सूरिर्बोधायेदमलेखयेत् ।
जीव ! **'मा रुष्य मा तुष्य'** यतो दोषाः स्वयं कृताः ॥१४॥
घोषयन्नित्यसौ नित्यं स्वशक्तेः सारमग्रहीत् ।
जीव ! **माषतुषे**त्यादि पदमन्यद् मुमोच च ॥१५॥
ततोऽसावतिघोषेण शश्वत् कौतुकिनो जनात् ।
लेभे **माषतुषा**भिख्यां **'मासाहस'**पतत्रिवत् ॥१६॥
ज्ञानावरणखेदेनाभ्यग्रहीदित्ययं गुरोः ।
आचाम्लानि तदा मोक्ष्ये पाठोऽयं मे यदैष्यति ॥१७॥
मुने**र्माषतुष**स्यैवमाचाम्लानि वितन्वतः ।
द्वादशाब्दी व्यतीयाय सोऽस्य पाठस्त्वयाय न ॥१८॥
स्वपाठपट्टिकामग्रे मुक्त्वैकान्तस्थितोऽन्यदा ।
निनिन्द मूर्खताकन्दमात्मानं स महातपाः ॥१९॥
"रे जीव ! भवता पूर्वभवे ज्ञानं व्यराध्यत ।
यथा तथा तवाभ्यर्णं क्लिश्यतोऽपि समेति न ॥२०॥
द्विसंस्था ह्येकसंस्थास्ते पदानुसृतिलब्धयः ।
भवन्ति कवयो धन्याः स्वाराद्धं यैः श्रुतं पुरा ॥२१॥
पुरा विराधित ज्ञानं धिग् धिग्मामधमाधमम् ।
श्लोकार्धमपि यस्येयद्वर्षतोऽपि समेति न ॥२२॥
इत्थं विविधमात्मानं निन्दतोऽपि च गर्हतः ।
क्षपकश्रेणिलीनस्य केवलज्ञानमुद्ययौ" ॥२३॥

उत्पन्नकेवलोऽन्येषामनुग्रहविधित्सया ।
मोहाहिगारुडमिव श्लोकार्धं तदथापठत् ॥२४॥

तन्निशम्यागमेनास्य यानस्येव प्रवासिनः ।
अवर्धयन् गुरुं क्षुल्ला हर्षफुल्लाननास्ततः ॥२५॥

जगु**र्माषतुषं** पूज्याः कथं पाठस्तवागतः ? ।
ज्ञानेनाह स तेनोक्तः केनोचेऽप्रतिपातिना ॥२६॥

परितः सपरीवारा सूरयो भक्तिभूरयः ।
नेमुस्तं निस्तुषज्ञानमथ **माषतुषं** मुनिम् ॥२७॥

सुराः समेत्य सद्भक्तिकलिताश्चलितासनाः ।
तदा केवलिनस्तस्य महिमानं वितेनिरे ॥२८॥

सैष **माषतुष**केवली ततो गोभिरुज्ज्वलतराभिरिन्दुवत् ।
लोकसंहतितमोहतिक्रमात् कौमुदं किल विकास्य निर्वृतः ॥२९॥

॥ इति श्रीमाषतुषमुनिकथा ॥

● ● ●

अथ **केशी** यथा –

§§ **श्रावस्ती भरत**क्षोणावस्तीह नगरी वरा ।
तत्र क्षत्त्रशिरोरत्नं **जितशत्रु**रभूद् नृपः ॥१॥
तत्र श्री**पार्श्वनाथ**स्य गणभृद् गुणसम्भृतः ।
केशिनामा चतुर्ज्ञानी द्वादशाङ्गधरोऽभवत् ॥२॥
इतः **श्वेताम्बी**ति ख्याता पुरी पौरगणाञ्चिता ।
प्रदेशी नाम राजाऽऽसीत् तत्रासीमभुजाबलः ॥३॥
चित्रनामा च तन्मन्त्री राजकार्येण केनचित् ।
श्रावस्त्यामाययौ तस्यां **जितशत्रु**नृपान्तिके ॥४॥
केशी गणधरस्तत्र जगन्मोहतमोऽपहः ।
तेनौक्षि गोभिरूर्जस्वी जन्मान्धेनेव भास्करः ॥५॥
गत्वा नत्वा च तं भक्तया निषसादैष तत्पुरः ।
चक्रे च **केशि**नाप्यस्य बोधाय धर्मदेशना ॥६॥
प्रबुद्धस्तत्क्षणादेष **केशि**देशनया तया ।
मन्त्री पवित्रसम्यक्त्वं श्रावकत्वमशिश्रियत् ॥७॥
सिद्धकार्योऽन्यदा मन्त्री गच्छन्निजपुरीं प्रति ।
श्री**केशि**गणभृत्पादान् वन्दित्वैवं व्यजिज्ञपत् ॥८॥
पूज्यपादैरनुग्राह्यः **श्वेताम्ब्या**गमनादहम् ।
धर्मं चेत् प्रतिपद्येत **प्रदेश्य**पि नरेश्वरः ॥९॥
सूरयोऽप्यूचिरे मन्त्रिन् ! स राजा नास्तिकस्तव ।
वास्यो धर्मेण किं क्वापि कर्पूरेणेव रामठः ? ॥१०॥
मन्त्री प्राहोपकार्या वस्तत्रान्ये सन्ति भूरिशः ।
पौर-भक्तिविधौ शूरा दूरादास्तामयं नृपः ॥११॥
वर्तमानेन योगेन तत्रैष्यामः कदाचन ।
इत्युक्ते सूरिभिर्मन्त्री स्वां पुरीमगमत् ततः ॥१२॥

सूरयोऽप्येकदा पृथ्व्यां विहरन्तो यथागमम् ।
समेत्य **श्वेताम्बी**पुर्यामुद्याने समवासरन् ॥१३॥
चरैर्वर्धापितो मन्त्री तदागमनवार्तया ।
स्थानस्य एव सद्भक्त्या गुरुपादानवन्दत ॥१४॥
अचिन्तयच्च मिथ्यात्वग्रहग्रस्तो नृपो मम ।
याता हा ! दुर्गति घोरां सति मन्त्रिणि मय्यपि ॥१५॥
तदेनं गुरुपादान्ते कथञ्चन नयाम्यहम् ।
तद्गीःश्रवणतोऽस्यापि यदि मोहो विलीयते ॥१६॥
इतश्च वाहनव्याजाद् राजानं बहिरानयत् ।
परिश्रमविनोदायोद्याने प्रावीविशच्च सः ॥१७॥
धर्मव्याख्यापरं तत्र **केशिनं** वीक्ष्य भूपतिः ।
सोत्प्रासमवदद् मन्त्रिन् ! मुण्डोऽयं रारटीति किम् ?
चित्रोऽप्युवाच नो विद्मोऽभ्यर्णीभूय निशम्यते ।
इत्युभावुवसर्पाते **केशिनं** राज-मन्त्रिणौ ॥१९॥
स्वरूपे तत्र देवानां जीवानां च गणेन्दुना ।
दिश्यमाने जगादेति विहस्य वसुधापतिः ॥२०॥
''मुने ! ते भाषितं सर्वसम्बद्धसत्त्वतः ।
असत्त्वं च तत्प्रत्यक्षागोचरत्वात् खपुष्पवत् ॥२१॥
सत्प्रत्यक्षागोचरं न यथा भूतचतुष्टयम् ।
इति स्थितिमुपन्यस्य तमूचुः सूरयोऽप्यथ'' ॥२२॥
''भद्र ! किं भवतोऽध्यक्षविषयातीतमेव तत् ।
उतान्यदेहिनामाद्यपक्षे स्तम्भादिवस्तुनः ॥२३॥
अन्यपक्षोऽथवा तस्यासिद्धत्वाद्वेत्सि तत्कथम् ? ।
तत्सिद्धौ तु तवैवेह सिद्धा सर्वज्ञजीवता ॥२५॥

तस्मादनुपत्तिस्ते देवजीवादिनिष्कृतौ ।
जीवे च सूपपादत्वाद् वेद्यादीनामिति स्थितम्'' ॥२६॥

''ततो राजाह भगवन् ! परलोकोऽस्ति चेत् क्वचित् ।
धार्मिका मे सवित्री तत् पापीयान् जनकोऽभवत् ॥२७॥
त्वन्मते नियतं स्वर्गदुर्गतिव्यतिषङ्गिणौ ।
प्रतिबोधयतस्तन्मां कथमागत्य तौ न हि ?'' ॥२८॥

''अथाह भगवान् राजन् ! यथा कारागृहस्थितः ।
ईष्टे न बान्धवान् द्रष्टुमेवं जीवोऽपि नारकः ॥२९॥
अन्यच्च विषयासक्ता दिव्यप्रेमपराः सुराः ।
समाप्तकृत्या नो मर्त्यलोकं दुर्गन्धमिग्रति'' ॥३०॥

''राजोचे द्वौ पुरा चौरौ संगृह्यैकस्तयोर्मया ।
खण्डितो न तथाप्यात्मा तत्तनौ क्वापि वीक्षितः ॥३१॥
क्षिप्तः कुम्भयां द्वितीयस्तु तद्द्वारं च नियन्त्रितम् ।
कथं तदात्मा निरगात् कृम्यात्मानोऽविशन् कथम्'' ॥३२॥

''सुरिराह यथा नीलनालिकेरात् पयोध्वनिः ।
निःसरत्ययसि ध्माते यथा विशति चानलः ॥३३॥
अन्यच्च दारितादग्निररणेः क्वापि दृश्यते ।
तद्वदात्मा वीक्ष्येत देहात् खण्डीकृतादपि'' ॥३४॥

''राजोचे तोलितश्चैकश्चारैः सात्मा मया पुरा ।
निरात्मा च ततो भारस्तत्तनौ तादृगेव किम् ?'' ॥३५॥

''सूरिः प्राह दृतिः पूर्वं रिक्ताथो वायुपूरिता ।
तोल्यतां तादृगेवास्यां भारो हि नाधिको भवेत् ॥३६॥
राजंस्तद्देहिनामात्मा गन्धः सुमनसामिव ।
देहाद् भिन्नोऽपि चिद्रूपचेष्टालिङ्गो मरुल्लघुः'' ॥३७॥

पीत्वेत्थमाचार्यगवीप्रसूतोपदेशदुग्धं मधुरं सितावत् ।
प्रदेशिनो भूमिपतेर्विलिल्ये मिथ्यात्वहृत्पूरविषस्य पूरः ॥३८॥
गुरोरथो भावभिषग्वरात् परामवाप्य सम्यक्त्वमहौषधीमथ ।
विमुच्य नास्तिक्यमयं क्रमागतामयः क्रमेणाजनि निर्जरो नृपः ॥३९॥
सूरिस्तु पूरितजगद्यशसा रसायां धर्मोद्यमार्थमखिलानि खलानि भित्त्वा ।
कर्मक्षयं क्रमतया च विधाय मोक्षमुत्पन्नकेवलकलः कलयाञ्चकार ॥४०॥

॥ इति श्रीकेशिकथा ॥

● ● ●

अथेलातीपुत्रो यथा —

§§ **वसन्तपुर**मित्यस्ति पुरं तत्राभवत् पुरा ।
अग्निशर्मेति विप्रोऽस्य महिला **सोमिले**ति च ॥१॥
सोऽन्यदा साधुसंसर्गात् प्रबुद्धो व्रतमग्रहीत् ।
तत्प्रियापि तथा देहच्छायेव हि सधर्मिणी ॥२॥
पूर्वाभ्यासवशादेतावनुरागं परस्परम् ।
तथा जातिमदं नामुञ्चतामात्तव्रतावपि ॥३॥
ततोऽनशनमाधाय तदनालोच्य दुष्कृतम् ।
मृत्वा द्वावपि **सौधर्म**कल्पे देवौ बभूवतुः ॥४॥
इलावर्धनमित्यस्ति पुरमस्मिन्निलातले ।
तत्र श्रेष्ठी **धना**ख्योऽभूद् **धारिणी** चास्य गेहिनी ॥५॥
तावपुत्रावमन्येतां पुत्रार्थमुपयाचिते ।
पुरदेव्या **इलावत्या** यात्रां पुत्रस्य नाम च ॥६॥
इतश्च सो**ऽग्निशर्मा**त्मा च्युत्वा **सौधर्म**कल्पतः ।
आययौ **धारिणी**कुक्षौ शुक्तौ स्वातिपयो यथा ॥७॥
कालेनाजायत सुतः शुभेऽह्नि शुभलक्षणः ।
ईलातीपुत्र इत्याख्यां पितरौ तस्य चक्रतुः ॥८॥
ततोऽङ्गैर्मृदुलैः कान्तिकन्दलैरिव चन्द्रमाः ।
स विश्वनयनानन्दी क्रमेण ववृधेतमाम् ॥९॥
च्युत्वा **सौधर्मत**स्तस्य प्रिया जातिमदादभूत् ।
नटस्य नन्दिनी रूपलावण्यरसदीर्घिका ॥१०॥
तथा ननर्त सा वंशप्रान्तरङ्गतरङ्गिता ।
यथा किं मानवा देवदानवा अपि विस्मिताः ॥११॥
एता**मिलातीपुत्रो** मित्रवर्गयुतोऽन्यदा ।
खेचरीमिव नृत्यन्तीं चत्वरेऽथ व्यलोकयत् ॥१२॥

अथास्यां रूपलावण्यविज्ञानातिशयेक्षणात् ।
असौ भवान्तरप्रेमाभ्यासादप्यन्वरज्यत ॥१३॥
एतस्यां मोहितश्चित्रन्यस्तवल्लेप्यक्लृप्तवत् ।
पाषाणोत्कीर्णवच्चास्थाद् यन्त्रकीलितवच्च सः ॥१४॥
दृष्ट्वेति जल्पितो मित्रैर्नोचे किञ्चन लज्जया ।
भूयोऽप्यभिहितोऽवादीदयं मुक्तत्रपो द्रुतम् ॥१५॥
भो वयस्या इमामेव परिणेष्यामि नर्तकीम् ।
नो चेत् प्राणपरित्यागं करिष्यामि हुताशने ॥१६॥
ततो नीतो गृहं मित्रैः प्रतिबोध्य कथञ्चन ।
तत्रास्थाद् मदनावस्थाव्याकुलो मौनभागयम् ॥१७॥
पितृभ्यामथ पृष्टोऽयं लज्जमानो जगाद न ।
ताभ्यां पृष्टैस्तु तन्मित्रैस्तदीप्सितमकथ्यत ॥१८॥
श्रुत्वा तदीहितं श्रेष्ठी मर्माहत इवाकुलः ।
पुत्रं रहसि कृत्वेति सानुतापमभाषत ॥१९॥
कुलीनानुचितं वस्सार्थयसे त्वं किमीदृशम् ।
चाण्डालकूपिका क्वापि गम्यते तृषितैरपि ? ॥२०॥
निष्ठिताः किं वणिक्पुत्र्यः पात्रं सौन्दर्यसम्पदाम् ।
अवाच्यामपि साधूनां यन्नटीमनुरज्यसे ? ॥२१॥
"**इलातीसूनु**रप्याह ताताहमिति वेद्म्यदः ।
किं करोमि परं कामो वामो मथ्नाति मन्मनः ॥२२॥
महान्तोऽपि न विन्दन्ति कृत्याकृत्यं स्मरातुराः ।
जानन्तोऽपीति किं तात ! यूयं त्याजयथ त्रपाम् ?" ॥२३॥
असाध्य इति पित्राथोपेक्षितोऽयं दुरीहितः ।
नटेभ्यः स्वर्णतुलितामुद्वोढुं तामयाचत ॥२४॥

ऊचुस्ते नोऽक्षतं रत्ननिधानमियमङ्गजा ।
विक्रीणामो वयं नैतां वसुभिः प्रचुरैरपि ॥२५॥
अथ ते प्रतिबन्धोऽस्यां तदागच्छ मिलाशु नः ।
शिल्पं शिक्षस्व चास्माकं तवैवेयं प्रिया ततः ॥२६॥
इति स्वस्यावधीर्योच्चैः कुलं शीलमथो यशः ।
नटानाममिलत्तेषामहो कामग्रहो बली ॥२७॥
अहो ! नटीकृते नृत्यपटीयानप्यभूदयम् ।
यद्वा योषित्कृते शम्भुरपि जज्ञे महानटः ॥२८॥
ततो **बेन्नातट**पुरं नटपेटकसंयुतः ।
य**याविलातीपुत्रो**ऽपि द्रविणार्जनहेतवे ॥२९॥
प्रेक्षाकृते तमादिक्षत्तत्र रा**जारिमर्दनः** ।
तद्वर्ग्या राजसौधाग्रेऽवसरप्रसरं व्यधुः ॥३०॥
तदा नान्दीरवाहूताः स्यूताः कौतुकरंहसा ।
उपर्युपरि नीरन्ध्रममिलन् परितः प्रजाः ॥३१॥
सान्तःपुरपरीवारः पौरामात्यादिभिर्वृतः ।
कृट्टिमाग्रसभावेदीमलञ्चक्रे च भूपतिः ॥३२॥
रङ्गभूमौ नटा वंशं तदा प्रांशुममण्डयन् ।
वरत्राभिश्चतसृभिर्भववद् गतिभिर्युतम् ॥३३॥
उभयप्रान्तविश्रान्तकीलिकं फलं च ते ।
वंशोपरि न्यधुः सिद्धिशिलामिव भवोपरि ॥३४॥
खड्गखेटकहस्तोऽंह्रिविलसत्पादुकाद्वयः ।
इलासूनुरथारोहद्वंशं विश्वमनोऽपि च ॥३५॥
स्थितां वंशमवष्टभ्य शालभञ्जीमिवाग्रतः ।
नटीमालोकयन् राजा तदानीमित्यचिन्तयत् ॥३६॥

स्वयं वंशाद् निपत्योच्चैर्नटोऽयं म्रियते यदि ।
नटीमेतां तदाऽक्लेशात् क्षिपाम्यन्तःपुरे निजे ॥३७॥
इतश्च वीक्ष्यमाणः खे खेचरैर्भूचरैरपि ।
इलासूनुः किलाऽधत्त करणानि चतुर्दश ॥३८॥
सप्त पश्चात्पुरः सप्त तान्यथो फलकोपरि ।
ऊर्ध्वोऽस्थात् कीलकान् कृत्वा पादुकारन्ध्रगोचरान् ॥३९॥
पौरामात्यादयस्तस्य नाट्यातिशयरञ्जिताः ।
दध्युर्ददाति राजा चेदस्मै दद्मो वयं ततः ॥४०॥
राजापि मृत्युमाकाङ्क्षंस्तस्यान्तर्विस्मितोऽपि हि ।
ऊचे न किञ्चिदालोकि मयैतत् तत्पुनः कुरु ॥४१॥
विलक्षीभूय कृष्णास्यैः पौरामात्यैरथ स्थितम् ।
स तु लोभात् पुनस्तेने करणानि चतुर्दश ॥४२॥
नृपस्तत्पतनाकाङ्क्षी जगाद पुनरप्यदः ।
व्यलोकि न तथा सम्यक् करणानि पुनः कुरु ॥४३॥
नृपाविवेकविमनाः सर्वोऽप्यासोज्जनस्ततः ।
इलासूनुः पुनर्लोभात् तत्तथा कष्टमातनोत् ॥४४॥
राजा तथैव चाचख्या**विलातीतनयः** पुनः ।
शङ्कितश्चिन्तयामास किमयं ग्रहिलो नृपः ? ॥४५॥
अज्ञानो वाथ विद्वेषी यदेवं वक्ति मां मुहुः ।
चिन्तयन्निति तं दृष्टिविकाराद् ज्ञातवानयम् ॥४६॥
तदा च प्रांशुवंशाग्राधिरूढोऽयमलोकत ।
इभ्यगेहे क्वचिद्भिक्षाकृते प्राप्तं मुनिद्वयम् ॥४७॥
ईर्यैषणेक्षणाभ्यस्तमीक्षणं क्षणमप्यहो ! ।
अददानं पुरो दानं ददत्यामपि योषिति ॥४८॥

दृष्ट्वा तद् व्रतिनोर्द्वन्द्वमद्वन्द्वशमभाजनम् ।
इलासूनुरथोत्सूनभावोद्वेगो व्यभावयत् ॥४९॥

"अहो ! मोहस्य विहितद्रोहस्याब्धेश्च तुल्यता ।
स्ताघो यस्य महावंशैरपि न प्राप्यते क्वचित् ॥५०॥
यदुच्चकुलसम्भूतोऽप्यहमुच्चकुलोद्भवाः । 5
सुकन्या लभमानोऽपि व्यलगं नीचयोषिति ॥५१॥
मन्मुखं को नु वीक्षेत गृह्णीयाद् मेऽभिधां च कः ।
भाषते कोऽपि मां को नु पदेनापि स्पृशेच्च माम् ? ॥
येन मोहमहान्धेनाऽकार्यसज्जेन पातितम् ।
असुखे हा ! मनः पित्रोर्निर्निमित्तोपकारिणोः ॥५३॥ 10
मानिता न सुहृद्वाचो गणितं नात्मलाघवम् ।
जनवादाच्च नो भीतं कुलाङ्गारेण हा ! मया ॥५४॥
ही ! नीरवाहवन्नीचैर्गामिना यत्कृतं मया ।
रुष्टे राज्ञीह तज्जातमकृत्यमपि निष्फलम् ॥५५॥
अयं च रमणी राजवंशमुक्तामणीर्नृपः । 15
भुञ्जानोऽपि यदेतस्यां रज्यते नटयोषिति ॥५६॥
तन्मन्ये मोहराजस्याविषयः कोऽपि न क्वचित् ।
मुक्त्वा जिनमुनीनेतान् महाव्रतधुरन्धरान् ॥५७॥
विषयीकुर्वते स्वदृशामेणीदृशोऽपि न ।
ईर्यायै न्यङ्मुखा धारासारसिक्ता वृषा इव ॥५८॥ 20
तदेत एव धन्या ये विमलं ब्रह्म बिभ्रति ।
यत्र चामी प्रवर्त्तन्ते मार्गाः सोऽस्तु ममापि हि ॥५९॥
इति भावयतस्यतस्य विगलत्पापकर्मणः ।
विपेदे मोहसन्तानमुत्पेदे केवलं महः" ॥६०॥

तत्कालं तन्महाज्ञानमहिमानं वितेनिरे !
देवा जयजयेत्युच्चैरुच्चरन्तश्चतुर्विधाः ॥६१॥

द्रव्यलिङ्गं समादत्स्व नमस्कुर्मो यथा वयम् ।
त्रिदशैरिति विज्ञप्तः केवली तत्तथाऽकरोत् ॥६२॥

वंशः स एव कनककमलं तत् क्षणादभूत् ।
विमानिभिः स्थितोऽत्रैव नतोऽसौ देशनां व्यधात् ॥६३॥

उन्मुखैर्भूचरै राजादिभिर्विस्मितमानसैः ।
चातकैरवि मेघाम्भः पपे तद्देशनावचः ॥६४॥

प्रबुद्धा बहवो जीवास्तस्य देशनया तदा ।
केचिद् दिग्विरतिं सर्वविरतिं केचनाश्रयन् ॥६५॥

राजा स्वेङ्गितवैराग्यादात्मवैराग्यतो नटी ।
राज्ञी च राजवैराग्यात् तत्पार्श्वे जगृहुर्व्रतम् ॥६६॥

तदानीमेव तस्योच्चैस्तस्थुषः कमलासने ।
सर्वे ते क्षपकश्रेणिमारुह्यासन् समासनाः ॥६७॥

क्रमादिलातीतनयो मुनीन्दुस्तैः साकमुत्पाकसमृद्धिपात्रम् ।
निर्धूय निर्धूतभवो भवोपग्राहीणि कर्माणि शिवं प्रपेदे ॥६८॥

॥ इतीलातीपुत्रकथा ॥

● ● ●

अथ **मेघकुमारो** यथा –

§§ अस्ति स्वस्तिकमाणिक्यराजि **राजगृहं** पुरम् ।
आसीत्तत्र गुरुश्रेणिकलितः **श्रेणिको** नृपः ॥१॥

तत्प्रिया **धारिणी** नाम सामजस्वप्नसूचितम् ।
सुरत्नं रत्नगर्भेव गर्भे सुतमधारयत् ॥२॥

तस्यास्तृतीयमासेऽब्दवृष्टिखेलनदोहदम् ।
अकाले पूरयामास राजा दिव्यानुभावतः ॥३॥

असूयत तया सूनुः समये निःसमद्युतिः ।
दोहदान्वयतो **मेघकुमार** इति विश्रुतः ॥४॥

पाल्यमानः क्रमेणाप वृद्धिं नृपतिनन्दनः ।
असौ धात्रीभिरुद्यानपालीभिरिव चन्दनः ॥५॥

अष्टादश लिपीस्ततो द्विगुणान्यायुधानि सः ।
ततोऽपि द्विगुणा बिभ्रत् कला भेजेऽथ यौवनम् ॥६॥

इतश्चान्येद्युरुद्याने वने **गुणशिला**भिधे ।
यथाविहारं श्री**वीरः** समेत्य समवासरत् ॥७॥

श्रेणिकः सपरीवारो निरीय नगरादथ ।
प्रणन्तुमाययौ नाथं स्वर्गादिव पुरन्दरः ॥८॥

प्रणम्योचितभूपीठप्रतिष्ठेषु नृपादिषु ।
स्वामी संसारधिक्कारदायिनी देशनां व्यधात् ॥९॥

देशनान्ते प्रबुद्धात्मा विभुं **मेघो** व्यजिज्ञपत् ।
नाथ ! संसारपाथोधितरीं दीक्षां प्रयच्छ मे ॥१०॥

जगादाथ जगन्नाथः प्रमादं वत्स ! मा कृथाः ।
ततश्चानेन पितरावापृष्टौ नम्रमौलिना ॥११॥

कृच्छ्रादनुमतस्ताभ्यामथ **मेघो** महोत्सवात् ।
जग्राह साग्रहो दीक्षां करेण परमेशितुः ॥१२॥

स्वामिना दीक्षयित्वायं स्थविरेभ्यः समर्पितः ।
रात्रौ संस्तारकस्तस्य स्थानद्वारि क्रमादभूत् ॥१३॥
ततः शरीरचिन्तायै गच्छदागच्छतां तदा ।
स्थविराणां पदै**र्मेघः** सर्वाङ्गीणामघट्टयत ॥१४॥
कदलीकोमलाङ्गस्य बदरीविटपोपमैः ।
तत्पादैर्घट्टयमानस्य निद्राऽऽयासीदमुष्य न ॥१५॥
"अचिन्तच्च खिन्नात्मा **मेघो**ऽमी व्रतिनः पुरा ।
गृहस्थं मां मृदूल्लापैरालपन् निखिला अपि ॥१६॥
घट्टयन्तस्त्विदानीं मां पदैरमुदुपातिभिः ।
कुम्भकारगृहद्वारपङ्क्तामनयन् हहा ! ॥१७॥
तत्प्रभाते विभुं नत्वा यास्यामि निजमन्दिरम् ।
व्यलोकि मालवः स्पष्टं भक्षिताश्चापि मण्डकाः" ॥१८॥
"ततः प्रगे तथा कर्तुं तमुपेतं प्रभुर्जगौ ।
वत्स ! ते जाग्रतो रात्रौ चिन्ता या समजायत ॥१६॥
महासत्त्ववतां **मेघ** ! त्वादृशां नोचितैव सा ।
दाहे चर्मैव दुर्गन्धं सुगन्धस्त्वगरुर्यतः ॥२०॥
अपरं च भवादस्मात्तृतीये त्वं भवान्तरे ।
सुमेरुप्रभ इत्यासी**र्विन्ध्ये** यूथाधिपः करी ॥२१॥
सुखं स्वीयपरीवारस्त्वमस्थाः प्रतिकाननम् ।
सल्लकीर्मृदुलाः खादन् पिबन् रेवाम्बु निर्मलम् ॥२२॥
ग्रीष्मे भीष्मेऽन्यदा वन्यदावधूमाकुलीकृतः ।
अगास्तृष्णातुरस्तूर्णं पल्वलं प्रतनूदकम् ॥२३॥
तत्र पातुं प्रविष्टोऽम्बु निमग्नः पङ्कसंकटे ।
प्राणं कुर्वन् स्वमाक्रष्टुं निमग्नोऽसि विशेषतः ॥२४॥

ततः पूर्वापराद्धेभयूना व्यूढेन हस्तिना ।
तत्रागतेन दन्ताभ्यां विद्धस्त्वं कटु चारटः ॥२५॥

सप्तमोर्व्यामिव प्राप्तः सप्तरात्रमिति व्यथाम् ।
विषह्य पालयित्वायुः समा विंशोत्तरं शतम् ॥२६॥

आर्तध्यानेन मृत्वात्र **भारते विन्ध्य**पर्वते । 5
चतुर्दन्तः करी **मेरुप्रभो** यूथाधिपोऽभवः ॥२७॥ युग्मम् ॥

ततो ग्रीष्मे दवं दृष्ट्वा संभ्रान्तः समचिन्तयः ।
मयेदृग्दृष्टपूर्वोऽग्निसंभ्रमः क्वचिदप्यहो ! ॥२८॥

चिन्तयन्निति संजातजातिस्मृतितया व्यधाः ।
प्रावृष्युत्पाट्य विटपिविटपान् स्थण्डिलत्रयम् ॥२९॥ 10

ग्रीष्मकाले तथैवाथ दीप्यमाने दवानले ।
भीतो दहनतस्त्वं तु प्रथमं स्थण्डिलं गतः ॥३०॥

तदग्रे परितोऽभ्येत्य निकुञ्जेभ्योऽग्निभीरुभिः ।
उपर्युपरि संलीनैर्नीरन्ध्रं श्वापदैर्वृतम् ॥३१॥

मुक्त्वा तत्कृपया तेषां द्वितीयं स्थण्डिलं गतः । 15
तत्तथैव ततोऽयासीस्तृतीयं सपरिच्छदः ॥३२॥

अस्थास्तत्र निराबाधे प्रविश्य करिणीयुतः ।
तारिकासहितः सायं नभसीव निशाकरः ॥३३॥

कण्डूयितुं ततः स्वाङ्गमेकोऽंह्रिस्त्वयकोद्धृतः ।
स्थानेऽत्र शशकोऽभ्येत्य तस्थौ दावभयातुरः ॥३४॥ 20

कृतकण्डूयनो यावद्यथास्थानेऽमुचः पदम् ।
स्पृष्टश्च तावदेतेन शनकैः शशकस्त्वया ॥३५॥

सहसैष त्वयाऽऽकुञ्च्य धृतो जीवानुकम्पया ।
त्रिभिरेव स्थितं पादैः कृपाहो ! ते पशोरपि ॥३६॥

मनुष्यायुस्त्वया बद्धं तया सत्त्वानुकम्पया ।
संसारश्च सुपुण्यात्मन् ! अतनुं प्रतनुः कृतः ॥३७॥
दिनद्वयेन सार्धेन दग्ध्वा वनमशेषतः ।
स्वयमेव तदा दावपावकः प्रशमं ययौ ॥३८॥
ययुस्तद्भीतितो मुक्ताः शान्तैऽग्नौ श्वापदाः समे ।
स्थण्डिलेभ्यो विनिःसृत्य कुटुम्बेभ्यो यथा जनाः ॥३९॥
मेघ ! त्वमपि खिन्नात्मा तदानीं क्षुत्तृषातुरः ।
तूर्णं निर्यातुकामोऽद्रिर्वज्राहत इवापतः ॥४०॥
मृतावस्थस्ततः काकोलूकजम्बुकभक्षणम् ।
दुःसहं सहमानोऽस्था महासत्त्व ! दिनत्रयम् ॥४१॥
पालयित्वा शतं वर्षाण्यायुर्मृत्वा ततोऽपि च ।
धीर ! त्वं **धारिणी**कुक्षौ पुत्रत्वेन समागमः ॥४२॥
गजो येनाभवस्तेन स्वप्ने सा गजमैक्षत ।
तृषार्त्तो येन चागास्त्वं तेन सा वृष्टिदोहदा ॥४३॥
तत्तिरश्चापि भवता पुरा जीवानुकम्पया ।
सोढं दृढतया कष्टमिदानीं तु किमुच्यते ? ॥४४॥
पदस्पर्शेन साधूनां पूज्यः पांशुकणोऽपि हि ।
जायते वत्स ! तेनायं विषोढुमुचितस्तव'' ॥४५॥
श्रुत्वेति जातिस्मृतिमान् **मेघः** प्रमदबाष्पयुक् ।
विभुं नत्वा ददौ मिथ्यादुष्कृतं स्वविकल्पिते ॥४६॥
तपोऽऽभितप्य क्षमया प्रधानं विपद्य भेजे **विजयं** विमानम् ।
ततोऽप्येष **महाविदेह**जनेः शिवं यास्यति मुक्तदेहः ॥४७॥

॥ इति श्रीमेघकुमारकथा ॥

● ● ●

अथ **पुण्डरीको** यथा –

§§ **जम्बूद्वीपे विदेहेऽस्ति** विजयः **पुष्कलावती** ।
नृपुण्डरीकिणी तत्रास्ते पुरी **पुण्डरीकिणी** ॥१॥

महापद्म इति श्रीणां सद्म तत्राभवद् नृपः ।
राज्ञी तस्य विनिर्धूतच्छद्मा **पद्मावती**त्यभूत् ॥२॥

तयोश्च **पुण्डरीकश्च कण्डरीकश्च** विश्रुतौ ।
सुतावजनिषातां द्वौ क्षत्रधर्मभुजाविव ॥३॥

दत्त्वाथ **पुण्डरीकाय** राज्यं भूमिपतिस्ततः ।
स्थविराचार्यतः प्राप्य व्रतं तप्त्वा शिवं ययौ ॥४॥

त एव **स्थविराचार्या** विहरन्तोऽवनीतले ।
पुर्यां कालान्तरेणात्र समेत्य समवासरन् ॥५॥

श्रुत्वा तदागमं राजा **कण्डरीक**समन्वितः ।
पुण्डरीको महाभूत्याभ्येत्य चैतानवन्दत ॥६॥

गुरवस्ते मुखद्वारविन्यस्तमुखवस्त्रिकाः ।
धर्मलाभाशिषं दत्त्वा तस्मै धर्ममुपादिशन् ॥७॥

"यौवनं वनजाक्षीणामपाङ्गप्रतिहस्तकम् ।
प्रेमापि पद्मिनीपत्रस्थितोकणसोदरम् ॥८॥

विषयाः किञ्च किम्पाकविपकफलसोदराः ।
वपुःश्रियोऽपि सन्ध्याभ्ररागाभियनयनाटिकाः ॥९॥

संपातदा सदा श्रेया संपदामपि संहतिः ।
तदपि प्राणिनामायुर्वायुसब्रह्मचारि च ॥१०॥

मत्वेति धर्म एवैको विवेकिभिरुपास्यते ।
स्वर्गपवर्गसम्पत्तिकारणं यः सनातनः ॥११॥

आत्मासौ पञ्चभिरपीन्द्रियै रागमुपागतैः ।
मोहतीक्ष्णैर्निहन्येत स्वस्वतृष्णासिधेनुभिः ॥१२॥

तपोहुताशनोद्भासिज्ञानद्यन्वयचेतितः ।
आत्मा सज्जीभवत्येष हतोऽपीन्द्रियघातकैः ॥१३॥
विषयांस्त्याजयित्वैतानीन्द्रियाणि रिपूनिव ।
तदा दासीकरोत्यात्मा वैराग्यास्त्रं यदाप्नुयात् ॥१४॥
अन्नपानादिरोधेनात्मनः सेनापतिस्तपः ।
बद्धमूलान् पुरेऽमुष्मिन् मारयत्यान्तरान् रिपून् ॥१५॥
स्थापितोऽथ मनोऽमात्यः करणेष्वेषु पञ्चसु ।
पुरेऽस्मिन्नात्मनो राज्यं विप्लावयति विप्लुतः ॥१६॥
विवेक उपरिस्थायी न्यायी यद्यस्य योज्यते ।
आत्मभूपालहस्ते स्युस्तदा सर्वा अपि श्रियः ॥१७॥
ज्ञात्वा विवेकतोऽनेन करणाचारचञ्चुना ।
कल्याणं ग्रस्तमप्यात्माऽऽदत्ते संयमयन् मनः'' ॥१८॥
श्रुत्वेति देशनां नत्वा गुरुपादानथो नृपः ।
जगाम नगरीमन्तर्भववैराग्यमुद्वहन् ॥१९॥
''मन्त्रिभिर्मन्त्रयित्वाथ **कण्डरीकं** जगौ नृपः ।
वत्स ! राज्यं गृहाणेदं पालयेथा यथाक्रमम् ॥२०॥
परिव्रज्यां ग्रहीष्यामि विरक्तोऽहं भवात् पुनः ।
वार्धके मुनिवृत्तित्वं कुलाचारादपीति नौ'' ॥२१॥
''उवाच **कण्डरीक**स्ते भ्रातः ! का भ्रातृता मयि ।
क्षिप्त्वा संसारगुप्तौ मामात्मानं मोचयिष्यसि ? ॥२२॥
आत्मनः स्वदते यत्तद् दीयते लघवे पुरः ।
तदार्य ! मह्यं स्वमतं व्रतं दापयसे न किम् ?'' ॥२३॥
''अथाह **पुण्डरीक**स्तं वत्स ! युक्तं त्वमब्रवीः ।
ऋते व्रतं मनुष्यत्वे नान्यत् किमपि सुन्दरम् ॥२४॥

यौवने मुक्तिवर्त्मेदं परं न वहते यतः ।
स्वस्थानेऽत्र स्थितात् कामचरटाद् भयमुत्कटात् ॥२५॥
स्मरस्य विषयानस्य भञ्जयन्ती समन्ततः ।
मुखे शिबिरदन्तांश्च पातयन्ती निरन्तरान् ॥२६॥
पञ्च वल्लभवाजीन्द्रान् खञ्जयन्तीन्द्रियाणि च ।
भस्मयन्ती च कबरीगरीयोवनजालिकाम् ॥२७॥
जरा यदा तु चारित्रसेनानीशमवाहिनी ।
दिग्जयं कुरुते मोक्षमार्गोऽयं सुवहस्तदा ॥२८॥ विशेषकम् ॥
तन्ममेयं जरा वत्स ! व्रतसाहाय्यकारणम् ।
तेन त्वां वच्मि तारुण्यं यावत्तावद् गृहे वस ॥२९॥
जाते राज्यधरे पुत्रे तारुण्ये चात्र जीर्यति ।
स्वकुलाचारतः पश्चाद् गृह्णीयास्त्वमपि व्रतम्'' ॥३०॥
''अथाह **कण्डरीको**ऽपि युक्तमार्य ! त्वयोदितम् ।
परं तत्पौरुषं मन्ये यत्तारुण्येऽपि संयमः ॥३१॥
महापद्मसुतः किं न त्वत्कनिष्ठश्च किं न हि ।
अहं तदाग्रहं कृत्वा यद् गृह्णामि न संयमम् ॥३२॥
संसारो दुस्त्यजस्तावद् व्रतं तावच्च दुष्करम् ।
दुष्प्रापं च शिवं तावद्धीरा यावदुदासते ॥३३॥
प्रतिज्ञामिति निर्माय वार्यमाणोऽपि बन्धुना ।
सोत्सवं **कण्डरीको**ऽथ व्रतं जग्राह साग्रहः'' ॥३४॥
कोऽपि सज्यधरो यावदेधते तावदुन्मनाः ।
पुण्डरीकः पुना राज्येऽप्यस्थाद्भावेन संयमी ॥३५॥
तप्यमानस्तपस्तीव्रं सहमानः परीषहान् ।
कण्डरीकमुनिः साकं गुरुभिर्व्यहरद् भुवि ॥३६॥

यथा कालं वसन्तर्तुरथ प्रावर्तताऽन्यदा ।
कूजितैः कलकण्ठीनामकुण्ठीकृतमन्मथः ॥३७॥
पलाशपुष्पदीपालिमालितेऽवनिमण्डले ।
पुष्पाणि पूरयत्युच्चैर्मधावुत्तरसाधके ॥३८॥
भृङ्गकूजितह्रीङ्कारमन्त्रजापपरायणः ।
कण्डरीकं वशीचक्रे तदा मन्मथमान्त्रिकः ॥३९॥ युग्मम् ॥
"चारित्रावरणे कर्मण्युदितेऽचिन्तयत् ततः ।
कण्डरीकमुनिः कोऽयमपस्मारो व्रतं मम ॥४०॥
दुर्विधानां च वृद्धानामुभयेषां व्रतं मतम् ।
येषां भोगेष्वसंपत्तिरशक्तिश्च किल कमात् ॥४१॥
हहा ! तदाहमार्येण वारितोऽप्यभजं व्रतम् ।
अथवाऽद्यापि किं नाम विनष्टं मे त्यजाम्यदः ॥४२॥
व्रजामि द्विगुणैर्भोगैः पूरयामि सुखक्षतिम् ।
तदार्यदित्सितं राज्यमादायात्मक्रमागतम्" ॥४३॥
चिन्तयित्वेति शयितान् मुक्त्वा गुरुपदाम्बुजान् ।
प्रकृत्या मलिनः सोऽगाद् भृङ्गवत् **पुण्डरीकिणी**म् ॥४४॥
स तत्रोपवने गत्वोपधिमालम्ब्य शाखिनि ।
कण्डरीको विशिश्राम श्रान्तः शाड्वलभूतले ॥४५॥
उद्यानपालकेनाथ ज्ञापयामास भूपतिम् ।
भूमानपि तदाकर्ण्य विस्मयादित्यचिन्तयत् ॥४६॥
"व्रते भग्नप्रतिज्ञोऽयमेकाकी यदिहागतः ।
महासत्त्वोऽथवैकाप्रतिमास्थो भविष्यति ॥४७॥
तथाप्यल्पपरिवार एव यामि तदन्तिके ।
कथञ्चनायं भग्नः **'स्याद्विचित्रा कर्मणां गतिः'** ॥४८॥

चिन्तयित्वेति राजापि प्रधानैः कैश्चिदन्वितः ।
उद्यानमागतोऽपश्यत् **कण्डरीकं** तथास्थितम् ॥४९॥

तदालोक्य महीपालः शोकेनाङ्कीकृतो हृदि ।
व्यमृशत् तातपुत्रोऽयं हा ! कर्मवशगोऽभवत् ॥५०॥

आरोपयामि लज्जायां तदेनं विधिवन्दनात् ।
चेततेऽसौ यदि पुनः प्रच्युतः स्वप्रतिश्रवात्'' ॥५१॥

चिन्तयित्वेति निर्मायोत्तरासङ्गं यथाविधि ।
वन्दित्वा तं नृपोऽपृच्छत् प्राञ्जलिः सुखसंयमम् ॥५२॥

ततोऽसौ प्राह विहितमियत्कालं मया तपः ।
राज्यार्थी साम्प्रतं राजन् ! भवन्तमहमागमम् ॥५३॥

स्वबन्धोर्व्रतखिन्नस्य वचः श्रुत्वा व्रतार्थ्यसौ ।
शोकहर्षाश्रुमानूचे प्रधानानिति भूपतिः ॥५४॥

''भोः ! भोः ! सचिवसामन्ताः ! बन्धुर्भे वोढुमक्षमः ।
व्रतं वत्सतरो भारमिव तेनागतो मयि ॥५५॥

कारणीयस्ततो राज्यमयं प्राज्यमहं यथा ।
युष्माभिरनुभन्तव्योऽस्मि च संयमहेतवे ॥५६॥

आपृच्छ्येति प्रधानांस्तद्यतिलिङ्गमुपाददे ।
निजं च **कण्डरीकाय** राज्यलिङ्गं नृपो ददौ'' ॥५७॥

कण्डरीकस्ततः साकं प्रधानैः पुरमाविशत् ।
भद्रासनं च स्वपितुः काकश्चैत्यमिवाश्रयत् ॥५८॥

माङ्गलिक्यं व्यधुस्तस्य सामन्तसचिवादयः ।
बहिरन्तश्च तैनोच्चैः शल्येनेवातिदुःखिताः ॥५९॥

अयं सूदानथादिक्षद् दुष्कालादिव निःसृतः ।
प्रगुणं मत्कृते सर्वमशनं कुरुताशु रे ! ॥६०॥

तथा ते चक्रिरे सोऽपि स्वोदरं समपूरयत् ।
भौज्यैः, कौतुपिकः पांशुविसरैः कुतुपं यथा ॥६१॥
विध्यातजठराग्नित्वात्तस्याहारव्यथा निशि ।
बभूव वेल्लतो भूमौ शय्यायां च प्रतिक्षणम् ॥६२॥
हुङ्काराङ्कारसूत्कारपुरस्सरमथारटत् ।
मातरं पितरं दैवं सस्मार च मुहुर्मुहुः ॥६३॥
परित्राणं न कोऽप्यस्य चकार सचिवादिषु ।
औषधेन विना व्याधिरिव शाम्यत्वसाविति ॥६४॥
ततोऽसौ कुपितस्तेभ्यश्चिन्तयामासिवानिति ।
प्रातरेतान् पीलयिष्ये सपुत्रपशुबान्धवान् ॥६५॥
कांश्चित् कांश्चिच्च सामन्तमन्त्रिणः कण्ठमर्दतः ।
चूर्णयिष्येऽसिना ये मेऽप्युपेक्षामिति कुर्वते ॥६६॥
कृष्णलेश्यापरिणाम इत्यसावारटन् भृशम् ।
अप्रतिष्ठो विपद्यागा**दप्रतिष्ठानका**वनिम् ॥६७॥
राजर्षिः **पुण्डरीक**स्तु धन्यम्मन्योऽध्वनि व्रजन् ।
दध्यौ व्रतं ग्रहीष्यामि गत्वाहं गुरुसाक्षिकम् ॥६८॥
क्षुत्तृषार्तोऽपि धर्मार्तोऽप्युर्वीचङ्क्रमणक्रमात् ।
पाषाणकण्टकाविद्धांह्रिगलद्रुधिरोऽपि हि ॥६९॥
शुभध्यानपरः शस्तलेश्यापरिताणताशयः ।
पथश्रान्तो ययौ ग्रामे स मुनिग्रामणीः क्वचित् ॥७०॥
याचित्वोपाश्रयं तत्र सायं संस्तारके स्थितः ।
भावितात्मा स राजर्षिः प्रीतिमानित्यचिन्तयत् ॥७१॥
"धन्योऽहं पुण्यवान् यानमिव यस्यावतीर्थितम् ।
अकस्माद् व्रतमायातं गृहीतं च मया नयात् ॥७२॥

कदाहं गुरुपादान्ते दान्तेन मनसा गतः ।
प्रव्रज्यां पालयिष्यामि यथाविधि समीरिताम् ॥७३॥
कदाहं भवदाहं च स्वरसप्रशमोर्मिभिः ।
गुरुपदेशतः सम्यक् शमयिष्यमामि सर्वथा'' ॥७४॥

चिन्तयन्निति निर्माय शिरसि प्राञ्जलोऽञ्जलिम् । 5
स्तुवन् पञ्चापि पञ्चाङ्गं ननाम परमेष्ठिनः ॥७५॥

आहारोपधिदेहमोहरहितः श्री**पुण्डरीको** मुनि-
श्रेष्ठः क्षामितसर्वजन्तुनिवहो लीनः परे ब्रह्मणि ।
तत्पूर्वाध्वपरिश्रमेण महता खिन्नोऽपि नास्थाद् महत्,
चित्रं दीर्घपदप्रयाणविधिना **सर्वार्थसिद्धिं** ययौ ॥७६॥ 10

॥ इति श्रीपुण्डरीककथा ॥

● ● ●

आर्द्रकुमारोऽभयकुमारकथायाम्, **कीर्तिधर**स्तु **सुकोशल**कथायामुक्तः, **नन्दिषेण**स्तूच्यते, यथा –

§§ अस्ति स्वस्तिश्रियोरेकगृहं **राजगृहं** पुरम् ।
नृपस्तत्र जितारातिश्रेणिः **श्रेणिक** इत्यभूत् ॥१॥
कुमारमण्डलीमौलिमण्डनं तस्य भूपतेः ।
नन्दिषेण इति ख्यातः सुतरत्नमजायत ॥२॥
अन्यदा विहरन् **वीरः** पुरग्रामकरादिषु ।
समेत्य समावासार्षीत् तत्रर्षीन्दुसमन्वितः ॥३॥
तन्निशम्य समायातं प्रणन्तुमथ पार्थिवः ।
सोमः सौम्येन वा **नन्दिषेणे**न सहितो ययौ ॥४॥
प्रणम्योचितभूपीठप्रतिष्ठे सति पार्थिवे ।
चकार भवनिष्कारदेशनीं देशनां विभुः ॥५॥
"**अस्मिन्नसारे संसारे सारमेकं तपः खलु ।**
यतः स्वर्गापवर्गोऽपि देहिनां करगोचरः" ॥६॥
श्रुत्वेति देशनां प्राप्ते नृपे निजनिकेतनम् ।
तं प्रव्रजितुमापृच्छद् **नन्दिषेणो** भवं द्विषन् ॥७॥
कृच्छ्रादनुमतः पित्रा स दीक्षार्थी व्रजन् पथि ।
ऊचे शासनदेव्येदमन्तरिक्षतलस्थया ॥८॥
"किमुत्सुकायसे वत्स ! प्रवज्याग्रहणं प्रति ।
चारित्रावारकं भोगफलं कर्मास्ति यत्तव ॥९॥
कञ्चित्कालं प्रतीक्षस्व गृहे तत्कर्मणः क्षये ।
प्रवज्यां प्रतिपद्येथाः '**सर्वं काले फलेग्रहि**' ॥१०॥
चारित्रावारकं कर्म साधुसङ्गजुषो मम ।
करिष्यति किमित्युक्त्वा स ययौ स्वामिनोऽन्तिके ॥११॥

निषिद्धः स्वामिनापीति रभसेन भृशायितः ।
प्रपेदे स परिव्रज्यां तत्पादकमलान्तिके'' ॥१२॥

अथ षष्ठाष्टमादीनि तप्यमानस्तपांसि सः ।
व्यहार्षीत् प्रभुणा साकं द्रोणाकरपुरादिषु ॥१३॥

जपन् सिद्धान्तमनिशं सिद्धाकर्षणमन्त्रवत् ।
बिभीषिका इवासह्यान् सैष सेहे परीषहान् ॥१४॥

सङ्कटादिव निःसर्तुं स भोग्यफलकर्मणः ।
तपोभिः प्रतनूचक्रे स्वतनूमतनूद्यमः ॥१५॥

महर्षिः सोऽन्यदैकाकी चिकीर्षुः षष्ठपारणम् ।
ययौ वेश्यागृहे धर्मलाभवाचमुवाच च ॥१६॥

न नोऽर्थो धर्मलाभेन द्रव्यलाभोऽस्तु केवलम् ।
इति प्रत्याह तं वेश्या सोपहासविकारयुक् ॥१७॥

किं मां हन्त वराकीयं हसतीति विचिन्त्य सः ।
कृष्ट्वा नीव्रतृणं लब्ध्या रत्नराशिमपातयत् ॥१८॥

द्रव्यलाभोऽयमित्युक्त्वा स तस्माद्ववले गृहात् ।
ससम्भ्रमं तमभ्येत्य सापि वेश्येदमभ्यधात् ॥१९॥

अवक्रयाधमर्णां मामाधाय त्वं क्व यास्यसि ? ।
नदीव रसपूर्णा यदलङ्घ्याहं पुरस्तव ॥२०॥

तपःकष्टमिदं मुञ्च भुङ्क्ष्व भोगान् मया सह ।
त्यक्ष्यामि सर्वथा प्राणान् प्राणनाथाहमन्यथा ॥२१॥

भूयो भूयस्तयेत्युक्तो भोगान्भोगान्विदन्नपि ।
भोग्यकर्मवशात् तस्या सोऽनुमेने वचस्ततः ॥२२॥

शश्वद्दशाधिकान् वापि बोधयिष्यामि नो यदि ।
तदादास्ये पुनर्दीक्षां प्रतिज्ञामिति चाकृत ॥२३॥

मुक्तर्षिलिङ्गः सोऽवात्सीद्वेश्यावेश्मनि चिन्तयन् ।
दीक्षानिषेधिकावाचं देवतया जिनस्य च ॥२४॥

भोगान् सह तयाऽभुङ्क्त सोऽन्वहं च जनान् दश ।
प्रबोध्य भव्यान् दीक्षार्थं प्रैषीदुपजिनेश्वरम् ॥२५॥

क्षीणेऽन्यदा भोगफले तस्य बोधयतः सतः ।
नवाबुधन् जनाष्टक्कजातीयो दशमो न तु ॥२६॥

तस्मिन्नबुध्यमाने सा वेश्या रसवतीं कृताम् ।
आचख्यौ **नन्दिषेणाय** समयज्ञा मुहर्मुहुः ॥२७॥

सोऽपूर्णाभिग्रहो भोक्तुं नोत्तस्थौ किन्तु सादरम् ।
तं टक्कं बोधयन्नस्थाद् गीर्भिर्विधभङ्गिभिः ॥२८॥

तदा चोवाच तं वेश्या प्राक्सिद्धान्नं विरस्यभूत् ।
भूयो निष्पन्नमस्त्यन्नं किं विलम्बयसि प्रभो ! ॥२९॥

नन्दिषेणोऽप्युवाचैतां बोधितो दशमो न हि ।
दशमोऽद्याहमेवातः प्रव्रजिष्यामि भामिनि ! ॥३०॥

इत्युक्त्वा **नन्दिषेणः** स्वं भुक्ताभोगफलं विदन् ।
निर्गत्य स्वामिनः पार्श्वे प्रव्रज्यां पुनराददे ॥३१॥

आलोच्य दुष्कर्म तदेतदुच्चैः शमी समीपे जिनपुङ्गवस्य ।
स **नन्दिषेणो** मुनिरायुषोऽन्ते समाधिना देवभुवं जगाम ॥३२॥

॥ इति श्रीनन्दिषेणकथा ॥

● ● ●

अथ **करकण्डुर्यथा** –

§§ आस्ते **कलिङ्ग**देशेषु पुरी **चम्पे**ति विश्रुता ।
कूपच्छायेव लोकानां यत्रार्थ्यासिमनोरथाः ॥१॥

तत्र नक्षत्रनाथांशुगुणोज्ज्वलगुणोदधिः ।
राजाऽऽसीदपनीतारिवाहनो **दधिवाहनः** ॥२॥

चेटकोर्वीशदुहिता सहिता रूपसंपदा ।
राज्ञी तस्यापरिज्ञातच्छद्मा **पद्मावती**त्यभूत् ॥३॥

संसारसुखसर्वस्वानुषङ्गिफलमन्यदा ।
गर्भं कादम्बिनीवार्काद् दधौ सा **दधिवाहना**त् ॥४॥

आसीत्तस्याः करिस्कन्धगताहं नृपवेषभृत् ।
विश्वग्राजधृतच्छत्रा विचरामीति दोहदः ॥५॥

पतिभक्ता न पत्ये तं दोहदं सा न्यवेदयत् ।
कृष्णपक्षेन्दुलेखावत् क्षीयते स्म तु केवलम् ॥६॥

नृपः शपथपूर्वं तामपृच्छत् खेदकारणाम् ।
तदाज्ञाभङ्गभीरुश्च साऽप्यथाऽकथयत् तथा ॥७॥

हर्षसन्दोहदे तस्या दोहदेऽथ महीभुजा ।
पूर्यमाणे ववर्षाब्दो मुदश्रुभिरिवाम्बुभिः ॥८॥

घनसिक्तमहीगन्धाद् **विन्ध्या**द्रिस्मृतिदुर्धरः ।
सिन्धुरः क्ष्मापदम्पत्योरुच्चचाल दिशैकया ॥९॥

हित्वा परिजनं सर्वमुत्पथेनाथ विप्लुतः ।
नामन्यतैष मातङ्गो गुरुशिक्षामिवाङ्कुशम् ॥१०॥

दूरस्थं पार्श्व एवाशु पार्श्वस्थं दूरतः पुनः ।
गजवेगेन संभ्रान्तौ दम्पती तावपश्यताम् ॥११॥

इति कर्तव्यतामूढो राजा न्यग्रोधमग्रतः ।
एकमालोक्य दयितां जगादोत्पन्नधीरिति ॥१२॥

देव्यस्य वटशालस्याधस्ताद् हस्ती यदा व्रजेत् ।
तदा त्वमाशु प्रालम्बमालम्बेथा मया सह ॥१३॥
इत्यमन्त्रयतां यावदिमौ नृपतिदम्पती ।
तावद्वटस्य तस्याधः सिन्धुरः प्रापदेव सः ॥१४॥
लब्धलक्षो ललम्बे च तत्प्रालम्बमिलापतिः ।
राज्ञी तूद्यमतेयावत्तावदेवाव्रजद् गजः ॥१५॥
न्यग्रोधादुत्ततारोच्चैः प्रमोदाच्च महीपतिः ।
प्रापञ्च पृष्ठतः सैन्यं शोकस्तस्याग्रतः पुनः ॥१६॥
विलपन् विपुलालापोऽरोदीद्बालो यथा ततः ।
वियोगकारणं देव्या निःश्वाससैर्ज्ञापयन् दृढम् ॥१७॥
हा पद्मवदने ! पद्मनेत्रे ! पद्मकरक्रमे !
क्व मया सद्मपद्मे ! त्वं **पद्मावति** ! विलोक्यसे ॥१८॥
नात्मम्भरिरपासीत्त्वां ह्रियमाणामिभेन यः ।
स कथं पास्यति क्षोणीमधमो **दधिवाहनः** ? ॥१९॥
अर्न्तवत्नीं प्रवास्य त्वामेकपत्नीं प्रियेऽधुना ।
स्वमुखं दर्शयिष्यामि कथं कथमहं जने ? ॥२०॥
प्रवासितप्रियाशोकपतितं **रघु**राजवत् ।
अमात्यास्तमुपेत्याशु सानुरोधमबोधयन् ॥२१॥
मा मा देव ! रुदन्नेवमबलाकृत्यमाश्रय ।
वैधुर्यं यदि धीरेषु धैर्यं कुत्रोपयुज्यताम् ? ॥२२॥
तद्धैर्यमवलम्बस्व केतनं पुंव्रतस्य यत् ।
पुरीमेहि निजां देवी विलोक्यानेष्यते ततः ॥२३॥
प्रधानपुरुषैरेवं बोधं बोधमनेकधा ।
कथङ्कथमपि क्ष्मापो राजधानीमनीयत ॥२४॥

पद्मावती तु करिणा कर्मणेव पुराभुवा ।
प्रावेश्यत महाभीमामथापदमिवाटवीम् ॥२५॥
करी खेदपरीतोऽत्राविशदेकं महासरः ।
वायुवेगागस्तोयभिवादातुं घनोऽर्णवम् ॥२६॥
निममज्ज गजस्तत्र साहसीव सरोऽम्बुनि ।
देवी तु वेतसं पुण्यमिवाप्योदतरत् ततः ॥२७॥
सरःपालीमथारुह्याटवीं वीक्ष्य विमानुषाम् ।
रुरोद रोदयन्ती सा प्रस्वनः पर्वतानपि ॥२८॥
हा ! तात ! हहहा ! मात ! सुतेयं वामभागिनी ।
कैवर्तेनेव शफरी कृता धात्राऽमृताद् बहिः ॥२९॥
धातर्निरपराधाहं कथं भर्त्रा वियोजिता ? ।
प्रालम्बाप्रमादिन्याः ममागो व्यक्तमेव वा ॥३०॥
स्वशीलरत्नरक्षार्थमसवो दुस्त्यजा न मे ।
गर्भरत्नमयो न्यासस्त्वार्यपुत्रेण दुस्त्यजः ॥३१॥
तदहं दैव ! रे शंस क्व यामि करवाणि किम् ?
इहानयार्यपुत्रं मे तं वा प्रापय मां लघु ॥३२॥
अथवा प्रार्थनादैन्यादलं मे वीरयोषितः ।
सत्त्वैकमनसो यस्माद् दुदैवमपि नश्यति ॥३३॥
§§ इति धैर्यमथालम्ब्य प्रक्षाल्य मुखमम्भसा ।
प्रत्याख्याय च सागारं सिंहीवासौ वनेऽचरेत् ॥३४॥
यावद् दिशैकया दूरं सा जगाम महासती ।
तावत्तापसमद्राक्षीद्विश्वासमिव देहिनम् ॥३५॥
नीता तेनाश्रमेऽनंसीदियं कुलपतिं ततः ।
पृष्टा तेनापि पित्रेवातुल्यवात्सल्यया गिरा ॥३६॥

वत्से ! कासि किमेकासि कस्यासि खलु नन्दिनी ।
अमरी किन्नरी विद्याधरी किं वा सरीसृपी ? ॥३७॥
सोचेऽहं **चेटको**र्वीशसुता **चम्पेश**गेहिनी ।
मत्तेभेनापहृत्येह पातिता विजने वने ॥३८॥
ततः कुलपतिः प्राह **चेटक**स्यास्म्यहं सुहृद् ।
तत्प्राप्ता पितृगेहे त्वं वत्से ! मा स्म विखिद्यथाः ॥३९॥
तेनेति गदिता वन्यवृत्तिः सा तापसीष्वथ ।
भवामर्षान्विता वर्षाचातुर्मासीमिह स्थिता ॥४०॥
अन्यदाऽचिन्तयदियं क्वाहं सम्यक्त्वनिर्मला ।
क्व च मिथ्यात्वपङ्केऽस्मिन् पातो धिक्कर्मवैवशम् ॥४१॥
वरं वनं वरं भैक्ष्यं वरं प्राणविमोचनम् ।
मिथ्यात्विषु न तु स्थातुमार्हत्याया ममोचितम्" ॥४२॥
इत्यसौ व्यवहारेण नत्वा कुलपतिं जगौ ।
अस्थां वर्षाचतुर्मासीमाश्रमे भवतामहम् ॥४३॥
नागात् त्वनुपदं कश्चिदगम्येऽत्र वने मुने ! ।
तद्वसन्तीं भुवं यामि यदि कोऽपि मिलेद् मम ॥४४॥
तन्मार्गदर्शकं कञ्चिद् मुनिमादिशताद्य मे ।
तयेति गदितः सोऽस्यै शिष्यमेकथार्पयत् ॥४५॥
सोऽप्येत्य कियतीं भूमिं जगौ **पद्मावती**मिति ।
अतः परमगम्या नः पृथ्वी हलविलेखिता ॥४६॥
ऋजुरेष प्रयातीतः पन्था **दन्तपुरं** प्रति ।
भद्रे ! तद्याहि पन्थानः शिवास्ते याम्यहं गुरुम् ॥४७॥
विसृज्य तमथो **पद्मावती** यान्ती शनैः शनैः ।
सायं **दन्तपुरो**पान्ते प्राप प्रेतवनं महत् ॥४८॥

प्रत्याख्यायात्र सागारं लतागारे क्वचिद् गता ।
स्मृत्वा देवान् गुरून् गुर्विण्यशेत श्रमवत्यसौ ॥४९॥

नृत्यदुत्तालवेतालमालाकिलकिलारवैः ।
श्रृगालादिरुतैर्भीतेवास्या निद्राऽनशद् निशि ॥५०॥

तत्तद्बिभीषिकाभीतेराकुला सा कुलाङ्गना ।
कृष्णाष्टमीव शीतांशुं निशीथेऽसूत नन्दनम् ॥५१॥

तद्देहविभयैवैतं पश्यन्ती स तमस्यपि ।
आशशासाङ्कमारोप्य स्नपयन्त्यश्रुवारिभिः ॥५२॥

जात ! त्वमाजनेरेवारण्यभूत इव स्वयम् ।
वर्धेथा मन्दभाग्यायास्त्वयि मे न हि योग्यता ॥५३॥

विभातायां विभावर्यां विभावर्यंशुकावृतम् ।
विधाय सास्य कण्ठेऽधादूर्मिकां **दाधिवाहिनी**म् ॥५४॥

तमथो वनदेवीनां भलयित्वा लतागृहे ।
वपुः क्षालयितुं साऽगात् तडागान्तस्तडिच्छविः ॥५५॥

क्षालयित्वाङ्गमभ्येति यावदेषा लतागृहम् ।
श्मशानपालश्चाण्डालस्तावदग्रे समाययौ ॥५६॥

बालस्तेन लतागेहे देहेनार्क इवापरः ।
दृष्ट प्रहृष्टमनसा कराभ्यामुदपाटि सः ॥५७॥

ममापुत्रस्य पुत्रोऽयं वनदेवीभिरर्पितः ।
इत्युत्ताल स चाण्डालश्चचाल स्वगृहं प्रति ॥५८॥

लतान्तरितया देव्या तन्निरूप्य व्यचिन्त्यथ ।
यदुत्तरति शृङ्गाभ्यां शृङ्खला तद्वरं खलु ॥५९॥

निर्विण्णाहमतीवाम्भाद् नानादुःखभुवो भवात् ।
छित्त्वा केशांश्छुटिष्ये तद्दीक्षाग्रहणकर्मणा ॥६०॥

§§ विमृशतीति तत्पृष्ठे लग्ना साऽध्वनि धेनुवत् ।
चाण्डालस्त्वविशद् **वाटधानका**ख्यं स्वपाटकम् ॥६१॥
प्रिये ! ते निरपत्यायाः सुतरत्नमुपायनम् ।
ब्रुवाण इति पाणस्तं स्वपत्न्यै बालमार्पयत् ॥६२॥
"इदं **पद्मावती** दृष्ट्वौदासीन्यादित्यचिन्तयत् ।
अहो ! विचित्रता कापि कर्मणामवलोक्यते ॥६३॥
क्व सम्भवः शिरोरस्य भूभुजां विमले कुले ।
क्व च श्वपचगेहेऽस्मिन् विश्रामश्च कलङ्कदः ?" ॥६४॥
इत्युत्तेजितवैराग्या सा प्रविश्य पुरान्तरा ।
व्रतं निवृत्तकामादात् प्रवर्तिन्या पदान्तिके ॥६५॥
गुरूपास्तिमुरीकृत्य नित्यमेवोत्तमं तपः ।
तन्वती मोक्षसाधीयः साऽधीयायोचितं श्रुतम् ॥६६॥
दुस्त्यजापत्यमोहेन मोदकादि कदाचन ।
पुत्रायोपनयन्ती सा चक्रे तामन्त्यजां सखीम् ॥६७॥
बालकः स तु पूर्वस्मिन् भवेऽभूत् क्षपकाग्रणीः ।
आदाय स्वांशुकाद् यूकाः परवस्त्रेषु चाक्षिपत् ॥६८॥
तपःप्रभावाज्जज्ञे भूपतेस्तनुभवस्ततः ।
चाण्डालपुत्रकश्चाभूदुत्तमोऽहमिति स्मयात् ॥६९॥
परवस्त्रेषु चात्मीययूकाक्षेपविपाकतः ।
भवेऽस्मिन्नुदियायायास्य कण्डूरुद्दण्डवेदना ॥७०॥
स पञ्चवर्षदेशीयः क्रीडंश्चाण्डालदारकान् ।
नृपीभूय करे कण्डूकण्डूयनमयाचत ॥७१॥
अमीभिस्तच्च कुर्वाणैर्डिम्भोऽयं **दाधिवाहनिः** ।
करकण्डुरिति स्वैरमभ्यधीयत दारकैः ॥७२॥

नाम्नाऽमुनैव विख्यातो वर्धमानः क्रमादसौ ।
प्रपेदे यौवनं नागपोतः कलभतामिव ॥७३॥

अन्यदा तद्वने कायचिन्तार्थं व्रतिनावुभौ ।
आगतौ लघुमाचष्ट स्थिरधीः स्थविरस्तयोः ॥७४॥

धीमन् ! वंशः प्रवर्धिष्णुर्नवपर्वाऽस्ति योऽग्रतः ।
स्वग्राहकस्य भविता दशपर्वा स राज्यदः ॥७५॥

तद्वाक्यं शुश्रुवे स्थविरस्तयोः वृक्षान्तरेण **करकण्डु**ना ।
बटुनैकेन चोत्खन्य मूलाद् वंशस्त्वखन्यत ॥७६॥

दृष्ट्वा च **करकण्डु**स्तमाच्छिद्याऽऽदत्त तत्करात् ।
मद्भूमेर्वंशमादाय क्व गन्तासीति विब्रुवन् ? ॥७७॥

राजाज्ञादानपूर्वं तं धृत्वाथ करणेऽनयत् ।
विप्रोऽधिकारिणामन्यायिनं चाकथयत् तथा ॥७८॥

साक्षेपमूचिरे ते तं कथं रे मलिन ! त्वया !
विप्रादाच्छेदि वंशोऽयमस्मै प्रत्यर्प्यतां द्रुतम् ॥७९॥

सोऽब्रवीत् किं मुधा दानीं स्मशानस्य ददाम्यहम् ।
तदेनं तद्भवं वंशं विप्रचौराय नार्पये ॥८०॥

अथाधिकारिणः प्रोचुस्तथाप्यस्मद्गिराऽर्पय ।
स प्राहान्यान् प्रयच्छामि म्रियमाणोऽप्यमुं न तु ॥८१॥

ते प्रोचुरमुना राज्यं किं ते शठ ! भविष्यति ।
सोऽब्रवीदेवमेवैतद् **'नान्यथा महतां गिरः'** ॥८२॥

हसन्तस्ते पुनः प्रोचुर्यदा ते राज्यमेधते ।
यष्टेरस्याः पदे ग्राममस्मै देया द्विजाय तत् ॥८३॥

ओमित्युदीर्य करणात् **करकण्डू** रयादयात् ।
विलक्षस्तु द्विजः स्थानं तद्वधार्थं[1] समुद्यतः ॥८४॥

---

१. ग. घ. र्थममीमिलत् ।

करकण्डुस्तु तज्ज्ञात्वा पितृभ्यां सहितो निशि ।
निरीय **काञ्चनपुरं** ययौ श्रान्तस्त्विहाऽस्वपीत् ॥८५॥

इतश्च तन्नृपोऽकस्मादपुत्रः पञ्चतां गतः ।
दिव्यानि पञ्च तत्कालमध्यवास्यन्त मन्त्रिभिः ॥८६॥

भ्रान्त्वा पुरान्तराऽमूनि बहिस्तत्पार्श्वमाययुः ।
असौ गजेन गर्जित्वा पुण्येनेभ्यषिच्यत ॥८७॥

अश्वोऽथाहेषत च्छत्रं व्यकसत् कीर्तिवद्दिवि ।
पुरोधा मन्त्रमपठच्चामरे चापि चेलतुः ॥८८॥

पुरप्रवेशं तस्याथ **करकण्डो**र्महीपतेः ।
तदा सम्भूय नायच्छंश्चाण्डालोऽयमिति द्विजाः ॥८९॥

करकण्डुस्ततो वंशरत्नं पस्पर्श पाणिना ।
तत्र ज्वलति नेशुश्च प्रत्युह इव ते द्विजाः ॥९०॥

नृपासनमथासीनः पौरप्रकृतिभिर्नतः ।
छत्राधः स्थापयित्वा स पितरौ तावचोक्षयत् ॥९१॥

दधिवाहनपुत्रेण राज्ञाथ **करकण्डु**ना ।
वाटधानकवास्तव्याश्चाण्डाला ब्राह्मणीकृताः ॥९२॥

कण्डूलकाख्यमेतेभ्यो महास्थानमयं ददौ ।
ईश्वरेच्छा हि यत्कृत्यविधावस्खलिता खलु ॥९३॥

तेनैत्य बटुना **चम्पा**सन्नं ग्राममथार्थितः ।
स्वग्रामव्यत्ययेनैष लेखं **चम्पेन्द**वे ददौ ॥९४॥

अनात्मनीनश्चाण्डालोऽस्माल्ँलेखेनैष भाषते ।
इति **चम्पेन्दु**राक्रोशल्ँलेखं त्वस्फाटयत् कुधा ॥९५॥

करकण्डुरपि ज्ञात्वा तत्कोपाटोपभीषणाः ।
दधिवाहनमुच्छेत्तुं तदानीमभ्यषेणयत् ॥९६॥

देशदाहोद्धतैर्धूमैः परागैश्च बलोद्धतैः ।
द्विषतां द्वैधमप्याशा रुन्धंश्चम्पामयं ययौ ॥९७॥

वार्यामिव गजं क्षिप्त्वा नगर्यां **दधिवाहनम्** ।
तद्बहिर्वेष्टमाधाय **करकण्डु**रथ स्थितः ॥९८॥

पद्मावत्यपि मत्वेति मिथः सन्धिकृते तयोः । 5
प्रवर्तिनीं तथाख्यानादापृच्छ्यागात् तदन्तिकम् ॥९९॥

नता तेनाभ्यधाद्वत्स ! कस्ते तातेन विग्रहः ? ।
कथं तातोऽयमित्युक्ताऽमुना तां युक्तिमाह सा ॥१००॥

सोऽपृच्छत् पितरौ प्रीतस्तावप्येव शंसताम् ।
मुद्रिकाङ्कावलीरत्नाभिज्ञादर्शनपूर्वकम् ॥१०१॥ 10

पद्मावतीं नृपोऽथाह यद्यप्यस्तीदमम्बिके ! ।
तथापि नाभिमानेनापसर्तुमधुना सहे ॥१०२॥

ततः **पद्मावती चम्पा**मध्येऽगात् पतिमन्दिरे ।
रुदतीभिर्नताऽभ्येत्य दासीभिरुपलक्ष्य सा ॥१०३॥

मत्वा राजापि तामेत्य साश्रु नत्वा निवेश्य च । 15
पप्रच्छ किं तदा जातं साह यद् बहिरागतम् ॥१०४॥

निर्ययावथ **चम्पेन्द्रः** प्रीत्या पुर्या द्रुतं तदा ।
करकण्डुस्त्वनंसीत् तमभ्येत्य लुठदङ्गकैः ॥१०५॥

चम्पेन्द्रोऽप्यालिलिङ्गैनमभिषिच्य मुदश्रुभिः ।
चम्पाराज्यं च दत्वा स्मै प्राव्रजद् वृजिनं द्विषन् ॥१०६॥ 20

करकण्डुरपि क्षोणीं प्रशासन् प्रियगोकुलः ।
विलोक्य गोकुले श्वेतं वृषमेकमपूपुषत् ॥१०७॥

स्वर्णशृङ्गखुरो रत्नकिङ्किणीमानयं महान् ।
वृषभानपरानात्तदिक्कान् हिक्कारवैर्व्यधात् ॥१०८॥

राजा दिग्विजयं कृत्वाऽन्यदाऽऽयातो ददर्श तम् ।
घट्ट्यमानं परैः शृङ्गैर्वृषभैस्तं जरद्गवम् ॥१०९॥

तन्मूला भूपतेरात्मवैभवादावपि क्षणात् ।
जले तैलमिवानित्यभावना प्रासरत्तदा ॥११०॥

विभवो वैभवं बन्धुयुवतीयौवनादिकम् ।
सर्वमेतच्चलं चण्डानिलोद्धूतार्कतूलवत् ॥१११॥

स्वयं बुद्ध्वेति साम्राज्यमुत्सृज्य तृणखण्डवत् ।
परिव्रज्यामुपादत्त सिद्धसाक्षिकमेव सः ॥११२॥

देवतार्पितलिङ्गोऽयं द्वादशाङ्गीधरः स्वयम् ।
विजहार धरापीठे कर्मसामजकेसरी ॥११३॥

एतत्ततो जगदनित्ययाभिनाट्यमानं विलोकितुमिवाश्रितकेवलश्रीः ।
प्रत्येकबुद्धमुनिराट् **करकण्डु**नामा धामाध्यरोहदपुनर्भवनामधेयम् ॥११४॥

॥ इति श्रीकरकण्डुकथा ॥

● ● ●

हल्ल-विहल्लौ श्रेणिकसुतौ श्री**वीर**शिष्यीभूय निर्वृतौ, **शाल-महाशालौ** तु **पृष्ठचम्पा**यां राज-युवराजौ श्री**वीरात्** प्रबुध्य प्रव्रज्य च मोक्षं गताविति विदितम्, **सिंहगिरिस्तु** श्री**वज्र**स्वामिकथायामुपदिष्ट एव, **आर्यमहागिरि-आर्यसुहस्तिनौ स्थूलभद्र**कथायां तच्छिष्यौ कथितपूर्वौ, **आर्य्यरक्षित**स्तु **वज्र**स्वामिकथायामुक्तः, **शाम्ब-प्रद्युम्नौ** तु **कृष्ण**सुतौ श्री**नेमेः** शिष्यीभूय **शत्रुञ्जये** सिद्धौ, प्रसिद्धमेतत् । 5

सम्प्रति **कूर्मापुत्रो** यथा –

§§ पुरासीद् **दुर्गमपुरे द्रोणो** नाम नरेश्वरः ।
दुमादेवीभवश्चास्य सुतोऽभूद् **दुर्लभा**भिधः ॥१॥
स तु दुर्ललितः प्राप्तान् गृहे सेवादिकर्मणे ।
लोठयन् कन्दुकीकृत्य चेटांश्चिक्रीड सर्वदा ॥२॥ 10
अन्यदा **दुर्गिलो**द्यानेऽभिधानेन **सुलोचनः** ।
तत्रैत्य समवासार्षीत् केवली सूरिरुत्तमः ॥३॥
तत्र **भद्रमुखी** नाम यक्षिण्येकाऽभवद् वने ।
बहुशालवटस्याधोभूमिवनवासिनी ॥४॥
केवलालोकभास्वन्तं स समेत्य **सुलोचन**म् । 15
भक्त्या प्रणम्य पप्रच्छ पद्मकोशीकृताञ्जलिः ॥५॥
अहं **मानवती** नाम मानुष्यपि पुरा प्रभो !
वेलन्धरसुरस्याऽऽसं **सुवेला**ख्यस्य वल्लभा ॥६॥
तादृक्पुण्यक्षये स्वस्यायुःक्षये चागते समम् ।
मत्वा **भद्रमुखी** नाम यक्षिण्यहमिहाऽभवम् ॥७॥ 20
सुवेलः कथमास्ते स स्वामिन्निति निवेदय ।
अथाख्यत् केवली भद्रे ! च्युत्वा स तदनन्तरम् ॥८॥
सुतो **द्रोण**नृपस्यास्ते जातस्ते वल्लभः खलु ।
आख्यया **दुर्लभो**ऽप्येष सुलभोऽत्रैव पत्तने ॥९॥

श्रुत्वेति यक्षिणी हृष्टा नत्वा केवलिनं ततः ।
कृत्वा **मानवती**रूपं सा ययौ **दुर्लभा**न्तिकम् ॥१०॥
मानुषोद्द्रावणक्रीडापरं तं वीक्ष्य सा जगौ ।
निःसत्त्वैः किममीभिश्चेच्चित्रं मामनुधाव तत् ॥११॥
दुर्लभोऽपि निशम्येति द्रुतं तामन्वधावत ।
धावन्ती तत्पुरः सापि व्यामोह्यान्यान् वने ययौ ॥१२॥
तत्र सा **बहुशाला**ख्यवटकोटरवर्त्मना ।
गता पातालमन्वयि तेन सूचीव तन्तुना ॥१३॥
भूपभूर्भुवनं तत्र मणीमयमलोकत ।
आदाय सारमर्केन्दुरोचिषामिव निर्मितम् ॥१४॥
अथास्मै विस्मयस्मेरलोचनाय सुलोचना ।
निवेशिताय पल्यङ्के सार्घ्यपाद्यादि निर्ममे ॥१५॥
ततो **भद्रमुखी** स्मेरमुखी प्राञ्जलिराह तम् ।
दीपालीदिनवद् नाथ ! वीक्षितोऽसि चिराद् मया ॥१६॥
तामालोक्य कुमारोऽपि क्वापीयं वीक्षिता मया ।
विमृशन्निति संस्मृत्य जातिं तामन्वरज्यत ॥१७॥
पुद्गलानशुभान् हृत्वा कृत्वा च शुभपुद्गलम् ।
तमथारंस्त सा स्नेहाद् गुणस्यूतेव तत्तनौ ॥१८॥
इतः कुमारपितरौ ज्ञात्वा तद्गमनं शुचा ।
विश्वगप्यगवेषिष्टां नालभेतां च तं क्वचित् ॥१९॥
तयोः पुत्रवियोगार्तिविमुक्ताशनपानयोः ।
तदैव मन्त्रिणा प्रोक्तं केवल्यागमनं मुदा ॥२०॥
ततस्तौ प्रावृषेण्याब्दाविवाश्रुजलवर्षिणौ ।
गत्वा केवलिनं नत्वोपविश्य तमपृच्छताम् ॥२१॥

भगवन् ! कुलदीपो नौ भानुर्भूनभसोरिव ।
कुमारो **दुर्लभः** क्वागात् कृपां कृत्वा निवेदय ? ॥२२॥
केवली प्राह यक्षिण्याऽपहृतो वां कुमारकः ।
कथं तावूचतुः केवल्याख्यच्चाखिलमेतयोः ॥२३॥
ऊचाते तौ कदा नौ स, मिलिष्यत्याह केवली । 5
यदेहैष्याम्यहं भूयस्तदा वां स मिलिष्यति ॥२४॥
श्रुत्वेत्यथैतौ संविग्नौ **दुर्लभा**नुजमङ्गजम् ।
राज्ये निवेश्य भेजाते व्रतं केवलिसन्निधौ ॥२५॥
समं केवलिना देशानुदेशं तौ विजह्रतुः ।
तप्यमानावधीयानौ सहमानौ परीषहान् ॥२६॥ 10
विहारक्रमयोगेण कदाचिद् **दुर्गमं** पुरम् ।
केवली पुनरप्येत्य **दुर्गिलो**द्यानमास्थित ॥२७॥
यक्षिण्यवधिना मत्वा कुमारस्यायुरल्पकम् ।
साऽऽगत्य सादरं नत्वापृच्छत् केवलिनं तदा ॥२८॥
प्रभो ! वर्धयितुं शक्यं स्वमल्पायुः कथञ्चन ? 15
केवली प्राह **'नार्हन्तोऽप्यायुः सन्धातुमीशते'** ॥२९॥
निरुत्साहा करस्तस्तसर्वस्वेवाथ यक्षिणी ।
गता स्वं भवनं पृष्टा सा कुमारेण सादरम् ॥३०॥
प्रिये ! किमसि खिन्नेव साऽब्रवीदेवमेव हि ।
ततोऽपि साग्रहं पृष्टा साऽऽख्यत् केवलिभाषितम् ॥३१॥ 20
संविग्नोऽसावथ प्राह द्रष्टव्यः केवली स मे ।
इत्याग्रही स नीतश्च यक्षिण्यापि तदन्तिके ॥३२॥
नत्वा केवलिनं सोऽपि न्यषीदत् तत्पदान्तिके ।
तं वीक्ष्य पितरावस्याऽरोदिषातां च मोहतः ॥३३॥

केवली प्राह तं वत्स ! वन्दस्व पितराविमौ ।
किमेतदिति स प्रोचे केवल्याख्यच्च तत् तथा ॥३४॥

ततः कुमारः सोत्कण्ठं प्राग्वदालिङ्ग्य तौ स्यात् ।
प्रवृत्तो रोदितुं कृच्छ्राद् यक्षिण्याऽयमवार्यत ॥३५॥

देवदूष्याञ्चलेनास्य संप्रमार्ज्य दृशौ तदा ।
न्यवेशयत स पादाब्जमूले केवलिनोऽनया ॥३६॥

केवल्यपि हि संसारविषनाशसुधारम् ।
विदधे प्रतिबोधाङ्गावेशनं धर्मदेशनम् ॥३७॥

तद् निशम्य चिरं सम्यग् यक्षिणी श्राविकाऽभवत् ।
तामापृच्छ्य कुमारस्तु भेजे गुर्वन्तिके व्रतम् ॥३८॥

तप्यमानस्तपस्तीव्रं सहमानः परीषहान् ।
अधीयानः कुमार्षिः स चतुर्दशपूर्व्यभूत् ॥३९॥

कालं कृत्वा यथाकालममी पितृकुमारकाः ।
महाशुक्रेऽभवन् देवा विमाने **मन्दिरा**भिधे ॥४०॥

यक्षिणी सापि **वैशाल्यां** भूत्वा स्त्री **कमला**भिधा ।
तत्राभूत्तद्भवेष्टेन **भ्रमरेण** समं सुरः ॥४१॥

इतश्चास्ति पुरं **राजगृहं** लीलगृहं श्रियः ।
राजा **महेन्द्रसिंहो**ऽभूत्तत्र सिंह इवौजसा ॥४२॥

कूर्मादेवीति राज्ञस्य तस्याः कुक्षाववातरत् ।
च्युत्वा कुमारदेवोऽथ भवनस्वप्नसूचितः ॥४३॥

स्वप्नं तं भर्तुराचख्यौ **कूर्मादेवी** निशात्यये ।
राजा व्याख्यच्च ते देवि ! भावी श्रीभवनं सुतः ॥४४॥

ततोऽस्या हृष्टमनसो वहन्त्या गर्भभुत्तमम् ।
धर्मागमश्रुतौ जातसौहृदो दोहदोऽभवत् ॥४५॥

प्रत्येकं भट्टमुख्यांश्चाहूय दर्शनिनोऽन्वहम् ।
तत्तद्धर्मागमं राज्ञी श्रावयामास भूपतिः ॥४६॥
स्वं स्वं धर्मागमं ते तु पञ्चाप्युच्चैर्व्यपञ्चयन् ।
तं तु हिंसात्मकं राज्ञी श्रावं श्रावमखिद्यत ॥४७॥
§§ ततो जैनान्मुनीन् भक्तयाऽऽहूय तद्धर्मदेशनाम् ।
श्रावयामास वसुधावासवस्तां क्षमाशचीम् ॥४८॥
जन्तुजातदयारूपं शृण्वन्ती सा जिनागमम् ।
संसारस्थापि मेने स्वं महानन्दपदे गतम् ॥४९॥
अथो नवसु मासेषु दिनेष्वर्धाष्टमेषु च ।
राज्ञ्यसूत सुतं कल्पद्रुमवद् **मेरु**चूलिका ॥५०॥
राज्याङ्गानि विमुच्यान्यत् पूर्णपात्रं वितन्वता ।
तस्य जन्मोत्सवश्चक्रे सुमहीयान् महीभुजा ॥५१॥
ततः सूनुरसौ राज्ञा महोत्सवपुरस्सरम् ।
दोहदानुगुणं **धर्मदेव** इत्यभ्यधीयत ॥५२॥
कूर्मापुत्र इति ख्यातः पुनरुल्लापनैरयम् ।
धात्रीभिः पञ्चभिः पाल्यमानः शिशुरवर्धत ॥५३॥
जनबन्धखेलातः पुरौपार्ज्यत कर्म यत् ।
खर्वनाम्नाऽमुना जज्ञे द्विहस्तोच्चवपुस्तु सः ॥५४॥
कलाचार्याश्रयादेव स कलाः सकला अपि ।
स्वत एवाऽऽपदादर्शो मृजामात्रादिव प्रभाम् ॥५५॥
आसन्नमुक्तचारित्रवशादेष वशी भूतम् ।
निकटे पल्वलादीनां शाड्वलाः स्यूर्न किं द्रुमाः ? ॥५६॥
विमुखो विषयेच्छायां यौवनस्थोऽप्यभूदयम् ।
कल्पते पशुधर्माय पशुरेव न तादृशाः ॥५७॥
हर्षी सैद्धान्तिकर्षीणां सविधं न मुमोच सः ।
किं चित्रमथवा योऽभूद् गर्भस्थोऽप्यागमस्पृहः ॥५८॥

शृण्वानोऽन्वहमेवासौ यतिभ्यो जैनमागमम् ।
श्रुतपूर्वमिदं क्वापीत्यूहया जातिमस्मरत् ॥५९॥
ततश्च क्षपकश्रेणीरूढोऽज्ञानतमोव्ययात् ।
स जातकेवलालोको लोकालोकमलोकत ॥६०॥
व्यवहारमलङ्कर्तुं ग्रहीष्यामि यदि व्रतम् ।
तदिमौ पितरौ वक्षः स्फुटित्वा हि मरिष्यतः ॥६१॥
अज्ञातवृत्त्या तिष्ठे तदेतयोः प्रतिबोधये ।
इत्यस्थाद् भगवान् **कूर्मापुत्रः** सदन एव सः ॥६२॥

§§ इतो **महाविदेहो**र्व्यामस्ति स्वस्तिनिकेतनम् ।
विजये मङ्गलावत्यां नगरी **रत्नसञ्चया** ॥६३॥
देवादित्योऽभवत्तस्यामादित्य इव तेजसा ।
चक्रीति विदितः कामं विजयेन महीभुजाम् ॥६४॥
जगत्यां विहरन्नर्हन् **जगदुत्तम**सञ्ज्ञितः ।
तदैत्य समवासार्षीत् पुरीपरिसरे वने ॥६५॥
तं धर्मचक्रिणं चक्रवर्ती वन्दितुमाययौ ।
तद्विधाय यथास्थानं निषसाद कृताञ्जलिः ॥६६॥
इतो **द्रोण-दुमा**देव्यौ **कमला-भ्रमरौ** च ते ।
च्युत्वा **भरतवैताढ्ये**ऽभवन् विद्याधराङ्गजाः ॥६७॥
चारणश्रमणीभूय चत्वारोऽपि समाहिताः ।
जगदुत्तमतीर्थेशं तेऽपीयुर्वन्दितुं तदा ॥६८॥
नत्वा विभुं निषण्णेषु तेषु पप्रच्छ चक्रभृत् ।
कुतोऽमी नाथ ! चत्वारो धर्मांशा इव चारणाः ? ॥६९॥
अमी **भा(भ)रतवैताढ्या**द् नाथोक्ते चक्रभृज्जगौ ।
भरते तीर्थकृच्चक्री केवली वास्ति सम्प्रति ? ॥७०॥

स्वाम्यूचे तीर्थकृच्चक्री केवली चात्र कोऽपि न ।
किन्तु **राजगृहे कूर्मापुत्रो**ऽस्ति केवली गृही ॥७१॥
चक्र्यूचे स व्रती किं न स्वाम्यूचेऽवद्यवर्जितः ।
गृहेऽस्ति प्रतिबोधाय पित्रोर्दुष्प्रतिकारयोः ॥७२॥
श्रुत्वेति चारणाः प्रोचुः स्वामिन् ! । केवलिनो वयम् । 5
भविष्यामो न वा स्वामी प्रोचे भद्राः ! भविष्यथ ॥७३॥
ते तु प्राह कदा नाथ ! नाथोऽप्याह महाशयाः ! ।
कूर्मापुत्राद् यदा वित्थ तन्मन्दिरकथानकम् ॥७४॥
ततस्ते विस्मिता नत्वा स्वामिनं चारणर्षयः ।
कूर्मापुत्रं गता यावत्तं नत्वा मौनमासिरे ॥७५॥ 10
तावच्च तेन ते प्रोक्ता महासत्त्वाः ! जिनेन वः ।
नेदं मन्दिरमाख्यायि **महाशुक्र**गतं हि तत् ॥७६॥
श्रुत्वेति तेऽपि सञ्जातजातिस्मरणवर्त्मना ।
क्षपकश्रेणिमासाद्य केवलज्ञानिनोऽभवन् ॥७७॥
भूयस्तीर्थकरं गत्वा तेऽस्थुः केवलिपर्षदि । 15
ततो जिनं जगादेन्द्रोऽधुना किं नानमन्नमी ? ॥७८॥
स्वाम्यूचे केवलं **कूर्मापुत्रादे**षामजायत ।
शक्रोऽथाह कदा **कूर्मापुत्रो**ऽसौ प्रवजिष्यति ? ॥७९॥
स्वाम्यूचे सप्तमे ह्यस्मादह्नि यामे तृतीयके ।
भविष्यति हरे ! **कूर्मापुत्रः** श्रमणकेवली ॥८०॥ 20
इतश्च भगवान् **कूर्मापुत्रः** स्वपितरौ क्रमात् ।
प्रबोध्य प्रावजत्तौ च प्रवज्यानुत्तरं गतौ ॥८१॥
कूर्मापुत्रो भगवानपि सुरसन्दोहपूजितो भुवनम् ।
परितः प्रबोध्य कैरवमिव शिवमूर्धानमिन्दुवत् प्राप ॥८२॥
इति श्री**कूर्मापुत्र**कथा । **भद्रगुप्त**स्तु **वज्र**स्वाभिकथायामुपदिष्टः ॥५३॥ 25

अथ बाहुल्येन मुनिमुपश्लोकयति –

विसमभवभमणनासणजिणसासणगयणमंडणमियंका ।
अन्ने वि महामुणिणो गुणिणो मम दिंतु सिद्धि सुहं ॥५४॥

[विषमभवभ्रमणनाशनजिनशासनगगनमण्डनमृगाङ्का ।
अन्येऽपि महामुनयो गुणिनो मह्यं ददतु सिद्धिसुखम् ॥]

व्याख्या – **धन्या**द्या मुनयस्तावत् केचनापि नामतोऽभिहिताः, **अन्येऽपि** "[१]**समणह कोडिसहस्सदुअ थुणिज्जिय निच्च विहाणि**" [जग.सूत्रे] इति वाक्यात् पञ्चदशकर्मभूमिषु ये केचनापि वर्त्तन्त इत्यपरेऽपि, **गुणिनः** गुणाः क्षमाद्याः सन्ति येषां ते तथा, **महामुनयो** महर्षयः 'मम दिन्तु सिद्धिसुहं' **मह्यं ददतु सिद्धि-सुखम्** । किं विशिष्टास्ते ? 'विसम त्ति' **विषमः** स्थपुट उच्चनीचजातिकुलाद्यारोहावरोहक्रमेण विसंस्थुलो योऽसौ **भवस्तत्र भ्रमणं** तत्तथा, **तन्नाशयति** निराकरोति तत्तथा तच्च तज्जिनशासनमर्हन्मतं तदेव निर्मलत्वाद् महत्त्वाच्च **गगन**-माकाशं तस्य **मण्डनाय मृगाङ्का** दुष्कर्मसन्तप्तजन्तुजातह्लादनत्वाच्चन्द्रा इति ॥५४॥

● ● ●

१. श्रमणानां कोटिसहस्राद्विकं स्तूयेत नित्यं विधानेन ।

नवीनसंस्करणप्रकाशकः
श्रुतरत्नाकर
अहमदाबाद